॥१६॥१७॥१८॥१९॥२२०॥२१॥२२॥२३॥२४॥२५॥२६॥ अब सारांश भोजनका यह है कि पंचद्रविडोंने पंचद्रविडमें पंचगौड पंचगौडोंमें॥२७॥ और स्वस्वज्ञातिमें भी जहां ब्राह्मण अपने स्वकर्मनिष्ठ आचार सम्पन्न होवें उसके हाथसे भोजन करनेका दोष नहीं है ॥२८॥ परंतु जहां कन्या देना वहां भोजन करना बहुत शुद्ध मार्ग शास्त्रोक्त है ॥२९॥ अब वणिक शब्दका अर्थ कहते हैं सांप्रतकालमें वणिकश-ब्दसे सब बनियें और द्रव्यलोभी ब्राह्मण बानियोंके ठिकाने वैश्यवर्ण स्थापन करते हैं ॥ ३३० ॥ और कितनेक सच्छूद्रवर्ण स्थापन करतेहैं परंतु वणिक शब्दसे केवल सच्छूद्र है ऐसा भी नहीं है ॥ और वैश्य भी नहीं है जो जो जाति हैं उनके उत्पत्तिग्रन्थ देखनेसे स्पष्ट मालुम होता है उसमें भी जैनमतकी प्रबलतासे वर्णाश्रम धर्म नष्ट हुआ उस दिनसे क्षत्रिय वैश्य शूद्रोंका संकर होगया है । बाद श्रीशंकरा-चार्य और श्रीगोस्वामी श्रीवल्लभाचार्यजीके प्राकटचसे इन तीनोंका कुछ थोडा धर्म चला है । अभी भी जो अपना वर्ण धर्म करनेकी इच्छा होवे तो बृहन्नारद पुराणोक्त पतितसावित्रीका विधान करनेसे अधिकार होवेगा ॥ ३१ ॥ वणिक

श्लोकादीन् वक्ष्यामि शृणुतादरात् ॥ ३२ ॥ श्रीवाल्मीकीय रामायणे बालकांडे वर्णपरत्वेन श्रवणफलकथनप्रस्तावे श्रीवाल्मीकिः-पठन् द्विजो वागृषभवत्वमीयात्स्यात्क्षत्रियो भूमिपतित्वमीयात् ॥ वणिग्जनः पण्यफलत्वमीयाज्जनश्चशूद्रोऽपि महत्त्वमीयात् ॥ ३३ ॥ स्कांदोपपुराणे कल्याणखण्डे पोरवालश्रीमालिवणिजो वैश्यत्वं प्रत्यक्षतया प्रतिपादितं वर्तते ॥ ॥ ३४ ॥ वणिक्शब्देन सच्छूद्रास्तत्प्रमाणमथो ब्रुवे ॥ ब्रह्मवैवर्ते ब्रह्मखण्डे-गोपनापितभिल्लाश्च तथा मोदककूबरौ ॥ ॥ ३५ ॥ तांबूलिस्वर्णकाराश्च तथा वणिक्जातयः ॥ इत्येवमाद्या विप्रेन्द्र सच्छूद्राः परिकीर्तिताः ॥ ३६ ॥ तथा च शूद्रकमलाकरे-शूद्रस्य द्विजशुश्रूषा तयाजीवन् वणिक् स्मृतः ॥ स्कांदोक्तबालखिल्यादिखण्डेषु च प्रकीर्तितम् ॥ ३७ ॥ बालखिल्यादिखण्डेषु झारोलादिशावालादिवणिजां सच्छूद्रत्वं प्रतिपादितमतः केवलवणिक्शब्देनैव वैश्यत्वं शूद्रत्वं वोत्पत्तिग्रन्थमविज्ञाय ये कल्पयिष्यंति तेऽपिपंडितेतरशिरोमणय इत्यलमतिविस्तरेण ॥ ३८ ॥ किं च ब्राह्मणाः स्वधर्मत्यागिनः वणिजश्च स्वमुखेनैव वैश्यत्वं प्रतिपादयति । तत्र न तेषां दोषः किन्तु कलिदोष एव ॥ ३९ ॥ तदुक्तं पाद्मे-अतः परं भविष्यं यच्छृण्वंतु मुनयः कलौ ॥ ब्राह्मणा वेद रहिताः शिष्टाचारविवर्जिताः ॥ २४० ॥ शूद्राचार्या लोभयुक्ताः परस्परविरोधिनः ॥ ब्राह्मणा वृत्तिहीनाश्च शूद्रसेवा-

शब्दका विशेष शब्दार्थ मूलमें स्पष्ट है ॥३२॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ॥३८॥ अब ब्राह्मण अपने स्वकर्मसे भ्रष्ट हुवेहैं और बनियें शूद्र होके वैश्य बनके बैठेहैं सो उनका दोष नहीं है। किन्तु कलियुगका दोष है ॥३९॥ ब्राह्मण और बनिये अपना मुख्य उत्पत्तिस्थान को छोडके धनलोभके लिये देशोंदेशोंमें जायके स्वधर्मभ्रष्ट

परायणाः ॥ ४१ ॥ वणिजो देशेदेशे च गमिष्यंति धनार्थिनः ॥ वैश्यवृत्तियुताः सर्वे द्विजसेवनवर्जिताः ॥ ४२ ॥
अथ गुर्जरादिवणिक्षु शाशब्दस्य प्रयोजनमाह हरिकृष्णः।
गुर्जरादिषु शाशब्दः किमर्थं प्रोच्यते बुधैः ॥ तस्याहं कारणं वक्ष्ये श्रुत्वा लोकमुखादिदम् ॥ ४३ ॥ कलौ श्रीराजनगरे पादशाहस्य योगतः ॥ श्रीलक्ष्मीश्च प्रसन्नाभूच्छाशब्दस्थिर-

होवेंगे ऐसा भविष्य कथानक कह्याहै ॥ २४० ॥ ४१ ॥ ४२ ॥ अब गुजराती आदि बनियोंमें शा० किसनदास शा० रणछोडदास ऐसा जो कहते हैं उसमें शा कहनेका क्या कारणहै सो कहतेहैं शा कहते साहुकार धनवान् धनका व्यापार करताहै उसको कहतेहैं। तब "जागो जागो साहुकार" यह चार अक्षर लिखनेका आलस्य आताहै इसवास्ते उस चार अक्षरमें सा अक्षर पाहिला लियाहै इससे सा कहतेहैं ॥ ४३ ॥ इस कलियुगके अंदर राजनगरमें एक बादशाह हता उसने शा०ईश्वरदास ऐसा बानियेका नाम सुनके मनमें बिचार किया जो मैं तो पादशाह कहते चतुर्थांश शा कहा जाताहै और यह बानिये पूरे शाह कहे जातेहैं इसवास्ते इनका शाहपना छुडालेना ऐसा बिचार करके सब बानियोंको बुलायके कहा कि मैं पादशाह और तुम शाह पूरे इसवास्ते मैं जो कहूं वो शिक्केके छप्पन करोड रुपये लायके देव तो तुमारा शापना खरा है नहीं तो शा कहना छोडदेव वो सुनके अच्छा कहके सब बानिये इकट्ठे मिलके बडा विचार करने लगे कि राजा कौनसा शिक्का मांगेंगे और हम कहांसे लायके देवेंगे ऐसा जगह २विचार करने लगे तो वहां एक तेलीकी दुकान लोहासा शिरमाली बनियें की थी। वो लोहासाने उनका विचार सुनके पूछा कि भाई मुझको कहो तुम लोग सब क्या विचार करते हो तब वो लोग हँसने लगे कि जिसकी दुकानमें बूँदभर तेल तो है नहीं और अपना विचार पूछता है इस वास्ते इसको क्या कहना फिर वह तेली और पूछने लगा तब वो लोकोंने सब वृत्तांय कहा सो सुनके लोहासा कहने लगा कि तुम सब पहिले मेरे घरको जीमनेको आवो बाद तुम्हारा काम मैं करूंगा। वो बात सुनके सब आश्चर्य करने लगे कि देखो तो सही क्या होता है सबोंका एक विचार होके लोहासाके पिछाडी सब लोग गये लोहासाका घर गांवके बाहर एकांतमें था सो सब बानियोंको बिलमें लेगया वहां देखे तो लाखों मनुष्य बैठे ऐसी बडी सुन्दर जगा है सो देखके सब आश्चर्य करने लगे बाद दूसरे दिन सारे शहरके बानियें जीमनेको आये अमृतसरीखे पदार्थ जीमे लोहासाको महालक्ष्मी प्रसन्न थी अपने स्वहस्तसे महालक्ष्मीने सबोंको भोज्य पदार्थ परोसे थे भोजन किये बाद सबोंने प्रार्थनाकी तब लोहासाके घरसे राजदरबारतक गाडे लगा दिये और एक शिक्केके छप्पन करोड

कारिणी ॥ ४४ ॥ अथ शास्त्रदृष्टिर्बलीयसीत्यस्य निर्णयमाह श्रीकृष्णः -विवाहव्रतबंधादिकर्मसु ब्राह्मणादयः ॥ शास्त्रमार्ग परित्यज्य रूढिमार्गपरायणाः ॥ ४५ ॥ कार्यं कुर्वंति तेषां वै प्रार्थना मम चादरात् ॥ पापाधिक्यकरां रूढिं त्यक्त्वा पुण्यविवृद्धिदाम् ॥ ४६ ॥ कुर्वंतु सज्जनास्सर्वे येन सौख्यम-

रुपये देके कहा कि और दूसरा कौनसा शिक्का चाहिये । तब पादशाहने वो कोरे शिक्केके रुपये देखके हाथ जोडके कहा कि तुम पूरे शाह हो मुझको मान्य है ऐसा गुजराती आदि बानियोंमें शाह कहनेका जो कारण सो फिर कोई कारणके लिये महालक्ष्मीका कोप भया सो यह धर्मीवनियोंको छोडके श्रावकी बानियोंके घरमें विराजमान भई ॥ ४४ ॥ अब ब्राह्मणादिक लोकोंमें विवाह व्रतबंधादिक कर्म होते हैं उनमें शास्त्र संमत पुण्यकारक कर्मको छोडके जिसमें द्रव्य खर्च बहुत होवे पुण्य थोडा होवे और कर्म भ्रष्टता होवे ऐसे काममें जो लोक प्रवृत्त होते हैं ॥४५॥ और पूछे तो 'श्मशानविवाहयोर्ग्रामःप्रमाणमिति श्रुतिः' 'शास्त्राद्रूढिर्बलीयसी इति स्मृतिः' ऐसा प्रमाण बोलते हैं और यह वचनसे भी रूढिमार्ग बलवान् है परन्तु जो रूढि शास्त्रसे विरुद्ध न होके अधर्म न होके जिस रूढिमें पुण्यकर्मकी वृद्धि होवे वो रूढिमार्गको सज्जन लोकोंने मान्य करना बाकी जिस रूढिमें पुण्य क्षीण होके पाप वृद्धिंगत होवे वहां " शास्त्राद्रूढिर्बलीयसी " यह वचन प्रवृत्त करना नहीं और ऐसे ठिकाने जो वो वचनकी प्रवृत्ति करेंगे तो इस वचनका मूल इनने देखा नहीं ऐसा जानता हूं " शास्त्राद्रूढिर्बलीयसी " यह वचन कहां प्रवर्तक होता है उसके ऊपर एक दृष्टांत कहता हूं कि पंकज शब्दका अर्थ शास्त्रसे देखे तो 'पंकात्कर्दमाज्जातं पंकजं' कीचडसे जो पैदा हुवा उसको पंकज कहना तब कीचडसे तो दर्दुरी अद्रक हलदी अरवी कमल शाली धान्य इत्यादि पदार्थ होता है परन्तु उनको पंकज नहीं कहते फक्त कमलको पंकज कहते हैं । और दूसरा दृष्टांत 'त्रिफलं त्रयाणां फलानां समाहारः त्रिफलं' इसका अर्थ यह है कि तीन फल एक ठिकाने जहां होवें उसको त्रिफला कहना परन्तु वैसा नहीं है फक्त रूढिमें त्रिफला शब्दसे हैडे बहेडे आंवले लेना ऐसे शास्त्रमें अनेक पद हैं सो शास्त्रसे अर्थ होता होवे परन्तु जो रूढिमें प्रवृत्त होवे वो लेना जैसा पंकज कहते कमल लेना शालि धान्य नहीं लेना । इस वास्ते कहा है कि ' शास्त्राद्रूढिर्बलीयसी ' यह वचन प्रमाण है परन्तु वर्तमानकालमें जो लोक हैं सो अपने स्वार्थके वास्ते " शास्त्राद्रूढिर्बलीयसी " यह पद भिन्न विषय प्रतिपादक है । तथापि स्वार्थमें ग्रहण करके अच्छे शास्त्रज्ञ पुरुषको दूषण देते हैं ॥ ४६ ॥ इस वास्ते वह सज्जन लोकोंको हाथ जोडके

वाप्नुयुः ॥ इति मे प्रार्थनाऽभीक्ष्णं प्रसार्य करसंपुटौ ॥ ४७ ॥ रूढिमार्गस्य सूक्ष्मत्वमविचार्याऽबुधा जनाः ॥ कर्म कुर्वंति तेषां वै वैफल्यं भवति ध्रुवम् ॥ ४८ ॥ ज्ञानदेवस्य विप्रस्य दुर्गादेवीप्रसादतः ॥ पुत्रे जाते भूषणं च दूषणं वापि योगतः ॥ ४९ ॥

मेरी प्रार्थना है कि जिस रूढिसे इह लोक परलोकमें सुख होवे और जैसा पूर्वदेशी ब्राह्मण मत्स्याहार करते हैं गुर्जरमें चर्मोदक पान करते हैं यह परंपरागत मार्ग है परंतु इसके त्याग करनेसे पाप नहीं होनेका पुण्य होगा ॥ ४७ ॥ और कितनेक पंडित नरशिरोमणि जो हैं वो अपने वंशकी रूढिका सूक्ष्म विचार न करके रूढिमार्ग करे जाते हैं । उसमें घात होता है ॥ ४८ ॥ उसपर एक कथा कहता हूं एक ज्ञानदेव ब्राह्मण था उसके संतान नहीं होती थी । सो विरक्त होके गांवके बाहर एक दुर्गादेवीका मांदिर था और उसके सामने पानीकी बावडी थी वहां स्नान करके नित्य देवीका पूजन करता था । सो एकादिन देवीकी प्रार्थना किया कि मेरा पुत्र जो होगा तो उसका विवाह कब करूंगा कि पहिले आपकी पूजा करके यह बावडीके ऊपरसे कुदाऊंगा ऐसी मानता लेके घरको गया । बाद देवीकी कृपासे पूजाके पुण्यसे बरस ९ के अंदर वो ज्ञानदेवके पुत्र चार भये वह देवीकी मानता फक्त पहिले छोकरेकी थी सो बापको मालुम थी दूसरेको मालुम नहीं थी । फिर बापने मनमें विचार करके उस बड़े छोकरेको दौडके कुदानेका अभ्यास करवाया ऐसे नित्य अभ्यास करनेसे बारह बरसका वो लडका हुवा तब दस हाथीकी बावडीसे चार हाथ ज्यादा कूदे वैसा पक्का हुवा फिर जिस बखत विवाहका समय आया उस बखत चार ज्ञाति भाइयोंके हाथ जोडके कहा कि मेरा कुलाचार करने के बाद लग्न लगाना ऐसा कहके वो दुर्गादेवीके पास जायके छोकरेके हाथसे पूजा करवाये वो बावडी कुदवायके लग्न लगाये फिर थोडे दिनमें वो बाप तो मरगया पीछे वो बडा छोकरा अपने छोटे भाईका विवाह करने लगा तब जैसा कुलाचारको करता था वैसा कुलाचार करने गया और वो बावडीको कुदाने गया सो वो छोटा भाई अंदर गिरके मरगया सो सारे गांवमें हाहाकार हो गया कि कुलाचारकी कुछ रीत भूल गये उससे छोकरा मरगया परंतु छोकरेको कूदनेका अभ्यास नहीं था ऐसा कोईने जाना नहीं और कईकादिन गये बाद तीसरे भाईके और चौथे भाईके विवाहके बखत वो कुलाचार करने गये सो तीनों भाईका प्राणगया बाद वो ज्ञानदेवका बडा जो लडका था उसको एक पुत्र था उसका विवाहका समय आया उस बखत गावमें बडा विचार पडा उतनेमें एक पंडित ज्ञातिभेद कुलाचार भेद ग्रंथोंको जाननेवाला आया उसने उस ज्ञानदेव ब्राह्मणका सब आद्यंत वृत्तांत सुनके खुलासा

देशाचारःकुलाचारोःज्ञात्याचारो विशेषतः॥कर्तव्यो विदुषा तत्र सारासारं विचार्य च ॥ २५० ॥ तस्माद्रूढिं परित्यज्य

किया कि फक्त पाहिले छोकरेकी यह मानता थी और अभ्याससे बावडी कूदी जाती है इसवास्ते तुमको जो भक्तिसे करना होवे तो फक्त दुर्गादेवीका पूजन करो यह बात सुनके वैसा किये बाद वंशकी वृद्धि हुई ॥ ४९ ॥ पंडित ब्राह्मणने देशका आचार कुलका आचार अपनी ज्ञातिका आचार करना परंतु उससे आगे अपनेको सुख होगा या दुःख होगा इसका विचार करके करना उसमें भी हलके लोक शब्दका अर्थ भी बराबर करते नहीं जैसा कोई दाक्षिणी ब्राह्मणने गुजराती ब्राह्मणसे पूछा कि तुम्हारी स्त्रियां कच्छ नहीं करतीं (बाँधतीं) और तुम शूद्रोदक पान करते हो यह बडा अनाचार है तब वह लोक उनको उत्तर ऐसा देते हैं कि हमारा देशाचार है तब यह बात सुनके बडा आश्चर्य होता है कि देशाचार कहते देशका जो आचार धर्म उसको देशाचार कहना तो यह शूद्रोदकपान तो अनाचार है तब देशाचार कहना उनका भाषण व्यर्थ है कुलाचारमें जो दुष्ट रूढि उसका लक्षण तो ज्ञानदेवकी वार्तामें पूर्वमें कहा वैसा ज्ञातिका अनाचार किसीमें ऐसा है कि विवाहमें नव ज्ञाति जिमाना और अवांतरभी दूसरे कर्म उससे द्रव्य खर्च बहुत करना परंतु विवाहकी वेदोक्त विधि क्या है ? और उसमें क्या चाहिये ? अपनी शाखा कौनसी है ? क्या सूत्र है ? उसका विचार न यजमान करता है और न उपाध्याय करता है । वैसा मरणमें एकादशाहादि तीन दिनोंमें १००रुपयेसे हजार तक खर्च भोजनमें करते हैं परंतु वह मृतप्राणीके अडतालीस ४८ श्राद्ध यथा सांग हुये या नहीं उसका विचार नहीं क ते तब विवाह यज्ञोपवीत मरणादिक कर्ममें रूढिके लिये द्रव्य बहुत लगता है और कर्ममें हीनता होती है और कर्ज करके जो ज्ञातिकी रूढि संपादन किये बाद वह कर्ज फेडनेको फिर अपना ब्रह्मकर्म छोडके द्रव्यके वास्ते घातपातादिक करता है उसमें भी जो मृत होगया तो ऋणमें रहता है इसवास्ते ज्ञानी पुरुषने अपनी ज्ञाति रूढि बरोबर न हुई तो दूषण नहीं है परंतु अपना ब्रह्मकर्म वेदोक्त संस्कारादिक कर्ममें दूषण नहीं लेना तब ज्ञातिवाले नाम रक्खेंगे तो उन लोकोंको मूर्ख समझना क्योंकि जो वो निंदक पुरुषको पूछना कि अपनी ज्ञातिमें रीति सब देशमें यही है वा फिरती है जो सब देशमें उस ज्ञातिकी रीति एक होवे तो वह रीति करना अवश्य है और प्रत्येक गांवमें अपनी बुद्धिसे जो रूढि चलाई है वह अवश्य त्याग करना और ज्ञाति एक और जो ज्ञातिव्यवहार करके बडा अहंकार मानता है तब उसका अहंकार व्यर्थ है क्योंकि जो ऐसा जगत्में कौन है कि फक्त अपनी संपूर्ण ज्ञातिका मान्य करेगा और भोजन देगा ॥२५०॥ इस वास्ते यह लोक परलोकमें जो दुःख शोक

दुःखशोकादिदायिनीम् ॥ इहामुत्र च भो विप्र स्वकर्मनिरतो भव ॥ ५१ ॥ कर्मणैवहि संसिद्धिमास्थिता जनकादयः ॥ इत्युक्तत्वात्सदा विप्रैः कर्तव्यं स्वस्वकर्म च ॥ ५२ ॥ श्रीभागवते–कर्मनिष्ठा द्विजाः केचित्तपोनिष्ठा नृपाःपरे ॥ स्वाध्यायेऽन्ये प्रवचने एके च ज्ञानयोगयोः ॥ ५३ ॥ ब्राह्मणेष्वपि वेदज्ञा ह्यर्थज्ञोऽभ्यधिकस्ततः ॥ अर्थज्ञः संशयच्छेना ततः श्रेयांश्च कर्मकृत् ॥ ५४ ॥ हरिकृष्णः–कर्मणोत्तमतां यांति कर्महीनाः पतंत्यधः ॥ अत्रापि मूलवाक्यानि संलिखामि शृणुष्व तत् ॥ ५५ ॥ अथ कर्मभिरेव वर्णविभागे प्रमाणमाह--श्रीभागवतम्--आदौ कृतयुगे वर्णो नृणां हंस इतीरितः ॥ कृतकृत्या प्रजा जात्या तस्मात्कृतयुगं विदुः ॥ ॥५६॥भारते शांतिपर्वणि--न विशेषोऽस्ति वर्णानां सर्वब्राह्ममिदं जगत ॥ ब्रह्मणा पूर्वसृष्टं हि कर्मभिर्वर्णतां गतम् ॥ ॥ ५७ ॥ वसिष्ठस्मृतौ--योगस्तपो दमो दानं सत्यं शौचं दया श्रुतम् ॥ विद्याविज्ञानमास्तिक्यमेतद्ब्राह्मणलक्षणम् ॥ ५८ ॥ भगवद्गीतायां–शमोदमस्तपः शौचं क्षांतिरार्जवमेव

देनेवाली रूढि उसका त्याग करके अपने स्वकर्ममें निष्ठ होके रहो ॥ ५१ ॥ कर्ममार्गसे जनकादिक सिद्धि पाये हैं ऐसा कहाहै इससे हे ब्राह्मणो ! तुमने अपना स्वस्वकर्म करना ॥ ५२ ॥ ५३ ॥ श्रीभागवतमें कहाहै कि स्वकर्म करनेवाला सबसे श्रेष्ठ है ॥ ५४ ॥ कर्मकी प्राबल्यसे क्षत्रियादिक ब्राह्मणताको पातेहैं और कर्म त्याग करनेसे ब्राह्मणादिक वर्ण क्षत्रियादिक हीनवर्णको पातेहैं इसके ऊपर मूलवचनभी आगे सिखाताहूँ ॥ ५५ ॥ अब कर्मसे वर्णका निश्चय कहते हैं । पहिले सर्व लोक एकही जातिके थे, परंतु फिर कर्मके भेदसे चारवर्ण भये ॥ ५६ ॥ जातिका वस्तुतः भेद नहीं हैं यह सब जगह ब्राह्म है । कायसे जो ब्रह्मद्वारा प्रथम उत्पन्न भया कर्मद्वारा जातिभेद भया है ॥५७॥ जिस मनुष्यमे जिस प्रकारके गुण होवें उनका लक्षण धर्मशास्त्रमेंसे लिखतेहैं । योग तप इंद्रियदमन दान सत्य शौच दया बहुश्रवण विद्या विज्ञान आस्तिक्य यह सब ब्राह्मणके लक्षणहैं॥५८॥शम दम शौच क्षमा सरलता ज्ञान विज्ञान और आस्तिक्य

च ॥ ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ॥ ५९ ॥ सद्धर्मसूत्रे ३।४३-आचार्या अध्यापका याजकाः साधवो मुनयश्च ब्राह्मणाः ॥ २६० ॥ भारते मोक्षपर्वणि-कामभोगप्रियास्तीक्ष्णाः क्रोधना प्रियसाहसाः ॥ त्यक्तस्वधर्मारक्तांगास्ते द्विजाः क्षत्रतां गताः ॥ ६१ ॥ भगवद्गीता-शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् ॥ दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥ ६२ ॥ सद्धर्मसूत्रे-राजानो राजकर्मचारिणो रक्षकाश्च क्षत्त्रियाः ॥ ६३ ॥ भारते मोक्षधर्मे-गोभ्यो वृत्तिं समास्थाय पीताः कृष्युपजीविनः ॥ स्वधर्मान्नानुतिष्ठंति ते द्विजा वैश्यतां गताः ॥ ६४ ॥ भगवद्गीता-कृषिगोरक्षवाणिज्यं वैश्यकर्म स्वभावजम् ॥ ६५ ॥ सद्धर्मसूत्रे-वित्तोपार्जककृषकशिल्पवणिज्यादयो वैश्याः ॥ ६६ ॥ भारते मोक्षधर्मे-हिंसानृतक्रियालुब्धाः सर्वकर्मोपजीविनः ॥ कृष्णाः शौचपरिभ्रष्टास्ते द्विजाः शूद्रतां गताः ॥ ६७ ॥ भगवद्गीता-परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम् ॥ ६८ ॥ सद्धर्म-

यह ब्राह्मणके स्वाभाविक कर्म हैं ॥ ५९ ॥ आचार्य अध्यापक याजक साधु-मुनि ब्राह्मण कहे जातेहैं ॥ २६० ॥ विषयभोगमें आसक्त उग्र और कोपन स्वभाव साहस प्रिय स्वधर्मच्युत रजोगुणविशिष्ट ब्राह्मण क्षात्रियभये ॥ ६१ ॥ शूरता तेज धैर्य पटुता युद्धमेंसे नहीं भागना दान और प्रभुता यह क्षात्रियके स्वाभाविक कर्म हैं ॥ ६२ ॥ राजा राजकर्म करनेवाले और रक्षक क्षत्रिय कहेजातेहैं ॥ ६३ ॥ जे सर्व द्विज रजोगुण और तमोगुण मीश्रित पशुपालन वैसी कृषी जिनकी उपजीविका और स्वधर्मका अनुष्ठान करते नहीं वे ब्राह्मण वैश्य भये ॥ ६४ ॥ खेती करना गौको पालन और व्यापार करना यह वैश्यका स्वाभाविक कर्महै ॥ ६५ ॥ अन्नादिकको उत्पन्न करनेवाले खेडत शिल्प वाणिज्यादिक वैश्य कहे जातेहैं॥६६॥जे सर्वद्विज हिंसा और मिथ्या कर्ममें लुब्ध जीविकाके वास्ते सर्वकर्म करतेहैं और तमोगुणविशिष्ट वैसे शौचाचार भ्रष्ट हैं वे ब्राह्मण शूद्र भये ॥६७॥सेवारूप कर्म शूद्रका स्वाभाविक कर्म है ॥६८ ॥ शारीरिक सेवा करनेवाले

सूत्रम् २।४६। सेवकाः शूद्राः ॥६९॥ भगवद्गीता-चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ॥ २७० ॥ महाभारते शांतिपर्वणि १८८ अध्याये भरद्वाज उवाच-चातुर्वर्ण्यस्य वर्णेन यदि वर्णो विभिद्यते ॥ सर्वेषां खलु वर्णानां दृश्यते वर्णसंकरः ॥ ७१ ॥ कामः क्रोधो भयं लोभः शोकश्चिंता क्षुधा श्रमः ॥ सर्वेषां च प्रभवति कस्माद्वर्णो विभज्यते ॥ ७२ ॥ जंगमानामसंख्येयाः स्थावराणां च जातयः ॥ तेषां हि विधिवर्णानां कुतो वर्णविनिश्चयः ॥ ७३ ॥ भृगुरुवाच ॥ न विशेषोऽस्ति वर्णानां सर्वं ब्रह्ममिदं जगत् ॥ ब्रह्मणा पूर्वसृष्टं हि कर्मभिर्वर्णतां गतम् ॥ ७४ ॥ मनुसंहितायां दशमे अध्याये-शूद्रो ब्राह्मणतामेति ब्राह्मणश्चैति शूद्रताम् ॥ क्षत्रियाज्जातमेवं हि विद्याद्वैश्यात्तथैव च ॥ ७५ ॥ युधिष्ठिरं प्रति वैशम्पायनवचनम्-क्षांत्यादिभिर्गुणैर्युक्तस्त्यक्तदंडो निरामिषः ॥ न हंति सर्वभूतानि प्रथमं ब्रह्मलक्षणम् ॥ ७६ ॥ यदा सर्वं परद्रव्यं पथि वा यदि वा गृहे ॥ आदत्तं नैव गृह्णाति द्वितीयं ब्रह्मलक्ष-

शूद्र कहेजाते हैं ॥६९॥ गुण कर्मके विभागसे चार वर्णका धर्म मैंने किया ॥२७०॥ ऐसे ऊपर लिखेहुये प्रमाणोंसे स्पष्ट मालूम होताहै कि पूर्वमें गुण ऊपरसे जातिभेद हुआ है भृगु ऋषिने प्रथम ऐसा कहा कि ब्रह्मदेवसे चारि जाति पैदा भई उसके वर्ण भिन्न भिन्न थे तब भरद्वाजने प्रश्न किया कि चार वर्णोंका भेद जो रंगऊपरसे होवे सो सब जातिमें वर्ण संकर रंगकी मिलनता दिखती है ॥ ७१ ॥ ऐसी काम वासना क्रोध भय लोभ शोक चिंता क्षुधा श्रम यह सबोंके समान हैं तब जाति कैसी पिछाननी ॥७२ पशु पक्षी वृक्ष पाषाणादिक अनेक जातिहैं तब वर्णनिश्चय कैसा होता है सो कहो॥७३॥ तब भृगु कहते हैं। जातिभेद भूलसे नहीं है। सब जगत् ब्रह्महै कार्यसे जो ब्रह्मद्वारा उत्पन्न भयाहै कर्मके योगसे वर्णभेद भया है॥७४॥ पूर्व कर्म और चरित्रगुणसे ब्राह्मण शूद्र होते हैं शूद्र ब्राह्मण होतेहैं। उस ऊपर मनुसंहिता प्रमाण स्पष्ट है ॥७५॥ क्षांति इत्यादि गुणोंसे युक्त दंड और आमिषभोजन जिसने त्याग किया कोई जीवकी हिंसा करता नहीं यह ब्राह्मणका प्रथम लक्षण है ॥ ७६ ॥ और जो दूसरेके द्रव्यको रस्तेमें होवे या घरमें होवे परन्तु दिये विना लेवे नहीं यह

णम् ॥७७॥ त्यक्त्वा क्रूरस्वभावं तु निर्ममो निष्परिग्रहः ॥ मुक्तश्चरति यो नित्यं तृतीयं ब्रह्मलक्षणम् ॥ ७८ ॥ देवमानुषनारीणांतिर्यग्योनिगतेष्वपि ॥ मैथुनंहिसदात्यक्तश्चतुर्थंब्रह्मलक्षणम् ॥ ७९ ॥ सत्यं शौचं दया शौचं शौचमिन्द्रियनिग्रहः ॥ सर्वभूतदया शौचं तपः शौचं च पंचमम् ॥ २८० ॥ पंचलक्षणसंपन्न ईदृशो यो भवेद्द्विजः ॥ तमहं ब्राह्मणं ब्रूयां शेषाः शूद्रा युधिष्ठिर ॥८१॥ न कुलेन न जात्या वा क्रियाभिर्ब्राह्मणो भवेत् ॥ चांडालोऽपि हि वृत्तस्थो ब्राह्मणः स युधिष्ठिर ॥ ॥ ८२ ॥ एकवर्णमिदं पूर्णं विश्वमासीद्युधिष्ठिर ॥ कर्मक्रियाविशेषेण चातुर्वर्ण्यं प्रतिष्ठितम् ॥ ८३ ॥ सर्वे वै योनिजा मर्त्याः सर्वे मूत्रपुरीषिणः ॥ एकेंद्रियेंद्रियार्थाश्च तस्माच्छीलगुणो द्विजः ॥ ८४ ॥ शूद्रोऽपि शीलसम्पन्नो गुणवान् ब्राह्मणो भवेत् ॥ ब्राह्मणोऽपि क्रियाहीनः शूद्रात्प्रत्यवरो भवेत् ॥८५॥ पंचेन्द्रियार्णवं घोरं यदि शूद्रोऽपि तीर्णवान् ॥

ब्राह्मणका दूसरा लक्षण है ॥ ७७ ॥ क्रूर स्वभावको त्याग करके ममता और परिग्रह रहित होयके मुक्तवन्ध होयके चलता है यह ब्राह्मणका तीसरा लक्षण है ॥ ७८ ॥ जिसने सदा मैथुन त्याग किया है वो ब्राह्मणका ४ चौथा लक्षण है ॥७९॥ सत्यशौच १ दयाशौच २ इन्द्रिय जीतना शौच ३ सर्व जीवोंके ऊपर दया शौच ४ और स्वधर्मानुष्ठान तप शौच ५ ॥ २८० ॥ ऐसा पांच शौच लक्षण संपन्न जो द्विज है उसको ब्राह्मण कहता हूं । बाकीके शूद्र जानना ॥ ८१ ॥ कुल और जाति और क्रियासे ब्राह्मण होता नहीं चंडालभी जो उत्तम गुणयुक्त होवे तो वो ब्राह्मण है ॥ ८२ ॥ हे युधिष्ठिर ! एकवर्णसे यह विश्व पहिले भरा हुवा था कर्म और क्रियाकी विशेषतासे चार वर्णका धर्म स्थापित भया ॥ ८३ ॥ सर्व मनुष्य योनिसे पैदाभयेहैं और सब मूत्र पुरीष करने वाले हैं । और एकही प्रकारकी सबकी इंद्रियां हैं और विषय भी सबके एकही तरहके हैं । इस वास्ते शील और गुणसे ब्राह्मण होता है ॥ ८४ ॥ शीलवान् और गुणवान् शूद्रभी होवे तथापि ब्राह्मण होता है और ब्राह्मण होके क्रियाहीन होवे तो शूद्रसे भी कम होताहै ॥ ॥ ८५ ॥ पंचेंद्रियरूपी घोर समुद्रको जो कभी शूद्र तर जावे तो हे युधिष्ठिर!उसको

तस्मै दानं प्रदातव्यमप्रमेयं युधिष्ठिर ॥ ८६ ॥ न जातिर्दृश्यते राजन् गुणाः कल्याणकारकाः ॥ जीवितं यस्य धर्मार्थे परार्थ यस्य जीवितम् ॥ ८७ ॥ अहोरात्रं चरेत्क्षांतिं तं देवा ब्राह्मणं विदुः॥ परित्यज्य गृहावासं ये स्थिता मोक्षकांक्षिणः ॥ ॥८८॥ कामेष्वसक्ताः कौंतेय ब्राह्मणास्ते युधिष्ठिर ॥ अहिंसानिर्म्ममत्वं वा सतः कृत्यस्य वर्ज्जनम् ॥ ८९ ॥ रागद्वेषनिवृत्तत्वमेतद्ब्राह्मणलक्षणम् ॥ क्षमा दया दमो दानं सत्यं शौचं स्मृतिर्घृणा ॥ २९० ॥ विद्या विज्ञानमास्तिक्यमेतद्ब्राह्मणलक्षणम् ॥ यदा न कुरुते पापं सर्वभूतेषु दारुणम् ॥ कायेन मनसा वाचा ब्रह्म संपद्यते तदा ॥ ९१ ॥ महाभारते वनपर्वणि अजगरोपाख्याने—शूद्रे तु यद्भवेल्लक्ष्म द्विजे तच्च न विद्यते ॥ न वै शूद्रो भवेच्छूद्रो ब्राह्मणो न च ब्राह्मणः ॥ ९२ ॥ श्रीभागवते सप्तमस्कंधे—यस्य यल्लक्षणं प्रोक्तं पुंसां वर्णाभिव्यंजकम् ॥ यदन्यत्रापि दृश्येत तत्तेनैव विनिर्दिशेत् ॥ ९३ ॥ भारते आनुशासनिके पार्वतीं प्रति शिवः—घात्यं न घातको

दान देवे ॥ ८६ ॥ जाति देखनेमें आती नहीं गुण जो हैं वोई कल्याणकारक हैं जिसका जीना धर्मके वास्ते, जिसका जीना परोपकारके वास्ते, रात्रादिन जो अच्छे काम करता है उसको देवता ब्राह्मण जानते हैं ॥८७॥ घरका निवास छोडके मुमुक्षु नाम मेरा मोक्ष होवे ऐसी आशा करके जो बैठेहैं कामतृष्णासे जो आसक्त नहीहैं हे राजा ! वे ब्राह्मण हैं ॥८८॥ हिंसा और ममताका त्याग और समान भावमें स्थिति दुष्टकर्मका त्याग रागद्वेषकी निवृत्ति यह ब्राह्मणके लक्षण हैं ॥८९॥ क्षमादिक ग्यारह पदार्थ सेवन करना यह भी ब्राह्मणके लक्षण हैं ॥८९॥ जिस वखत जीवमात्रके विषे अपने देहसे मनसे वाणीसे पापकर्ता नहीं तब ब्रह्मगतिको प्राप्त होताहै॥९१॥ पूर्वोक्त लक्षण शूद्रमें होवे और ब्राह्मणमें न होय तो वह शूद्र शूद्र नहीं है और वह ब्राह्मण ब्राह्मण नहींहै॥९२॥जिस पुरुषका जो वर्ण द्योतक लक्षण कहनेमें आया है वो लक्षण जो कभी अन्यमें देखनेमें आवे तो उसकी उस लक्षणानुसार जातिनिर्देश करना ९३ और स्त्री पुत्र धन आबरू इत्यादिकका अनेक मार्गसे घातकरनेवाला जो शत्रु उस जातके ऊपर अपनी तरफसे बदला लेनेके वास्ते जो घात करता नहीं उसको ब्राह्मण

विप्र क्षत्त्रियो रिपुघातकः ॥ विश्वासघातको वैश्यः शूद्रःसर्व-
स्वघातकः ॥९४॥ एभिस्तु कर्मभिर्देवि शुभैराचरितैस्तथा ॥
शूद्रो ब्राह्मणतां याति वैश्यः क्षत्त्रियतां व्रजेत् ॥ ९५ ॥ एतैः
कर्मफलैर्देवि न्यूनजातिकुलोद्भवाः ॥ शूद्रोऽप्यागमसंपन्नोद्विजो
भवति संस्कृतः ॥९६॥ ब्राह्मणो वाप्यसंपन्नो सर्वसंकरभोज-
नः ॥ ब्राह्मण्यं समनुत्सृज्य शूद्रो भवति तादृशः ॥ ९७ ॥
कर्मभिः शुचिभिर्देवि शुद्धात्मा विजितेन्द्रियः॥शूद्रोऽपि द्विज-
वत्सेव्य इति ब्रह्मानुशासनम् ॥ ९८ ॥ स्वभावं कर्म च शुभं
यत्र शूद्रेऽपि तिष्ठति ॥ विशिष्टः स द्विजातेर्वै विज्ञेय इति मे
मतिः॥९९॥ न योनिर्नापि संस्कारो न श्रुतं न च संततिः ॥
कारणानि द्विजत्वस्य वृत्तमेव तु कारणम् ॥ ३०० ॥ सर्वो
ऽयं ब्राह्मणो लोके वृत्तेन च विधीयते ॥ वृत्ते स्थितस्तु शूद्रो-
ऽपि ब्राह्मणत्वं निगच्छति ॥१॥ ब्रह्मस्वभावः कल्याणि समः
सर्वत्र मे मतिः ॥ निर्गुणं निर्मलं ब्रह्म यत्र तिष्ठति स द्विजः

कहना । शत्रुको मारनेवाला क्षत्त्रिय कहना व्यापारमें विश्वासघात करनेवाला वैश्य जानना अनेक तरहसे जो घात करनेवाला उसको शूद्र कहना ॥९४॥ हे देव ! यह कर्मोंसे और अच्छे आचारसे शूद्र ब्राह्मण होजाताहै वैश्य क्षात्रिय होजाताहै॥९५॥ हे देवि ! यह कर्मोंके फलसे नीच जातिकुलमें पैदा हुआ शूद्रभी वेदसंपन्न संस्कार विशिष्ट ब्राह्मण होजाताहै॥९६॥ और ब्राह्मण होयके जो दुष्टवृत्ति और सर्वसंकर भोजन करता है तो वो अपनी ब्राह्मणताको त्यागकरके शूद्र होजाता है ॥ ९७ ॥ पवित्र कर्मसे शुद्ध हुआ है अंतःकरण जिसका और जितेंद्रिय ऐसा शूद्र भी ब्राह्मण सरीखा सेवा योग्य है ऐसा ब्रह्माने कहाहै ॥९८॥ जिस शूद्रमें अच्छा स्वभाव शुद्ध कर्म है वह ब्राह्मणजातीसे श्रेष्ठ है ऐसी मेरी समझहै ॥९९॥ ब्राह्मणयोनिसे उत्पत्ति यज्ञोपवीतादि संस्कार वेदशास्त्र पाठ ब्राह्मणवंशीय संतान होना यह सर्व ब्राह्मणत्वका कारण नहीं हैं सच्चरित होना यही कारण है ॥३००॥ इस लोकमें जो ब्राह्मणका विधान है सो सच्चारित्रसे है शूद्रभी सद्वृत्तिमें स्थित होवे तो ब्राह्मणत्वका पात्र होता है ॥१॥ ब्रह्मका स्वभाव हे कल्याणि! मैं सब ठिकाने समान जानताहूं निर्गुण

॥ २ ॥ एतत्ते गुह्यमाख्यातं यथा शूद्रो भवेद् द्विजः ॥ ब्राह्मणो वा च्युतो धर्माद्यथा शूद्रत्वमाप्नुते ॥ ३ ॥ आपस्तंबधर्मसूत्रे-अधर्म्मचर्यया पूर्वो जघन्यवर्णमापद्यते जातिपरिवृत्तो धर्म्मचर्यया जघन्यो वर्णः पूर्वंपूर्ववर्णमापद्यते जातिपरिवृत्तेः ॥ ४ ॥ मनुसंहितायां-तपोबीजप्रभावैस्तु ते गच्छंतु युगेयुगे ॥ उत्कर्षं चापकर्षंच मनुष्येष्विह जन्मतः ॥ ५ ॥ शनकैस्तु क्रियालोपादिमाः क्षत्त्रियजातयः ॥ वृषलत्वं गता लोके ब्राह्मणादर्शनेन च ॥ ६ ॥ श्रीभागवते-विप्राद्द्विषड्गुणयुतादरविंदनाभपादारविंदविमुखाच्छ्वपचं वरिष्ठम् ॥ ७ ॥ एवं पद्मपुराणेऽप्युक्तं महाभारते वनपर्वणि-शूद्रयोनौ हि जातस्य सद्गुणानुपतिष्ठतः ॥ वैश्यत्वं लभते ब्रह्मन् क्षत्त्रियत्वं तथैव च ॥ आर्जवे वर्तमानस्य ब्राह्मण्यमभिजायते ॥ ८ ॥ तस्योपरि नीलकण्ठी टीका गुणकृत एव वर्णविभागो न जातिकृत इति ॥ ९ ॥ कामान्माता पिता चैनं यदुत्पादयतो

निर्मल ब्रह्म जिसके हृदयमें स्थितहै सो ब्राह्मण है ॥२॥ शूद्र जिस प्रकारसे ब्राह्मण होताहै और ब्राह्मण स्वधर्म भ्रष्टतासे जैसा शूद्र होताहै यह गुप्त बात मैंने तेरेको कही ॥ ३ ॥ अधर्मके आचरणसे उच्च वर्णका मनुष्य नीच वर्णमें जाता है और धर्मके आचरण करनेसे नीच जातिका मनुष्य उच्चवर्णमें आजाताहै ॥ ४ ॥ मनुष्योंमें जिस जातिमें जन्म होता है उस जातिसे उत्तम वा कनिष्ठ ऐसी जो जाति उसमें मनुष्य अपने तप और बीजके सामर्थ्य प्रमाणसे पाता है ॥ ५ ॥ और आगे उत्पत्ति प्रकरणमें कहेंगे जो क्षत्रियजाति सो अपने कर्मलोपसे और ब्राह्मणोंके समागम न होनेसे शूद्रत्वको पायेहैं ॥ ६ ॥ ब्राह्मण अनेक गुण संपन्न हो परन्तु उसको भक्ति न होवे तो उससे अति श्रेष्ठ शूद्र समझना ॥ ७ ॥ शूद्र जातिमें जन्म होवे उसको वैश्यत्व क्षात्रियत्व ब्राह्मणत्व सत्कर्मसे आता है ॥ ८ ॥ गुणसे वर्ण प्राप्त होता है मातापितासे वर्ण मिलता नहीं ॥ ९ ॥ सृष्टिनियमानुसार माबापसे यह मानव देहमें जो जन्म होता है सो यह प्राणी उत्पन्न भया इतनाही समझनेका है परन्तु उसकी जाति कौनसी कहै तो देहोत्पादककी जो जाति संस्कार करनेवाले उपदेश गुरुकी जो जाती यथाशास्त्र वेदादिक अध्ययनमें निष्ठासे पूर्वोक्त

मिथः ॥ संभूतिं तस्य तां विद्याद्यद्योनावभिजायते ॥ ३१० ॥ आचार्यस्त्वस्य यां जातिं विधिवद्वेदपारगः ॥ उत्पादयति सावित्र्या सा सत्या साजरामरा ॥ ११ ॥ न हायनैर्न पलितैर्न वित्तेन न बंधुभिः॥ऋषयश्चक्रिरे धर्मं योऽनूचानः स नो महान्॥१२॥विप्राणां ज्ञानतो ज्यैष्ठ्यं क्षत्रियाणां तु वीर्यतः॥ वैश्यानां धान्यधनतः शूद्राणामेव जन्मतः ॥ १३ ॥ न तेन वृद्धो भवति येनास्य पलितं शिरः ॥ यो वै युवाप्यधीयानस्तं देवाः स्थविरं विदुः ॥ १४ ॥ यथा काष्ठमयो हस्ती यथाचर्ममयो मृगः ॥ एवं विप्रोऽनधीयानस्त्रयस्ते नामधारकाः ॥ १५ ॥ ऐतरेयब्राह्मणम् ॥ १६ ॥ ऋषयो वै सरस्वत्यां सत्रमासत ते कवशमैलुषं सोमादनयन् दास्याः पुत्रः कितवोऽब्राह्मणःकथं नो मध्ये दीक्षिष्टेति तं बहिर्धनवोदवहन् तत्रैनं पिपासाहं तु सरस्वत्या उदकमापादितो स बहिर्धनवो दुलहः पिपासाया वित्तये तदपो न प्लीयमपश्यत प्रदेवत्रा ब्रह्मणे गातुमैरतेत्विति तेनापाप्रियं धामो पागच्छतम्मापोऽनुदायस्तं सरस्वती समंतं पर्यधावतस्माद्धाप्यपि येतरहिपरिक्षारकमित्याचक्षते यदेनं सरस्वतिसमन्तं परिसारने वा ऋषयोऽब्रुवन् विदुषा इमं देवा उपेमं ह्वयामह इति तथेति तमुपाह्वयंतमुपहूयैतदपो नहीयम्

ब्रह्म लक्षण धर्म निष्ठतासे जो जाति वही उसकी खरी स्थायी जाति होवे१०बहुत वय होनेसे बाल सफेद होनेसे अथवा द्रव्यके वैभवसे अथवा बडे कुटुंब परिवारसे कुलवानके बडेपनेसे महत्त्व आता नहीं तब ऋषियोंने ऐसा सिद्धान्त किया है कि जो अध्ययन संपन्न वही हमलोगोंसे महान् है॥११॥१२॥ब्राह्मणोंका बडप्पन ज्ञानके ऊपर है। क्षत्रियोंका बडप्पन शूरपनसे है वैश्योंका बडप्पन धनधान्यसंपत्ती पर है । शूद्रका बडप्पन उनकी अवस्था ऊपरसे है ॥१३॥ जिसके सिरके बाल सफेद हुवे उसके वह वृद्ध होता नहीं परन्तु तरुण होके जो ज्ञान संपन्न होवे उसको देवता वृद्ध कहते हैं ॥१४॥जैसा लकडीका हस्ती सूखे चर्ममें घास भराहुवा चर्मका हरिण उसमें हरिणपणा वैसा विद्याहीन ब्राह्मण यह तीनों नामधारक हैं ॥ १५ ॥ एक समयमें ऋषि-

कुर्वंतः प्रदेवत्रा ब्राह्मणे गातुमैरेत्विति तेनापोप्रियं धामोपागच्छनुपदेवापापांप्रियं धाम गच्छत्युपदेवानां जयति परमं लोकं ययेवंवेदचैनविद्वांस्तदपोऽनाप्लीय कुरुते॥१६॥ छान्दोग्योपनिषदि सत्यकामोह जाबालो जबलां मातरमामंत्रयांचक्रे ब्रह्मचर्यं भवति विवित्स्यामि किंगोत्रोऽहमस्मीतिसाहैनमुवाचनाहमेतद्वेद तात यद्गोत्रस्त्वमसि बह्वहं चरंतीपरिचारिणी यौवने त्वामलभे साहमेतन्नवेद यद्गोत्रस्त्वमसि जाबाल तु नामाहमस्मि सत्यकामो नाम त्वमसि स सत्यकाम एव जाबालो ब्रुवीथा इति २ सहहारिद्रुमंतं गौतममेत्योवाच—ब्रह्मचर्यं भगवति वत्स्याम्युपेयां भगवंतमिति ३ तं होवाच किंगोत्रो नु सोम्यासीति सहोवाच नाहमेतद्वेद भो यद्गोत्रोऽहमस्म्यपृच्छं मातरं सामाप्रत्यब्रवीद्बह्वहंचरंती परिचारिणी यौवने त्वामलभेसाहमेतन्नवेदयद्गोत्रस्त्वमसि जबाला तु नामाहमस्मि सत्यकामो नातमत्वमसीति सोऽहं सत्यकामो जाबालोस्मि भोइति४तं होवाच नैतदाब्राह्मणो विवक्तुमर्हतिइति ४॥१७॥ इति गुणकर्मभिरेव जातिविभागे प्रमाणानि

लगे सरस्वती नदीके किनारे ऊपर यज्ञ करतेहुवे। उसमें एक कवश अडणाव यलुश उस नामका शूद्र तैसा नीच दासीपुत्र इसका ऋषिमंडलमें प्रवेश भया तब उसके ऊपर सबोंने क्रोध किया और उसको दूर निकाल दिया फिर उसने तप किया और ब्राह्मण भया इस दृष्टांतका मूल यह है कि ब्राह्मणका ब्रह्मत्व तपादिकसे है इसवास्ते स्वधर्म अवश्य करना॥ १६॥ जाबाल नामका एक छोकरा था सो गुरुके पास विद्या सीखनेको गया। गुरुने उसको पूछा तेरी जात कौन है सो तेरी माको पूछके आ तब वह माके पास जायके पूछा सो माने कहा कि मैं स्वामीकी विना इच्छाप्रमाणसे फिरती हुई उससे तू हुआ तुझसे तेरे बापका नाम कह सकती नहीं वह उत्तर छोकरेने जैसाका वैसा गुरुसे कहा तब गुरुने कहाकि हे छोकरे! तू सत्यप्रिय है उसवास्ते तेरी जात मैं समझा तू ब्राह्मण है इस वास्ते तेरा नाम आजसे सत्यकामजाबाल ऐसा ठहराया है। तू ब्राह्मणमें अध्ययन करता जा॥१७॥ ऐसा गुण कर्मसे जातिभेद जाननेके जो प्रमाण वचन सो पूरे हुए

समाप्तानि॥अथतत्र कानिचिद्दृष्टान्तान्याह भारतेअनुशासनपर्वणि—ततोहि ब्राह्मण्यं यातो विश्वमित्रो महातपाः॥ क्षत्त्रियः सोऽप्यथ तथा ब्राह्मवंशस्य कारकः ॥१८॥ विष्णुपुराणे चतुर्थेंशे करूषात् कारूषा महाबलाः क्षत्त्रिया बभूवुः ॥ नाभागो दिष्टपुत्रस्तु वैश्यतामगमत् पृषध्रस्तु गुरुगोवधाच्छूद्रत्वमगमत् ॥१९॥ हरिवंशे—एते त्वंगिरसः पुत्रा जाता वंशेऽथ भार्गवे ॥ ब्राह्मणाः क्षत्त्रिया वैश्याः शूद्राश्चभरतर्षभ॥एवमन्यानि वचनप्रमाणानि श्रीभागवतादिपुराणेषु बहूनि संति ग्रंथविस्तरभयान्नोच्यंते एवं पूर्वोक्तवचनैरुत्तमो हीनतां झटित्येव प्राप्नोति

अब उसके ऊपर थोडे दृष्टांत भी लिखता हूं वो बडे तपस्वी विश्वामित्र क्षात्रिय थे। पीछे ब्राह्मण हुए उनसे ब्राह्मणका वंश होता भया ॥ १८ ॥ वैवस्वत मनुके पुत्रोंमें का करूष जो था उससे बलवान् कारूष क्षत्रिय पैदा भये और दिष्टका पुत्र नाभाग कर्मसे वैश्य भया और पृषध्र गुरुकी गायका वध करनेके दोषसे शूद्रत्वकूं पाया ॥ १९ ॥ भृगुवंशीय अंगिराके पुत्र ब्राह्मण क्षत्रिय वैश्य शूद्र भये हैं क्षात्रिय जो ऋषभदेव उनके पुत्र १०० थे उनमें नव महायोगी भये ८१ ब्राह्मणोत्तम भये ९ खंडपति क्षात्रिय भये मुख्य भगवद्भक्त भरतराजा भया ऐसे दूसरे अनेक वचन श्रीभागवत आदि ग्रंथोंमें हैं ग्रंथविस्तार भयसे यहां नहीं लिखता। ऐसा इस ग्रंथमें पूर्वोक्त जो वचन कहे हैं वह प्रमाणसे उत्तम वर्ण जो ब्राह्मणादिक व हीन कर्मसे तत्काल हीनत्व दशाको प्राप्त होताहै और हीनवर्ण जो शूद्रादिक वह तो कवि उनके अंतःकरणमें इर्षा न होवे (नाम ये ऐसा है तो मैं भी उसके सरीखा देखूं) और मत्सर न होवे (नाम ब्राह्मणके जगद्वंद्यादिक गुण देखके सहन न होवे उसको मत्सर कहते हैं वह न होवे) और देहके ऊपर मान अहंकार न आवे (नाम इस कालमें ब्राह्मण गुणरहित कर्म भ्रष्ट हो गया है और मैं तो सब निर्णय अच्छा जानताहूं मैं इन ब्राह्मण-लोकोंमें उत्तम हूं ऐसा देहमें अहंकार न होवे) तो वह शूद्र अपने गुणकर्मके प्रतापसे कालान्तरमें ब्राह्मण्यको पाता है। विश्वामित्रादिक सरीखा इस विना कोई शूद्र जाने कि मैं विद्यागुणसे ब्राह्मण होऊँ सो होनेका नहीं कारण रामायणादिकमें प्रसिद्ध कथा है कि विश्वामित्र बडे गुणी विद्यामें संपन्न थे। तब एक समयमें वसिष्ठके पास गये वंदन किया तब वसिष्ठने आव राजऋषि ऐसा कहा सो सुनके अंतःकरणमें इर्षा उत्पन्न भई कि अब अपने तपोबलसे वसिष्ठको जीतके ब्रह्मर्षिपना पैदाकरना ऐसा संकल्प करके जगत्में जितनी शस्त्रास्त्र

हीनस्तु यदा ईर्षामत्सरमानादिरहितश्चेद्गुणकर्मभिः कालांतरेणोत्तमतां याति विश्वामित्रादिवत्। अन्यथा नेति निश्चयः। अत एवाविच्छिन्नसंस्कारसंस्कृतः स्वकर्मकृदेव ब्राह्मण

विद्या थी उससे वासिष्ठके साथ युद्ध करनेलगे परंतु निर्विकार वसिष्ठने एक गायत्री ब्रह्मदंडसे जब शस्त्रास्त्रको जीतालिया फिर विश्वामित्रने वहुत तप किया जिनने दूसरी सृष्टि निर्माण की ऐसे प्रतापी थे परंतु वसिष्ठने उनको ब्रह्मर्षि नहीं कहा फिर विश्वामित्र एक बखत विरक्त उदास होके बैठे और अहंकार छोडके वसिष्ठके पांव पडे तब वसिष्ठने उनकी निर्विकारता देखके कहाकि आप बडे ब्रह्मर्षि हमसेभी श्रेष्ठहो इस वास्ते कारण यह है कि शुद्धांतःकरण कर्मादिकके गुणसे उत्तम गतिको पाता है अलम् इह सृष्टिमेंका कोई भी एक आधा सृष्ट पदार्थ उत्तम स्थितिमें लाना सो क्रियाका अर्थ संस्कार (सं-उत्तम प्रकारकृति) वह प्रमाणते मनुष्य प्राणी उत्तम स्थितिको प्राप्त होवे अर्थात् इसजगतमें उसका जीवित्व जीये तहांतक निरोगी सुदृढ सतेज दीर्घायुषी रहे और उत्तम ज्ञान गुणको प्राप्त होयके सुखसे और निर्विघ्नतासे व्यावहारिक और पारमार्थिक काम साधन होवे। उस वास्ते वे दोनों व्यवहारादि षोडश संस्कार (सम्यक् नियमित आचार) दिखाय दियेहैं और उन सबोंका स्पष्टीकरण प्रत्येक वेदके गृह्यसूत्रादि ग्रन्थोंमें अच्छी तरहसे किया है और उसीके प्रमाणसे पूर्वके आर्य लोक सब कर्म आचरण करते थे और शरीरसे निरोगी सुदृढ सतेज दीर्घायुष रहतेथे वैसा उत्तम ज्ञान गुणको प्राप्त होयके निर्विघ्नतासे व्यावहारिक और पारमार्थिक कर्म करके आनंदमें रहतेथे परन्तु पूर्वलोकमें सत्य और हितकारक कर्म जो गरीबसे लेके श्रीमंत तक एक सरीखी रीतिसे होसके ऐसे थे। सो बदल होके और रूपांतर करके उसपर वेदविरुद्ध मनमें आवे वैसी दुर्घट रचना करनेमें आई उससे अपने सब आर्य लोक हालके बखतमें संपूर्ण कर्मभ्रष्ट होगये हैं और वैसा होनेका मुख्य कारण मात्र इतना है कि पुरोहिता और यजमान दोनोंमें परस्पर एक एककी हित और रक्षण करनेकी श्रद्धा छोड दी उससे दोनों ऐसे दुर्घट स्थितिमें आयफंसे हैं वैसे कर्मभ्रष्टभी भये हैं इसमें किसीका अपराध निकालना रहा नहीं जैसा पुरोहितने यजमानकी हित करनेकी इच्छा छोडी वैसा दूसरी तरफ यजमानने उनका प्रतिपालन करनेके शुभ नियम और भक्ति छोडदिये। जैसे जैसे छूटतेगये वैसी वैसी पुरोहित लोकोंकी स्थिति खराब होनेलगी और निर्वाह होना भी मुश्किल होगया फिर उससे वह यजमानोंके पापसे धन निकालनेके लिये और उससे अपना निर्वाह चलानेके वास्ते नाना प्रकारकी युक्ति रचके नवीन ग्रन्थ बनाने लगे इस रीतिसे सत्यकर्मका अन्तर्भाव होने-

इति ॥ ३२० ॥ अथ प्रत्येकब्राह्मणज्ञातिमध्ये दशविधत्व-माह हिन्दलाद्रिखण्डे-देवो मुनिर्द्विजो राजा वैश्यःशूद्रो विडा-लकः ॥ कृतघ्नो म्लेच्छचांडालौ विप्रा दशविधाः स्मृताः ॥ ॥ २१ ॥ अथैषां लक्षणानि—भिक्षासनोऽध्यापकश्च सन्तुष्टो येनकेनचित् ॥ वेदशास्त्रार्थतत्त्वज्ञो विप्रो देवः प्रकीर्तितः ॥ ॥ २२ ॥ अकृष्टफलमूलाशी वनवासरतः सदा ॥ कुरुतेऽह-रहः कर्म स विप्रो मुनिरुच्यते ॥ २३ ॥ तपः सत्यमहिंसा च षट् कर्माणि दिनेदिने ॥ न भवेत्काललोपश्च स वै द्विज इहो-

लगा । और उस जगह ऊपर हाल असत्य कर्म रूढीका तमाम पसारा हो रहाहै, उससे शरीर बल और बुद्धिबल इनकी वृद्धि करनेके साधन जो षोडष संस्कार कर्म छूट जानेसे दोनोंकी बलहानि होगई है और होती जाती है इस वास्ते अबसे वैसा न होवे । सब साहेबोंने सावधान होके प्राचीन शुभ कर्मोंके ऊपर आनेका प्रयत्न करना रूढिका लक्षण पहिले मैंने वर्णन कियाहै । और हालके यजमान-पुरोहित कैसे हैं ॥ (तिष्ठन्मूत्रो यजमानः धावन्मूत्रः पुरोहितः इति) ऐसे हैं परन्तु यजमान लोकोंने एक बात मुख्य ध्यानमें रखना चाहिये कि जो पुरोहित यजमान के हितके वास्ते यह वेद प्रणीत सत्य कर्म करावे उसको तन मन धनसे सदा प्रसन्न रखना चाहिये अर्थात् अन्न वस्त्रादिकसे उसको बारबार प्रतिपालन करना पडता है वैसा पुरोहितनेभी यजमानके कल्याणार्थ सत्य कर्म करानेका बोध करना यह मुख्य धर्म है हदके बाहर लोभ करना उसको घटता नहीं है (अमन्त्रकस्य यागस्य महिषी शतदक्षिणा । तवार्धं च ममार्धं च मौनं सर्वार्थसाधनम्॥) ऐसा करना नहीं। अर्थात् यजमान पुरोहित दोनोंने परस्पर हित साधक होना प्रत्येक कार्यमें लेनेदे-नेका सदा निभै वैसा नियम रखना इस वास्ते यजमानके षोडशसंस्कार यथार्थ करना और जिसके सब संस्कार बरोबर हुये होवें वही ब्राह्मण जानना ॥३२०॥ अब प्रत्येक ज्ञातिके जो ब्राह्मण हैं उस एक ज्ञातिमें भी दश दश प्रकार हैं सो कहते हैं देवनामके ब्राह्मण १ मुनि ब्राह्मण २ द्विज ब्राह्मण ३ क्षत्रिय ब्राह्मण ४ वैश्यब्राह्मण ५ शूद्रब्राह्मण ६ मार्जारब्राह्मण ७ कृतघ्नब्राह्मण ८ म्लेच्छ ब्राह्मण ९ चांडाल ब्राह्मण १० ऐसे दश प्रकारके ब्राह्मण कहे हैं ॥२१॥ अब यह दश ब्राह्मणके लक्षण कहते हैं भिक्षामांगके निर्वाह करता होवे, वेद पढता होवे, जो मिले उतनेमें सन्तोष रखता होवे, वेदशास्त्रार्थका तत्त्व जानता होवे उसको देव ब्राह्मण कहना ॥ २२ ॥ ॥ २३ ॥ ब्राह्मण तप करता है सत्य भाषण करता है जीवमात्राकी हिंसा करता नहीं है नित्य अपना षट्कर्म साधन करता है त्रिकाल संध्यादिकमें तत्पर रहता है काल लोप

च्यते ॥ २४ ॥ अश्वादिवाहने दक्षः संग्रामे निर्भयः सदा ॥
राजविद्यासु निर्ज्ञाता स राजा ब्राह्मणः स्मृतः ॥ २५ ॥
कुसीदको वार्धुषिकः पशूनां परिपालकः ॥ कृषिवाणिज्यकर्ता
च स विप्रो वैश्य उच्यते ॥ २६ ॥ स्नेहलाक्षातिला नीली
क्षारं क्षीरं घृतं मधु ॥ निशादिविक्रयं कृत्वा शूद्र इत्युच्यते
तदा ॥ २७ ॥ स्तेयप्रियोऽदयालुश्च दांभिको लोकवंचकः ॥
कन्याविक्रयकारी च विप्रो मार्जार उच्यते ॥ २८ ॥ भक्ष्या-
भक्ष्यसमो यस्तु परदाररतोऽपि च ॥ कृत्याकृत्य न जानाति
कृतघ्नो ब्राह्मणः पशुः ॥ २९ ॥ वापीकूपतडागानां क्षेत्राण
च विनाशकः ॥ स्नानसंध्याविहीनश्च स विप्रो म्लेच्छ उच्य-
ते ॥ ३३० ॥ क्रूरो लुब्धः प्रहर्ता च परद्रव्यापहारकः ॥
निर्दयः सर्वभूतेषु विप्रश्चांडाल उच्यते ॥ ३१ ॥ अथ ब्राह्म-

करता नहीं है उसको द्विज ब्राह्मण कहना ॥२४॥ जो ब्राह्मण घोडा हाथी रथ बगैर-हके ऊपर वाहन करनेको बडा कुशल और लडाई करनेको जो सदा निर्भय रहता है राजनीति विद्यामें जो कुशल है उसको क्षत्रिय ब्राह्मण कहना ॥२५॥ जो ब्राह्मण द्रव्यका व्याज उत्पन्न करताहै गाय बैल घोडोंका पालन करता है खेती और व्यापा-रकी दुकान लगाताहै उसको वैश्य ब्राह्मण कहना ॥ २६ ॥ जो ब्राह्मण तेल लाख तिल नील क्षार दूध घृत मधु (सहत) हरिद्रा आदि शब्द करके अनेक औषधी यह सब पदार्थोंका अगर इनमेंसे कोई एक भी पदार्थका विक्रय करताहै उसको शूद्र ब्राह्मण कहना ॥२७॥ जो ब्राह्मण चोरी करने में प्रीति रखताहै अन्तःकरणमें दया नहीं है और दंभ दिखाताहै लोगोंको दगा देता है कन्याका धन लेताहै उसको मार्जार ब्राह्मण कहना ॥ २८ ॥ जो ब्राह्मण निंद्यानिंद्य सब पदार्थ भक्षण करताहै परस्त्रीसे संग करता है करना न करना उसका विचार करता नहीं है और उपकार मानता नहीं है उसको पशु कृतघ्न ब्राह्मण कहना ॥ २९ ॥ जो ब्राह्मण बावडी कुवां तालाव घाट तीर्थ क्षेत्रका नाश करताहै स्नान संध्या कर्मसे हीन है उसको म्लेच्छ ब्राह्मण कहना ॥ ३३० ॥ जो ब्राह्मण स्वभावसे बडा क्रूर होताहै और लोभी दूसरेको मारनेवाला परद्रव्यको चुरालेता है सर्व प्राणियोंके ऊपर निर्दय रहताहै उसको चांडाल ब्राह्मण कहना ॥ ३१ ॥ अब ब्राह्मणके बारह बडे व्रत कहते हैं ज्ञानाभ्यास १सत्य

णस्य द्वादशमहाव्रतान्याह सप्तमस्कंधव्याख्यायाम्—ज्ञानं च सत्यं च दमः श्रुतं च ह्यमात्सर्यं ह्रीस्तितिक्षाऽनुसूया॥यज्ञश्च दानं च धृतिः शमश्च महाव्रता द्वादश ब्राह्मणस्य ॥ ३२ ॥ अथ सत्पुरोहितलक्षणमुक्तं हिंगुलाद्रिखण्डे—पुरोहितः कथं भाव्यो वेत्ति भूतं भविष्यकम् ॥ शापानुग्रहकारश्च स पुरोहित उच्यते ॥३३॥ 'स एव आचार्य' इत्युच्यते ॥ अथवा आचार्यशब्देन यजमानस्यापि ग्रहणं भवति तदुक्तं कुंडसिद्धिव्याख्यायाम् । आचिनोति अर्थान् कर्मफलरूपानिति पारस्करवाक्यबलाद् व्युत्पत्तिबलाद् दानवाचनान्वारंभणवरणव्रतप्रमाणेषु यजमानं प्रति दयतीति कात्यायनवचनाच्च आचार्यो यजमान एव । अथ स्मार्तें कर्मणि कथं श्रौतकर्मावसर इति नाशंक्यं यथा श्रौतेप्यग्निहोत्रादौ—सदोपवीतिना भाव्यं सदा बद्धशिखेन चेत्याद्यविरुद्धं स्मार्तमंगीक्रियते तद्वत्तस्मात्तेऽप्यस्मिन्कर्मणि श्रौतं ग्राह्यमेवेति ॥ ३४ ॥ अथ वर्तमानकालीनासत्पुरोहितलक्षणमाह शार्ङ्गधरपद्धतौ—पुरीषस्य च रोषस्य

भाषण २ इंद्रिय स्वाधीनरखना ३ शास्त्राभ्यास करना ४ दूसरेके उत्कर्ष देखके हर्षित होना ५ लज्जा रखना ६ सुखदुःखसहन करना ७ ईर्षा करना नहीं ८ यज्ञ करना कराना ९ दान देना लेना १० धैर्य रखना ११ मन जीतना १२ ऐसे बारह ब्राह्मणके जानना ॥३२॥अब उत्तम पुरोहितका लक्षण कहते हैं अपना पुरोहित कैसा चाहिये भूत भविष्य पदार्थको जानता होवे और शापदेनेको अनुग्रह आशीर्वाद देनेको समर्थ होवे उसको पुरोहित कहना ॥ ३३ ॥ पुरोहितको आचार्य भी कहते हैं और आचार्य शब्दसे यजमानका ग्रहण करते हैं ॥ ३४ ॥ परंतु इसकालमें पुरोहित हैं उनका लक्षण कहतेहैं धाता जो ब्रह्मदेव उन्होंने जो पुरोहित नाम स्थापन कियाहै सो चार पदार्थोंके प्रथम चार अक्षरलेके पुरोहित शब्द निर्माण कियाहै। सो चार पदार्थ कौनसे सो कहतेहैं। पुरीष नरकको कहतेहैं वो पुरीष पदार्थका प्रथमाक्षर पु लिया । बाद दूसरा अक्षर रोष कहते हैं क्रोधका नाम है उस पदार्थका प्रथमाक्षर रो लिया । अब तीसरा अक्षर हिंसा कहतेहैं जो जीवघातकरनेका नाम है उस पदार्थका प्रथमाक्षर हि लिया । अब चौथा अक्षर कहते हैं चोरका

हिंसायास्तस्करस्यच ॥ आद्याक्षराणि संगृह्य धाता चक्रे पुरो
हितम् ॥ ३५ ॥ अथ मूर्खब्राह्मणनिंदा हिंगुलाद्रिखंडे–मूर्खपु-
त्रादपुत्रत्वं वरं वेदविदो विदुः ॥ तथापि ब्राह्मणो मूर्खःसर्वेषां
निंद्य एवहि ॥ ३६ ॥ पशुवच्छूद्रवच्चैव न योग्यः सर्वकर्मसु ॥
यथा शूद्रस्तथा मूर्खब्राह्मणो नात्र संशयः ॥ ३७ ॥ न च
पूज्यो न दानार्हो निंद्यश्च सर्वकर्मसु ॥ कर्षकस्तु द्विजः कार्यो
न विप्रो वेदवर्जितः ॥ ३८ ॥ विना विप्रेण कर्तव्यं श्राद्धं
पित्रोश्चटेन वै ॥ न तु मूर्खेण विप्रेण श्राद्धं कार्यं कदाचन ॥
॥ ३९ ॥ आहारादधिकं चान्नं न दातव्यमपंडिते ॥ दाता
नरकमाप्नोति ग्रहीता तु विशेषतः ॥ ३४० ॥ सुमूर्खस्य च
विप्रस्य यस्यान्नमुदरे गतम् ॥ पच्यंते नरके घोरे सर्वे वै तस्य
पूर्वजाः ॥ ४१ ॥ धिग्राज्यं तस्य वै राज्ञो यस्य देशे ह्यपं-
डिताः ॥ पूज्यंते ब्राह्मणा मूर्खा दानमानादिकैरपि ॥ ४२ ॥

नामहै उस पदार्थका प्रथमाक्षर त लिया ऐसा पुरोहित शब्द पूरा भया इस वास्ते बहुत
करके इस कालमें कितनेक पुरोहितोंमें ऊपर लिखेहुए चारों पदार्थोंका गुण है
परन्तु सभी वैसे नहीं हैं ॥ ३५ ॥ अब मूर्ख ब्राह्मणकी निंदा कहते हैं । वेदवेत्ता
पुरुष ऐसा कहते हैं कि मूर्ख पुत्र होवे उससे तो अपुत्र रहना अच्छा है उसमें ब्राह्मण-
जाति मूर्ख होवे तो सर्वकाल सबोंको निंद्यहै ॥ ३६ ॥ वह मूर्ख ब्राह्मण पशु सरीखा
शूद्र सरीखा सब कर्ममें अयोग्य है । जैसा शूद्र वैसा मूर्ख ब्राह्मण जानना ॥३७॥
वह ब्राह्मण पूजा करनेमें और दान देनेमें योग्य नहीं है । कोई अडचन बखतमें
खेती करनेवालेको ब्राह्मण करलेना परन्तु वेदमन्त्ररहित ब्राह्मणका त्याग करना
॥ ३८ ॥ पिताका श्राद्ध धर्मका चट (कुशनिर्मित ब्राह्मण) रखके ब्राह्मण बिना
करना योग्य है । परन्तु मूर्ख ब्राह्मण करके श्राद्ध कभी करना नहीं ॥ ३९ ॥ मूर्ख
ब्राह्मणको जो दान देना सो आहार परिमित अन्नमात्र दान देना । दूसरे दान
कुछ देना नहीं देनेसे नरक प्राप्त होवेगा ॥३४०॥और जो श्राद्धका अन्न मूर्ख ब्राह्म-
णके उदरमें गया तो वे पितृगण नरकमें पडतेहैं॥४१॥ इसवास्ते उस राजाके राज्यको
धिक्कार है कि जिसके देशमें मूर्ख अपंडित ब्राह्मण दानमानादिकोंसे पूज्य होते

ब्राह्मणमहिमा–पृथिव्यां यानि तीर्थानि तानि तीर्थानि सागरे ॥ सागरे सर्वतीर्थानि पादे विप्रस्य दक्षिणे ॥ ४३ ॥ चैत्रमाहात्म्ये-तीर्थानि दक्षिणे पादे वेदास्तन्मुखमाश्रिताः ॥ सर्वाङ्गेष्वाश्रिता देवाः पूजितास्ते तदर्चया ॥ ४४ ॥ अव्यक्तरूपिणो विष्णोः स्वरूपं ब्राह्मणा भुवि ॥ नावमान्या नो विरोध्या कदाचिच्छुभमिच्छता ॥ ४५ ॥ ब्राह्मणो नाम किं तत्राह वज्रसूच्याम्–ब्राह्मणाःक्षत्त्रिया वैश्याः शूद्राश्चत्वारो वर्णास्तेषां वर्णानां ब्राह्मणो गुरुरिति वचनात् निरूपितं स्मृतिभिरुक्तं तत्र चोद्यमस्ति को वा ब्राह्मणो नाम किं जीवः १ किं देहः २ किं वर्णः ३ किं कर्म ४ किं जातिः ५ किं पांडित्यम् ६ किं धर्मः ७ किं धार्मिकयम् । इत्यष्टौ विकल्पाः प्रथमं जीवो ब्राह्मण इति चेत्तर्हि सर्वस्यापि जनस्य जीवस्यैकरूपत्वात्तस्माज्जीवो ब्राह्मणो न भवत्येव ॥ १ ॥ ४६ ॥ अन्यच्च देहो

हैं ॥ ४२ ॥ अब उत्तम ब्राह्मणोंकी महिमा कहतेहैं पृथ्वीमें जितने तीर्थ हैं वे सब तीर्थ समुद्रमें मिलते हैं समुद्रमें जितने तीर्थ हैं वे सब तीर्थ ब्राह्मणके दक्षिण पादमें हैं ॥ ४३ ॥ और चारों वेद उसके मुखमें हैं और अंगमें सब देवता आश्रय करके रहतेहैं इसवास्ते ब्राह्मणकी पूजा करनेसे सब देवोंकी पूजा होतीहै ॥ ४४ ॥ पृथ्वीमें ब्राह्मण जो हैं वह विष्णुरूप हैं इससे जिसको कल्याणकी इच्छा होवे उसने ब्राह्मणोंका अपमान नहीं करना द्वेष नहीं करना ॥४५॥ चारवर्णोंमें ब्राह्मण मुख्य है सब वर्णोंका गुरु है । अब ब्राह्मण नाम करके क्या जीवको ब्राह्मण कहना १ या देहको ब्राह्मण कहना२ या रंगको ब्राह्मण कहना ३ या कर्मको ब्राह्मण कहना ४ या जातिको ब्राह्मण कहना ५ या पांडित्यको ब्राह्मण कहना ६ या धर्मको ब्राह्मण कहना ७ क्या धार्मिक्यको ब्राह्मण कहना ८ ऐसे आठविकल्प हैं । तब कौनसे विकल्पसे ब्राह्मण कहना सो कहो अब पहिले जीवको जो ब्राह्मण कहना तब सब लोक प्राणिमात्रका जीव एकरूप है इससे जीव मात्रसे ब्राह्मण नहीं होताहै ॥ ४६ ॥ अब देहको जो ब्राह्मण कहना तो चांडाल पर्यंत मनुष्योंके देहका जरामरण देख पडताहै और देहको ब्राह्मण कहना तो मरणांतको मातादिकके देहको दहन करनेसे पुत्रादिकोंको ब्रह्महत्यादि दोष होवे इससे देह

ब्राह्मण इति चेत्तर्हि चांडालपर्यंतानां मनुष्याणां देहस्य जरामरणदर्शनात्तस्माद्देहो ब्राह्मणो न भवत्येव। पुनर्देहो ब्राह्मण इति चेत्तर्हि पितृमातृशरीरदहनात्पुत्राणां ब्रह्महत्यादिदोषसंभवः, तस्माद्देहो ब्राह्मणो न भवत्येव २ ॥ ४७ ॥ पुनर्वर्णो ब्राह्मण इति चेत्तर्हि ब्राह्मणः श्वेतवर्णः क्षत्त्रियो रक्तवर्णः वैश्यः पीतवर्णः शूद्रः कृष्णवर्णः इतिनियमे इदानीं ब्राह्मणवर्णदर्शनाभावात्संकरदर्शनात्। तस्माद्वर्णो ब्राह्मणो न भवत्येव ३ ॥ ४८ ॥ अन्यच्च। कर्म ब्राह्मण इति चेत्तर्हि ब्राह्मणः शतवर्षाणि जीवति क्षत्त्रियस्तदर्धं वैश्यस्तदर्धं शूद्रस्तदर्धमिति नियमाभावात् तस्मात्कर्म ब्राह्मणो न भवत्येव४॥४९॥अन्यच्च। जातिर्ब्राह्मण इति चेत्तर्हि अन्यजातौ समुद्भवा बहवो महर्षयःसंति ऋष्यश्रृंगो मृग्यांजातःकौशिकः कुशस्तंबात् गौतमः शशपृष्ठे, वाल्मीकिर्वल्मीक्यां, व्यासः कैवर्तकन्यायां पराशरश्चांडालिगर्भोत्पन्नः वसिष्ठो वेश्यायां विश्वामित्रः क्षत्त्रियायामगस्त्यः कलशाज्जातो मांडव्यो मांडुकिगर्भोत्पन्नः मातंगो मातंगीपुत्रः अनुचरो हस्तिनीगर्भोत्पन्नःभरद्वाजः शूद्रीगर्भोत्पन्नो नारदो दासीपुत्रः, इति श्रूयते

ब्राह्मण नहीं होताहै ॥ ४७ ॥ अब रंगसे जो ब्राह्मण कहना तो ब्राह्मणका श्वेत वर्ण क्षत्त्रियका रक्त वर्ण, वैश्यका पीतवर्ण, शूद्रका कृष्ण वर्ण ऐसा शास्त्रनिश्चय है। परंतु इस वखत शूद्रादिक श्वेत वर्ण हैं और ब्राह्मण कृष्णादिक वर्णहैं इससे ब्राह्मण नहीं होताहै ॥ ४८ ॥ अब कर्मसे ब्राह्मण कहना तो ब्राह्मण शतवर्षायु क्षत्त्रियका पचास वर्ष वैश्यका पचीस, शूद्रका बारह वर्ष ऐसा नियम है परंतु यह निश्चय हालमें नहीं है इससे आयुष्यरूप कर्मसे ब्राह्मण नहीं होताहै ॥ ४९ ॥ अब जातिसे जो ब्राह्मण कहना तो अन्यजातिमें उत्पन्न हुये बहुत ऋषीश्वर हैं ऋष्यश्रृंग ऋषी हरिणीसे पैदाभये, कौशिक ऋषि दर्भके गुच्छेसे पैदाभये गौतम ऋषि शशके पीठसे पैदाभये, वसिष्ठ ऋषि वेश्यासे वेदव्यास कैवर्तकन्यासे भरद्वाज शूद्रीसे विश्वामित्र क्षत्त्रियास्त्रीसे नारद दासीपुत्र

पुराणे तेषां जातिं विनापि सम्यग्ज्ञानविशेषाद्ब्राह्मण्यमत्यन्तं स्वीक्रियते तस्माज्जात्या ब्राह्मणो न भवत्येव ॥३५०॥ अन्यच्च पांडित्यं ब्राह्मण इति चेत्तर्हि क्षत्रियवैश्यशूद्रादयोऽपि पदपदार्थवाक्यप्रमाणविज्ञाना बहवः संति तस्मात्पांडित्येन ब्राह्मणो न भवत्येव ॥५१॥ अन्यच्च धर्माद्ब्राह्मण इति चेत्तर्हि क्षत्रियवैश्यशूद्रादय इष्टापूर्तादिधर्मकारिणो बहवः संति तस्माद्धर्माद्ब्राह्मणो न भवत्येव७॥५२॥ अन्यच्च धार्मिको ब्राह्मण इतिचेत्तर्हिक्षत्रियवैश्यशूद्रादयोऽपिकन्यादानगजदानगोदानहिरण्यदानमहिषीदानपृथ्वीदानादिदातारोबहवः संति तस्माद्धार्मिकोब्राह्मणोनभवत्येव ८॥५३॥ किन्तु करतलामलकमिव पश्यत्यपरोक्षे ब्रह्मकृतार्थतयाकामरागद्वेषादिरहितः शमदमादिसन्तोषमानमात्सर्यतृष्णासंमोहादिदुष्टार्थनिवृत्तः स एव ब्राह्मण इत्युच्यते न तु वेषधरः । तथाहि जन्मना जायते शूद्रः व्रतबंधाद्द्विजोत्तमः॥वेदाभ्यासी भवेद्विप्रो ब्रह्मज्ञो ब्राह्मणोभवेत्॥अत एव ब्रह्मविदेव ब्राह्मणो नान्योऽस्तीति निश्चयः ॥५४॥

ऐसे पुराणोंमें प्रसिद्धहैं । इनकी ब्राह्मणजातिमें उत्पत्ति नहीं है तथापि उत्तमज्ञानके लिये और कर्मप्राबल्यसे अत्यंत ब्राह्मणताको पाये हैं इसवास्ते केवल जातिसे ब्राह्मण होता नहीं है ॥ ३५० ॥ अब पंडिततासे जो ब्राह्मण होता होवे तो क्षत्रिय वैश्य शूद्रादिक पद पदार्थ वाक्य प्रमाणके जाननेवाले बहुत हैं । इससे पंडितपनेसे ब्राह्मण नहीं होता है ॥ ५१ ॥ अब धर्म ब्राह्मण होता होवे तो क्षत्रिय वैश्य शूद्रादिक यज्ञ (याग) वापी कूप तडागारामादिक धर्म बहुत करवाते हैं इससे धर्मसे ब्राह्मण नहीं होता है ॥ ५२ ॥ अब धार्मिक ब्राह्मण होता होवे तो अन्य वर्ण भी कन्यादान गजदान गोदान भूमिदान सुवर्ण दानादिक बहुत दान देनेवाले हैं इससे धार्मिक ब्राह्मण नहीं होता है ॥ ५३ ॥ तब ब्राह्मण कौन होता है सो कहतेहैं जो पहिले ब्राह्मण जातिमें जन्म लेके वेदोक्त संस्कारयुक्त होके स्वकर्म करता होवे शमदमादिगुणयुक्त काम क्रोध लोभ मोह मद मात्सर्य तृष्णा ईर्षा हिंसा निर्दयतादि रहित होके जो वेद वेदार्थ जानके उपनिषत्प्रतिपाद्य ब्रह्मको जाने नित्य उसका मनन

किंच–विप्रो वृक्षो मूलकं तस्य संध्या वेदाः शाखा धर्म्मकर्माणि पत्रम् ॥ तस्मान्मूलं यत्नतो रक्षणीयं छिन्ने मूले नैव पत्रं न शाखाः ॥ ५५ ॥ अथ चतुरशीति ज्ञातिगणने कस्यचित्पद्यम्–
च्यांतत्रयं चाष्टदशैव रांता डांताष्टकं सप्तदशैव बान्ताः ॥ यांताश्चलांताश्च नवैव ढांतकांतद्वयं गांगयुगं च वांतौ ॥ ५६ ॥णांतत्रयं तातयुगं रूमोसौ बुढा च यांताश्चतुराशि विप्राः ॥ वणिग्वराणां च तथैव संख्या श्रीमालिकाद्याः प्रवदंति तज्ज्ञाः ५७ विप्राणांवणिगादीनां भेदाः संति ह्यनेकधा ॥ तेषां विस्तरतोवक्तुं माहात्म्यं चात्र न क्षमः ॥५८॥ एके तु ब्राह्मणाः प्रोक्ताः किंकिं ब्राह्मणलक्षणम्॥एतदिच्छामि विज्ञातुं तन्मे कथय सुव्रत ५९ सत्यं ब्रह्म तपो ब्रह्म ब्रह्म इंद्रियनिग्रहः ॥ सर्वभूतदया ब्रह्म एतद्ब्राह्मणलक्षणम् ॥३६०॥ शूद्रोऽपिशीलसंपन्नो गुणवान्ब्राह्मणो मतः ॥ ब्राह्मणोऽपि क्रियाहीनः शूद्रादप्यधमो भवेत् ॥६१॥ सर्वजातिषु चांडालाः सर्वज्ञातिषु ब्राह्मणाः ॥ ब्राह्मणेष्वपि चांडालश्चांडालेष्वपि ब्राह्मणः ॥ ६२ ॥ ब्राह्मणा ब्रह्म-

करे सो ब्राह्मज्ञ ब्राह्मण दूसरा नहीं होता है ॥ ५४ ॥ और ब्राह्मण जो है वह वृक्षरूप है वो वृक्षका मूल संध्या है चार वेद उसकी शाखा हैं धर्म कर्म उसके पत्र हैं मोक्ष उसका फलहै इसवास्ते बडे प्रयत्नसे मूलका रक्षण करना मूलनाश पाया तो शाखापत्र फल सबोंकी प्राप्ति कहांसे होगी इसवास्ते ब्राह्मणने त्रिकाल संध्या अवश्य करना ॥५५॥ इन तीन श्लोकोंमें ब्राह्मण और बनियोंके नाम हैं सो चक्रमें स्पष्ट लिखे हैं चक्र ग्रंथके अंतमें लिखेहैं ॥ ५६ ॥ ५७ ॥ ५८ ॥ कौन कौन ब्राह्मण और क्या क्या लक्षण सो कहो॥५९॥ उत्तम एक सत्य ब्रह्म एक तप ब्रह्म, एक इंद्रियजय ब्रह्म, एक सर्वभूतदया ब्रह्म यह चार पदार्थ जिसने पैदा किये वह ब्राह्मणका लक्षण पूर्ण जानना ॥३६०॥ शूद्र होके शील गुण संपन्न होवे तो ब्राह्मणको वह मान्य है और ब्राह्मण स्वकर्मभ्रष्ट है तो शूद्रसे भी अधम होताहै ॥६१॥ सब जातिमें ब्राह्मण और सब जातिमें चांडाल हैं। ब्राह्मणोंमें भी कर्मयोगसे चांडाल हैं।और चांडालोंमे कर्मयोगसे ब्राह्मण हैं ॥ ६२ ॥ इसवास्ते ब्राह्मणने अपना स्वधर्म पालन करना

धर्मेण यथा शिल्पेन शिल्पकः ॥ अन्यथा नाममात्रं स्यादिन्द्रगोपककीटवत् ॥ ६३ ॥ अव्रताश्च दुराचारा यत्र भिक्षाचरा द्विजाः ॥ तं ग्रामं दण्डयेद्राजा चौराभयप्रदायकम् ॥ ६४ ॥ ऋष्यशृङ्गः शुको व्यासो वसिष्ठोऽगस्तिरेव च ॥ कौशिको गौतमो द्रोणो विश्वामित्रादयः परे ॥ ६५ ॥ विप्रजातिकुलाभावेऽप्येते तावद्द्विजोत्तमाः ॥ तस्माद्वो ब्राह्मणाः सर्वे शृण्वंतु वचनं मम ॥ ६६ ॥ यूय तु ब्रह्मजातिस्थाः स्वधर्मपरिपालकाः ॥ भवेयुर्यदि तत्रैव चोत्तमोत्तमता भवेत् ॥ ६७ ॥ गीता—यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ॥ न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥ ६८ ॥

इति श्रीज्योतिर्वित्कुलावतंसवेंकटरामात्मजहरिकृष्णविनिर्मिते बृहज्ज्यो मि० पो० ब्रा० मार्तंडाध्याये परिभाषा प्र०ना०प्र०समाप्तम् ॥

स्वधर्म बिना नामधारक जानना ॥६३॥ जिस ग्राममें दुराचारी अधर्मी ब्राह्मण भिक्षा लेके निर्वाह करतेहैं वह ग्राम चोरलोकोंको आश्रय देनेवालाहै इसवास्ते राजाने उस ग्रामलोकोंको अवश्य दण्डदेनायोग्य है॥६४॥ऋष्यशृंगादिक जो ऋषिहैं उनकी उत्पत्ति देखो तो ब्राह्मण जाति विना हीनवर्ण पशुपक्ष्यादिक योनिसेहैं परंतु (तपसा ब्राह्मणा जातास्तस्माज्जातिरकारणम्)यह शास्त्ररीतिसे तपोबलसे ब्राह्मणकुलमें नहींथे तथापि ब्राह्मणोत्तम होगये ॥ ६५ ॥ इस वास्ते हे ब्राह्मणो ! तुम मेरा सब वचन श्रवण करो ॥६६॥ तुम तो ब्राह्मणजातिमें पैदाभयेहो और जो स्वधर्मका परिपालन करोगे तो उत्तमोत्तम होवोगे ॥ ६७ ॥ और जो स्वधर्मका त्याग करोगे तो क्या फल होवेगा सोगीतामें कहाहै जो पुरुष शास्त्रविधि जो अपना वर्णाश्रमधर्म उसको छोडके अपनी इच्छाप्रमाण अन्यवर्णका व्यापार करके संसारमें निर्वाह करेगा तो पहिले लाभसरीखा दीखेगा परन्तु आगे इसमें धनप्राप्ति और सुखप्राप्ति होनेकी नहीं और मरे बाद परमगतिकी प्राप्ति भी होनेकी नहीं ॥ ६८ ॥

इति ब्राह्मणोत्पत्तिमार्तण्डाध्याये परिभाषाप्रकरणं समाप्तम् ॥

अथौदीच्यसहस्रब्राह्मणोत्पत्तिमाह ॥ उक्तं पुराणसारसंग्रहे श्रीस्थलप्रकाशग्रंथे–शिष्या ऊचुः ॥ स्वामिन् श्रुता कथा दिव्या विस्मयानन्दकारिणी ॥ न वयं तृप्तिमापन्नास्तथापि च महामुने ॥ १ ॥ वृत्ताध्ययनसंपन्ना द्विजवर्याः सुमेधसः ॥ कथमत्र समानीताः कुतः केन च नो वद ॥ २ ॥ सुमेधा उवाच ॥ न च प्रज्ञाभिमानेन ममायं वक्तुमुद्यमः ॥ किंतु वाडवभक्तिर्मां विवशं समचूचुदत् ॥ ३ ॥ गुर्जरे विषये चास्ति पुरं रत्नमनोहरम् ॥ पत्तनाख्यं हि मुनयः सरस्वतिनदीतटे ॥ ४ ॥ तत्रासीत्क्षात्रवंशस्थश्चामुंडाख्यो नृपोत्तमः ॥ अथै-कदा नदीतीरे चागतौ मुनिवेषकौ ॥ ५ ॥ राजबीजाभिधौ पुत्रौ पूर्वदेशस्य भूपतेः ॥ गंगायाः सलिलं स्कंधे वहमानौ क्षणात्तदा ॥ ६ ॥ सगर्भा वडवाराज्ञो जलपानार्थमागता ॥ जलं पीत्वा यदा त्रस्ता ताडिता रक्षकेण सा ॥ ७ ॥ ततस्तौ राजबीजौ तां दृष्ट्वा रक्षकमूचतुः ॥ सगर्भावडवा दुष्ट मिथ्या संताडिता त्वया ॥ ८ ॥ अस्यां यः पूर्णगर्भोऽस्ति स

अब औदीच्य, सहस्र ब्राह्मणोंकी उत्पत्ति कहतेहैं कि हे गुरु ! सिद्धपुर क्षेत्रका माहात्म्य हमने सुना परंतु तृप्ति नहीं भई ॥ १ ॥ इस वास्ते वा क्षेत्रमें सत्पात्र ब्राह्मणोंकी स्थापना किनोंने किया और कहांसे आये सो कहो ॥ २ ॥ तब गुरु सुमेधा ऋषिकहते हैं कि केवल ब्राह्मणकी भक्तिसे कहता हूं सो सुनो ॥ ३ ॥ गुजरात देशमें सरस्वती नदीके किनारेपर पाटणकरके बडा नगर है ॥ ४ ॥ वह पाटण शहर विक्रम संवत् ८०२ के सालमें चायडा वनराजाने बसाया बाद उसके वंशमें अठवें सोलंकी क्षत्रियवंशी चामुंडराजा राज्य करता भया संवत् १०५२ के सालमें इसका प्रमाण जैनमतके प्रबंध चिंतामणिमें कहा है अब एक दिन सरस्वतीके किनारे ऊपर मुनिका वेश धारण करके ॥ ५ ॥ पूर्व देशके राजाके पुत्र २ राज और बीज ऐसे नामके २ गंगाजलकी कावड लेके प्राप्तभये ॥ ६ ॥ इतनेमें चामुंडराजाकी घोडी गर्भवती हती सो जलपान कर-नेको आई जल पीके कावडको देखके चमकने लगा उस वखत रक्षक सईसने उस को लकडी मारी ॥ ७ ॥ तब वह राजबीज रक्षकको कहने लगे कि तुम व्यर्थ घोडी-को तो ताडना किया और॥८॥इसकी कुक्षीमें गर्भहै उसको नेत्रहीन अंधा किया तब

ददौ ॥ कृते शमीपुरं प्रोक्तं दूर्वं त्रेतायुगे तथा ॥ २४ ॥ कुशं च द्वापरे चैव कलौ जाल्योदरं स्मृतम् ॥ शमीदूर्वांकुशतरु जालैरपि समाकुलम् ॥ २५ ॥ अतो जाल्योदरं क्षेत्रं प्रथितं परमेष्ठिना ॥ अथोवाच शिवः प्रीतो बालखिल्यद्विजान्प्रति ॥ २६ ॥ शंकर उवाच ॥ ॥ यावच्चन्द्रश्च सूर्यश्च यावद्ब्रह्मांडगोलकम् ॥ तावत्तिष्ठतु तत्स्थानं बालखिल्याश्रमं द्विजाः ॥ २७ ॥ इत्युक्तवति देवेशे संजातं नगरं महत् ॥ स्वं स्वं तत्राश्रमं चक्रुर्बालखिल्या महर्षयः ॥ २८ ॥ निवासं कृतवंतश्च सच्छूद्राश्च तदाश्रमे ॥ शुश्रूषां परमां चक्रुः पासयंतो द्विजोत्तमान् ॥ २९ ॥ एवंविधं महत्स्थानं शंभुना स्थापित पुरा ॥ हिताय बालखिल्यानां सच्छूद्राणां तथैव च ॥ १३० ॥ सच्छूद्राणां समुत्पत्तिं यः शृणोति द्विजोत्तमः ॥ सर्वान् कामानवाप्नोति संततेर्वृद्धिमुत्तमाम् ॥ १३१ ॥

इति बालखिल्यभेदवर्णनं नामैकादशप्रकरणम् ॥ ११ ॥

इति पंचद्रविडमध्ये गुर्जरसंप्रदायः ॥

सत्ययुगमें उसका नाम शमीपुर था । कारण उस बखत वहां शमीके वृक्ष बहुत थे । त्रेतायुगमें दूर्वापुर, द्वापरमें कुशपुर, और कलियुगमें शमीदूर्वा और कुश यह तीनोंसे जालसरीखी पृथ्वी व्याप्त हैं ॥ २३-२५ ॥ इसवास्ते जाल्योदर नाम ब्रह्माने रखा । अब शिव बालखिल्य ब्राह्मणोंको कहते हैं कि ॥ २६ ॥ यावत् कालपर्यंत चन्द्रसूर्यका प्रकाश ब्रह्माण्डगोलमें है वहांतक यह बालखिल्य ऋषियोंका आश्रम प्रख्यात रहै ऐसा कहके शिव गये ॥ २७ ॥ बाद वह नगर बडा वृद्धिंगत भया । सब ऋषि उसमें अपने अपने आश्रम बनायके ॥ २८ ॥ निवास करते भये । सच्छूद्र झारोले बानिये भी उनके आश्रममें रहके उन ब्राह्मणोंकी सेवा करते भये और वहां रहते भये ॥ २९ ॥ हे शौनक ! शिवजीने झारोले ब्राह्मण और बानियोंके लिये ऐसा बडा नगर स्थापन किया ॥ यह सच्छूद्रोंकी जो कोई उत्पत्ति श्रवण करेगा त उसकी सब कामना सिद्ध होवेगी और संततिकी वृद्धि होवेगी ॥ १३० ॥ १३१

इति ब्राह्मणोत्पत्ति भाषाटीकामें झारोळा ब्राह्मण झारोळे बनिये और जंबु ब्राह्मण गंगापुत्र ब्राह्मणोंकी उत्पत्ति वर्णन नाम ११ प्रकरण संपूर्ण भया ॥

अथ गुग्गुलीब्राह्मणोत्पत्तिप्रकरण १२.

अथ गुग्गुल्यबालखिल्यब्राह्मणोत्पत्तिमाह स्कांदे बालखिल्यखंडे द्वारकामाहात्म्ये च ॥ ॥ प्रह्लाद उवाच ॥ ॥ तत्र स्थितान् समाहूय ब्राह्मणान् मंत्रकोविदान् ॥ होमद्रव्यंसमानीय ततस्तीर्थं समाव्रजेत् ॥ १ ॥ ऋषय ऊचुः ॥ ॥ वसंति द्वारकायां ये ब्राह्मणा दैत्यसत्तम ॥ केनेह स्थापितास्ते वै विस्तरेण वदस्व नः ॥२॥ कुशस्थलीति या पूर्वं वेदधर्मविवर्जिता ॥ सनकाद्यैस्तु यत्रैव स्थीयते वायुरूपिभिः ॥ ३ ॥ अत्रिपुत्रो महाश्रेष्ठो यत्र देवैर्बहिष्कृतः ॥ तस्मिन्नानर्तविषये केऽत्र तिष्ठंति वाडवाः ॥ ४ ॥ श्रीप्रह्लाद उवाच ॥ शृणुध्व द्विजशार्दूला बालखिल्या इति श्रुताः ॥ ब्रह्मविष्णुशिवैश्चैव वरान् दत्त्वा महर्षयः ॥ ५ ॥ स्थापिता द्वारकायां च देवदेवेन विष्णुना ॥ स्वीयाश्रमविशुद्ध्यर्थं समिद्गुग्गुलुजुह्वकाः ॥ ६ ॥ सर्वपापविनिर्मुक्तास्तेन गुग्गुलिकाः स्मृताः ॥ केचिज्जालिगृहे रम्ये केचिद्भास्करसन्निधौ ॥ ७ ॥ त्रिषु स्थानेषु ते

अब द्वारकावासी गुग्गुली ब्राह्मणोंकी उत्पत्ति कहतेहैं, एक समयमें तीर्थयात्राके प्रसंगसे प्रह्लाद कहते थे कि हे ऋषीश्वरो ! मंत्रके जाननेवाले द्वारकावासी ब्राह्मणोंको बुलायके होम पदार्थ लाके होम करके बाद तीर्थ यात्रा करनेको जाना॥१॥ ऋषि पूछते भये हे प्रह्लाद ! द्वारकामें जा गुग्गुली ब्राह्मण हैं सो किनोंने स्थापन किये हैं सो कहा ॥२॥ द्वारका पहिले वेदधर्मरहित थी सनकादिक वायुरूप करके रहते थे ॥ ३ ॥ जहां दैत्योंने दुर्वासा ऋषीका बहिष्कार किया है उस आनर्त देशमें ब्राह्मण कैसे रहते हैं सो कहो ॥ ४ ॥ प्रह्लाद कहने लगे हे ऋषीश्वरो ! श्रवण करो, बालखिल्य नाम करके विख्यात जो महर्षि उनको ब्रह्मा विष्णु शिव इन्होंने वरदान देके ॥ ५ ॥ और श्रीकृष्णने अपनी स्थानकी शुद्धिके अर्थ समिधा गुग्गुलुके होमकरनेवाले ब्राह्मण द्वारकामें स्थापन किये ॥ ६ ॥ गुग्गुलुहोम करनेसे सर्व पापसे मुक्त होगये इसवास्ते उन ब्राह्मणोंका नाम गुग्गुली ब्राह्मण भया अब अठासी हजार बालखिल्य ऋषि जो थे, उनमेंसे कितनेक जालिका क्षेत्रमें गये कितनेक भास्कर मंडलमें गये और यहां कितनेक आये ॥ ७ ॥ बाकी मोक्षका साधन करते भये। अब जो द्वारकामें गुग्गुली ब्राह्मणोंका अनुग्रह नहीं लिया

विप्राः शेषा मोक्षैकसाधकाः ॥ एषामनुग्रहमृते तीर्थयात्राफलं न हि ॥८॥ शौनक उवाच ॥ ॥ कथंविवाहिता गौरी देवदेवेन शंभुना ॥ कस्मिन्स्थाने विवाहोभूत्सूत तद्वद सांप्रतम् ॥ ॥९॥ सूत उवाच ॥ निजस्थान गते लिंगे देवैः प्रोक्तो महेश्वरः॥उत्तिष्ठ स्वाश्रमं गच्छ कैलासं पर्वतोत्तमम् ॥१०॥वयंच गत्वा सर्वे वै प्रार्थयामो हिमाचलम् ॥ तवार्थे सा समुत्पन्ना सर्वलक्षणलक्षिता ॥ ११ ॥ ॥ शिव उवाच ॥ नाहं तं द्रष्टुमिच्छामि प्रिया शून्यं नगोत्तमम् ॥ तस्मादानीयतामत्र देवकन्या नगोद्भवा ॥ १२ ॥ यदि तादृग्गुणोपेता कन्या तां वचसोद्वहेत् ॥ तत्कैलासं गमिष्यामि नान्यथैवात्र मे स्थितिः ॥१३॥ तच्छ्रुत्वा विबुधाः सर्वे गत्वा प्रोचुर्हिमालयम् ॥ हराय दीयतां कन्या तदर्थमिह चागताः ॥ १४ ॥ हिमालय उवाच ॥ ॥ सम्यगुक्तं भवद्भिश्च मेनकायास्तथा मतिः ॥ तस्मादानीयतामत्र सांप्रतं शशिशेखरः ॥ १५ ॥ विवाहः क्रियते येन विधिदृष्टेन कर्मणा ॥ तदाद्रिकथितं श्रुत्वा साधु साध्विति वादिनः ॥ १६ ॥

तो उनको यात्राफल नहीं होता है ॥ ८ ॥ सौनक पूछते हैं हे सूत ! शिवने पार्वती कैसी व्याही और विवाह कहां भया सो ॥ ९ ॥ सूत कहतेहैं हे शौनक ! शिवका जालिगृहमें लिंगपात होनेसे वह बैठरहे तब सब देवताओंने कहा कि हे शिव ! यहांसे उठके कैलासमें चलो ॥ १० ॥ और हम सब हिमालयके पास जायके प्रार्थना करते हैं और वहां जो कन्याहै सो आपके वास्ते उत्पन्न भई है ॥ ११ ॥ शिव कहनेलगे हे देवो ! स्त्री विना वो कैलासपर्वतकूं देखनेकी इच्छा करता नहींहूं इसवास्ते वो हिमालयकी कन्याकूं यहां लावो ॥ १२ ॥ वो कन्या जो योग्य होवेगी तो विवाह करके कैलासपै जाऊंगा नहीं तो यहांही रहूंगा ॥ १३ ॥ शिवका वचन सुनके सब देवताओंने हिमालयके पास जाके कहा कि हे हिमालय ! शिवको तुम कन्या देओ इसवास्ते यहां आये हैं ॥ १४ ॥ देवोंका वचन सुनके हिमालय कहनेलगे हे देवताओ ! तुमने जो कहा सो उत्तमहै और मेनकाकीभी इच्छा है इस वास्ते शिवको यहां लावो ॥ १५ ॥ विधिसे विवाह करेंगे

देवा ऊचुः ॥ ॥ ऋषीणामाश्रमे पुण्ये सांप्रतं वर्तते शिवः ॥
प्रोक्तोऽस्माभिर्हि बहुधा कैलासं पर्वतं प्रति ॥ १७ ॥ तेनोक्तं
न प्रियाहीनः प्रयास्येऽहं तु कुत्रचित्॥ तस्मात्कुरुष्व नो वाक्यं
तत्रैव व्रज माचिरम् ॥ १८ ॥ सुतामादाय चैतस्मै शिवाय
प्रतिपादय ॥ सुतामादाय भार्यां च तत्रैव सत्वरं ययौ ॥ १९ ॥
आनर्तदेशे मुख्या च स्वर्णनाशा महानदी ॥ तस्यास्तीरे जलं
पीत्वा क्षणार्धं विस्मयं गतः ॥ २० ॥ ॥ देवा ऊचुः ॥
प्रोत्थापय स्मरं देवं यदि वाञ्छसि तां प्रियाम् ॥ स्मरेणैव
विना सृष्टिः सुप्रिया न भविष्यति ॥ २१ ॥ शिव उवाच ॥
जीवान्वितं करिष्यामि कामदेवमहं पुनः ॥ सशरीरं न पश्या-
मि तेनास्य वदनं सुराः ॥२२॥ प्रेषयित्वा निजां भार्यां कृत्वा
मम विडंबनम् ॥ अशरीरोऽपि सत्त्वस्थो बलवान् वै भवि-
ष्यति ॥ २३ ॥ एवमुक्त्वा ततो विद्यां मृतसंजीवनीं हरः ॥
तदर्थमजपद्देवः प्रोत्तस्थौ च स्मरस्ततः ॥२४॥ ततश्च विष्णुः
प्रोवाच स्वयमेव पितामहम् ॥ गृह्योक्तेन विधानेन कर्म वैवा-

ऐसा हिमालयका वचन सुनके शाबास शाबास कहके ॥ १६ ॥ देव कहते हैं हे हिमालय ! इस बखत शिवजी ऋषियोंके आश्रममें हैं और उनको हमने कहा कि कैलासके ऊपर चलो ॥ १७ ॥ तब उन्होंने कहा कि स्त्रीविना यह स्थान छोडके कहीं भी जानेका नहीं ऐसा शिवका आग्रह है इसवास्ते हे हिमालय ! हमारी बात सुनो तो शीघ्रतासे कन्या लेके शिवके पास चलो ॥ १८ ॥ तब हिमालय स्त्रीसह वर्तमान कन्याको लेके शिवके पास आया ॥ १९ ॥ आनर्तदेशमें अर्णनाशानामकी नदीके तीरमें जायके जलपान करके क्षणमात्र आश्चर्य करता भया ॥ २० ॥ उस बखत सब देवता शिवको कहने लगे हे शिव ! जो पार्वतीका इच्छा करते हो तो जो कामदेव दग्धहुवा है उसको संजीवन करो । कामदेव विना उत्तम सृष्टि होनेकी नहीं ॥ २१ ॥ शिव कहते हैं हे देवताओ ! कामदेवको संजीवन करता हूं परन्तु सशरीर मुख देखनेका नहीं ॥ २२ ॥ अपनी स्त्रीको भेजके मेरा विडम्बन किया इसवास्ते शरीरविना भी कामदेव बलवान् होगा ॥ २३ ॥ ऐसा कहके मृतसंजीविनी विद्याका जप करते ही उसी बखत कामदेव उत्पन्न होता भया ॥ २४ ॥ पीछे विष्णु कहते हैं हे ब्रह्मा ! गृह्यसूत्रानुसारसे विवाह कर्म करो

हिकं कुरु ॥२५॥ अहं ब्रह्मा भविष्यामि कर्माध्यक्षः शतक्रतुः॥ मधुपर्कं समादाय मातृणां पुरतो ययौ ॥ २६ ॥ देवदेवोमहादेवो यत्र गौरी व्यवस्थिता ॥ उत्तरीयेण सञ्छाद्य वस्त्रेण व्रीडिता सती ॥ २७ ॥ करस्य ग्रहणे जाते शंकरस्य तया सह ॥ उभयोः स्वेदतो जाता सरित्पापप्रणाशिनी ॥ २८ ॥ तां दृष्ट्वा विस्मयाविष्टो देवदेवः पितामहः ॥ अचिन्तयत्स्वचित्ते तु तस्याः स्पृष्टेऽपि सत्करे ॥ २९ ॥ अत्रेऽय संस्थिता रुद्रसंगमे प्रथमेऽद्भुतम् ॥ आननं छादितं गौर्या चौत्तरीयेण लज्जया ॥ ३० ॥ कथं पश्याम्यहं तां च कीदृगूरूपं भविष्यति एवं चिंतयमानस्तु कामबाणप्रपीडितः ॥ ३१ ॥ वेदीमूलं ततः प्राप्तो दंपतीसहितस्तदा ॥ प्रारब्धं च ततः कर्मगृह्योक्तविधिना ततः ॥ ३२ ॥ विहितश्च ततो धूमो गौरीवक्त्रदिदृक्षया ॥ निमीलिते च नयने देवदेवेन शंभुना ॥ ३३ ॥ तदवस्थां च तां दृष्ट्वा वस्त्रमाकृष्य पद्मजः ॥ मुखमालोकयामास पूर्णेन्दुसदृशच्छवि ॥ ३४ ॥ दृष्टमात्रे मुखे तस्मिन वीर्यस्खलिरजायत ॥ यथा क्लिन्नाश्च सिकताः समंताद्द्विजसत्तमाः

॥ २५ ॥ मैं ब्रह्मदेव होता हूं तुम आचार्य हो ओ इंद्र कर्माध्यक्ष हो पीछे मधुपर्कपूजा लेके कुलदेवीके आगे जाते भये ॥ २६ ॥ जहां गौरी बैठी थी वहां शिव आये पार्वतीने लज्जालिये उत्तरीय वस्त्रसे मुख आच्छादित किया ॥ २७ ॥ शिवजीने पार्वतीका पाणिग्रहण किया उस बखत दोनोंके परिस्वेदसे नदी होती भई ॥ २८ ॥ वस्त्रके बाहरसे पार्वतीका स्वरूप देखके ब्रह्मा विस्मयाविष्ट होके पार्वतीके हस्तको स्पर्श किया तथापि विचार करनेलगा कि शिवके प्रथमसंग होनेसे उत्तरीयवस्त्रसे पार्वतीने तो लज्जासे मुख आच्छादित किया है ॥ २९-३१ ॥ तब पार्वतीको कैसे देखूंगा और रूप कैसा होगा ऐसा चिंतन करते करते कामबाणसे पीडित होयके ॥ ३२ ॥ दंपतीसहित वेदीके पास आयके कर्मका प्रारंभ करके गौरीके मुख देखनेके वास्ते धूम बहुत किया उस बखत शिवने धूमकी पीडासे नेत्र मीचलिये ॥ ३३ ॥ इतनेमें ब्रह्माने गौरीका वस्त्र खींचके मुखचन्द्र देखलिया ॥ ३४ ॥ मुखकूं देखते बरोबर ब्रह्माका वीर्य स्खलित भया तब ब्रह्माने वह

॥ ३५ ॥ ततश्च च्छादयामास सिकतास्ताः पितामहः ॥ तृतीयनयनेनाथ तां दृष्ट्वा शशिशेखरः ॥ ३६ ॥ मन्त्राणां च विनाशं वै दृष्ट्वा ध्यानेन शंकरः ॥ प्रहस्याथाब्रवीद्वाक्यं किमिदं च पितामह ॥ ३७ ॥ विकलत्वेन संयुक्तो भवान्न् जातश्च सांप्रतम् ॥ किमेतत्कारणं ब्रूहि तथ्यं लोकपितामह ॥ ३८ ॥ ब्रह्मोवाच ॥ ॥ त्वयि धूमाकुले देव गौरीवक्त्रं विलोकितम् ॥ क्षंतव्यश्चापराधो मे ततश्च लघुता मम ॥ ३९ ॥ ॥ शिव उवाच ॥ ॥ यस्मात्सत्यं त्वया प्रोक्तं ममाग्रे चतुरानन ॥ तस्मात्तवात्र तुष्टोऽहं कुरु कर्माधुनोचितम् ॥४०॥ एषा वीर्यच्युतिर्जाता संस्पृष्टा सिकताकणैः ॥ यावन्मात्रैर्भविष्यंति तावन्मात्रा मुनीश्वराः ॥ ४१ ॥ संज्ञया बालखिल्येति त्वत्सुता मम कर्मजाः ॥ स्मरार्तेन चतुर्वक्त्र सापराधेन ते स्थिताः ॥ ॥ ४२ ॥ बालखिल्या इति ख्याता भविष्यंति जगत्रये ॥ निजवीर्येण संयुक्ता यत्त्वया वालुकाः कृताः ॥४३॥ तस्माच्च बालखिल्याख्या भविष्यंति च ते सुताः ॥ तेषां संतानजा ये च धर्मिष्ठाः पुत्रपौत्रकाः ॥४४॥ भविष्यंति न संदेहो वेद-

वीर्य रेतीमें छिपाय दिया ॥ ३५ ॥ तब शिवजीने तीसरे नेत्रसे रेतीको देखके ॥ ३६ ॥ और मंत्र कर्मका विनाश हुवा देखके हास्य करके ब्रह्माको कहा ॥३७॥ हे ब्रह्मा ! इस वखत तुम विकल कैसे भये उसका कारण सत्य कहो ॥३८॥ ब्रह्मा कहनेलगे हे शिव ! तुमने धूम्रसे नेत्र बंद किये उसी वखत गौरीका मुख मैंने देखा सो अपराध मेरा क्षमा करना और मैं लघुत्वको पाया ॥३९॥ शिव कहनेलगे हे ब्रह्मन् ! मेरे सामने तुमने सत्य बात कही इसवास्ते मैं संतुष्ट हुआहूं सांप्रतकालं तुम कर्म शेष जो है सो पूर्ण करो ॥ ४० ॥ और ए जो वीर्य स्खलित भया उसमें जितने रेतीके कण मिश्रित भयेहैं उतने मुनीश्वर होवेंगे ॥ ४१ ॥ और बालखिल्य नामसे मेरे कर्मसे तुम्हारे पुत्र हैं हे ब्रह्मन् ! काम पीडाकी वखत तुम्हारे वीर्यसे ये पुत्र भये हैं ॥ ४२ ॥ और अपने वीर्यसे वालुका मिश्रित की इस वास्ते तीन लोकमें बालखिल्य नामसे विख्यात होवेंगे उनके गोत्रके लोग भी पुंण्यवान् होंगे ॥ ४३ ॥ ४४ ॥ वे सब वेद वेदांगोंमें पारंगत होवेंगे । ऐसा शिवजीने कहा ॥४५॥

वेदांगपारगाः ॥ उक्तमात्रे ततस्तस्मिन्न् शंकरेण महात्मना ॥ ॥ ४५ ॥ निष्क्रांता वालुकामध्यादंगुष्ठपरिमाणतः ॥ तस्माच्च बालखिल्येति ब्रुवते च मनीषिणः ॥ ४६ ॥ अष्टाशीतिसहस्राणि अष्टाविंशतिकं शतम् ॥ एतत्संख्या कृता तेन रुद्रेणैव महात्मना ॥ ४७ ॥ ॥ सूत उवाच ॥ ॥ कर्मांते पूर्णपात्रं तु करं कृत्वा पितामहः ॥ विष्णोर्निवेदयामास सहिरण्यं सदक्षिणम् ॥ ४८ ॥ तदोवाच स भगवान् विष्णुर्ब्रह्मासने स्थितः ॥ शतानि पंच मे देव पंचयुक्तानि शंकर ॥ ४९ ॥ प्रेषयस्व पुरीं रम्यां द्वारकां मम वल्लभाम् ॥ गोमती यत्र वहति नदी ब्रह्मह्रदोदका ॥ ५० ॥ यदालोकनमात्रेण सर्वपापक्षयो भवेत् ॥ आनीता मम भक्तैस्तु सनकाद्यैर्मुनीश्वरैः ॥ ५१ ॥ विश्वोपकरणार्थाय प्रेषिता ब्रह्मणा स्वयम् ॥ सर्वेषां जीवजातीनां कर्मपाशविनाशनी ॥ ५२ ॥ स्थितिं तत्र प्रदास्यामि तेषां मोक्षः करे स्थितः ॥ गार्हस्थ्येन च संयुक्ता अस्पृष्टा मम मायया ॥ ५३ ॥ ॥ बालखिल्या ऊचुः ॥ ॥ भगवन् वैष्णवी माया देवादीनां दुरासदा ॥ गृहस्थाश्रमयुक्तानां दुरा-

उसी वखत वालुकामेंसे अंगुष्ठप्रमाण वालखिल्य ऋषीश्वर प्रकट होतेभये इसवास्ते महान् लोक उनको बालखिल्य कहतेभये ॥ ४६ ॥ उनकी संख्या ८८१२८ अठासी हजार एकसौ अठाईस शिवजीने करीहै ॥ ४७ ॥ सूत कहने लगे कर्म समाप्तभये बाद ब्रह्माने पूर्णपात्र सुवर्णदक्षिणासहित विष्णुको दिया॥४८॥उस वखत ब्रह्मासन ऊपर बैठेहुए विष्णु कहते हैं हे शिव ! इन बालीखल्योंमेंसे पांचसौ पांच ऋषिनको कृष्णपालित जो द्वारका है वहां भेजो जहां ब्रह्मवीर्यसमुद्भव गोमती नदी बहती है ॥४९॥५०॥ जिसके दर्शनमात्रसे सर्व पाप क्षय होता है और मेरे जो भक्त सनकादिक उन्होंने लायेहैं ॥ ५१ ॥ जगत्के उपकारार्थ ब्रह्माने भेजी है । और जीवमात्रके कर्मपाशकी नाश करनेवाली है ॥ ५२ ॥ उस क्षेत्रमें उन ब्राह्मणोंको मैं स्थान देताहूं मोक्ष उनके हाथमें है॥५३॥तब वालखिल्य कहनेलगे हे विष्णु ! विष्णु माया देवताओंको जीतना कठिन है गृहस्थाश्रमयुक्तमनुष्योंको तो विष्णु दुराराध्य

राध्यो जनार्दनः ॥ ५४ ॥ ब्रह्मचर्येण संयुक्ता आशापाशवि-
वर्जिताः ॥ त्वदाज्ञया करिष्यामो यत्र तत्र च त्वं वस ॥
॥ ५५ ॥ स्थास्यामो गोमतीतीरे अयोनिगर्भसंभवाः ॥ राज-
प्रतिग्रहैर्दग्धा ब्राह्मणा ये जनार्दन ॥ ५६ ॥ प्रायश्चित्तमकु-
र्वाणा यांति सत्यमधोगतिम् ॥ एतस्मात्कारणाद्देव अजन्मानो-
वयं यतः ॥ ५७ ॥ मायादुःखान्विता देव तथा दुष्टः प्रति-
ग्रहः ॥ त्वन्माया बाधते नैव तथा कुरु जगत्पते ॥ ५८ ॥
॥ श्रीविष्णुरुवाच ॥ आधारेण गृहस्थस्य सर्वे तिष्ठंति
चाश्रमाः ॥ जतवो येन जीवंति सदा स्थावरजंगमाः ॥ ५९ ॥
आतिथ्येन सदा युक्ताः प्रतिग्रहपराङ्मुखाः ॥ वेदशास्त्रस-
मायुक्ताः स्वधर्मे परिपालकाः ॥ ६० ॥ शापानुग्रहसामर्थ्याः
परदारपराङ्मुखा ॥ लोभपाशविनिर्मुक्ताः कलिकाले विशे-
षतः ॥ ६१ ॥ तीर्थसेवां करिष्यंति भगवद्भक्तिसंयुक्ताः ॥
गमिष्यंति च ते नूनं सापराधा ममालयम् ॥ ६२ ॥ सूत
उवाच ॥ ॥ ततो ब्रह्मा हरिश्चैव हरः सर्वे दिवौकसः तेषां

ही हैं ॥ ५४ ॥ इसवास्ते हम ब्रह्मचर्यव्रत पालन करके आशापाश छोडके आपकी
आज्ञासे जहां आप वास करो वहां हम ॥ ५५ ॥ गोमतीके तट ऊपर रहेंगे और हे
जनार्दन ! जो ब्राह्मण राजप्रतिग्रह करके ॥ ५६ ॥ प्रायश्चित्त नहीं करते वे नर्क-
गतिकूं पाते हैं इसवास्ते हम अयोनिसंभव हैं ॥ ५७ ॥ मायासे दुःखी नहीं होनेके
और प्रतिग्रह तो दुष्ट है इसवास्ते हमको बाधक न होवे ऐसा करो ॥ ५८ ॥
श्रीकृष्ण कहने लगे हे ऋषिश्वरो ! गृहस्थाश्रमके आधारसे सब आश्रम रहते
हैं और सब स्थावर जंगम जीवोंका पालन होता है ॥ ५९ ॥ आतिथिका सेवन
करना वेदशास्त्रका अभ्यास करना प्रतिग्रहसे पराङ्मुख रहना ॥ ६० ॥ शाप
अनुग्रह करनेको समर्थ परस्त्रीभोगसे पराङ्मुख लोभपाशसे निर्मुक्त ऐसे कलि-
कालमें जो होवेगा ॥ ६१ ॥ और भगवद्भक्तिसहित तीर्थसेवा करेंगे वे
निश्चय करके मेरे परमधामको जावेंगे ॥ ६२ ॥ सूत कहने लगे हे ऋषीश्वरो !
तदन्तर ब्रह्मा विष्णु शिव उन्होंने देवतावोंको पलाश समिधा और गुग्गुल

संप्रेषयामास समिद्गुग्गुलुपाणिनाम् ॥ ६३ ॥ सपादभारमेकं तु गुग्गुलं प्रतिवत्सरम् ॥ होतव्यं बालखिल्यैस्तु सर्वकर्मक्षयाय च ॥ ६४ ॥ ऋषिभिः सोरठीसोमनाथस्य पुरतस्तथा ॥ गुग्गुल्वाक्तसमिद्भिस्तु हुतं त्र्यम्बक-मन्त्रतः ॥ देववाक्यानुसारेण समिद्गुग्गुलुजुह्वकाः ॥ तं च मायाविनिर्मुक्तास्तेन गुग्गुलिकाः स्मृताः ॥६५॥ जातमात्रं सुतं विप्राः स्नपयित्वा शुभे दिने ॥ निवेदयंति ते सर्वे त्रिविक्रमपदाग्रतः ॥ ६६ ॥ अथ निवेदनमंत्रः ॥ सापराधा हि ये देवा दैत्यदानवमानवाः ॥ सर्वे पापविनिर्मुक्ता उद्धृता हरिनामतः ॥ ॥ ६७ ॥ वेदस्मृतिपुराणैस्तु यतो ब्रह्मण्यता तव ॥ तस्मान्निवेदयंति स्म तवैवायं सुतो हरे ॥ ६८ ॥ ऋषयः ऊचुः ॥ अन्ये ये बालखिल्याश्च द्विजास्तत्रैव संस्थिताः ॥ ६९ ॥ सर्वेषामासुरश्रेष्ठ स्थानं कथय सत्वरम् ॥ प्रह्लाद उवाच ॥ ॥ मंदेहा नाम ये दैत्या वर्तते सूर्यशत्रवः ॥ ७० ॥ तेषां निग्रहणार्थाय प्रेषितास्ते तपोधनाः ॥ ७१ ॥ मंत्रपूतं जलं ते वै प्रक्षिपंति

हाथमें जिनके ऐसे बालखिल्य ऋषियोंके पास भेजा ॥ ६३ ॥ तब देवताओंने बालखिल्योंको कहा कि प्रतिवर्ष तुमने अपने कर्म क्षीण करनेके वास्ते सवाभार गुग्गुलका होम करना ॥ ६४ ॥ तब उन ऋषियोंने सोरठी सोमनाथके सामने या दुर्वासाके सामने त्र्यंबक मंत्रसे समिधा गुग्गुलका होम किया ॥ ६५ ॥ वे मायासे मुक्तभये और गुग्गुलका होम किया उससे गुग्गुली ब्राह्मण होते भये ॥ ६६ ॥ उन गुग्गुली ब्राह्मणोंमें सांप्रतकालमें जब पुत्र होता है उसी वखत उनकूं स्नान करवायके शुभ तिथिकूं प्रथम श्रीमद्द्वारकाधीशके चरणारविंदके पास निवेदन करते हैं ॥ ६७ ॥ उस वखत यह मंत्र पढते हैं हे भगवन्! देव दैत्य दानव मानव सब हरिनाम ग्रहण करनेसे सब पापोंसे मुक्त होते हैं ॥ ६८ ॥ और वेद तथा स्मृतियोंमें आपकी ब्रह्मण्यता वर्णन किये हैं, इसवास्ते यह ब्राह्मणका बालक आपको अर्पण करता हूं यह बालक आपका है ऋषि प्रश्न करते हैं कि ॥ ६९ ॥ और बाकी जो बालखिल्य हैं वे कहां रहैं सो कहो। प्रह्लाद कहते हैं मंदेह राक्षस जो सूर्यके शत्रु हैं ॥ ७० ॥ उनके नाशार्थ साठ हजार बालखिल्य सूर्यके पास भेजे ॥ ७१ ॥ तब वे ऋषि सब प्रातःकाल और सायंकाल

त्वहर्निशम् ॥ तेन तोयेन दैत्याश्च भस्मतां यांति नित्यशः ॥
॥ ७२ ॥ मंत्रस्नानं ततः कृत्वा वेदोक्तविधिना यतः॥ अष्टा-
दशसहस्राणि अष्टाविंशतिकं शतम् ॥ ७३ ॥ स्थिता जालि-
गृहे रम्ये शेषा मोक्षैकसाधकाः ॥ कैलासे पर्वते रम्ये जांबु-
मती नदीजले ॥ ७४ ॥ जंबुवृक्षस्य विश्रांतिस्तेषां मुक्तिः करे
स्थिता ॥ अद्यापि ते द्विजश्रेष्ठा वेदवेदांगपारगाः ॥ ७५ ॥
ततः कर्मसमाप्तिं च चकार चतुराननः ॥ कर्मणोऽते ततो वेद्यां
दक्षिणां शशिशेखरः ॥ ७६ ॥ ददौ कर्मसमृद्ध्यर्थं ब्रह्मा-
दीन्सुरसत्तमान् ॥ ऋषीणां चैव सर्वेषां मुनीनांच च विशेषतः
॥ ७७ ॥ शिव उवाच ॥ ॥ ब्रूहि ब्रह्मंश्चतुर्वक्त्र किं ते
मनसि वांछितम्॥ अदेयमपि दास्यामि संदेहं मा करिष्यथ ॥
॥ ७८ ॥ ब्रह्मोवाच ॥ ॥ य एते भवता सृष्टा मम वी-
र्यान्महेश्वर ॥ आवयोर्नास्ति सन्देहस्ते पुत्रास्त्रिपुरान्तक॥
॥ ७९ ॥ तेषां हिताय सर्वेषां ज्ञानं तस्मात्प्रयच्छताम् ॥ यथा
ममापि संदेहो व्याख्याने जायते यदा ॥ ८० ॥ विनाशयंतु
ते सर्वे तव देव प्रसादतः ॥ एतां मे दक्षिणां देहि यदि तुष्टो-

मन्त्रित जलका प्रोक्षण करते भये ॥ उस जलके प्रतापसे वे दैत्य नित्य भस्म होते हैं ॥ ७२ ॥ ऋषि सब नित्य मन्त्र स्नान करते हैं। पूर्वोक्त बालखिल्योंमेंसे अठारह हजार एकसौ अट्ठाईस १८१२८ ब्राह्मण ॥ ७३ ॥ जालिगृहमें रहे वे शारोले ब्राह्मण भये बाकीके मोक्ष साधक भये ॥ ७४ ॥ कितनेक ब्राह्मण जंबुनदीके तटपै गये वे अद्यापि वेदवेदांगपारंगत हैं ॥ ७५ ॥ उस पीछे ब्रह्माने कर्म समाप्त किया तब शिवजीने सबोंको दक्षिणा देके कहा ॥ ७६ ॥ ७७ ॥ शिवजी बोले हे ब्रह्मा ! इच्छित वरदान मांगो नहीं देने योग्य पदार्थ भी मैं दूंगा ॥ ॥ ७८ ॥ ब्रह्मा कहने लगे हे शिव ! मेरे वीर्यसे यह पुत्र तुमने उत्पन्न किये हैं और तुम्हारे हमारेमें सन्देह नहीं है यह तुम्हारे पुत्र हैं ॥ ७९ ॥ इन पुत्रोंके हितार्थ इनको ज्ञान देवो और मुझे भी व्याख्यानकी वखत जो सन्देह होवे ॥ ॥ ८० ॥ सो तुम्हारे अनुग्रहसे वह अज्ञान नाश करो इतनी दक्षिणा मुझे देवो

ऽसि शंकर ॥ ८१ ॥ ॥ श्रीशिव उवाच ॥ अष्टादश-सहस्राणि शतमेकं पितामह ॥ अष्टाविंशतिसंयुक्तं यत्त्वया प्रोक्तमेव मे ॥ ८२ ॥ स्थिता जालिगृहे रम्ये मम वाक्यानु-सारतः ॥ द्वारकायां स्थिता ये च गोमत्यां कृष्णसेवकाः ॥ ॥ ८३ ॥ आश्रिताः कृष्णदेवस्य सदा विप्रप्रियस्य च ॥ भविष्यति न संदेहः शेषा मोक्षैकसाधकाः ॥ ८४ ॥ ये गृहस्था भविष्यंति तान् शृणुष्व पितामह ॥ तेऽत्र सर्वे भवि-ष्यंति वेदवेदांगपारगाः ॥ ८५ ॥ तथैव च विशेषेण मम वाक्यान्न संशयः ॥ तथा चतुर्णां वेदानां शास्त्राणां चैव कृत्स्नशः ॥ ८६ ॥ तथा तंत्रोपवेदानां चतुर्णामपि पद्मज ॥ कलिकाले च संप्राते चतुर्थे सत्त्ववर्जिते ॥ ८७ ॥ मर्यादां नैव त्यक्ष्यंति श्रुतिस्मृतिपरायणाः॥तीर्थेष्वपि च सर्वेषु विच रिष्यंति भक्तितः ॥ ८८ ॥ एकभार्या भविष्यंति परदारपरा-ङ्मुखाः ॥ यौवनेऽपि चरिष्यंति यथा वृद्धा बहुश्रुताः ॥८९॥ विशेषेण च सर्वेषां भूपाला अर्थदाः खलु ॥ बहुवृत्तियुताश्चैव दातारो भोगसंयुताः ॥९०॥शापानुग्रहकर्तारो भविष्यंति सदा द्विजाः ॥ धर्मेण वर्तमानानां भूपालो यदि कर्हिचित् ॥ ९१ ॥

॥८१॥ शिव बोले हे ब्रह्मा ! अठारह हजार एकसौ अठाईस जो बालखिल्य तुमने कहे ॥८२॥ वे जालिगृह (झाल्योदरनगर) में मेरे वचनसे रहैं और जो द्वारकामें गोमती तटके ऊपर कृष्णके सेवक रहते हैं ॥ ८३ ॥ वे ब्राह्मण प्रिय कृष्ण देवके आश्रित हैं बाकी जो हैं वह मोक्षकी इच्छावाले हैं और गृहस्थाश्रमी वेदवेदांग पारंगत होवेंगे ॥ ८४ ॥ ८५ ॥ संपूर्ण शास्त्रकूं जानेंगे सत्त्वगुणवर्जित कलिकाल आयके प्राप्त होवेगा उसमें अपनी मर्यादा त्याग करनेके नहीं और श्रुति स्मृतिके मार्गमें तत्पर रहेंगे, सब तीर्थयात्रा करेंगे ॥ ८६ ॥ ८७ ॥ ८८ ॥ एक पत्नीव्रत रखेंगे परस्त्रीका सेवन करनेके नहीं तरुण अवस्थामें भी जैसे वृद्ध होवें ऐसे मार्गसे चलेंगे ॥ ८९ ॥ और बहुधा राजा लोग द्रव्य देवेंगे खान पान नित्य करेंगे शाप और अनुग्रह देनेको समर्थ होवेंगे और धर्ममार्गसे चलनेवाले गुग्गुली ब्राह्मणोंको जो कभी राजा लोग ॥ ९० ॥ ९१ ॥

द्वेषात्पीडां करिष्यंति प्रयास्यंति परिक्षयम् ॥ पंचक्रोशप्रमाणेन व्याप्तायां वै समंततः ॥ ९२ ॥ जातमात्रेश्च संप्राप्ता भविष्यंति न संशयः ॥ तस्यां पुण्यानि तीर्थानि सर्वपापहराणि च ॥ ९३ ॥ शमीभिर्दूर्वया दर्भैर्जातिभिर्वा हुतं यतः ॥ युगंयुगं प्रतिभवेद् द्वारवत्यां विशेषतः ॥ ९४ ॥ यद्यस्मिन् भवतां नाम तद्बाहुल्यं भविष्यति ॥ युगानुसारिणः सर्वे ह्युपचारा जनोद्भवाः ॥ ९५ ॥ विप्रादीनां भविष्यंति देवानामपि कृत्स्नशः ॥ अक्षया वाडवाश्चैव बालखिल्योद्भवं कुलम् ॥ ॥ ९६ ॥ भविष्यति न संदेहो मत्प्रसादादनामयम् ॥ विवादा ये भविष्यंति वेदयज्ञसमुद्भवाः ॥ ९७ ॥ अन्यदेशेषु ते सर्वे तत्र यास्यंति निर्णयम् ॥ तथा द्वारवती सम्यक्कलिकाले पितामह ॥ ९८ ॥ अष्टाविंशतियुक्तेन शतेनैव द्विजन्मनाम् ॥ निर्णयस्तत्र कर्तव्यः संप्राप्ते तु कृते युगे ॥ ९९ ॥ त्रेतायां षण्णवत्या च चतुष्षष्ट्या च द्वापरे ॥ द्वात्रिंशश्चैव गोत्राणि कलौ भावीन्यसंशयः ॥१००॥ एवं दत्त्वा वरांस्तस्मै ब्रह्मणे शशिशेखरः ॥ गौरीमादाय संहृष्टः कैलासं पर्वतं गतः ॥ ॥ १ ॥ बालखिल्यास्तु ते सर्वे स्थिता यत्र पितामहः ॥ पितामहस्तु तान्दृष्ट्वा ज्ञानप्राप्तान् द्विजांस्तदा ॥ २ ॥

द्वेषसे पीडा करेंगे तो उनका नाश होगा उस क्षेत्रका प्रमाण पांच कोशका है ॥ ९२ ॥ उसमें जो तीर्थ हैं वे पापको नाश करनेवाले हैं ॥ ९३ ॥ और शमी दूर्वा दर्भजातिके पदार्थोंसे होम किया सो युगयुगमें होता भया ॥९४॥ हे ब्रह्मा ! इसमें तुम्हारा नाम विख्यात होगा॥९५॥ और युगके अनुसारसे सब व्यवहार देवब्राह्मणादिकोंका होगा मेरे अनुग्रहसे बालाखिल्योंका कुलअक्षय्य होवेगा इसमें संदेहनहीं है॥९६॥ वैदिक यज्ञादि निमित्त जो विवाद होगा अन्यदेशमें उसको निर्णयके लिये यहां आवेंगे ॥९७॥९८॥और यह बालखिल्योंके गोत्र सत्ययुगमें १२८ त्रेतायुगमें ९६ द्वापर युगमें ४ कलियुगमें ३२ होवें ॥ ९९ ॥ १०० ॥ ऐसा वरदान देके शिव पार्वतीको लेके कैलासमें गये ॥ १ ॥ बालाखिल्य वहां रहतेभये ॥ २ ॥

संस्कारैर्योजयामास प्राग्गृहैः स्नेहसंयुतः ॥ गोदानं च ददौ तेभ्य एकैकं च पृथक् पृथक् ॥ ३ ॥ चत्वारिंशत्प्रमाणैश्च तथा चाष्टभिरेव च ॥ एतद्वः सर्वमाख्यातं यत्पृष्टोऽहं द्विजोत्तमाः ॥ ४ ॥ संगमो हि यथा जातो गौरीहरविवाहकः ॥ उत्पत्तिर्बालखिल्यानां सर्वपातकनाशिनी ॥ ५ ॥ तथा कृष्णवचनम् ॥ धेनूनां कोटिदानेन यत्पुण्यं लभते नरः ॥ द्वार्वत्यां गोमतीतीरे बालखिल्यप्रदर्शनात् ॥ ६ ॥ सर्वलोकेषु सर्वेभ्यो ह्यपूर्वोऽहं यथा प्रियः ॥ ब्राह्मणेषु च सर्वेषु बालखिल्यास्तथाधिकाः ॥ ७ ॥ तेषां वासो भवेदत्र गोमत्यां मम सन्निधौ ॥ तिष्ठाम्यहमतो नित्यं गुग्गुल्या यादवे कुले ॥ ॥ ८ ॥ पंचवर्षसहस्राणि कलौ जाते समुद्रजे ॥ तदाहं द्विजरूपेण स्थाने स्थाने चतुर्थके ॥ ९ ॥ ते तु तत्र स्थिता विप्राश्चतुर्वेदप्रवर्तकाः ॥ सन्ध्योपासनशीलास्ते भविष्यंति न संशयः ॥ ११० ॥ लोकानुद्धारयिष्यंति गोमतीतीरसंप्लुतान् ॥ हरिकृष्णः ॥ सांप्रतं गुग्गुलीयानामेक एव यजुर्गणः ॥ ॥ ११ ॥ शाखा माध्यंदिनी चास्ति श्रीहरिः कुलदेवता ॥

ब्रह्मा ज्ञानवंत उन ब्राह्मणोंको देखके संस्कार करते भये ॥ ३ ॥ और अडतालीस समूहको एक एक गोदान पृथक् पृथक् देतेभये हे ऋषीश्वरो ! जो आख्यान पूछा सो संपूर्ण वर्णन किया ॥ ४ ॥ जैसा गौरीहरका विवाह भया उस संगम निमित्तसे बालखिल्योंकी उत्पत्ति कही यह श्रवण मात्रसे सर्व पातकनाश करनेवाली है ॥५॥ हरिकृष्ण कहते हैं करोड गोदान करनेसे जो पुण्य होता है उतना पुण्य द्वारकामें गोमती तटके ऊपर गुग्गुली ब्राह्मणोंके दर्शन करनेसे होगा ॥ ६ ॥ हे लक्ष्मी ! जैसा मैं सबोंको प्रिय हूं वैसे यह गुग्गुली ब्राह्मण सब ब्राह्मणोंमें अधिक होवेंगे ॥ ७ ॥ उनका वास मेरे सामने गोमती तटपै होगा मैं भी यहां रहूंगा ॥ ८ ॥ कलियुगके पांच हजार वर्ष होजावेंगे तब मैं ब्राह्मण रूपसे इस स्थानमें रहूंगा ॥ ९ ॥ वे गुग्गुली ब्राह्मण द्वारकामें रहे चार वेदोंके प्रवर्तक स्नान संध्याशील होवेंगे ॥ ११० ॥ और गोमती यात्राके वास्ते जो लोग आवेंगे उनका उद्धार करेंगे और सांप्रतकालमें सब गुग्गुली ब्राह्मणोंका यजुर्वेद माध्यंदिनी शाखा है कुलदेवता श्रीद्वारकानाथ हैं ॥ ११ ॥ इनके अवटंक सत्ताईस हैं उनमेंसे

अथ गुग्गुली ब्राह्मणोंका अवटंक चक्र.

						१६	ठाकोर
१	मीन.	६	जोशी.	११	मांडियार	१७	चारणवोरठाकोर.
५	घायडा.	७	द्विवेदी.	१२	उपाध्याय	१८	घेघटाठाकोर,
३	पाढ.	८	भट.	१३	व्यास.	१९	कणवीगोरठाकोर
४	पाठक.	९	चुवान भट	१४	घटकाई	२०	होराठाकोर.
५	पुरोहित.	१०	पढियार.	१५	घेघटा.	२१	पिंडारियाठाकोर.

उपनामानि तेषां वै सप्तविंशतिसंख्यया ॥ १२ ॥ आसन्पुरा च तन्मध्ये नष्टानि द्वादशैव हि ॥ एषां भोजनसंबंधः कन्यासंबंध एव च ॥ १३ ॥ स्ववर्ग एव भवति नान्येनेति विनिश्चयः ॥ गुग्गुलीब्राह्मणानांवैचोत्पत्तिर्वर्णिता मया ॥ १४ ॥

इति श्रीब्राह्मणोत्पत्तिमार्तण्डे गुग्गुलीब्राह्मणोत्पत्तिवर्णनं नाम त्रयोदशं प्रकरणम् ॥ १३ ॥

बारह अवटंक नष्ट भये है बांकी पंद्रह अवटंक हालमें हैं उनमें ठाकोर छःप्रकारके हैं अवटंक चक्रमें स्पष्ट हैं गोत्रोंके नाम झारोलेकी उत्पत्तिमें पाहिले कहे हैं वहां देखना ॥ १२ ॥ इनका भोजन सम्बन्ध और विवाह सम्बन्ध ॥ १३ ॥ अपने गुग्गुलीवर्गमें होता है अन्यत्र नहीं ऐसी गुग्गुली ब्राह्मणोंकी उत्पत्ति मैंने वर्णन किया ॥ १४ ॥

इति गुग्गुली ब्राह्मणोत्पत्तिप्रकरण १३ संपूर्ण भया ॥

अथ नागर ब्राह्मणोत्पत्तिप्रकरणम् १४

अथ नागरब्राह्मणानामुत्पत्तिसारमाह स्कांदे नागरखंडे ॥ ऋषयः ऊचुः ॥ ॥ रहस्यं पूज्यते लिंगं कस्मादेतन्महामुने ॥ विशेषात्संपरित्यज्य शेषांगानि सुरासुरैः ॥१॥ सूत उवाच ॥ आनर्तविषये चास्तिवनं मुनिजनाश्रयम् ॥ कदाचित्समये

अब छःप्रकारके जो नागर ब्राह्मण और बनिये उनकी उत्पत्ति कहता हूं। उसमें पाहिले उनके जो कुलदेवता हाटकेश्वर महादेव हैं उनकी उत्पत्ति कहताहूं।शौनक प्रश्न करतेहैं हे सूत!शिवजीका सब अंग छोडके गुप्त जो लिंगस्थान उसकी पूजा देव दैत्य सब किसवास्ते करते हैं सो कहो॥१॥सूत कहते हैं आनर्त द्वारका देशके वनमें किसी

तत्र संप्राप्तस्त्रिपुरांतकः ॥ २ ॥ सतीवियोगसंभ्रांतो भ्रममाण इतस्ततः ॥ नग्नः कपालमादाय भिक्षार्थं प्रविवेश सः ॥ ३ ॥ अथ तद्रूपमालोक्य तापस्यः काममोहिताः ॥ शिवेन सह मार्गं वै बभ्रमुस्त्यक्तलौकिकाः ॥ ४ ॥ अथ ते मुनयो दृष्ट्वा तं तथा विगतांबरम् ॥ कामोद्भवकरं स्त्रीणां प्रोचुः कोपारुणेक्षणाः ॥ ५ ॥ यस्मात् क्रूरं कृ कर्म तस्माल्लिंगं पतत्विह ॥ एतस्मिन्नंतरे भूमौ लिंगं तस्य पपात ह ॥ ६ ॥ भित्त्वाथ धरणीपृष्ठं पातालं प्रविवेश ह ॥ अथ लिंगस्य पातेन ह्युत्पाता बहवोऽभवन् ॥ ७ ॥ इंद्रादयो भयत्रस्ता ब्रह्माणं शरणं ययुः ॥ ब्रह्मा तद्वचनं श्रुत्वा गत्वा चानर्तदेशके ॥ ॥ ८ ॥ देवैः सह स्तुतिं चक्रे भवस्य परमात्मनः ॥ संधारय पुनर्लिंगं स्वकीयं चन्द्रशेखर ॥ ९ ॥ नो चेज्जगत्त्रयं देव नूनं नाशमुपैष्यति ॥ ॥ शिव उवाच ॥ ॥ अद्य प्रभृति मे लिंगं यदि देवा द्विजातयः ॥ १० ॥ पूजयिष्यंति यत्नेन तदिदं धारयाम्यहम् ॥ ब्रह्मोवाच ॥ ॥ अहमादौ पूजयामि किं पुनर्देवब्राह्मणाः ॥ ११ ॥ ततः प्रविष्य पातालं देवैः सार्द्धं पिता-

समयमें पार्वतीके वियोगसे शिव नग्न होयके फिरते फिरते भिक्षाके वास्ते हाथमें कपालपात्र लेके मुनियोंके आश्रममें आये ॥ २ ॥ ३ ॥ वहां मुनियोंकी स्त्रियां नग्नशिवका स्वरूप देखके कामातुर हो लोकलज्जा छोडके शिवके पीछे २ फिरने लगीं ॥ ४ ॥ तब मुनियोंके उन नग्न पुरुषको देखके कोपसे कहा ॥ ५ ॥ जिसने हमारी स्त्रियोंकी भ्रष्टता किया उसका लिंगपात हो ऐसा शाप देते हुए शिवका लिंगपतन भया ॥ ६ ॥ सो पृथ्वीको भेदके पातालमें प्रवेश किया । शिवके लिंगपात होनेसे अनेक उत्पात होने लगे ॥ ७ ॥ उससे इंद्रादिक देवता भयभीत होके ब्रह्माके शरण गये ब्रह्माने कारण जानके उस आनर्त देशमें ॥ ८ ॥ इंद्रादिक सहवर्तमान आयके शिवकी स्तुति करके कहा कि हे शिव ! लिंगको पुनः धारण करो ॥ ९ ॥ नहीं तो तीन लोक नाश पावेंगे । शिव कहने लगे हे ब्रह्मन् ! आजसे सब देव और ब्राह्मण मेरे लिंगकी जो ॥ १० ॥ पूजा करेंगे तो लिंग धारण करता हूं । ब्रह्मा बोले—हे शिव ! पहिले मैं पूजा करता हूं फिर देव ब्राह्मण पूजा करेंगे उसमें क्या बडी बात है ऐसा कहके ॥ ११ ॥ देवताओंको साथ

महः ॥ स्वयमेवाकरोत्पूजां तस्य लिंगस्य भक्तितः ॥ १२ ॥
ततो हाटकमादाय तदाकारं तदात्मकम् ॥ कृत्वा लिंगं स्वयं
तत्र स्थापयित्वाब्रवीद्वचः ॥ १३ ॥ मया ह्यद्य त्विदं लिंगं
हाटकेन विनिर्मितम् ॥ ख्यातिं यास्यति सर्वत्र पाताले हाट-
केश्वरम् ॥ १४ ॥ अस्य पूजनयोगेन चतुर्वर्गफलं भवेत् ॥
इत्युक्त्वा स चतुर्वक्त्रः सहदेवैस्त्रिविष्टपम् ॥ १५ ॥ जगाम
सोऽपि कैलासं लिंगं धृत्वा महेश्वरः ॥ तस्मिन्नुत्पाटिते लिंगे
विनिष्क्रांतं रसातलात् ॥ १६ ॥ पवित्रं जाह्नवीतोयं सर्वपा-
पहरं नृणाम् ॥ यत्र वै स्नानमात्रेण हाटकेश्वरदर्शनात् ॥
॥ १७ ॥ चांडालत्वा निर्मुक्तस्त्रिशंकुर्नृपसत्तमः ॥ सशरीरो
दिवं यातो विश्वामित्रबलेन वै ॥ १८ ॥ अत्र वै स्नानयोगेन
हाटकेश्वरपूजनात् ॥ तत्क्षणाच्च दिवं यांति महापातकिनोऽपि
ये ॥ १९ ॥ तद्दृष्ट्वा महदाश्चर्यं दृष्ट्वा स्वर्गं प्रपूरितम् ॥ तत्क्षेत्रं
पूरयामास पांसुभिर्देवराट् तदा ॥ २० ॥ एवं नाशमनुप्राप्ते
तस्मिंस्तीर्थे स्थलोच्चये ॥ जाते तेनैव मार्गेण नागा यांति

लके पातालमें जाके भक्तिसे लिंगकी पूजा किया ॥ १२ ॥ फिर ब्रह्माने हाटक-
लेके शिवके लिंगसरीखा दूसरा लिंग बनायके पातालमें स्थापना किया और
कहा ॥ १३ ॥ मैंने आज हाटक कहते सुवर्णका लिंग बनायके स्थापन किया
है इसवास्ते जगत्‌में पातालमें हाटकेश्वर नामसे विख्यात होगा ॥ १४ ॥ इनकी
पूजा करनेसे धर्म अर्थ काम मोक्ष यह चारों पुरुषार्थ प्राप्त होवेंगे ऐसा कहके
देवसहवर्तमान ब्रह्मा स्वर्गमें गये ॥ १५ ॥ शिवने पातालमें प्रवेश किया हुवा जो
अपना लिंग था उसको निकालके धारण करके कैलास ऊपर गये वो लिंग निकालने
नीचेसे जलकी धारा निकली सो पृथ्वी ऊपर आई सो परमपवित्र जाह्नवी
गंगा जल भया जिसमें स्नान करनेसे और हाटकेश्वरके दर्शन करनेसे ॥ १६ ॥
॥ १७ ॥ त्रिशंकु राजा चांडालत्वसे मुक्त होके विश्वामित्रके तपोबलसे देह सहित
स्वर्गमें गया ॥ १८ ॥ उस तीर्थमें स्नान करनेसे और हाटकेश्वरके दर्शनसे महा-
पातकी होवे तथापि स्वर्गमें जानेलगे ॥ १९ ॥ ऐसा आश्चर्य देखा और
स्वर्ग सारा भरगया तब उस तीर्थ क्षेत्रको इंद्रने मृत्तिकासे भरदिया ॥ २० ॥ ऐसा
वह तीर्थ नाश पाया और मृत्तिकासे जगा ऊंची होगई वहां नागोंने एक बिल

धरातलम् ॥ २१ ॥ ततो नागबिलं ख्यातं सर्वस्मिन्वसुधातले ॥ यदेंद्रो वृत्रमाहत्य ब्रह्महत्यामुपेयिवान् ॥ २२ ॥ जगाम सत्वरं तत्र यत्र नागबिलं किल ॥ ततःप्रविश्यपातालं गंगातोयपरिप्लुतः ॥ २३ ॥ पूजनाद्धाटकेशस्य निर्मलत्वं गतः क्षणात् ॥ दृष्ट्वा तीर्थचमत्कारं शक्रो गत्वा हिमालयम् ॥२४॥ तत्पुत्रं रक्तशृंगाख्यं समानीय त्वरान्वितः ॥ तद्बिले स्थापयामास तेनागम्यमभूत्किल ॥ २५ ॥ रक्तशृङ्गोऽपि तस्थौ च व्याप्य नागबिलं तदा ॥ तस्योपरि सुमुख्यानि तीर्थान्यायतनानि च ॥२६॥ संजातानि मुनीनां च संजाताश्च तथाश्रमाः ॥ आनर्ताधिपतिर्भूपश्चमत्कार इति स्मृतः ॥ ॥ २७ ॥ हरिणीशापयोगेन कुष्ठव्याधिसमाकुलः ॥ बभ्राम सकलां पृथ्वीं श्रुत्वा ब्राह्मणवक्रतः ॥ २८ ॥ शंखतीर्थस्य माहात्म्यं हाटकेशसमीपतः ॥ चैत्रशुक्ले निराहारः चित्रासंस्थे निशाकरे ॥ २९ ॥ हीनांगश्चाधिकांगो वा योऽत्र स्नानं करि

गिरायके नाग पातालमें भूमि ऊपर आनेलगे ॥२१॥ उसीदिनसे स्थानका नागबिल नामविख्यात भया ॥ जब इंद्रने वृत्रासुरको मारा तब ब्रह्महत्या लगी ॥२२॥ उसके शुद्धिके वास्ते वह नागाबिलके रस्तेसे पातालमें जायके गंगामें स्नान करके ॥२३॥ हाटकेश्वरकी पूजा करतेही ब्रह्महत्या दोषसे शुद्ध होगया । तब वह आश्चर्य देखके इंद्रने मनमें विचार किया कि जैसा बडे दोषसे तत्काल मैं शुद्ध होगया वैसे अनेक लोग इस रस्तेमें जायके शुद्ध होवेंगे इसवास्ते यह रस्ता बन्द करना ऐसा विचार करके हिमालय पर्वत ऊपर जायके ॥ २४ ॥ उसका पुत्र रक्तशृंग पर्वत था उसको जलदी लायके उस बिलके ऊपर स्थापन करदिया उससे वह रस्ता बंद हुवा ॥२५॥ पीछे उस पर्वतके ऊपर मंदिर और तीर्थ भये ॥ २६ ॥ और ऋषियोंके आश्रम भये । एक दिन उस देशका राजा चमत्कार नाम करके था॥२७॥ उसकूं हरिणीके शापसे कुष्ठरोग पैदा भया उसकूं दूर करनेके वास्ते अनेक तीर्थ फिरा परंतु कुष्ठ नहीं गया इतनेमें रक्तशृंग पर्वतके ऊपर आया । वहां एक ब्राह्मणके मुखसे श्रवण किया कि ॥२८॥चैत्रशुक्ल चित्रानक्षत्रके दिन निराहार होयके यह हाटकेश्वरके नजदीक जो शंखतीर्थ है उसमें जो कोई स्नान करे तो वह सर्वरोगसे मुक्त होके बडा तेजस्वी होगा

ष्यति ॥ सुवर्णांगः स तेजस्वी भविष्यति न संशयः ॥ ३० ॥ ततः स मनसि ध्यात्वा कुष्ठव्याधिपरिक्षयम् ॥ स्नानं चक्रे यथान्यायं श्रद्धया परया युतः ॥ ३१ ॥ ततः कुष्ठविनिर्मुक्तो द्वादशार्कसमप्रभः ॥ निष्क्रांतः सलिलात्तस्माद्धर्षेण महतान्वितः ॥ ३२ ॥ ततः प्रणम्य तान् विप्रान् वाक्यमेतदुवाच ह ॥ प्रसादेन हि युष्माकं मुक्तोऽहं ब्राह्मणोत्तमाः ॥ ३३ ॥ एतद्राज्यं च देशश्च हस्त्यश्वादि तथापरम् ॥ यत्किंचिद्विद्यते मह्यं तद्गृह्णंतु द्विजोत्तमाः ॥ ३४ ॥ ममैवानुग्रहार्थाय तदा प्रोचुर्द्विजोत्तमाः ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ निष्परिग्रह धर्माणो वानप्रस्था वयं द्विजाः ॥ ३५ ॥ सद्यः प्रक्षालकाः किन्नो राज्येन विभवेन च ॥ तस्मात्त्वं गच्छ राजेन्द्र स्वधर्मेण प्रपालय ॥ ३६ ॥ ततः स भूपतिर्दुःखाज्जगाम स्वगृहं प्रति ॥ चकार पूर्ववद्राज्यं चिंतयानो दिवानिशि ॥ ३७ ॥ कथं तेषां द्विजेन्द्राणामुपकारो भविष्यति॥ मदीयैर्मम यैर्दत्तं गात्रमेतत्पुनर्नवम् ॥ ३८ ॥ तेऽपि सर्वे मुनिश्रेष्ठाः खचरत्वसमन्विताः ॥ तपः शक्त्या सदा यांति नानातीर्थेषु भक्तितः॥ ३९ ॥ उषित्वा

इसमें संशय नहीं है ॥२९॥ ३० ॥ ऐसा ऋषियोंका वचन सुनते चमत्कार राजाने अपना कुष्ठरोग दूर होनेके वास्ते श्रद्धासे शंख तीर्थमें स्नान किया ॥३१॥ तब कुष्ठ रोगसे मुक्त होके बाहर सूर्य सरीखी कांति जिनकी होगई ऐसा वह राजा बडे हर्षसे उस तीर्थमेंसे बाहर निकलके ॥३२॥ सब ब्राह्मणोंको नमस्कार करके कहने लगा हे ब्राह्मणो ! तुम्हारी कृपासे मैं रोगसे मुक्त हुवा ॥ ३३ ॥ इसवास्ते यह राज्य देश हाथी घोडे धन जो कुछ मेरे पास हैं सो सब आप ग्रहण करो ॥३४॥ तब ब्राह्मण कहने लगे हे राजा ! हम वानप्रस्थ धर्मी हैं परिग्रह करनेका नहीं हैं ॥ ३५ ॥ हमकूं राज्य वैभवसे क्या करना है इसवास्ते तुम जावो धर्मसे अपना राज्य पालन करो ॥ ३६ ॥ तब राजा बडा उदास होके अपने घरको गया राज्य करने लगा ॥ ३७ ॥ और रोज मनमें विचार करनेलगा कि यह ब्राह्मणोंका उपकार कैसे होवेगा जिन्होंने मेरा नवीन देह दिया है ॥ ३८ ॥ वे मुनि श्रेष्ठ सब अपनी तपःशक्तिसे आकाशमार्गसे नित्य तीर्थक्षेत्रोंमें भक्तिसे जाते हैं ॥ ३९ ॥ वहां

रजनीं तत्र द्विरात्रं वा पुनर्गृहान् ॥ समागच्छंति ते मत्तो दानं गृह्णन्ति नैव च ॥ ४० ॥ कदाचिदथ ते सर्वे कार्त्तिक्यां पुष्करत्रये ॥ गता विनिश्चयं कृत्वा पंचरात्रस्थितिं प्रति ॥ ॥ ४१ ॥ तस्माद्वह्निः स्वदारैस्तु रक्षितव्यः स्वशक्तितः ॥ एवं ते समयं कृत्वा गत्वा यावद् द्विजोत्तमाः ॥४२ ॥ तावद्भूपतिना ज्ञातं न कश्चित्तत्र तिष्ठिति ॥ तेषां मध्ये मुनींद्राणां द्विसप्तति-महात्मनाम् ॥ ४३ ॥ दमयन्तीति विख्याता राजपत्नी सुशोभना ॥ तामुवाच रहस्ये च व्रज त्वं चारुहासिनि ॥ ४४ ॥ हाटकेश्वरजे क्षेत्रे ममादेशोऽधुना ध्रुवम् ॥ तत्र तिष्ठिंति याः पत्न्यो मुनीनां भावितात्मनाम् ॥ ४५ ॥ भूषणानि विचित्राणि तासां यच्छ यथेच्छया ॥ न तासां पतयोऽस्माकं प्रकुर्वंति प्रतिग्रहम् ॥ ४६ ॥ कथंचिदपि सुश्रोणि लोभ्यमानापि भूरिशः ॥ स्त्रीणां भूषणजा चिंता सदा चैवाधिका भवेत् ॥ ॥ ४७ ॥ एष एव भवत्तेषामुपकारस्य संभवः ॥ सा तथेति प्रतिज्ञाय विचित्राभरणानि च ॥ ४८ ॥ गृहीत्वा हर्षसंयुक्ता ततस्तत्क्षेत्रमाययौ ॥ अथ तास्तां समालोक्य दिव्यभूषण-भूषिताम् ॥ ४९ ॥ दमयन्तीं समाधिस्थाश्चित्ते चिंतां प्रच-

एक वा दो रात्री रहके पुनः अपने घरको आते हैं परंतु मुझसे दान प्रतिग्रह नहीं करते ॥ ४० ॥ ऐसा विचार करते करते एक समयमें पुष्करक्षेत्रमें पांच दिन वहां रहना ऐसा निश्चय करके वे ऋषि पुष्करजीको गये ॥ ४१ ॥ अग्निका रक्षण स्त्रियोंके सुप्रत करके गये ॥ ४२ ॥ यह बात राजा चमत्कारने सुनी कि रक्तशृंग-पर्वतके ऊपर बहत्तर ऋषियोंमेंसे कोईभी नहीं है ॥ ४३ ॥ तब दमयंती राणीको कहनेलगा हे स्त्री ! ॥ ४४ ॥ तुम हाटकक्षेत्रमें जाओ वहां तपस्वी ब्राह्मणोंकी स्त्रियां रहती हैं ॥ ४५ ॥ उनको जैसी इच्छा होवे वस्त्र अलंकार जो चाहिये सो देवो । क्यों उनके पति दान प्रतिग्रह करते नहीं हैं ॥ ४६ ॥ इसवास्ते स्त्रियोंको वस्त्रालंकारकी प्रीति ज्यादा रहती है इस करके कोई रस्तेसे स्त्रियोंको लोभायमान करके तुम वस्त्रालंकार देवो वही उपकार होवेगा तब राणी तथास्तु कहके नाना प्रकारके वस्त्रालंकार लेके बडी हर्षयुक्त होके क्षेत्रमें आई तब ऋषिपत्नियां उन

क्रिरे ॥ धन्येयं भूपतेर्भार्या यैव भूषणभूषिता ॥५०॥ दमयंती नमश्चक्रे ताः सर्वा विधिपूर्वकम् ॥ दमयंत्युवाच ॥ ममायं भूषणस्तोम उद्दिश्य गरुडध्वजम् ॥ ५१ ॥ कल्पितोऽद्य दिने स्नात्वा समुपोष्य दिनं हरेः ॥ तस्माद् गृह्णंतु तापस्यो मया दत्तानि वाञ्छया॥५२॥ तदा सर्वाश्च तापस्यो भूषणार्थे समुत्सुकाः ॥ सस्पर्द्धा जगृहुस्तानि भूषणानि स्वयं द्विजाः ॥ ५३ ॥ एवं सा पञ्चदिवसं नित्यमेव ददाति च ॥ पंचरात्रे व्यतिक्रांते तृप्तास्तास्तापसप्रियाः ॥ ५४ ॥ तासां मध्ये चतस्रस्तु जगृहुर्भूषणानि न ॥ ५५ ॥ चतस्रस्तापस्य ऊचुः ॥ नास्माकं भूषणैः कार्यं भूषिता बालकैर्वयम् ॥ ५६ ॥ तस्माद्गच्छ निजं हर्म्यमर्थिभ्यः संप्रदीयताम् ॥ एवं संवदतीस्ता वै तया सार्द्धं द्विजोत्तमाः ॥ ५७ ॥ चत्वारः पतयः प्राप्ता एकैकस्याः पृथक् पृथक् ॥शुनःशेफोऽथ शाक्रेयो बौधो दांतश्चतुर्थकः ॥५८॥ वियन्मार्गे हि चत्वारः प्राप्य स्वाश्रममाययुः ॥ शेषाः सर्वे गतिभ्रंशं प्राप्य भूमागमाश्रिताः ॥५९ ॥ चत्वारो

वस्त्रालंकारोंसे शोभायमान राजपत्नीको देखके मनमें कहने लगीं कि धन्य है यह राजस्त्री ॥ ४७--५० ॥ तब दमयंती राणी सबोंको नमस्कार करके कहनेलगी कि हे तापसस्त्रियो ! मेरा जितना यह अलंकारसमूह है ॥ ५१ ॥ सो आज प्रबोधिनी एकादशीका उपोषण करके स्नान करके विष्णुके प्रीत्यर्थं दान करनेके लिये है इसवास्ते तुम्हारी जैसी इच्छा होवे वैसा ग्रहण करो ॥ ५२ ॥ ऐसा वचन सुनते सब तापस स्त्रियें अलंकार लेनेके वास्ते बडी उद्युक्त हुई । एक कहनेलगी इस अलंकारको मैं लूंगी दूसरी कहनेलगी मैं लूंगी ऐसी ईर्षा करते करते अलंकार लिये ॥ ५३ ॥ ऐसा पांच दिन तक राणी दान देती रही उन अलंकारोंसे तापसस्त्रियां तृप्त भई ॥ ५४ ॥ उनमेंसे चार स्त्रियां अलंकार न लेके कहने लगीं कि हे राणी ! हमको इन अलंकारोंसे क्या करना है हम बालकोंसे भूषित हैं ॥ ५५ ॥ इसवास्ते तुम अपने घरकूं जाव जो लोभी होवे उनको देवो ऐसी वे चार स्त्रियां राणीसे वात कररहीथीं ॥ ५६॥५७॥ इतनेमें उनके पति चारों ब्राह्मण शुनःशेफ, शाक्रेय,

ब्राह्मणा ऊचुः ॥ ॥ केनैवं पाप्मनास्माकमाश्रमोऽयं विडं-
बितः ॥ प्रदाय तापसीनां च भूषणान्यंबराणि च ॥ ६० ॥
पत्न्य ऊचुः ॥ ॥ चमत्कारस्य भूपस्य चैषा भार्या व्यव-
स्थिता ॥ अनया संप्रदत्तानि सर्वासां भूषणानि च ॥ ६१ ॥
अस्माकमपि संप्राप्ता गृहेयं नृपवल्लभा ॥ दातुं विभूषणान्येव
निषिद्धास्माभिरेव सा ॥ ६२ ॥ ॥ सूत उवाच ॥ ॥
तासां तद्वचनं श्रुत्वा ततस्ते कोपमूर्च्छिताः ॥ ऊचुश्च नृपते-
र्भार्यां तच्छापाय मुहुर्मुहुः ॥ ६३ ॥ ॥ चत्वारो ब्राह्मणा
ऊचुः ॥ द्विसप्ततिर्वयं पापे स्नानार्थं पुष्करे गताः ॥
कार्त्तिक्यां व्योममार्गेण मनोमारुतरंहसा ॥ ६४ ॥ चत्वारस्त
इमे प्राप्ता येषां दारैः प्रतिग्रहः ॥ न कृतस्तस्य भूपस्य कुभा-
र्यायाः कथंचन ॥ ६५ ॥ त्वया विडंबितो यस्मादाश्रमोऽयं
तपस्विनाम् । शिलारूपा मुनिश्रेष्ठास्तस्माद्भवतु कुत्सिता ॥
॥ ६६ ॥ अथ सा तत्क्षणादेव शिलारूपा बभूव ह ॥ ततः
स परिवारोऽस्यास्तद्दुःखेन समाकुलः ॥ ६७ ॥ राज्ञे संकथ-

बौद्ध, दांत यह ॥ ५८ ॥ आकाशमार्गसे अपने आश्रममें आये बाकी अडसठ ऋषि आकाशमार्ग भूलके पृथ्वी ऊपर चलने लगे ॥ ५९ ॥ अब वे चार ब्राह्मण अपने आश्रममें आके स्त्रियोंको पूछनेलगे कि किसने तापसी स्त्रियोंको वस्त्रालंकार देके हमारे आश्रमको दुःख दिया ॥ ६० ॥ तब उनकी स्त्रियां कहनेलगीं कि चमत्कार राजाकी यहां स्त्री है इसने वस्त्रालंकार सबोंको दिये हैं ॥ ६१ ॥ हमारे भी घरमें देनेको आयी थी परंतु हमने निषेध किया ॥ ६२ ॥ सूत कहनेलगे ऐसा स्त्रियोंका वचन सुनते चारों ब्राह्मण कोपायमान होके राणीको शाप देनेलगे ॥६३॥ हे दमयंति ! हम बहत्तर ब्राह्मण पुष्कर क्षेत्रमें कार्त्तिकी पूर्णिमाके स्नानवास्ते आकाशमार्गसे वायुवेगसे गये ॥६४॥ उसमें जिनकी स्त्रियोंने तेरा प्रतिग्रह नहीं किया वे हम चारजने तो यहां आये बाकी अडसठ ब्राह्मण कहां गये उनका पता नहीं है ॥६५॥ तुमने हमारे आश्रमको दूषण लगाया इसवास्ते तू शिला--पाषाणरूप होजा ॥ ६६ ॥ तब उसी बखत शिलारूप होगई । फिर राणीके साथ जो मनुष्य आये थे उन्होंने राजाको जायके सब वृत्तांत कहा ॥ ६७ ॥ राजा शापका वृत्तांत

यामास दमयंत्याः समुद्भवम् ॥ श्रुत्वा स पार्थिवस्तूर्णं वृत्तांतं शापजं तदा ॥ ६८ ॥ प्रसादनाय विप्राणां दुःखितः स वनं ययौ ॥ ततस्ते मुनयस्तूर्णं चत्वारोऽपि महीपतिम् ॥ ६९ ॥ ज्ञात्वा प्रसादनार्थाय भार्यार्थे समुपस्थितम् ॥ अग्नि-होत्राणि दारांश्च समादाय ततः परम् ॥ ७० ॥ कुरु-क्षेत्रं समाजग्मुः खमार्गेण द्रुतं तदा ॥ पार्थिवोऽपि न तान् दृष्ट्वा भार्याशोकपरिप्लुतः ॥ ७१ ॥ गत्वा शिला-समीपे तु विललापातिचित्रधा ॥ ततः कृत्वालयं तस्याः समंतात्सुमनोहरम् ॥ ७२ ॥ कर्पूरागरुधूपाद्यैर्वस्त्रकुंकुम-चंदनैः ॥ योजयामास तां भार्यां शिलारूपामपि स्थिताम् ॥ ७३ ॥ ततः कतिपयाहेषु गतेषु नृपतिर्ययौ ॥ स्वगृहं प्रति दुःखार्तः परिवारसमन्वितः ॥ ७४ ॥ पद्भ्यामेव समायाता अष्टषष्टिर्द्विजोत्तमाः ॥ परिश्रांता कृशांगाश्च धूलिधूसरिता-ननाः ॥ ७५ ॥ यावत्पश्यंति दाराः स्वा दिव्याभरणभूषिताः ॥ ततश्च विस्मयाविष्टाः पप्रच्छुस्ते क्षुधान्विताः ॥ ७६ ॥

सुनके उसी वखत दुःखी होयके ब्राह्मणोंकी प्रार्थना करनेके वास्ते वनमें आया ॥ ॥ ६८॥६९ ॥ [illegible] चारों ऋषि राजा अपनी स्त्रीका शाप दूर करानेके वास्ते प्रार्थना करनेको आताहै यह बात सुनके अपने आग्निहोत्रको और स्त्रियोंको लेके ॥ ७० ॥ आकाश मार्गसे कुरुक्षेत्रमें गये। राजा ऋषियोंको न देखके स्त्रीके शोकके लिये॥७१॥ शिलाके पास जाके अनेक तरहसे विलाप करने लगा, पीछे उस शिलारूपी स्त्रीके वास्ते चारों तरफ अच्छा एक मंदिर बनाया ॥ ७२ ॥ और कपूर बरास केशर चंदन अगरू धूप नैवेद्य वस्त्र आदि पदार्थोंसे वह शिलारूपी है तथापि नित्य उसको मिले ऐसा बंदोबस्त करदिया ॥ ७३ ॥ फिर कई एक दिन गये बाद राजा उदास होके अपने सेवकोंको साथ लेके घरको आया ॥ ७४ ॥ पीछे वे अडसठ ब्राह्मण पुष्करजीसे पांवरस्तेसे हाटकक्षेत्रमें आये। बहुत श्रमित हुवेहैं शरीर शुष्क हुवा है मुखके ऊपर रज बहुत पडी है ॥ ७५ ॥ और घरमें आयके देखते हैं तो स्वस्त्रियां दिव्य वस्त्रालंकार धारण करके खडी हैं । उनको देखते आश्चर्य करके क्षुधातुर हुवे वह पूछनेलगे॥ ७६ ॥ हे पापिनी स्त्रियो ! यह क्या किया शरीरके

किमिदं किमिदं पापा विरुद्धं विहितं वपुः ॥ कथं प्राप्तानि वस्त्राणि भूषणान्यम्बराणि च ॥ ७७ ॥ नूनमस्मद्गतेर्भ्रंशः खे जातो नान्यथा भवेत् ॥ अथातः सर्ववृत्तांतमूचुस्तापसयोषितः ॥७८॥ तच्छ्रुत्वा मुनयः क्रुद्धा ज्ञात्वा राजप्रतिग्रहम् ॥ ततो भूपस्य राष्ट्रस्य नाशार्थं जगृहुर्जलम् ॥ ७९ ॥ अनेन पाप्मनास्माकं कुभूपेन विनाशिता ॥ खे गतिर्लोभयित्वा तु पत्न्योऽस्माकं विभूषणैः ॥ ८० ॥ एवं ते मुनयो यावच्छापं तस्य महीपतेः ॥ प्रयच्छंति च तास्तावदूचुर्भार्या रुषान्विताः ॥ ८१ ॥ न देयो भूपतेस्तस्य शापो ब्राह्मणसत्तमाः ॥ अस्मदीयवचस्तावच्छ्रोतव्यमविशंकितैः ॥ ८२ ॥ वयं सर्वा नरेंद्रस्य भार्यया समलंकृताः ॥ सुवस्त्रैर्भूषणैर्दिव्यैः श्रद्धापूतेन चेतसा ॥८३॥ वयं दारिद्र्यदोषेण सदा युष्मद्गृहे स्थिताः॥ कर्शिता न च संप्राप्तं सुखं मर्त्यसमुद्भवम् ॥ ८४ ॥ भूपालाद्भूमिमादाय वृत्तिं चैवाभिवांछिताम् ॥ ततः सौख्यं च वीक्षध्वं पुत्रपौत्रसमुद्भवम् ॥ ८५ ॥ न करिष्यथ चेद्वाक्यमेतदस्मदु-

ऊपर वस्त्रालंकार कहांसे प्राप्त भये ॥ ७७ ॥ निश्चय करके तुमने कुछ पाप किया है। उनके लिये आकाशगति हमारी भ्रष्ट हुई । तब इन स्त्रियोंने वृत्तांत कहा ॥ ७८ ॥ सो सुनते राजप्रतिग्रह बडा निंद्य जानके राजा का और राज्यका नाश करनेके वास्ते ऋषियोंने हाथोंमें जल लिया ॥ ७९ ॥ और कहनेलगे इस पापी राजाने हमारी स्त्रियोंको लोभित करके आकाशगमन नाश किया ॥ ८० ॥ ऐसे वे ऋषि जबतक राजाको शापदेनेको उद्यत भये उतनेमें उनकी स्त्रियां क्रोधायमान होके कहनेलगीं ॥८१॥ हे ब्राह्मणो ! तुमने राजाको शाप नहीं देना। शंका छोडके पहिले हमारा वचन सुनो ॥ ८२ ॥ हम सब राजपत्नीसी शोभायमान हुईं दिव्य वस्त्रालंकार श्रद्धाकरके दिये हैं ॥८३॥ तुम्हारे घरमें रहके दरिद्रतासे कभी भी मनुष्य देहका सुख भोग नहीं किया और देह कृशित भया ॥ ८४ ॥ इसवास्ते राजा के पाससे भूमी और इच्छित पदार्थ लेके फिर देखो पुत्रपौत्रादिकका सुख कैसा होता है ॥८५॥ और जो कभी हमारा वचन नहीं करनेके तो हम सब अपना प्राणत्याग

दीरितम् ॥ सर्वाः प्राणपरित्यागं करिष्यामो न संशयः ॥
॥ ८६ ॥ यूयं स्त्रीवधपापेन नरकं वै गमिष्यथ ॥ एवं ते
मुनयः श्रुत्वा तासां वाक्यानि तानि वै ॥ ८७ ॥ भूपृष्ठे तत्य-
जुस्तोयं शापार्थं यत्करैर्धृतम्॥ततस्तत्तोयनिर्दग्धस्तद्विभागः
क्षितेस्तदा ॥ ८८ ॥ ऊषरत्वमनुप्राप्तो ह्यद्यापि द्विजसत्तमाः ॥
ततस्ते ब्राह्मणाः सर्वे गतकोपा दधुर्मतिम् ॥ ८९ ॥ यज्ञक-
र्मसु गार्हस्थ्ये पुत्रपौत्रसमुद्भवे ॥ एतस्मिन्नंतरे राजा श्रुत्वा
शांतिं द्विजन्मनाम् ॥ ९० ॥ तत्रागत्य द्विजान्सर्वान्साष्टांगं
प्रणनाम ह ॥ युष्मदीयप्रसादेन संप्राप्तं जन्मनः फलम् ॥
॥ ९१ ॥ मया रोगविनाशेन तस्माद्ब्रूत करोमि किम् ॥
अष्टषष्टिब्राह्मणा ऊचुः ॥ ॥ भार्यया तव राजेंद्र वयं सर्वे-
प्रवासिनः ॥ ९२ ॥ नीताः कृतार्थतां दत्त्वा रत्नानि विवि
धानि च ॥ ९३ ॥ अवश्यं यदि ते श्रद्धा विद्यते दान-
संभवा ॥ क्षेत्रे वापि महापुण्ये कृत्वा देहि पुरोत्तमम् ॥९४॥
वसाम ससुखं यत्र पुत्रदारसमन्विताः॥आकर्ण्य राजा निरमा-
त्पुरं शक्रपुरोपमम् ॥ ९५ ॥ आयामव्यासतश्चैव क्रोशमात्रं

करेंगी ॥ ८६ ॥ तुम स्त्रीवध पापसे नरकमें जावोगे ऐसा स्त्रियोंका वचन सुनते
॥ ८७ ॥ शाप देनेके वास्ते जो हाथमें जल लियाथा सो भूमि ऊपर डाल दिया
तब वह जगह दग्धहुई ऊखरताको प्राप्तभई ॥८८॥ सो अद्यापि देखपडती है फिर
सब ब्राह्मण कोप छोडके यज्ञयाग गृहस्थाश्रम करनेकी इच्छा करनेलगे ॥ ८९ ॥
इतनेमें चमत्कार राजाने सुना कि ब्राह्मणोंने क्रोध त्याग कियाहै ॥ ९० ॥ तब
वहां आयके सब ब्राह्मणोंको नमस्कार करके कहने लगा कि आज जन्मका
फल प्राप्तभया ॥ ९१ ॥ इसवास्ते क्या आज्ञाहै सो कहो तब अडसठ ब्राह्मण
कहनेलगे हे राजा ! तेरी स्त्रीके लिये हम सब यहांके रहनेवाले भये ॥ ९२ ॥
और रत्नालंकार वस्त्रादिक देके कृतार्थ किये ॥९३॥ इसवास्ते आगे दानकरनेकी
तेरी श्रद्धा होवे तो इस क्षेत्रमें एक नगर बनायके दे ॥ ९४ ॥ जिसमें हम सुखसे
निवास करेंगे राजा चमत्कारने वो वचन सुनके इन्द्रलोकके तुल्य एक नगर
बनाया॥९५॥जिसकी लंबान और चौडान कोशभरकी है चारों तरफसे कोट बंधा है

महत्तमम् ॥ त्रिकचत्वरसंयुक्तं प्रासादपरिखान्वितम् ॥ ९६ ॥ कल्पयित्वा ततस्तत्र अष्टषष्टिगृहाणि च ॥ सुवर्णमणिमुक्तादिपदार्थैरपरैरपि ॥ ९७ ॥ पूरयित्वा नृपश्रेष्ठो ध्वजतोरणमंडितम् ॥ ब्राह्मणेभ्यः कुलीनेभ्यो गृहस्थेभ्यो विशेषतः ॥ ॥ ९८ ॥ श्रोत्रियेभ्यश्च दांतेभ्यः स तु श्रद्धासमन्वितः ॥ शास्त्रोक्तेन प्रकारेण प्रददौ नगरं शुभम् ॥ ९९ ॥ शंखतीर्थे स्थितो राजा समाहूय ततःसुतान् ॥ पुत्रान् पौत्रांस्तथाभृत्यान् वाक्यमेतदुवाच ह ॥१००॥ एतत्पुरं मया कृत्वा ब्राह्मणेभ्यो निवेदितम् ॥ भवद्भिर्मम वाक्येन रक्षणीयं प्रयत्नतः ॥१॥ यः पुनर्द्वेषसंयुक्तः संतापं च नयिष्यति ॥ वंशच्छेद समासाद्य गमिष्यति यमालयम् ॥ २ ॥ एवं स भूपतिः सर्वास्तानुक्त्वा तपसि स्थितः ॥ गते पंचशते वर्षे तुष्टः शंभुरुवाच तम् ॥ ॥ ३ ॥ अचलोऽहं भविष्यामि स्थाने तव महामते ॥ अचलेश्वर इत्येवं नाम्ना ख्यातो जगत्त्रये ॥ ४ ॥ एवं स भगवांस्तत्र सर्वदैव व्यवस्थितः ॥ अचलेश्वररूपेण चमत्कारपुरांतिके ॥ ५ ॥ तत्र कृष्णचतुर्दश्यां चैत्रमासे सदैव हि ॥ चमत्कार-

बाहरसे पानीकी खंदक है. अंदर तीन रस्ते और चार रस्ते इकट्ठे होते होवें ऐसा त्रिकचत्वर है॥९६॥उसमें अडसठ घरबनाये उसमें सुवर्ण रत्न वस्त्र खान पान पदार्थ भरके ध्वज तोरणादिकसे शोभायमान करके गृहस्थ कुलीन श्रोत्रिय जितेंद्रिय ब्राह्मणोंकूं श्रद्धासे शास्त्रविधिसे राजाने चमत्कारपुरका दान दिया ॥ ९७-९९ ॥ पीछे राजा शंख तीर्थके ऊपर बैठके अपने पुत्रपौत्रोंको बुलायके वचन कहनेलगा ॥ १०० ॥ कि यह चमत्कारपुर मैंने इस ब्राह्मणोंकूं दान दिया है. वास्ते मेरे वचनसे इनका तुमने वंशरक्षण करना ॥ १ ॥ और जो कभी ब्राह्मणोंको संताप देवेगा उसका वंशच्छेद होवेगा और यमलोकमें जावेगा ॥ २ ॥ ऐसा कहके राजा तप करनेको बैठा ! उसको पांच सौ वर्ष जब हुवे तब शिव प्रसन्न होयके कहनेलगे ॥ ३ ॥ हे राजा ! यह तेरी तपश्चर्याकी जगहमें अचलेश्वरनामसे मैं स्थिति करताहूं ऐसा कहके वहां रहे ॥ ४ ॥ वह चमत्कारपुरके पास ही है ॥ ५ ॥ चैत्रकृष्ण चतुर्दशीके दिन उस पुरकी जो कोई प्रदक्षिणा

पुरस्यैवं यः कुर्याच्च प्रदक्षिणाम् ॥ ६ ॥ जातिस्मरत्वमाप्नोति सर्वपापविवर्जितः ॥ ऋषयः ऊचुः ॥ ॥ चमत्कारपुरोत्पत्तिः श्रुता त्वत्तो महामते ॥ ७ ॥ तत्क्षेत्रस्य प्रमाणं यत्तदस्माकं प्रकीर्त्तय ॥ यानि तत्र च पुण्यानि तीर्थान्यायतनानि च ॥ ८ ॥ ॥ सूत उवाच ॥ ॥ पंचक्रोशप्रमाणेन क्षेत्रं ब्राह्मणसत्तमाः ॥ प्राच्यां तस्यां गयाशीर्षं पश्चिमेन हरेः पदम् ॥ ९ ॥ दक्षिणोत्तरयोश्चैव गोकर्णेश्वरसंज्ञितम् ॥ हाटकेश्वरसंज्ञं तु पूर्वमासीदद्द्विजोत्तमाः ॥ ११० ॥ तत्क्षेत्रं प्रथितं लोके सर्वपातकनाशनम् ॥ यतः प्रभृति विप्रेभ्यो दत्तं तेन महात्मना ॥ ११ ॥ चमत्कारेण तत्स्थानं नाम्ना ख्यातिं ततो गतम् ॥ यदा राज्ञा पुरं दत्तं भार्यां चिंतयता सदा ॥ १२ ॥ अथ ताः प्रोचुरन्योन्यं तापस्यस्तत्पुरस्थितम् ॥ तस्य भूपस्य सन्तोषं जनयंत्यो द्विजोत्तमाः ॥ १३ ॥ यदास्माकं गृहे वृद्धिः कदाचित्संभविष्यति ॥ तदग्रतश्चपश्चाच्च दमयंत्याः प्रपूजनम् ॥ १४ ॥ करिष्यामो न संदेहः सर्वकृत्येषु सर्वदा ॥ एनां दृष्ट्वा कुमारी या वेदीमध्ये गमिष्यति ॥१५॥ सा भवि-

करेगा वह सर्वपापोंसे मुक्त होके भूत भावी जन्मका ज्ञानवान् होवेगा ॥ ६ ॥ शौनक प्रश्न करते हैं हे मुने ! क्षेत्रका प्रमाण और वहां जो जो तीर्थ देवालय हों उनको कहो ॥ ७ ॥ ८ ॥ तब सूत कहने लगे हे ऋषीश्वरो ! उस क्षेत्रका पांच कोसका प्रमाण है। क्षेत्रके पूर्वमें गया शीर्ष है । पश्चिममें हरिपद ॥ ९ ॥ दक्षिणोत्तरमें गोकर्णेश्वर और हाटकेश्वर तो पहिले विराजते हैं ॥ ११० ॥ वह क्षेत्र जगतमें बडा पवित्र राजा चमत्कारने दान दिया ॥ ११ ॥ उस दिनसे चमत्कारपुर उसका नाम पडा । जिस बखत राजा अपनी दमयंती स्त्रीका स्मरण करता गया और पुरका दान दिया ॥ १२ ॥ तब सब ऋषिस्त्रियां राजाको सन्तोष करनेके वास्ते परस्पर कहने लगीं कि ॥ १३ ॥ हे स्त्रियो ! जिस बखत अपने घरोंमें वृद्धि विवाहादिक कार्य आवेगा तब कार्यके आरंभ और कार्य समाप्तिमें दमयंतीका पूजन करेंगे । इसमें सन्देह नहीं है ॥ १४ ॥ और विवाहकी बखत जो कन्या पहिले दमयंतीके दर्शन करके पीछे वेदीमें जावेगी ॥ १५ ॥ तो वो अपने पतिकूं प्राण-

ष्यत्यसन्देहात्पत्युः प्राणसमा सदा ॥ तस्मात्सर्वप्रयत्नेन कन्यायज्ञ उपस्थिते ॥ १६ ॥ दमयंती प्रहृष्टव्या पूजनीया विशेषतः ॥ सूत उवाच ॥ ॥ एवं तत्रपुरे तेन भूभुजा सुमहात्मना ॥ १७ ॥ अष्टषष्टिं च संस्थाप्य गोत्राणां निर्वृतिः कृता ॥ तेषामपि च चत्वारि गोत्राण्युरगजाद्भयात् ॥ १८ ॥ गतानि तत्र यत्र स्युस्तानि पूर्वोद्भवानि च ॥ चतुःषष्टिः स्थितास्तत्र पुरे शेषद्विजन्मनाम् ॥ १९ ॥ ऋषय ऊचुः ॥ कीदृङ्नागभयं तेषां येन तेऽपि गता विभो ॥ परित्यज्य निजस्थानमेतन्नो विस्तराद्वद ॥ १२० ॥ सूत उवाच ॥ आनर्ताधिपतिः पूर्वमासीन्नाम्ना प्रभंजनः ॥ ततस्तस्य सुतो जज्ञे प्राप्ते वयसि पश्चिमे ॥ २१ ॥ दैवज्ञात् स समाहूय कीदृक् पुत्रो भविष्यति ॥ इति पृष्टे तदा प्रोचुरयं सर्वविनाशकः ॥ २२ ॥ गंडांतेषु समुद्भूतस्तस्य शांतिर्विधीयताम् ॥ ततः स सत्वरं गत्वा चमत्कारपुरं नृपः ॥ २३ ॥ तत्र विप्रान् समावेश्य वृत्तांतो विनिवेदितः ततस्ते ब्राह्मणाः प्रोचुः

समान होवेगी । तस्मात् सब प्रयत्नसे विवाहमें ॥ १६ ॥ दमयंतीका दर्शन और पूजा अवश्य करना । उस दिनसे नागर ब्राह्मण बानियोंमें दमयंतीका पूजन होता है । सूत कहने लगे उस राजाने चमत्कारपुरमें ॥ १७ ॥ अडसठ गोत्र स्थापन किये उनमेंसे चार गोत्रोंके ब्राह्मण उनके पास जायके रहे । यह आठ नागर ब्राह्मणोंमें जो अष्टकुली ऊंच ब्राह्मण भये और चौंसठ ब्राह्मण उस नगरमें रहे ॥ ॥ १८ ॥ १९ ॥ तब ऋषि कहने लगे उनको नागभय कैसा भया सो विस्तारसे कहो और चमत्कार पुर ऐसा नाम कैसे भया जिस नगरके प्रतापसे नागर ऐसी संज्ञा ब्राह्मणोंकी भई ॥ १२० ॥ सूत कहने लगे आनर्त देशका एक प्रभंजन नामका राजा था उसको वृद्ध अवस्थामें पुत्र भया ॥ २१ ॥ तब ज्योतिःशास्त्रज्ञ ब्राह्मणोंको बुलायके पूछा कि यह पुत्र कैसा होवेगा तब ब्राह्मणोंने कहा कि सर्वका नाश करनेवाला होवेगा ॥ २२ ॥ गंडांत योगमें पैदा भया है उसकी शांति करो । तब राजाने जल्दीसे चमत्कारपुरमें आयके ॥ २३ ॥ ब्राह्मण सभामें लायके वृत्तांत कहा । तब ब्राह्मणोंने आपसमें विचार करके कहा कि ॥ २४ ॥

संमंत्र्याथ परस्परम् ॥ २४ ॥ हे राजन् प्रतिमासं वै करिष्या-
मोऽत्र शांतिकम् ॥ षोडशैवं वयं सर्वे तव पुत्रस्य वृद्धये
॥ २५ ॥ उपहाराः सदा प्रेष्यास्त्वया भक्त्या महीपते ॥
तथेत्युक्त्वा गतवति नृपे सर्वे द्विजातयः ॥ २६ ॥ शांतिकं
विधिवच्चक्रुश्चातुश्चारणसंज्ञकाः ॥ दिनेदिने तदा तस्मिन् महा
व्याधिरजायत ॥ २७ ॥ तत्पुत्रस्य विशेषेण तथैवाभिजनस्य
च ॥ तदा ते ब्राह्मणाः क्रुद्धा ग्रहान्शप्तुं समुद्यताः ॥ २८ ॥
तावद्वह्निरुवाचेदं दृश्यो भूत्वा द्विजोत्तमान् ॥ न चात्र दोषः
खेटानां यूयं ये षोडश द्विजाः ॥ २९ ॥ तेषां मध्ये स्थित-
श्चैकस्त्रिजातो ब्राह्मणाधमः ॥ तद्दोषेण न गृह्णंति हुतं द्रव्यं
ग्रहा इमे ॥ १३० ॥ तं त्यक्त्वा यदि कुर्वीत तदा शांतिर्भवि-
ष्यति ॥ त्रिजातस्य परीक्षार्थं शृण्वंतु द्विजसत्तमाः ॥ ३१ ॥
अत्र स्वेदजले विप्राः स्थिता ये षोडश द्विजाः ॥ ते स्नानं
चाद्य कुर्वंतु प्रविशुद्ध्यर्थमात्मनः ॥ ३२ ॥ एतेषां मध्यगो-
यश्च त्रिजातः संभविष्यति ॥ तस्य विस्फोटकैर्युक्तं स्नान-
स्यांगं भविष्यति ॥ ३३ ॥ ततस्ते ब्राह्मणाः सर्वे क्रमात्तत्र

हे राजन् ! हम सोलह ब्राह्मण दर महीने तेरे पुत्रकी वृद्धिके वास्ते शांति करेंगे ॥ २५ ॥ शांतिका साहित्य भेजना राजाने तथास्तु कहके घर जायके सामान भेज दिया ॥ २६ ॥ ब्राह्मण विधिसे शांतिकर्म करनेलगे परंतु पुत्रको और महलमें सब लोगोंको दिनदिन व्याधि बढता गया तब ब्राह्मण ग्रहोंको शाप देनेको तैयार भये ॥ २७–२८ ॥ इतनेमें अग्निने प्रत्यक्ष रूप धारण करके कहा कि यहां ग्रहोंका दोष नहीं है तुम सोलह ब्राह्मणोंमें ॥ २९ ॥ एक त्रिजात नामक ब्राह्मण जो है वह वडा नीच है उसके दोषसे होमकी आहुति ग्रह लेते नहीं हैं ॥ १३० ॥ इस- वास्ते उस ब्राह्मणको छोडके कर्म करोगे तो शांति होवेगी त्रिजात ब्राह्मण नीच कैसे हैं उसकी परीक्षा सुनो ॥ ३१ ॥ इस जलके बीचमें तुम सोलह ब्राह्मण स्नान करो अपनी शुद्धिके वास्ते ॥ ३२ ॥ पीछे इसमें जो त्रिजात होवेगा उसके अंग ऊपर तत्काल विस्फोटक रोग होवेगा ॥ ३३ ॥ तब सब तो स्नान करनेसे शुद्ध होगये एक ब्राह्मणको विस्फोटक होगये तब वह ब्राह्मण लज्जायुक्त होके

निमज्जनम् ॥ चक्रुः शुद्धिं गताः सर्वे मुक्त्वैकं ब्राह्मणं तदा ॥
॥ ३४ ॥ सोऽपि लज्जान्वितो विप्रः कृत्वाधोवदनं ततः ॥
निष्क्रांतोऽथ सभामध्यात्स्थानाद्विप्रसमुद्भवात् ॥ ३५ ॥
ततश्च शांतिकं चक्रुश्चमत्कारपुरस्थिताः ॥ ततोनीरोगतां
प्राप्तः स भूपस्तत्क्षणादृद्विजाः ॥३६॥ त्रिजातोऽपि द्विजश्रेष्ठो
गत्वा किंचिद्वनांतरम् ॥ मातृदोषादहं ह्येवं वैलक्षण्यं परंगतः॥
॥ ३७ ॥ ततो वैराग्यमापन्नो रौद्रे तपसि संस्थितः ॥ चम-
त्कारपुरे चैको विप्रो नहुषवंशजः ॥ ३८ ॥ क्रथोनाम ययौ
गर्वान्नागतीर्थं प्रति द्विजः ॥ श्रावणस्यासिते पक्षे पञ्चम्यां पर्य-
टन्वने ॥ ३९ ॥ तत्रापश्यन्नागबालं लगुडेन व्यपोथयत् ॥
अथ सा जननी तस्य निष्क्रांता जलमध्यतः ॥ १४० ॥
दृष्ट्वा निपतितं बालं तं गृहीत्वा गृहं ययौ ॥ अनंतस्याग्रतः
क्षिप्त्वा तं मृतं निजबालकम् ॥ ४१ ॥ प्रलापानकरोद्दीना
अनंतोऽपि तथाऽकरोत् ॥ एतस्मिन्नन्तरे नागाः सर्वे तत्र समा-
गताः ॥ ४२ ॥ तानुवाच ततः शेषः क्रोधेन महतान्वि-
तः ॥ हाटकेश्वरजे क्षेत्रे यान्तु हे भुजगोत्तमाः ॥ ४३ ॥

पृथ्वीराजचरित्रोक्तं विसलस्य कथानकम् ॥ आसीद्विसलदेवो वै राजा गुर्जरदेशके ॥ ९३ ॥ षट्त्रिंशदुत्तरनवशते शाके च वैक्रमे ॥ स्वनाम्ना नगरं कृत्वा यज्ञं चक्रे नृपोत्तमः ॥९४॥ तद्द्रष्टुमागतान्विप्रान्नागरान्वृद्धसंज्ञकान् ॥ दक्षिणां दातुमारेभे राजा प्रेमसमाकुलः ॥ ९५ ॥ न कुर्महे वयं सर्वे राजन्दानप्रतिग्रहम् ॥ तच्छ्रुत्वा नृपतिः प्राह तांबूलं तर्हि गृह्यताम् ॥९६॥ इत्युक्त्वा नृपतिस्तत्र लिखित्वा ग्रामनामकम् ॥ तांबूलवीटिकामध्ये ददौ ब्राह्मणहस्तके ॥ ९७ ॥ उद्घाट्य वीटिकां विप्रा दृष्ट्वा ग्रामस्य नामकम् ॥ प्रतिग्रहो बलाज्जातस्तस्मात्स्वीकुर्महे वयम् ॥ ९८ ॥ ततः प्रभृति ते विप्रा विसलग्रामवासिनः ॥ वृद्धात्प्रभिन्नाः संजाता वणिजश्च तथैव हि ॥ ९९ ॥ समूहो द्विविधस्तेषां ग्रामभेदेन चाभवत् ॥ मिथः कन्याविवाहं च न कुर्वंति विशेषतः ॥ ४०० ॥ साटोदकृष्णसाचोरग्रामाणां त्रितयं ततः ॥ ददौ विसलदेवो वै

नागर ऐसे दो भेदसे कहेजातेहैं ॥ ९१॥९२ ॥ अब विसलनगर ब्राह्मणोंकी उत्पत्ति कहताहूं। पृथ्वीराजरासेमें कथा लिखीहै गुजरात देशमें ॥ ९३ ॥ विक्रमसंवत् ९३६ के सालमें विसलदेव नाम करके राजा था उसने अपने नामसे एक नगर बसाया और पापसे मुक्त होनेके वास्ते वहां यज्ञ किया ॥ ९४ ॥ तब उस यज्ञ देखनेके वास्ते बडनगरसे बडनगरे ब्राह्मण आये। उनको देखके राजा प्रेमसे दक्षिणा देने लगे ॥ ९५ ॥ तब ब्राह्मण कहने लगे कि हम दान लेते नहीं। तब राजाने कहा कि दान दक्षिणा नहीं लेते तो तांबूल ग्रहण करो ॥ ९६ ॥ ऐसा कहके विसलनगर ग्रामका नाम पानमें लिखके बीडा ब्राह्मणके हाथमें दिया ॥ ९७ ॥ ब्राह्मणने बीडा खोलके देखा तो भीतर गामका नाम देखके विचार किया कि बलात्कारसे प्रतिग्रह तो होगया, अब स्वीकार करना अवश्यहै ॥९८॥ ऐसा निश्चय करके विसल नगरका दान लिया और उसके संबंधी वहां आयके रहे वह नगर सिद्धपुरसे दक्षिणमें बारह कोसके ऊपर है। बडनगर पूर्वमें पांच कोसके ऊपर है। फिर उसदिनसे विसल नगरे ब्राह्मण नामसे विख्यात भये ॥९९॥ उनमें संवा दो हैं। एक वीसनवरा, दूसरा अमदाबादी कहाजाता है। इनमें कन्या परस्पर देते नहीं ॥ ४०० ॥ फिर और विसलदेवने ब्राह्मणोंको साटोद कृष्णोर साचार ऐसे तीन गांव बीडेमें

ब्राह्मणानां विशेषतः ॥ १ ॥ ततः प्रभृति तन्नाम्ना विख्याता ह्यभवन्द्विजाः ॥ आचारादिप्रभेदेन पृथक्त्वेन स्थिताश्च ते ॥ २ ॥ बाह्यनागरभेदश्च पूर्वमेव प्रकीर्तितः ॥ चंडशर्म्मा ब्राह्मणश्च पुष्पविप्रस्य योगतः ॥ ३ ॥ अथान्यज्ञातिविप्रस्य कन्यायाश्च प्रतिग्रहात् ॥ बारडाख्या ज्ञातिरेका त्यक्तकर्मा विशेषतः ॥ ४ ॥ प्रश्नोत्तराणां भेदश्च पूर्वमुक्तस्सविस्तरात् ॥ दुर्वाससः सुशीलस्य प्रश्नोत्तरकथानकम् ॥ ५ ॥ कांदिशीक-प्रभेदो वै ब्राह्मनागरमध्यगः ॥ सर्वेष्वेतेषु श्रेष्ठो वै विप्रो ह्यष्ट कुलोद्भवः ॥६॥ चतुरशीतिगोत्राणि पूर्वं तेषां द्विजन्मनाम् ॥ क्षेत्रनिर्माणसमये ततो द्वादशगोत्रजाः ॥ ७ ॥ विप्रा गताश्च

दान दिये ॥१॥ उस दिनसे साठोदरे नागर कृष्णारे नागर साचोरे नागर ऐसे नामसे विख्यात भये। अब सब यह ब्राह्मण पहिले बडनगरे थे । परन्तु आचार भ्रष्टताके योगसे अपना अपना जथा बांधके जुदे होगये हैं । अपनी आचार भ्रष्टता अपने कूं मालूम पडती नहीं है॥२॥अब बाह्यनगर ब्राह्मणका भेद तो पहिले पुष्पब्राह्मणोंकी शुद्धिके निमित्तसे चंडशर्म्माने स्थापन किया। वह बाह्यनागर कहेजाते हैं ॥३॥अब यह बाह्यनागरोंसे बारड नागर नाम करके एक ज्ञाति पैदाभई है उसका कारण यह है कि अन्य ज्ञातिके ब्राह्मणकी कन्याके साथ विवाह करके पीछे ज्ञातिमें दंड देके जो रहते हैं विशेष करके ब्रह्मकर्ममें जो छूटगयेहैं उनका वंश हालमें पूर्वोक्त रीतिसे चलरहाहै । वे बारडनागर कहेजाते हैं ॥४॥ अब प्रश्नोत्तरे नागर ब्राह्मणोंका भेद पहिले कहा है दुर्वासा ऋषिने देवमंदिर बांधनेके वास्ते पृथ्वीका प्रश्न किया । तब सुशील ब्राह्मणने उत्तर दिया । उसके वंशमें जो आगे ब्राह्मण भये वे सब प्रश्नोत्तरे कहेजाते हैं । दंतकथा ऐसी है कि अहिच्छत्र ग्राममें रहनेवाला एक ब्राह्मण देशांत्तरको निकला रसतेमें रात्रिको घरमें रहा वहां रात्रिमें एक राक्षस आयके घरवालेके बालकको लेगया तब घरवाले रोनेलगे इतनेमें यह ब्राह्मण अपनी विद्याके सामर्थ्यसे राक्षससे कुमारको लाया तब पिशुन कहते दुष्टका हरण किया इस वास्ते पिशुनहर नागर भये उन्होंको हालमें प्रश्नोरेकहतेहैं ॥५॥ और बाह्य नागरमें कांदिशीक भेद भयाहै वे प्रश्नोरे संभवतेहैं यह सब भेद कहे उनमें अष्टकुली बडनगरेहैं वे उत्तम कहेजाते हैं ॥६॥ पहिले क्षेत्र स्थापना करनेकी वखत ब्राह्मणोंके गोत्र ८४ थे उनमेंसे बारह गोत्र खडायते ब्राह्मणोंमें गये हैं बाकी ७२ गोत्र प्रवरका निर्णय

कोस्थकें शेषास्तत्र द्विसप्ततिः ॥ गोत्राणां प्रवराणां च निर्णयः कथितः स्फुटः ॥ ८ ॥ द्रष्टव्यः प्रवराध्याये विस्तरान्नोच्यते मया ॥ एषां भोजनसंबंधो कन्यासंबंध एव च ॥ ९ ॥ स्ववर्गेष्वेव भवति भोजनं क्वचिदन्यथा ॥ इत्येवं नागराणां वै चोत्पत्तिर्वर्णिता मया ॥ ४१० ॥

इति ब्राह्मणोत्पत्तिमार्तण्डाध्याये नागरज्ञातिभेदवर्णनं नाम चतुर्दश प्रकरणं ॥ १४ ॥ इति पंचद्रविडमध्ये गुर्जरसंप्रदायः ॥

नागरोंका प्रवराध्याय नाम करके ग्रंथ है उसमें देखलेना ॥ ८ ॥ प्रवराध्यायके आरंभमें ऐसा लिखा है कि "श्रीमदानंदपुरमहास्थानीयपंचदशशतगोत्राणां संवत् २८३ समये पूर्वं तिष्ठमानाद्विसप्ततिगोत्राणां समानप्रवरस्य निबंधः" इसवास्ते उस ग्रंथमें गोत्रप्रवर निर्णय है अब वह पूर्वोक्त निर्णय है। अब यह पूर्वोक्त जो नागर ज्ञातिके भेद कहे हैं उनका परस्पर भोजन संबंध और कन्याविवाहसंबंध अपनी अपनी ज्ञातिके समूहमें होता है, कारण अनेक समूहमें धर्मभ्रष्टता होनेलगी वह कथा नागरखंडके १९३।१९५ वे अध्यायोंमें है और हीनवर्ण गुप्तरूपांतरसे ज्ञातिमें संबंध करने लगे इसवास्ते पीछे उन्होंने बंदोबस्त किया कि भोजन और कन्यादान अपने वर्गविना दूसरेमें नहीं करना ॥ ९ ॥ परंतु भोजनका थोडा फेरफार है जैसा नाडियाद परगनेमें बडनगरे विसलनगरे परस्पर एकएकके घरमें पानी पीते नहीं हैं सूरतमें पानी पीते हैं दक्षिण हैदराबाद मैसूर जिलेमें भोजन व्यवहार है ऐसा विलक्षण व्यवहार है परंतु जिसमें धर्म रहे वह बात करना मुख्य है ऐसा नागर-ब्राह्मण बनियोंका उत्पत्तिभेद वर्णन किया ॥ ४१० ॥

इति नागरभेदवर्णन नाम १४ प्रकरण संपूर्ण भया ॥

अथ नागराणां गोत्रप्रवरनिर्णयचक्रम्.

सं	अवटंक.	गोत्र.	प्रवर.	वेद.	शाखा	देवी	गण	देवता	भाग-ज.	शर्म
१	दवेपंचक.	प्रोक्षण.	वशिष्ठशक्तिपाराशर	य.	मा.	भागरी	खोख-ला	हाट-केश्वर	५ झाला पाटण	शर्म.
२	दवे.	कापिष्ठला.				,,	,,	,,	७	गो. २२
३	मेतातलखा.	अलुभाण.	वशिष्ठकौंडिन्यमैत्रावरुण ३	य.	मा.	,,	,,	,,		दत्त
४	पंड्याभूधर.	भारद्वाज.	भारद्वाज आंगिरस वार्हस्पत्य. ३	ऋ.	आ.	,,	,,	,,		तात
		शार्करा‌क्ष.	भृगुच्यवनआप्नुवानोदुम्बर जमदग्नि ५	ऋ.	आ.	,,	,,	,,		मित्र.
६	बासमोढासाके	गौतम.	गौतमआंगिरसऔतथ्य ३	य.	मा.	,,	,,	,,	१०	दत्त
७	जानि.	गार्ग्य.	अंगिरसभारद्वाजवार्हस्पत्यच्यवनगंगेति ५			,,	,,	,,	५	शर्म.
८	त्रवाडि.	कौंडिन्य	वसिष्ठकौंडिन्यमित्रावरु. ३	सा.	कौ.	,,	,,	,,		दत्त

इति अष्टकुल ब्राह्मणाः ।

अथ खडायता विप्र बणिगुत्पत्तिप्रकरण ॥ १५ ॥

॥ अथ खडायताविप्रवणिगुत्पत्तिसारमाह ॥ उक्तं च पाद्मे कोट्यर्कमाहात्म्ये ॥ शौनक उवाच ॥ ॥ सूतसूत महाभाग कथां वद मनोहराम् ॥ यस्यां वै श्रूयमाणायां कोट्यर्को मुक्तिदायकः ॥ १ ॥ कोट्यर्को नाम को देवः कस्मिन्देशे प्रतिष्ठितः ॥ ॥ सूत उवाच ॥ कल्पांते विष्णुकर्णाभ्यामुत्पन्नौ मधुकैटभौ ॥ २ ॥ तौ हंतुं भगवान् विष्णुः कोट्यर्के

अब खडायते ब्राह्मण और वानियोंकी उत्पत्ति कहते हैं शौनक प्रश्न करते हैं हे सूत ! उत्तम मनको आनंद करै ऐसी एक कथा वर्णन करो जिस कथाके श्रवण करनेसे कौट्यर्क भगवान् मुक्तिदायक होवें ॥ १ ॥ और कोट्यर्क भगवान् कौन देव हैं और कौनसे देशमें प्रतिष्ठित हैं सो कहो सूत कहने लगे पहले कल्पांतकी बखत विष्णुके कानोंसे मधुकैटभ दो दैत्य उत्पन्न होते भये ॥ २ ॥ उन दोनोंको मारनेके वास्ते विष्णुने कोट्यर्कका रूप

रूपमाश्रितः ॥ कोट्यर्करूपं दृष्ट्वैव तावुभौ निधनं गतौ ॥ ॥३॥ तदा ब्रह्मा भयान्मुक्तः स्तुत्वोवाच विभुं तदा ॥ कोट्यर्केश स्वरूपं ते भुवि संस्थाप्यते मया ॥ ४ ॥ साभ्रमत्यास्तटे रम्ये गुर्जरे विषये महत् ॥ तत्र त्वं वस देवेश कृपां कृत्वा ममोपरि ॥ ५ ॥ कोट्यर्क इति नाम्ना वै सर्वलोकेषु विश्रुतः श्रीभगवानुवाच ॥ ॥ त्वया तु चिन्तितं कार्यं तत्र सर्वं भविष्यति ॥ ६ ॥ साभ्रमत्यास्तटेऽत्रैव सन्निधानं मया कृतम् ॥ कोट्यर्क इति नाम्ना त्वं मन्मूर्तिं स्थापयादारात् ॥ ७ ॥ श्वेताननां श्वेतभुजां स्वेतमाल्यानुलेपनाम् ॥ आद्यस्य तु युस्गयैव त्वं मूर्तिंपरिकल्पय ॥ ८ ॥ पार्षदौ तत्र संस्थाप्यौ सुनन्दनंदनावुभौ ॥ कार्तिके शुद्धपक्षे तु एकादश्यां शुभे दिने ॥ ॥ ९ ॥ सूर्यवारे सुनक्षत्रे ह्यहं जातस्तदाब्जज ॥ द्वादश्यां तावुभौ दैत्यौ मत्तो निधनमापतुः ॥ १० ॥ अतः सा द्वादशी श्रेष्ठा वैष्णवी तिथिरुच्यते ॥ महोत्सवस्तत्र कार्योमत्पूजा च सुविस्तरात् ॥ ११ ॥ एवं विष्णोर्वचः श्रुत्वा तथैव कृतवान् विधिः ॥ ॥ सूत उवाच ॥

धारण किया वो कोट्यर्करूप देखतेही वे दोनों दैत्य नाश पाये ॥ ३ ॥ उस वखत ब्रह्माभयसे मुक्त होयके विष्णुको नमस्कार करके कहनेलगे हो कोट्यर्केश ! यह तुम्हारा स्वरूप पृथ्वीमें मेरे करके स्थापन होता है ॥ ४ ॥ गुजरात देशमें साभ्रमतीके तट ऊपर वहां आप कृपाकरके वास करना ॥ ५ ॥ कोट्यर्क (कोटारकु) नामसे सब लोकोंमें विख्यात हो । श्रीभगवान् कहनेलगे कि ब्रह्मा ! तुमने जो विचार किया है सो सब होवेगा ॥६॥ साभ्रमतीके तट ऊपर मैंने अपना अंश रखाहै । तुम कोट्यर्क नामसे मेरी मूर्तिका स्थापन करो ॥ ७ ॥ श्वेतवर्णका मुखारविंद श्वेत चंदनसे चर्चित ऐसी सत्ययुगकी मूर्तिकी कल्पना करो ॥ ८ ॥ और मेरे द्वारके पास दोनों तरफ नंदसुनंद पार्षदगणको स्थापन करो कार्तिक शुद्ध एकादशीके दिन ॥ ९ ॥ रविवार शुभ नक्षत्रमें मैं प्रकट भयाहूं और द्वादशीके दिन वे मधुकैटभ दोनों दैत्य नाश पाये हैं ॥ १० ॥ इसवास्ते वह द्वादशी वैष्णवी तिथि उत्तम कहते हैं । उस दिन बडा उत्सव और विस्तारसे मेरी पूजा कराना ॥ ११ ॥ ऐसा विष्णुका वचन सुनके ब्रह्माने कोट्यर्केशकी बडी पूजा कियी । सूत कहनेलगे

ततः कदाचित्तत्तीर्थं मानवा समुपागताः ॥ १२ ॥ तैस्तु स्नानं कृतं तत्र कोट्यर्केशो नमस्कृतः ॥ ततो विमानसंघस्तु तान्नेतुं समुपस्थितः ॥ १३ ॥ तद्दृष्ट्वा महदाश्चर्यं राक्षसाः समुपस्थिताः ॥ ते सर्वे प्रद्रुता दिग्भ्यो विमानाकर्षणोत्सुकाः ॥ १४ ॥ तांस्तु दृष्ट्वा महोत्पातानस्मरन्गणपं च ते ॥ ततो गणेशः संप्राप्तो हतवान्राक्षसांश्च तान् ॥ १५ ॥ विमानस्था नराः सर्वे स्तुत्वा तं गणनायकम् ॥ प्रासादे स्थापयामाससुर्गणेशं दुःखनाशकम् ॥ १६ ॥ ततस्तुतो गणेशस्तु मया स्थातव्यमत्र हि ॥ इत्युक्त्वा स्वर्गगान्तान्वै तत्रैवांतरधीयत॥ ॥ १७ ॥ तत्र कृता महापूजा कोटयर्कस्य महात्मनः ॥ खंड पूर्वैर्द्विजैः सर्वैर्वैष्णवैश्च महात्मभिः ॥ १८ ॥ ततस्तस्मिन्महातीर्थे हनुमान् भुवि संस्थितः ॥ पुरा वै ब्राह्मणः कश्चिद्वेदशर्मेति विश्रुतः ॥ १९ ॥ तीर्थयात्राः प्रकुर्वाणः प्राप्तः सारस्वतं तटम् ॥ तस्मिन्सरस्वतीतीरेदुर्गामंबां प्रपूज्य च ॥ ॥२०॥ ततो लोकमुखाच्छ्रुत्वा कोट्यर्कं तीर्थमुत्तमम् ॥ तत्र

हे शौनक ! उस उपरान्त किसी समयमें उस तीर्थमें अनेक मनुष्य आये ॥ १२ ॥ मनुष्योंने स्नान करके कोट्यर्केशको नमस्कार किया । उस बखत उनको लेनेके वास्ते विमानसमूह प्राप्तभया ॥ १३ ॥ वह आश्चर्य देखके राक्षस विमानोंको खेंचनेवाले प्राप्तभये--दश दिशाओंमें दौडने लगे ॥ १४ ॥ तब राक्षसोंको देखके वे मानव सब गणपतिका स्मरण करतेभये । उस बखत गणपति प्रकट होयके राक्षसोंको मारतेभये ॥ ९१ ॥ विमानोंमें बैठेहुए मानव सब उन गणपतिका स्तवन करके प्रासाद (मंदिर) में स्थापन करतेभये ॥ १६ ॥ तब गणपति स्वर्गमें जानेवाले मानवोंको इस क्षेत्रमें मैं रहूंगा ऐसा कहके गुप्तभये ॥ १७ ॥ वहां खंडशब्द है पहिले जिनको ऐसे जो खडायत ब्राह्मण और वैष्णव बनियोंने कोट्यर्ककी महापूजा किया ॥१८॥ उस उपरांत उस महातीर्थमें हनुमान्जी रहते भये । पाहिले एक वेदशर्म्मा नामकरके ब्राह्मण था ॥ १९ ॥ वह तीर्थ यात्रा करते करते सरस्वती नदीके तट ऊपर आया वहां दुर्गादेवीकी पूजा करके ॥ २० ॥ पीछे लोगोंके मुखसे कोट्यर्क तीर्थकी महिमा श्रवणकरके जो बारह योजन दूर है वहां जाने

गंतु मनश्चक्रे दूरं द्वादशयोजनम् ॥ २१ ॥ पादयोर्नास्ति मे शक्तिः किं कर्तव्यमतः परम् ॥ या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता ॥२२॥ सा देवी मन्मनोवाञ्छापूर्तिं कर्तुमिहार्हति ॥ इत्थं तेन स्मृता देवी हनुमंतमचिंतयत् ॥ २३ ॥ स्मृतमात्रो हि हनुमान् प्रणम्य चाग्रतः स्थितः ॥ ॥ देव्युवाच ॥ हनुमञ्छृणु मद्वाक्यं वेदशर्मा द्विजोत्तमः ॥ २४ ॥ पादयोर्बलहीनश्च तं गृहीत्वा द्विजोत्तमम् ॥ कोट्यर्कतीर्थं संप्राप्य त्वया स्थातव्यमेव च ॥ २५ ॥ तत्र त्वां पूजयिष्यंति तेषां कार्यं भविष्यति ॥ इत्युक्त्वा सा भगवती तत्रैवांतरधीयत ॥ ॥ २६ ॥ ततो हनुमान् परमानुभावो विप्रं गृहीत्वा परमप्रहृष्टः ॥ क्षणेन खं प्राप्य ततो हि वेगात्कोट्यर्कतीर्थं सहसा जगाम ॥ २७ ॥ वेदशर्मा तु संप्राप्य नत्वा कोटचर्कमद्भुतम्॥ हनुमंतं प्रणम्याथ प्रतिष्ठामकरोद्द्विजः ॥२८॥ तत्रैव स्थापितः शंभुः कपालेश्वरसंज्ञकः ॥ विष्णुना यत्र शंभुर्वै मुक्तो ब्रह्मकपालतः ॥ २९ ॥ कपालेशप्रसादेन दीक्षितो नाम

का उत्साह किया ॥२१॥ परंतु पांवमें शक्ति नहीं है कैसा करना जो देवी सर्वप्राणिमात्रके बीचमें शक्तिरूपसे रहती हैं॥२२॥वे देवी मेरी मनकी वाञ्छा पूर्ण करनेको योग्य हैं ऐसा देवीका स्तवन करते देवीने हनुमानको स्मरण किया ॥२३॥ तब हनुमान् नमस्कार करके सामने आयके खडेरहे तब देवी कहतीहैं हे हनुमान्! मेरे वचन श्रवणकर वेदशर्मा जो ब्राह्मणहै ॥२४॥ वह पांवसे बलहीन है इसवास्ते उस ब्राह्मणोत्तमको लेके कोट्यर्क तीर्थमें स्थापनकरो। और तुमभी वहां रहो ॥ २६ ॥ उस तीर्थमें जो तुम्हारी पूजा करेंगे उनके कार्य सिद्ध होवेंगे। ऐसा कहके देवी अंतर्धान भई॥२६॥ तब हनुमान्जी प्रसन्न होयके वेदशर्मा ब्राह्मणको लेके क्षणमात्रमें कोट्यर्क तीर्थमें आये ॥ २७ ॥ वेदशर्मा वहां तीर्थमें आके कोट्यर्क भगवान्को नमस्कार करके बाद हनुमान्को नमस्कार करके हनुमान्जीकी मूर्तिकी प्रतिष्ठा कियी ॥२८॥ और उसी ठिकाने विष्णुने कपालेश्वर महादेवका स्थापन किया जिस ठिकाने शिव ब्रह्मकपालसे मुक्त भये॥२९॥इसवास्ते कपालेश्वर नाम भया ॥ वो कपालेश्वरके अनुग्रहसे दीक्षित नाम करके ब्राह्मण रोगसे मुक्त होयके धनवान् भया और दूसरी कथा

ब्राह्मणः ॥ रोगैर्मुक्तो धनी जातः कथामन्यां वदामि ते ॥
॥ ३० ॥ सूत उवाच ॥ पुरा कश्चिद्द्विजो धीर आसीच्च ब्रह्मवित्तमः ॥ स कदाचिज्जगामाथ चमत्कारपुरं द्विजः ॥
॥ ३१ ॥ नागरैर्ब्राह्मणैर्व्याप्तं वेदशास्त्रार्थपारगैः ॥ नीतिशास्त्रेषु कुशलैराचाराणां प्रवर्तकैः ॥३२॥ तान्सर्वान्नागरान्नत्वा धीरोवै ब्राह्मणः स्थितः ॥ तत्र यात्राविधिं कृत्वा हाटकेशं प्रपूज्यच३३॥ ततस्तोत्रं चकाराथ स धीरो ब्राह्मणोत्तमः ॥ हाटकेश महादेव प्रपन्नभयभंजन ॥ ३४ ॥ दारिद्र्येणाभिभूतोऽस्मि निद्रां नैव लभे निशि ॥ पुत्रादिभिः पीडितश्च क्षुत्पिपासाकुलैः सदा ॥
॥ ३५ ॥ ॥ अस्माकं ज्ञातिभिः सार्द्धं विरोधो हि महानभूत ॥ विद्यावादेन भो देव बुद्धिर्नष्टा मनीषिणाम् ॥ ३६ ॥ बुद्धिनाशात्ततो भ्रष्टा वयं सर्वे महेश्वर ॥ एतस्मात्कारणाद्ब्रह्मंस्त्वामहं शरणं गतः ॥ ३७ ॥ सूत उवाच ॥ ॥ एतच्छ्रुत्वा महादेवो भगवान्भक्तवत्सलः ॥ उवाच भोभो ब्रह्मर्षे मत्प्रसादात्सुखंतव
॥ ३८ ॥ कोट्यर्कतीर्थे भवतां समागमो ह्यष्टादशानां हि मया कृतः पुरा ॥ तस्मिन्समाजे मम यज्ञहेतौ मया ततश्चोक्तमिदं

कहता हूं ॥३०॥ सूत कहते हैं हे शौनक! पहले कोई एक धीरकरके ब्राह्मण था सो एक समयमें बडनगर करके ग्राम है वहां आया ॥३१॥ वेदशास्त्रके जाननेवालों नीतिमें कुशल आचार संपन्न ऐसे नागर ब्राह्मणोंसे वह नगर व्याप्त है ॥ ३२ ॥ और धीर ब्राह्मण सब नागरोंको नमस्कार करके यात्राकी विधिकरके हाटकेश्वर महादेवकी पूजा करके ॥ ३३ ॥ स्तुति करताहै। हे हाटकेश्वर! तुम शरणागतके भय दूर करनेवाले हो ॥ ३४ ॥ मैं दारिद्र्यसे व्याप्तभयाहूं रात्रीमें निद्रा नहीं है। क्षुधातुर पुत्रादिकोंसे मैं सदा पीडित हूं ॥ ३५ ॥ और ज्ञातिसे भी बडा विरोध भया है। विद्याविवादसें अच्छे मनुष्योंकी बुद्धि नष्ट होतीहै ॥ ३६ ॥ बुद्धिनाशके योगसे हम सब नष्ट हुए हैं इसवास्ते हे भगवन्! आपके शरणागत हैं ॥ ३७ ॥ सूत कहने लगे ऐसा धीर ब्राह्मणका वचन सुनके महादेव कहते भये हे ब्राह्मण! मेरे अनुग्रहसे तुझे सुख होवेगा ॥ ३८ ॥ कोट्यर्क तीर्थमें पहिले तुम अठारह ब्राह्मणोंका समागम मैंने किया और उस सभामें यज्ञकरनेके वास्ते

वचो महत् ॥ ३९ ॥ कोव्यर्कतीर्थे मम ब्रह्महत्या यज्ञः कृतस्तेन विनाशमागता ॥ त्वदाज्ञया यज्ञविधिः कृतो महान्प्रसन्नचित्तेन मया पुरारिणा ॥ ४० ॥ उक्तं मया वरो युक्तो व्रियतां तु यथेप्सितम् ॥ ततो भवंतः सर्वेऽपि विचार्यैव स्थिताश्चिरम् ॥४१॥ ततस्ते ब्राह्मणाः सर्वे स्त्रियः प्रष्टुं गृहे गताः ॥ ताभिः सार्द्धं खट्टपटे संप्रवर्ते पुनः पुनः ॥ ४२ ॥ ततः सर्वे द्विजा जाता खडायतेति संज्ञया ॥ तस्माद्भवद्वंशजानां खडायतेति नाम च ॥४३॥ अष्टादशानां विप्राणां द्वौ द्वौ तु परिचारकौ ॥ वडनगरादानीय दत्तावित्यर्थः ॥ सच्छूद्रौ सेवकौ प्रोक्तौ ह्येकैकस्य द्विजस्य च ॥ ४४ ॥ खडायतास्तु सच्छूद्रा मया प्रोक्ताः पिनाकिना ॥ सच्छूद्राणां च तेषां वै विवाहे विधिरुच्यते ॥ ४५ ॥ पौराणिकैर्महामंत्रैः कर्तव्यं सर्वमेव हि ॥ इयान्विशेषस्तु मयैव कथ्यते खडायतानां द्विजसेवकानाम् ॥ निष्पावखंडैस्तु चरुर्विधेयो ग्रहप्रपूजा हवनं न चैव ॥ ४६ ॥ सुमंगलीकन्यकाया ग्रामे

मैंने वचन कहा ॥ ३९ ॥ हे धीर ब्राह्मण ! कोट्यकतीर्थमें तेरी आज्ञासे मैंने प्रसन्न चित्तसे यज्ञविधि किया उससे मेरी ब्रह्महत्या नाश भई ॥ ४० ॥ पीछे मैंने तुमको कहा कि इच्छित वरदान मांगो उस बखत तुम सब विचार करके थोडी बखत वहां बैठे ॥ ४१ ॥ बाद सब ब्राह्मण अपनी अपनी स्त्रियोंको पूछनेके वास्ते घर गये। स्त्रियोंके साथ वारंवार खटपट करनेलगे । परन्तु मांगनेका निश्चय नहीं किया ॥ ४२ ॥ उस कारणसे खडायते नाम करके ब्राह्मणभये । इस वास्ते तुम्हारे वंशमें जो उत्पन्न होवेंगे वे खडायते नामसे विख्यात होवेंगे ॥ ४३ ॥ तुम जो अठारह ब्राह्मण हो सो तुम्हारे सेवक सच्छूद्र एकएक ब्राह्मणका दो दो बडनगरसे बुलायके देताहूं ऐसा कहके दिये ॥ ४४ ॥ और कहनेलगे कि ये जो तुमको मैंने सच्छूद्र सेवक दिये हैं वे भी खडायते बनिये कहे जातेहैं और खडायते बनियोंमें जो विवाहमें विधि होतीहै सो कहताहूं ॥ ४५ ॥ वह बानियोंका सब कर्म पुराणोक्त मन्त्रोंसे करना और इतना विशेष है ॥ ४६ ॥ विवाह चतुर्थीकर्ममें चरुभक्षणकी बखत बालनामक जो धान्य है उसकी दालका चरु बनाना ग्रहशांति

पर्यटनं न च ॥४७॥ ततस्तत्र द्विजश्रेष्ठ नगरं निर्मितं मया ॥ विश्वकर्मा मयाज्ञप्तो नगरं तच्च कारयत् ॥४८॥ तस्मिन्सुनगरे रम्ये दुःखदारिद्र्यनाशके ॥ मया दत्ते द्विजेंद्राणां तस्मिन्नेव वस द्विज ॥४९॥ यस्मिन्काले मया विप्र वरो दत्तो द्विजन्मनाम् ॥ तस्मिन्काले त्वया तत्र न श्रुतं वचनं महत् ॥५०॥ तस्मात्तत्रैव वस्तव्यं कपालेश्वरसन्निधौ ॥ तत्र ते दुःखदारिद्र्यं सर्वं नश्यति तत्क्षणात् ॥ ५१ ॥इत्युक्त्वा तु महादेवस्तत्रैवांतरधीयत ॥ स धीरो ब्राह्मणस्तस्मात्कोट्यर्केशं गतस्तदा ॥ ॥ ५२ ॥ कोट्यर्कस्य समीपे तु कार्त्तिकव्रतयोगतः ॥ विष्णुदासादयः सर्वे जग्मुर्वैकुंठमुत्तमम् ॥ ५३ ॥ अत्रैव नीलकंठाख्यो महादेवश्च संस्थितः ॥ ॥ शौनक उवाच ॥ ॥ खडायतानां गोत्राणि कथं जातानि तद्वद ॥ ५४ ॥ कति गोत्राणि तान्येव तेषु गोत्रेषु के मताः ॥ ॥ सूत उवाच ॥ ॥ जनकः कृष्णात्रेयश्च कौशिकस्तु तृतीयकः ॥ ॥ ५५ ॥ वसिष्ठश्च भरद्वाजो गार्ग्यो वत्सश्च सप्तमः ॥ एतानि गोत्राणि द्विजर्षभाणां खडायतानां हि कृतानि तेन ॥ ५६ ॥

पूजा हवन करना नहीं सुमंगल कन्याकी घाटडी गांवमें फिराना नहीं । कोई रामेश्वरकी पूजा करतेहैं ॥ ४७ ॥ तदनन्तर हे धीर ब्राह्मण ! उस क्षेत्रमें विश्वकर्माको बुलायके मैंने नगर निर्माण किया ॥ ४८ ॥ वह रमणीक दुःख दारिद्र्य नाशक नगर मैने अठारह ब्राह्मणोंको दिया । उसमें वासकर ॥४९॥ जिस बखत उन ब्राह्मणोंको मन वरदान दिया उस समय तुमने मेरा वचन सुना नहीं॥५०॥इस वास्ते उस कोटयर्क क्षेत्रमें कपालेश्वर महादेवके समीप निवास करना वहां सब दुःख दारिद्र्य तत्काल नाश पावेगा ॥५१॥ इतना कहके शिव अंतर्धान हुए । धीर ब्राह्मण कोटयर्कशके समीप गया ॥ ५२ ॥ कोटारकर्जाके नजदीक कार्त्तिकमासके व्रत करनेसे विष्णुदासादिक वैकुंठको जातेभये ॥ ५३ ॥ इसी क्षेत्रमें नीलकंठ महादेव स्थित हैं । शौनक पूछनेलगे कि हे सूत ! खडायते ब्राह्मणोंके गोत्र कितने हैं नाम क्या हैं ? सो कहो । सूत बोले हे शौनक ! जनक१कृष्णात्रेय२कौशिक३वासिष्ठ ४ भरद्वाज ५ गार्ग६वत्स ७ यह सात गोत्र खडायते ब्राह्मणोंके शिवने स्थापन किये हैं॥ ५४–५६॥

कोटचर्कदेवेन तथा शिवेन कपालनाथेन महेश्वरेण ॥ अथ देवीः प्रवक्ष्यामि तेषां चैव यथाक्रमम् ॥ ५७ ॥ पूर्वं वाराहि नामा तु द्वितीया तु खराननना ॥ चामुंडा बालगौरी च बंधुदेवी तु पंचमी ॥ ५८ ॥ षष्ठी च सौरभी नाम ह्यात्मच्छंदा हि सप्तमी ॥ वणिजां च प्रवक्ष्यामि गोत्राणि विविधानि च ॥ ॥ ५९ ॥ गुंदाणुगोत्रं नांदोलुमिंदियाणु तृतीयकम् ॥ नानु नरसाणु ५ वैश्याणु ६ मेवाणु सप्तमं तथा ॥ ६० ॥ भटस्याणु साचेलाणु सालिस्याणु तथैव हि ॥ कागराणु तथा गोत्रमित्थं तेषां प्रकीर्तितम् ॥ ६१ ॥ देव्यश्च द्वादश प्रोक्तास्तत्राद्या नेषुसंज्ञका ॥ ततो गुणमयी प्रोक्ता नरेश्वरी तृतीयका ॥६२॥ तुर्या नित्यानंदिनी तु नरसिंही च पंचमी ॥ षष्ठी विश्वेश्वरी प्रोक्ता सप्तमी महिपालिनी ॥ ६३ ॥ भंडोदर्यष्टमी देवी शंकरी नवमी तथा ॥ सुरेश्वरी च कामाक्षी देव्यो ह्येकादशः स्मृताः ॥६४॥ द्वादशं च तथा प्रोक्तं गोत्रं कल्याणमेव हि ॥ तथा कल्याणिनीयं वै द्वादशी तु प्रकीर्तिता ॥ ॥ ६५ ॥ इति तेषां तु गोत्राणि देव्यश्च परिकीर्तिता ॥ कोटचर्के संस्थितिस्तेषां वणिजां च द्विजन्मनाम् ॥ ६६ ॥

अब वेत्रेय सात गोत्रोंकी कुलदेवता क्रमसे कहते हैं ॥ ५७ ॥ प्रथम वराही १ खराननना २ चामुंडा ३ बालगौरी ४ बंधुदेवी ५ सौरभी ६ आत्मच्छंदा ७ अब खडायते बानियोंके गोत्र कहते हैं ॥ ५८ ॥ ५९ ॥ गुंदाणु गोत्र १ नांदोलु गोत्र २ मिंदियाणु गोत्र ३ नानु गोत्र ४ नरसाणु गोत्र ५ वैश्याणु गोत्र ६ मेवाणु गोत्र ७ ॥ ६० ॥ भटस्याणु गोत्र ८ साचेलाणु गोत्र ९ सालिस्याणु गोत्र १० कागराणु गोत्र ११ कल्याणगोत्र १२ ऐसे बारह गोत्र बानियोंके कहे ॥ ६१ ॥ अब बारह कुलदेवी कहते हैं—नेषुदेवी १ गुणमयी २ नरेश्वरी ३ तुर्या नित्या नंदिनी ४ नरसिंही ५ विश्वेश्वरी ६ महिपालिनी ७ ॥ ६२ ॥ ६३ ॥ भंडोदरी ८ शंकरी ९ सुरेश्वरी १० कामाक्षी ११ कल्याणिनी १२ ॥ ६४ ॥ ६५ ॥ ऐसे खडायते बानियोंके

खडायतानां सर्वेषां कोट्यर्को मुक्तिदायकः ॥ कपालेशो महा-
देवः नीलकंठस्तथैव च ॥ ६७ ॥ चर्मक्षेत्रं तथा सूर्यक्षेत्रं
श्रीगलितेश्वरम् ॥ शकलेशं तथा तीर्थं वाल्मीकेराश्रमस्तथा
॥६८॥ यत्र पूर्वं तु रामेण सीता त्यक्ता महात्मना ॥ तस्याः
सुतौ समुत्पन्नौ कुशो लव इति स्मृतौ ॥ ६९ ॥ याभ्यां
पूर्वं हतं सर्वं श्रीरामस्य बलं महत् ॥ अश्वमेधसमारंभे
श्रीरामस्य महात्मनः ॥ ७० ॥ गजासुरं यत्र हत्वा गजचर्म-
धरो हरः ॥ चर्मक्षेत्रं तु तज्जातं यत्र श्रीशंकरेण च ॥ ७१ ॥
गजचर्म धृतं रक्तं तेन श्रीगलितेश्वरः ॥ ७२ ॥ तेनैव रक्तेन
तदुद्भवेन नदी तदा रक्तवती बभूव ॥ श्रीसाभ्रमत्या सलि-
लेन मिश्रिता पापामलानां प्रशमं चकार ॥ ७३ ॥ कृते कृत-
वती नाम त्रेतायां मणिकर्णिका ॥ द्वापरे चंद्रभागा च कलौ
साभ्रमती स्मृता ॥ ७४ ॥ कर्णिकाख्ये महातीर्थे कोटचर्के
कुलदेवता ॥ ब्रह्मस्थानं च तत्प्रोक्तं खंडाख्यं पुरमीरितम् ॥७५॥
दधीचेराश्रमस्तत्र महापुण्यफलप्रदः॥ दुग्धेश्वरो महादेवः सप्त-
श्रोतेश्वरस्तथा ॥७६॥ बकदाल्भ्यो ऋषिस्तत्र ह्यश्विनाख्यो

बारह गोत्र बारह कुलदेवी वर्णन किये ॥ ६६ ॥ यह खडायते ब्राह्मण और बनि-
योंकी मुक्ति देनेवाला कोटारक देव हैं और इस कोट्यर्कक्षेत्रमें कपालेश्वर नीलकं-
ठेश्वर चर्मक्षेत्र सूर्यक्षेत्र श्रीगलितेश्वर शकलेश तीर्थ वाल्मीकि ऋषिका आश्रम यह
सब इस क्षेत्रमें हैं ॥ ६७ ॥ ६८ ॥ जिस क्षेत्रमें पहिले रामचंद्रने सीताका परित्याग
किया । पीछे सीताके दो पुत्र कुश, लव जहां उत्पन्न होते भये ॥६९॥ जिन कुश-
लवोंने अश्वमेधके बखत इस जगह रामचंद्रकी सेना बहुत नाश किया ॥ ७० ॥
जिस ठिकाने शिवने गजासुरको मारके गजचर्म अंगमें धारण किया उससे चर्मक्षेत्र
भया ॥ ७१ ॥ और चर्म धारण करके उसमेंसे जो रक्त गलित भया उससे बडी नदी
भई । उसका श्रीसाभ्रमतीमें संगम भया और गलितेश्वर महादेव भये ॥ ७२ ॥
॥ ७३ ॥ साभ्रमतीके युगपरत्वकरके चार नाम हैं । सत्ययुगमें कृतवती त्रेता-
युगमें मणिकर्णिका । द्वापरमें चंद्रभागा कलियुगमें साभ्रमती नाम है ॥ ७४ ॥
कर्णिकारूप जो कोट्यर्क तीर्थ उसमें ब्राह्मणोंके स्थानके और खंडपुर नाम
कहा ॥ ७५ ॥ उसके नजदीक दधीचऋषिका आश्रम है दुग्धेश्वर महादेव और

महेश्वरः ॥ एतद्वः कथितं विप्राः कोटचर्कस्य महात्मनः ॥ ॥ ७७ ॥ माहात्म्यं पुण्यदं धन्यं सर्वपापप्रणाशनम् ॥ धर्मार्थकाममोक्षाणां कारणं परमं मतम् ॥ ७८ ॥ खडायतास्तु ये विप्रास्तेषां नान्यः प्रतिग्रहः ॥ षडक्षराणां विप्राणां वणिजां च प्रतिग्रहः ॥ ७९ ॥ विप्राणां वणिजां चैव देवः कोटचर्क एव च ॥ एतन्माहात्म्यमतुलं नृणां दुःखविमोचनम् ॥ ८० ॥ एतच्छ्रुत्वा नृणां सद्यः सर्वपापक्षयो भवेत् ॥ एतस्मात्कारणाद्विप्राः श्रोतव्यो महिमा महान् ॥ ८१ ॥

इति खडायतविप्रवणिगुत्पत्तिसारवर्णनं नाम ज्ञातिप्रकरणम् ॥ ॥ १५ ॥ इति पंचद्राविडमध्ये गुर्जरसंप्रदायः ॥

सप्त श्रोतेश्वर महादेव ॥ ७६ ॥ बकदाल्भ्य ऋषि अश्विनी महादेव इतने यह क्षेत्र देव हैं ॥ ७७ ॥ कोव्यर्क क्षेत्रका माहात्म्य पुण्यकारक धर्म अर्थ काम मोक्षका परम साधक है ॥ ७८ ॥ खडायते जो ब्राह्मण हैं उनको अन्यका प्रतिग्रह नहीं है । खडायत विप्रोंको खडायत वणिकका प्रतिग्रह है ॥ ७९ ॥ यह ब्राह्मण बानियोंके देव कोव्यर्क हैं । यह माहात्म्य दुःखमोचक है ॥ ८० ॥ इसके श्रवण करनेसे मनुष्योंके पाप तत्काल क्षय पावते हैं । इस वास्ते हे ब्राह्मणो ! अवश्य यह श्रवण करना ॥ ८१ ॥

इति खडायतविप्रवणिकूउत्पत्तिप्रकरणम् ॥ १५ ॥

अथ वायडा ब्राह्मणवणिगुत्पत्तिप्रकरण १६.

अथ वायडाब्राह्मणवणिगुत्पत्तिसारः कथ्यते ॥ उक्तं च ॥ वायुपुराणे मारुतोत्पत्तिप्रसंगे ॥ ऋषय ऊचुः ॥ सूतसूत महाभाग देवदानवरक्षसाम् ॥ पिशाचोरगनागानां संभवः कथितस्त्वया ॥ १ ॥ न वायोः कथितोत्पत्तिस्तस्माद्वर्णयतां हि नः ॥ दित्याः पुत्रः कथं तात देवत्वमुपजग्मिवान् ॥ २ ॥ तत्कीर्तयेति संपृष्टो सूतः प्रोवाच सादरम् ॥

अब वायडे ब्राह्मण और वायडे बानियोंकी उत्पत्ति कहते हैं शौनक प्रश्न करते हैं हे सूत! तुमने हमको पाहिले देव दैत्य राक्षसादिकोंकी उत्पत्ति कही ॥ १ ॥ परन्तु वायुकी उत्पत्ति कही नहीं है सो कि दितिका पुत्र दैत्य होना चाहिये । सो देवत्वको कैसे

पुरा कृतयुगे विप्रो जयश्च विजयस्तथा ॥ ३ ॥ शापाच्च सनकादीनां दैत्यत्वं प्रापितौ दितेः ॥ ताभ्यां संपीडिता लोकास्तदा विष्णुः सुरेश्वरः ॥ ४ ॥ वाराहंरूपमाश्रित्य हिरण्याक्षं जघान ह ॥ ततो नृसिंहरूपेण हिरण्यकशिपुः पुरा ॥ ५ ॥ तनयौ निहतौ श्रुत्वा विष्णुनाऽथादितिस्तथा ॥ रुरोद सुभृशं प्रेम्णा प्रोवाच प्रणता पतिम् ॥ ६ ॥ हतपुत्रा कथं स्वामिं स्थातुं शक्तास्मि भूतले ॥ न संति तनया यासां वंध्यास्ता हि प्रकीर्तिताः ॥७॥ न तासां वदनं कश्चित्प्रातरेवावलोकते ॥ तस्माद्देहि सुतं ब्रह्मन् देवराजसमं रणे ॥८॥ कश्यप उवाच ॥ व्रतं चेत्कुरुषे सुभ्रु संवत्सरमतंद्रिता ॥ तदा ते भविता पुत्रो देवदानवदर्पहा ॥ ९ ॥ श्रुत्वा भर्तुः सुवचनं दितिः प्रोवाच भूपते ॥ कस्मिन्देशे तु कर्तव्यं यत्र शीघ्रं फलं भवेत् ॥१०॥ कश्यप उवाच ॥ शृणु भद्रे प्रवक्ष्यामि देशानामुत्तमोत्तमम् ॥ धन्वसौवीरमद्राणां संधौ सुरविनिर्मिता ॥ ११ ॥ वाटिका विपुला रम्या वरवापी विभूषिता ॥ वसंति मातरो यत्र सर्व-

प्राप्त भयो ॥ २ ॥ सूत कहते हैं सत्ययुगमें जय विजय नामक विष्णुके द्वारपाल दो थे ॥ ३ ॥ वे सनकादिक मुनियोंके शापसे आसुरीयोनिमें आये वे दितिके गर्भसे पैदा होयके लोकोंको पीडा करने लगे ॥ ४ ॥ तब विष्णुने बराहरूप धारण करके हिरण्याक्षकूं मारा ! नृसिंहावतार लेके हिरण्यकशिपुकूं मारा ॥ ५ ॥ तब दिति दोनों पुत्रकूं नाश हुवा सुनके बडा विलाप करने लगी । और पतिको कहती भई कि ॥ ६ ॥ हे स्वामिन् ! पुत्रहीन में जगतमें कैसे रहूं । जिनोंके सन्तान नही है वे वंध्या कही जाती हैं ॥ ७ ॥ प्रातःकालको उनका मुख कोई देखते नहीं हैं । इसवास्ते हे पति ! युद्धमें इंद्रादिककूं जीते ऐसा पुत्र देव ॥ ८ ॥ कश्यप कहते हैं हे स्त्री ! बरसदिनताई एक व्रत करेगी तो तेरा प्रतापी पुत्र होवेगा । देवोंका अहंकार उतारेगा ॥ ९ ॥ ऐसा स्वामीका वचन सुनते दिति कहने लगी कि कौनसे देशमें व्रत करना जिससे व्रतकी फल प्राप्ति जल्दी होवे ॥ १० ॥ कश्यप कहने लगे हे स्त्री ! व्रत करनेकूं उत्तम स्थान कहता हूं सो सुन मद्रदेश सौवीरदेश और धन्वदेश इन तीनोंके बीचमें ॥ ११ ॥ वाटिकाक्षेत्र है जहां उत्तम

लोकसुखावहाः ॥ १२ ॥ वाडवादित्यसंज्ञोऽस्ति भगवानत्रि-
नंदनः ॥ चत्वारः संति वैकुण्ठा विष्णुरुद्रविनिर्मिताः ॥१३॥
ब्रह्मकुण्डश्च विख्यातं सूर्यकुण्डं हि पावनम् ॥ बाणगङ्गास्ति
निकटे योजनार्धमहत्तरा ॥ १४ ॥ कृते बाणेति विख्याता
त्रेतामध्ये सुलोचना ॥ द्वापरे सुवहा नाम कलौ प्रोक्ता
विनाशिनी ॥ १५ ॥ तत्र गत्वा कुरु व्रतमित्युक्त्वा पुनराह
सा ॥ विद्वन्वाटी कृता केन कुंडाः केन कृताः शुभाः ॥१६॥
बाणगंगा कथं तत्र त्वेत्सर्वं वदस्व मे॥ कश्यप उवाच ॥ निष्प्र
भेऽस्मिन्निरालोके सर्वत्र तमसावृते ॥ १७ ॥ विष्णोर्नाभिस
रोमध्यान्निसृतं हि कुशेशयम् ॥ जज्ञे तस्माच्चतुर्वक्त्रो ब्रह्माह्य-
त्रिस्ततोऽभवत् ॥ १८ ॥ अत्रेरभून्महातेजा वाडवो मानसः
सुतः ॥ तमाह चात्रिस्तनयं प्रजां सृज ममेच्छया ॥ १९ ॥
श्रुत्वा वाक्यं तपस्तेपे वर्षाणामयुतायुतम् ॥ तपसा तापिता
देवा ब्रह्माणं शरणं ययुः ॥ २० ॥ तदा ब्रह्मा सुरैः साकं स
रुद्रः क्षीरसागरम् ॥ तत्र गत्वा जगन्नाथं स्तुत्वा नीत्वा स-

वापिका है और मातृगण बाडवादित्य निवास करते हैं और विष्णुकुंड रुद्रकुंड
ब्रह्मकुंड सूर्यकूंड तीर्थ हैं। और दो कोसके ऊपर बाणगंगा नदी है ॥ १२ ॥ १३ ॥
॥ १४ ॥ उसके युगपरत्व करके चार नाम हैं सत्ययुगमें बाणगंगा, त्रेतायुगमें
सुलोचना, द्वापरयुगमें सुवहा, कलियुगमें विनाशिनी ऐसे नाम हैं ॥ १५ ॥ वहां
जायके व्रत कर तब दिति बोली हे पति ! वाटिका किसने निर्माण करी । और
कुण्ड बाणगंगा वहां कैसे भये। सो कहो। कश्यप बोले पहले कल्पांतकी बखत
अन्धकार होगया। और जंतु रहित लोक भया ॥ १६ ॥ १७ ॥ उस बखत विष्णुके
नाभिसरोवरमें कमल पैदा भया। कमलसे ब्रह्मा भया। ब्रह्माका अत्रिपुत्र भया ॥
॥ १८ ॥ अत्रिऋषिका बाडवनामक मानस पुत्र भया। उसको आत्रीने कहा कि
मेरी इच्छासे तुम प्रजाको उत्पन्न करो ॥ १९ ॥ ऐसा आत्रिका वचन सुनते बाडव-
ऋषि लक्षवर्ष पर्यंत तपश्चर्या किये उनके तपोबलसे देवता तपने लगे। तब ब्रह्माके
शरण आये ॥ २० ॥ ब्रह्मा आनेका कारण जानके शिवको तथा और देवतावोंको
साथ लेके सूर्यके साथ क्षीर समुद्रके ऊपर जायके विष्णुकी स्तुति करके ॥ २१ ॥

भास्करः ॥ २१ ॥ वरेणच्छंदयामास वाडवादित्यसन्निभम् ॥ वरं वरय भो वत्स वरदेशा वयं स्थिताः ॥ २२ ॥ तान्विलोक्य मुदा युक्तो ब्रह्मविष्णुमहेश्वरान् ॥ प्रोवाच प्रणतो वाग्मी भास्करादीन्सुरोत्तमान् ॥ २३ ॥ यदि प्रसन्ना मह्यं च वरं दास्यथ वाञ्छितम् ॥ मानस्यो मे प्रजाःसर्वा वृद्धिं गच्छंतु भूतले ॥ २४ ॥ वाडवादित्यवचनं श्रुत्वा प्रोचुः सभास्कराः ॥ अयोनिजा कुशभवा संततिस्ते भविष्यति ॥ ॥ २५ ॥ यदैवोत्पद्यते वायुः सर्वलोकसुखावहः ॥ तेषां शुश्रूषणार्थाय प्रजास्ते कुशसंभवाः ॥ २६ ॥ चतुर्विंशतिसंख्याका ब्राह्मणा वेदपारगाः ॥ द्विगुणाश्च ततो वैश्या भार्या शूद्री समुद्भवाः ॥ २७ ॥ तेषां समुद्भवाः सर्वे वणिजो वायडाभिधाः ॥ भविष्यंति द्विजाः सर्वे तन्नामानो विचक्षणाः ॥ २८ ॥ चतुर्विंशतिसंख्याका सहस्रं वणिजां गणाः ॥ तदर्धं ब्राह्मणा भूमौ भविष्यंति विचक्षणाः ॥ २९ ॥ तावत्तिष्ठ द्विजश्रेष्ठ कृत्वा वापीं महत्तराम् ॥ यावद्भवंति भूमिष्ठा वायवो लोकभावनाः॥

विष्णु ब्रह्मा शिव सूर्यादिक सब देवता वाटिका क्षेत्रमें बाडव ऋषिके पास आयके कहने लगे हे ऋषि ! वर देनेको समर्थ हम तेरे पास आये हैं तुम वरदान मांगो ॥ ॥ २२ ॥ तब विष्णवादिक देवताओंको देखके प्रसन्न चित्तसे तपोबलसे जिसका तेज सूर्य सरीखा भया है इसवास्ते बाडवादित्य ऋषि जिसका नाम वह ऋषि सूर्यादिक देवतावोंको कहता है ॥२३॥ हे देवताओ ! तुम जो प्रसन्न भये हो तो मेरी मानसिक सृष्टि पृथ्वीमें वृद्धिगत होवे। ऐसा वरदान देओ ॥ २४ ॥ बाडवादित्यका वचन सुनते सूर्यादिक देवता कहने लगे हे बाडवादित्य ! तुझको अयोनिसम्भव दर्भके सन्तान होवेंगे ॥२५॥ जिस वखत सब लोगोंके सुखके वास्ते वायुदेवता उत्पन्न होवेगा उनकी शुश्रूषाके वास्ते तेरे पुत्र अयोनिसे दर्भसे उत्पन्न हुए ॥ २६ ॥ चौवीस ब्राह्मण और अडतालीस बनिये शूद्रजातिकी स्त्री सहवर्तमान वैश्य होवेंगे ॥ २७ ॥ फिर अडतालीस बनियोंमें आगे वायडा वैश्य बनिये चौवीस हजार उत्पन्न होवेंगे। और चौवीस दर्भके ब्राह्मणोंसे बारह हजार वायडा ब्राह्मण भूमीमें पैदा होवेंगे ॥ २८ ॥ २९ ॥ उस समय तक हे ऋषि ! तू यहां बडी वापी निर्माण करके

॥ ३० ॥ चतुरोऽत्र महत्कुंडान् विश्वकर्मा करिष्यति ॥ सूर्यकुंडस्तु पूर्वस्यां दक्षिणस्यां महेश्वरः ॥ ३१ ॥ प्रतीच्यां वैष्णवः कुण्डस्तदुदीच्यां पितामहः ॥ बाणगंगा महापुण्यानिकटेऽप्यागमिष्यति ॥ ३२॥ वायडाख्यं पुरं श्रेष्ठं वणिग्विप्रविभूषितम्॥ भविष्यति हनूमांश्च वरान् लप्स्यति शोभनान् ॥ ॥३३॥ तस्मादुत्तिष्ठ भद्रं ते तपसोऽस्मात्सुदुष्करात् ॥ श्रुत्वा तेषां हि वचनं वाडवो विस्मयान्वितः ॥ ३४ ॥ वव्रे वरं पुनस्तेभ्यो त्रैलोक्यस्य हितेच्छया ॥ एषां वापी महापुण्यतीर्थरूपा भवेन्मम ॥ ३५ ॥ अत्रागत्य तपः कुर्युस्तेषां सिद्धिरनर्गला ॥ अत्रैवागत्य मद्वंश्याः करिष्यंति हि मज्जनम् ॥ ॥३६॥ अक्षय्यं नाकभवनं लप्स्यतेऽन्येऽपि मानवाः ॥ वायोरुत्पत्तिमात्रं मे स्थितिरत्र भवेत्सुखम् ॥ ३७ ॥ पश्चान्मुक्तो भवाम्येव देहेनानेन सुव्रताः ॥ तदा दत्त्वा वरं देवाः स्वकीयं भवनं ययुः ॥३८॥ नद्याः स्वरूपं वक्ष्यामि शृणु भद्रे यश-

निवासकर ॥ ३० ॥ और यहां विश्वकर्मा चार कुंड निर्माण करेंगे पूर्व दिशामें सूर्यकुंड दक्षिणदिशामें महेश्वरकुंड ॥३१॥ पश्चिमदिशामें विष्णुकुंड उत्तरदिशामें ब्रह्मकुंड करेंगे । बडीपुण्यरूप बाणगंगाभी तुम्हारे समीप आवेगी ॥ ३२ ॥ और वायडपुर नाम करके जगतमें विख्यात ब्राह्मण बनियोंसे होवेगा । और यहां हनुमान्‌का जन्म होवेगा और उनको वरप्राप्ति बहुत होवेगी ॥ ३३ ॥ इस वास्ते हे वाडव ऋषि ! अब उठो तपश्चर्या छोडो ऐसा देवोंका वचन सुनते वाडव ऋषि आश्चर्य करके ॥ ३४ ॥ सबोंके कल्याणार्थ और दूसरा वरदान मांगते हैं कि हे देवो ! यह वापिका पुण्यरूप तीर्थसरीखी होवे ॥ ३५ ॥ और यहां जो कोई तप करेगा तो उसको सिद्धि तत्काल होवे और मेरे वंशस्थ पुरुष यहां आयके जो स्नान करेंगे ॥ ३६ ॥ दूसरे भी मानव स्नान करेंगे तो अक्षय्य स्वर्गप्राप्ति हो ऐसा वर देवो और वायुदेवताकी उत्पत्ति होवेतक मैंने यहां रहना बाद इस देहसे मेरी मुक्ति होवे ऐसा वरदान देवो तब देवता तथास्तु कहके अपने अपने स्थानको जातेभये ॥ ३७ ॥ ३८ ॥ अब हे दिति ! बाणगंगाकी उत्पत्ति कहता हूं सो श्रवण कर जिस बखत पृथ्वी सब बीजोंको ग्रास करगई उस बखत उसको

स्विनि॥ग्रस्तबीजां धरां हंतु पृष्ठे वैनो यदा ययौ ॥ ३९ ॥
अर्बुदाचलमासाद्य तस्थौ किंचित्तृषातुरः ॥ बाणो जगाम
भूपीठे तस्माज्जाता नदी द्विधा ॥ ४० ॥ बाणोत्पन्ना स्मृता
बाणा सुनेत्रत्वात्सुलोचना ॥ शीततोयेन सुवहाजन्मनाशाद्वि-
नाशिनी ॥ ४१ ॥ एतत्सर्वं समाख्यातमेतत्कुरु व्रतं शुभे ॥
वाटिकावनमाश्रित्य तत्रास्ते कर्दमो ऋषिः ॥ ४२ ॥ तस्य
पार्श्वं नदीतीरे दिक्पालैः क्रतवः कृताः ॥ तस्माद्दिक्पालसंज्ञं
वै पुरमस्ति महत्तरम् ॥ ४३ ॥ तदा वाटिवनं गत्वा व्रतं चक्रे
दितिस्तदा ॥ ज्ञात्वा तस्यैव संकल्पं वासवोऽतिभयातुरः ॥
॥ ४४ ॥ जगाम सेवितुं तत्र नत्वा प्रोवाच नम्रतः ॥ पित्रा
संप्रेषितश्चास्मि रक्षार्थं तव सुव्रते ॥४५॥ इत्युक्त्वा ह्यकरोत्सर्वां
मृगयूरिव दुष्टधीः ॥ अथैकदा तु संध्यायां पूर्णगर्भा दितिस्तदा
॥ ४६ ॥ कृतमूत्रपुरीषा सा सुष्वाप विधिमोहिता ॥

मारनेके वास्ते पृथुराजा धनुर्बाण लेके पीछे दौडे ॥ ३९ ॥ सो आबूगढके समीप आये तब तृषाके दुःखसे वहां थोडे खडेरहे बाण जो था सो पृथ्वीको लगा। वहांसे दो धारासे एक नदी प्रकटभई ॥ ४० ॥ बाणसे उत्पन्न भई इसवास्ते बाणगंगा जिसका नाम नेत्र जिसके सुंदर हैं इसवास्ते सुलोचना, शीतल जल बहनेसे सुवहा और जिसमें स्नानादिक करनेसे पुनर्जन्मका नाश होताहै इसवास्ते विनाशिनी नाम भया ॥ ४१ ॥ हे दिति ! यह वृत्तांत सब तेरेकूं कहा इसवास्ते वाटिकावनका आश्रय करके व्रतकर जहां कर्दम ऋषि रहते हैं ॥४२॥ उनके पास नदीके तट ऊपर दिक्पालोंने यज्ञ कियाहै । उसके लिये दिक्पाल नाम करके बडा नगर भया है जिसकूं हालमें दर्शनपुर (दीसा) कहते हैं ॥ ४३ ॥ तब दितिने वाटिका वनमें जायके व्रतका आरंभ किया उस बखत इंद्रने जाना कि मेरे मारनेके वास्ते व्रतारंभ किया है सो जानके भयभीत होयके ॥ ४४ ॥ दितिकी सेवा करनेके वास्ते समीप जायके नमस्कार करके नम्रतासे कहता है हे दिति ! मातापिताने तुम्हारी रक्षाकरनेके वास्ते भेजा है॥४५॥ऐसा कहके कपटसे सेवा करने लगा । इस उपरांत एक दिन गर्भ पूर्णहुआहै जिसका ऐसी दिति सायंकालकी बखत ॥४६॥मूत्रपुरीषोत्सर्ग करके वर्ष पूर्ण होते आया उससे मोहित होयके शयन करती

एतदंतरमासाद्य योगरूपधरो हरिः ॥ ४७ ॥ प्रविश्य गर्भं चिच्छेद बालं वज्रेण सप्तधा ॥ सप्तरूपोऽभवद्बालो देवराजसमद्युतिः ॥ ४८ ॥ तानेव सप्तधा भूयश्चिच्छेद रुरुदुस्तदा ॥ मारोदत तथेत्युक्त्वा बालका निर्गता बहिः ॥ ४९ ॥ दितिः प्रबुध्य ददृशे बालकान् देवरूपिणः ॥ पप्रच्छशक्रं पार्श्वस्थं कथमेते वदस्व माम् ॥ ५० ॥ नो चेच्छप्स्यामि संरुष्टा तदा शक्रोऽब्रवीद्दितिम् ॥ माता मेऽकथयत्सर्वं वरदानं तवार्पितम् ॥ ५१ ॥ पित्रात्यंतं प्रसक्तेन पुत्रो दत्तो ममाधिकः ॥ तत्सिद्धये व्रतं दत्तमेवं ज्ञात्वाहमागतः ॥ ५२ ॥ दृष्ट्वैकदा व्रतच्छिद्रं छिन्नो गर्भस्तु सप्तधा ॥ यदा ते न मृता बालाश्छिन्नाश्च सप्तधा पुनः ॥ ५३ ॥ रुदंतः प्रार्थयामासुर्मास्मान् हिंसि शतक्रतो ॥ तवैव बांधवाः सर्वे भविष्यामः सुरोत्तमाः ॥ ५४ ॥ इत्युक्त्वा निसृताः सर्वे इति सर्वं निवेदितम्

भई। इतना व्रत भंग देखके इन्द्र योगमायाके बलसे सूक्ष्म रूप धारण करके ॥४७॥ दितिके गर्भमें प्रवेश करके बालकके सात खंड कियो । वे सात बालक इंद्रसमान तेजस्वी भये ॥ ४८ ॥ इंद्रने फिर उन सात बालकोंके भी एकएकके सातसात टुकडे किये तथापि सर्व बालक रोनेलगे। तब रोवो मत ऐसा इंद्रने कहा पीछे इंद्र सह वर्तमान सब बालक बाहर निकले ॥ ४९ ॥ तब दिति जागृत होयके देवसरीखे पुत्रोंकूं देखके इंद्रको पूछनेलगी हे इंद्र ! यह सब तेरे पास खडे हैं वे कौन हैं सो सत्य कहो ॥ ५० ॥ नहीं तो शाप देऊंगी तब इंद्र कहनेलगा हे दिति ! तुम्हारेको जो कश्यपसे वरदान प्राप्त भया। सो मेरी माने कहा ॥ ५१ ॥ और पिताने अत्यन्त प्रसन्न होयके मेरेसे अधिक ऐसा पुत्र दिया और पुत्र होनेके वास्ते एक व्रत भी बताया सो जानके मैं तुम्हारे पास आया ॥ ५२ ॥ एक दिन तुम्हारे व्रतमें न्यूनता देखके तुम्हारे उदरमें जायके गर्भके सातखण्डाकिये तब सात बालक भये। गर्भ मृत्युको पाया नहीं । फिर सातके सात सात खंड किये तथापि मरे नहीं॥५३॥ वे एक कम पचास बालक रोनेलगे। और प्रार्थना करने लगे कि हमको मारो मत हम तुम्हारे भाई देव होवेंगे ॥ ५४ ॥ ऐसा कहके गर्भके बाहर निकसे सो बात तुमको सत्य कही। तब इंद्रका वचन सुनके दिति कहनेलगी ॥ ५५ ॥ हे

अथ श्रुत्वा दितिःशक्रं प्रोवाच पुरतः स्थितम् ॥५५॥ तेषां पोषणं पुत्र नैकया संभविष्यति ॥ तदा सस्मार कं शक्रः सोऽप्यागत्याब्रवीद्धरम् ॥५६॥ कथयस्व स्वकीयं त्वं कार्यं सोऽप्याहभो विधे ॥ एते वै मरुतो देवाः समुद्भूता दितेः सुताः ॥ ५७ ॥ संख्ययैकोनपञ्चाशन्न तेषां पोषणे क्षमा ॥ दितिर्दैत्यस्य जननी तेषां धात्र्यो विमृग्यताम् ॥५८॥ श्रुत्वा वाक्यं शतक्रतोर्धाता सस्मार वाडवम् ॥ प्रादुरासीत्तदा तत्र वाडवादित्यसन्निभः ॥ ५९ ॥ कुतः स्मृतोऽस्मि लोकेश कार्यं कथय मा चिरम्॥ श्रुत्वात्रेयस्य वचनं धाता प्रोवाच पुत्रक॥ ॥ ६० ॥ सृज पुत्रान् सभार्यांस्त्वं मरुतां सेवनेच्छया ॥ कुशरूपान्पुरैवोक्तांस्तप्यतस्तप उत्तमम् ॥ ६१ ॥ चतुर्विंशति संख्याकान् वाडवान्वायडाभिधान् ॥ वैश्यान्शूद्रीप्रियायुक्तान् कुरुष्व द्विगुणांस्ततः ॥ ६२ ॥ वायडाख्या भविष्यंति सर्वेषां देवता मरुत् ॥ मर्यादा स्थापिता पूर्वं चतुर्विंशतिसंख्यया ॥ ६३ ॥ सहस्रं ते भविष्यंति तदर्धं ते द्विजोत्तमाः ॥

इंद्र ! यह सब बालकोंका पोषण अकेलीसे नहीं होनेके तब इंद्रने ब्रह्माका स्मरण किया । ब्रह्मा आयके कहनेलगे ॥५६॥ हे इंद्र ! तेरा काम क्या है सो कह इंद्रने कहा ये सब मरुद्गण देवता दितिके गर्भसे उत्पन्नभये हैं ॥ ५७ ॥ सब मिलके एक कम पचास हैं उनको पोषण करनेको एक दिति समर्थ नहीं हैं । इसवास्ते उनके पोषणार्थ माताओंको लावो ॥ ५८ ॥ इंद्रका वचन सुनते वाडव ऋषिका स्मरण किया वे ऋषि वहां आयके ॥ ५९ ॥ कहनेलगे कि मुझको क्यों बुलाया है । जो कार्य होवे सो जल्दी कहो । तब ब्रह्मा कहनेलगे ॥ ६० ॥ हे वाडव ऋषि ! मरुद्गणोंका पोषण करनेके वास्ते दर्भरूप स्त्री सहित पुत्रोंको उत्पन्न करो । तप करती बखत पाहिलेहीं तुमको कहाहै ॥ ६१ ॥ चौवीस वायडे ब्राह्मण और उनके सेवक वैश्य वायडे वणिज शूद्रीभार्यायुक्त ब्राह्मणसे दुगने करो ॥ ६२ ॥ यह सब वायडानामसे विख्यात होवेंगे । सबोंकी वायु देवता होवेगी । पाहिले मैंने चौबीसकी मर्यादा स्थापन कियीहै ॥६३॥ इसवास्ते चौबीस हजार ब्राह्मण अडतालीस हजार

ब्रह्मणैकं तु द्वौ वैश्यौ पालयिष्यंति संमताः ॥ ६४ ॥ एतेषां कुलदेवीयं तव वापी भविष्यति ॥ चूडाकर्म समागत्य ये करिष्यंति वाडवाः ॥ ६५ ॥ ते सर्वे पापनिर्मुक्ता भविष्यंति दिवोर्थिनः ॥ त्वामेव वाडवादित्यं वाप्यां मातृगणांस्तथा ॥ ॥ ६६ ॥ वायडा अर्चयिष्यंति ऋणमुक्ता न संशयः ॥ तेषां पुत्राश्च पौत्राश्च वृद्धिमेष्यंति विश्रुताः ॥ ६७ ॥ सूत उवाच ॥ ॥ इत्युक्तो वाडवादित्यो वायडाख्यान्द्विधाकृतान् ॥ वैश्यान्द्विजांश्च ससृजे सभार्यान्कुशनिर्मितान् ॥ ६८ ॥ स्नापयित्वैककं बालमर्पयामास विश्वकृत् ॥ शुश्रूषध्वमिमान् वेधा इत्युक्तादितिनंदनान् ॥ ६९ ॥ भाद्रशुक्लस्य षष्ठ्यां वै सुसंस्नाप्यार्पयत्स तान् ॥ तस्मात्सा स्नापिनी षष्ठी मासे सप्तमके पुनः ॥ ७० ॥ चैत्रषष्ठ्यां रवौ दोलारूढास्ते ब्रह्मणा कृताः ॥ तस्माद्धिंडोलिनी प्रोक्ता तस्यां चैव महोत्सवम् ॥७१॥ ये करिष्यंति ते वायुबाधाप्रमुक्ता भविष्यंति ॥ इत्युक्त्वांतर्दधे ब्रह्मा ह्यथ तेषां निवासकम् ॥ ७२ ॥ वाडवाख्यां महद्दिव्यं

वनिये होवेंगे एक ब्राह्मण दो बनिये इस रीतिसे अपने गुरुका पालन सेवन करेंगे ॥६४॥ इनकी कुलदेवता यह वापी होवेगी जो कोई ब्राह्मण यहां आयके चौलकर्म करेंगे ॥६५॥ वे पापसे मुक्त होयके स्वर्गमें जावेंगे । तुम जो वाडवादित्य हो सो तुम्हारी और वापीस्थ मातृगणोंकी जो पूजा करेंगे वे ऋणमुक्त होवेंगे।पुत्रपौत्रादिकसे वंश वृद्धिगत होवेगा॥६६॥६७॥सूत कहतेहैं हे शौनक! ब्रह्माका वचन सुनते वाडवादित्यने भार्यायुक्त ब्राह्मण और बनियोंको उत्पन्न किया ॥६८॥ फिर ब्रह्मा दितिगर्भोत्पन्न एक एक बालकको स्नान करवायके वे वायडोंको अर्पणकरके कहने लगे कि इनकी शुश्रूषा करना॥६९॥ब्रह्माने जो दितिपुत्रोंको भाद्रपदशुक्ल षष्ठीको स्नान करवायके अर्पण किया इसवास्ते उसको स्नापिनी षष्ठी कहते हैं फिर वहांसे सातवें महीने॥७०॥चैत्रशुक्ल षष्ठीके दिन ब्रह्माने मरुद्गणोंको डोलारोहण करवाया। उस दिनसे हिंडोलिनी षष्ठी कहते हैं जो उसी दिन उत्सव करेंगे ॥ ७१ ॥ उनको वायु रोगकी पीडा होनेकी नहीं । ऐसा कहकर ब्रह्मा गुप्त भये। ऐसा वायडे ब्राह्मण और वायडे वणिक वैश्योंका बडा स्थान॥७२॥ जिसका विस्तार सोलह कोश बडा

चतुर्योजनविस्तृतम् ॥ वाडवादित्यतपसः निर्मितं विश्वकर्मणा ॥ ७३ ॥ मातरस्तत्र तिष्ठंति देवी श्रीरंबिका तथा ॥ माघ्यला १ खाघ्यला २ देवी ह्यखिला ४ जाखिला ५ तथा ॥ ७४ ॥ ल्यंबजा ६ रूयंबजा ७ तत्र अरूयता ८ नयना तथा ९ ॥ सिद्धमाता १० तथा चाशापुरी ११ श्रीरंजनेति च १२ ॥७५॥ रामेश्वरश्च तत्रस्थौ भीमेश्वर २ त्रिपुरेश्वरौ। ॥ ३ पावनेश्वर ४ विल्वेशो ५ वालुकेश्वर ६ एव च ॥ ७६ ॥ उत्तरेश्वर ७ बिश्वकेशौ ८ सिद्धेशः २ कर्दमेश्वरः१० ॥ नीलकंठेश्वर ११ स्तत्र हनुमानेश्वरस्तथा १२ ॥ ७७ ॥ चतुर्भिश्चत्वरैर्व्याप्तं चतुष्कुण्डैः समन्वितम्॥वायडानां पुरं तत्र कुलाचारोऽयमीरितः ॥ ७८ ॥ वायडाख्याभिधैः सर्वैर्विवाहे चत्वरे तथा ॥ स्नानं कार्यं बलिर्देयः क्षेत्राधीशाय सर्वदा ॥ ७९ ॥ स्थिता द्वादशवर्षाणि वायवः स्वर्गतिंगताः ॥ अत्र पुत्रांश्च पौत्रांश्च संस्थाप्य वाडवो मुनिः ॥ ८० ॥ आराध्य देवदेवेशं विष्णोः सदनमीयिवान् ॥ एतत्सर्वं मयाख्यातं यत्पृष्टोऽहं पुरा द्विजाः

उत्तम वाडवादित्यके तपोबलसे विश्वकर्माने निर्माणकिया ॥ ७३ ॥ उस क्षेत्रमें बारह मातृगण और बारह महादेव निवास करतेहैं । उनके नाम अंबिकादेवी १ माघ्यला २ खाघ्यला ३ अखिला ५ ॥ ७४ ॥ ल्यंबजा ६ रूयंबजा ७ अरूयता ८ नयना ९ सिद्धमाता १० आशापुरी ११ श्रीरंजना १२॥७५॥रामेश्वर१भीमेश्वर २ त्रिपुरेश्वर ३ पावनेश्वर ४ विश्वेश्वर ५ वालुकेश्वर ६ ॥७६॥उत्तरेश्वर ७ बिल्वकेश्वर ८सिद्धेश्वर ९ कर्दमेश्वर१०नीलकंठेश्वर ११ हनुमानेश्वर १२ ये हैं ॥७७॥ उस पुरमें चार चौहट्टेहैं चार कुंडहैं और वायडे ब्राह्मण बनियोंका एक कुलाचार है ॥ ७८ ॥ विवाहमें सबोंने चौहट्टेमें जायके स्नान करना क्षेत्रपालकी पूजा बलिदान कराना ॥७९॥अब वे मरुद्गण जो थे वे बारह बरस वहां रहके स्वर्गमें चलेगये । वाडवमुनी भी पुत्र पौत्रादिकोंका स्थापन करके ॥८०॥ विष्णुका आगमन करके

॥ ८१ ॥ वायोर्जन्म मया प्रोक्तं किं भूयः श्रोतुमिच्छथ ॥
इतिवायडजातेश्चोत्पत्तिसारः प्रकीर्तितः ॥ ८२ ॥

इति वायडविप्रवणिग्युत्पत्तिप्रकरणं १५ संपूर्णम् ॥

इति पंचद्राविडमध्ये गुर्जरसंप्रदायः । सर्वश्लोकसंख्या २१०५ ॥

विष्णुलोकमें गये । हे शौनक ! तुमने जो मुझको पूछा वो सब मैंने ॥८१॥ वायुका जन्म तुमकूं कहा अब क्या श्रवण करनेकी इच्छा है वह वायडाज्ञातिका उत्पत्ति सार वर्णन किया ॥ ८२ ॥

इति वायडे ब्राह्मण और वायडे बनिये वैश्योंकी उत्पति कही प्रकरण १५ संपूर्ण भया।

अथ उन्नतवासिब्राह्मणोत्पत्तिप्रकरणम् ॥ १६ ॥

श्रीगणेशाय नमः ॥ ईश्वर उवाच ॥ ततो ॥ गच्छेन्महादेवि ह्युन्नतस्थानमुत्तमम् ॥ तस्यैवोत्तरदिग्भागे ऋषितोयातटे शुभे ॥ १ ॥ ब्रह्मेश्वरेति लिंगं वै ब्राह्मणैश्च प्रतिष्ठितम् ॥ एतत्स्थानं महादेवि विप्रेभ्यः प्रददौ बलात् ॥२॥ सर्वसीमासमायुक्तं चंडीगणसुरक्षितम् ॥ उन्नामितं पुनस्तत्र यत्र लिंगं महोदये ॥३॥ तदुन्नतमिति प्रोक्तं स्थानं स्थानवतां वरम् ॥ अथ वा चोन्नतं पूर्वद्वारं प्रासादकस्य वै ॥४॥ तदुन्नतमिति प्रोक्तं०॥ विद्यया तपसा चैव यत्रोत्कृष्टा महर्षयः ॥ ५ ॥ तदुन्नमिति प्रोक्तं स्थानं० ॥ यदा देवकुले विप्रा मूलचंडीशसंज्ञकम् ॥

अब उनेवाल ब्राह्मणोंकी उत्पत्ति कहतेहैं। शिवजी पार्वतीको कहतेहैं हेपार्वती! तदनंतर उन्नतक्षेत्रमें यात्रार्थ जाना उन्नतक्षेत्रसे उत्तर दिशामें ऋषितोया नदीके तट ऊपर ॥१॥ ब्राह्मणोंने ब्रह्मेश्वरनामक शिवकी प्रतिष्ठा की है शिवजीने ब्राह्मणोंको वह स्थान बलात्कारसे दिया ॥ २ ॥ वह उन्नत स्थान कैसा है चारों तरफ जिसके सीमाकोट बंधा है। चंडीगण जिसका रक्षण करते हैं। तपके महान् उदयकी बखत जहां लिंग उद्घाटित किया॥३॥ उससे उन्नतस्थान भया ॥ अथवा प्रसादका पूर्वद्वार ऊंचा है उससे ॥ ४ ॥ उन्नत स्थान कहते हैं। अथवा जहां विद्यासे और तपसे ऋषि बडे उत्कृष्ट हैं उससे उन्नत स्थानकहवे हैं ॥ ५ ॥ जिस बखत सब ब्राह्मण मूलचंडीश

॥ ६ ॥ प्रसाद्य च महादेवं पुनः प्राप्ता महोदयम् ॥ षष्टिवर्ष-सहस्राणि तपस्तेपुर्महर्षयः ॥ ७ ॥ ऋषि तोयातटे रम्ये ध्याय-माना महेश्वरम् ॥ भिक्षुर्भूत्वा गतश्चाहं यत्र तेपुर्द्विजातयः ॥ ॥ ८ ॥ त्रिकालदर्शिभिस्तत्र लक्षितोऽहं तपस्विभिः ॥ दृष्टमा-त्रस्तदा विप्रैर्विरराम महेश्वरः ॥ ९ ॥ क यासि विदितो देव इत्युक्त्वा न ययुर्द्विजाः ॥ यावदायांति मुनय ईशेशेति प्रभा-षकाः ॥ १० ॥ धावमानाः स्वतपसा द्योतयंतो दिशो दश ॥ लिंगमेव प्रपश्यंति न पश्यंति महेश्वरम् ॥११॥ यदैव ददृशु-र्लिंगं मूलचंडीशसंज्ञकम् ॥ तदा च मुनयः सर्वेसदेहाः स्वर्गमा-ययुः ॥१२॥ यदात्रिविष्टपं व्याप्तं दृष्टंवैशतयज्वना ॥ आयांतिच तथैवान्ये मुनयस्तपसोज्ज्वलाः ॥१३॥ एतदंतरमासाद्य समा-गत्य महीतले ॥ लिंगमाच्छादयामास वस्त्रेणैव शतक्रतुः ॥ ॥ १४ ॥ अष्टादशसहस्राणि मुनीनामूर्द्ध्वरेतसाम् ॥ स्थितानि न तु पश्यंति लिंगमेतदनुत्तमम् ॥ १५ ॥ शतक्रतुस्तु सहसा दृष्टो वज्रेण संयुतः ॥ यावद्दिशंति शापं ते तावन्नष्टः पुरंदरः ॥ ॥ १६ ॥ दृष्ट्वा तान्कोपसंयुक्तान्भगवांस्त्रिपुरांतकः ॥ उवाच

महादेवके पास बैठके साठ हजार वर्ष पर्यंत तपश्चर्या करतेभये । ६---७ ॥ ऋषितो या नदीके तट ऊपर शिवका ध्यान करते बैठे हैं शिवकहनेलगे हे पार्वती ! जहां वे तप करते रहे वहां मैं भिक्षुकका रूप लेके आया॥८॥ तब वे तपस्वी भूत भविष्य वर्तमानके जाननेवाले ऋषियोंने देखते बरोबर मुझको पिछाने तब ॥९॥ हे शिव ! तुम कहां जाते हो ऐसा कहके मेरे पीछे आय हे ईश्वर ! हे ईश्वर ! ऐसा कहते कहते दौडते दौडते यावत्काल पर्यंत आते हैं ॥ १० ॥ और अपने तेजसे दशदिशाओंको प्रकाशित करते हैं इतनेमें लिंगको देखे परंतु शिवको न देखे ॥ ११ ॥ जिस वखत मूलचंडीश लिंगको देखे उसी वखत सब मुनि स्वदेहसे स्वर्गको गये ॥ १२ ॥ जब स्वर्ग बहुत व्याप्तहुआ देखा और दूसरे भी आयरहे हैं यह देखके इंद्र ॥ १३ ॥ भूलोकमें आयके उस लिंगको अच्छादन किया ॥ १४ ॥ उस वखत वहां अठारह हजार मुनि थे वे उत्तम लिंगको न देखते भये ॥१५॥ वज्रसहित इन्द्रको देखते भये यावत्काल पर्यंत उसको शाप देते इतनेमें इंद्र छिपगया ॥ १६ ॥ तब शिव उन

सांत्वयन्देवो वाचा मधुरया द्विजान् ॥ १७ ॥ कथं खिन्ना द्विजश्रेष्ठाः सदा शांतिपरायणाः ॥ प्रसन्नवदना भूत्वा श्रूयतां वचनं मम ॥ १८ ॥ भवद्भिर्ज्ञानसंयुक्तैः स्वर्गः किं मन्यते बहु ॥ स्वपुण्यसंक्षये प्राप्ते यस्माद्वै भ्रश्यते नरः ॥ १९ ॥ एवं दुःखसमायुक्तः स्वर्गो नैवोह्यते बुधैः ॥ एतस्मात्कारणाद्विप्रा कुरुध्वं वचनं मम ॥ २० ॥ गृह्णीध्वं नगरं रम्यं निवासाय महाप्रभम् ॥ हूयतामग्निहोत्राणि देवताः सर्वदा द्विजाः ॥ २१ ॥ यजंतो विविधैर्योगैः क्रियतां पितृपूजनम् ॥ आतिथ्यं क्रियतां नित्यं वेदाभ्यासस्तथैव च ॥ २२ ॥ एवं वै कुरुतां नित्यं विना ज्ञानस्य संचयैः ॥ प्रसादान्मम विप्रेंद्राः प्रांते मुक्तिर्भविष्यति ॥ २३ ॥ विप्रा ऊचुः ॥ ॥ असमर्थाः परित्राणे जिताहारास्तपोन्विताः ॥ नगरेणेह किं कुर्मस्तव भक्तिमभीप्सवः ॥ २४ ॥ ईश्वर उवाच ॥ ॥ भविष्यति सदाभक्तिर्युष्माकं परमेश्वरे ॥ गृह्णीध्वं नगरं रम्यं कुरुध्वं वचनं मम ॥ ॥ २५ ॥ इत्युक्त्वा भगवान्देव ईषन्मीलितलोचनः ॥ सस्मार विश्वकर्माणं प्रांजलिः सोऽग्रतः स्थितः ॥ २६ ॥ आज्ञापयतु

ब्राह्मणोंको क्रुद्ध देखके मधुरवचनसे बोलनेलगे ॥ १७ ॥ हे ब्राह्मणो ! तुमसदा शांतचित्त होके उदास कैसे भये प्रसन्नमुख करके मेरा वचन सुनो ॥ १८ ॥ तुम ऐसे ज्ञानी होके स्वर्गको बडा मानते हो जहां पुण्य क्षीण होनेसे मनुष्यका नीचे पतन होता है ॥ १९ ॥ ऐसे दुःखयुक्त स्वर्गको पंडित लोग मनमें नहीं रखते इसवास्ते मेरा वचन सुनो ॥ २० ॥ तुमको रहनेके वास्ते अति तेजस्वी रमणीय नगर देता हूं सो ग्रहण करो वहां रहके अग्निहोत्र करो देवताकी पूजा करो ॥ २१ ॥ यज्ञकरो नित्य पितृपूजन आतिथिपूजन वेदभ्यास करो ॥ २२ ॥ ऐसा नित्य करो तो ज्ञान विना भी मेरे अनुग्रहसे अंतको मुक्ति होवेगी ॥ २३ ॥ ब्राह्मण कहनेलगे हे शिव ! गृहदारके रक्षणकरनेकूं हम समर्थ नहीं हैं हम जिताहार तपस्वी तुम्हारी भक्तिकी इच्छा करते हैं यहां नगर लेके क्या करेंगे ॥ २४ ॥ तब शिव कहनेलगे तुम्हारी भक्ति परमेश्वरमें होवेगी यह नगर ग्रहणकरो मेरा वचन मानो ॥ २५ ॥ ऐसा कहके विश्वकर्माका स्मरण करते वे हाथ जोडके सामने आयके खडे रहे ॥ २६ ॥ और क्या आज्ञा है सो कहो ऐसा वचन सुनते शिव कहनेलगे हे

मां देवो वचनं करवाणि ते ॥ सोऽप्याह क्रियतां त्वष्टर्विप्रार्थं सुन्दरं पुरम् ॥२७॥ इत्युक्तो विश्वकर्मा यः भूमिं वीक्ष्य समंततः ॥ उवाच प्रणतो भूत्वा शंकरं लोकशंकरम् ॥ २८ ॥ परीक्षिता मया भूमिर्न युक्तं नगरं त्विह ॥ अत्र देवकुलं साक्षाल्लिंगस्य पतनं तथा ॥ २९ ॥ यतिभिश्चात्र वस्तव्यं न युक्तं गृहमेधिनाम् ॥ इत्युक्तः स महादेवस्तेन वै विश्वकर्मणा ॥ ॥ ३० ॥ पुनः प्रोवाच तं तस्य प्रशस्य वचनं शिवः ॥ रोचते मे न वासोऽत्र विप्राणां गृहमेधिनाम् ॥३१॥ यत्र वोन्नामितं लिंगमृषितोयातटे शुभे ॥ तत्र निर्मापय त्वष्टर्नगरं शिल्पिनां वर ॥३२॥ तस्य तद्वचनं श्रुत्वा विश्वकर्मा त्वरान्वितः ॥ गत्वा चकार नगरं शिल्पिकोटिभिरावृतः ॥३३॥ उन्नतं नाम यल्लोके विख्यातं सुरसुन्दरि ॥ ततो हृष्टमना भूत्वा विलोक्य नगरं शिवः ॥ ३४ ॥ आहूय ब्राह्मणान्सर्वानुवाचानतकंधरः ॥ इदं स्थानवरं रम्यं निर्मितं विश्वकर्मणा ॥३५॥ ग्रामाणां च सहस्रैस्तु प्रोतं सर्वासु दिक्षु च ॥ नगरात्सर्वतः पुण्यो देशोन-

विश्वकर्मा ! तुम ब्राह्मणोंके अर्थ उत्तम नगर बनाओ ॥ २७ ॥ विश्वकर्मा तब चारों तरफकी भूमिको देखके कहनेलगे ॥ २८ ॥ हे शिव ! मैंने भूमिकी परीक्षा की यहां नगर निर्माणकरना योग्य नहीं है यहां लिंगपात भया है देवताका वास है ॥ २९ ॥ संन्यासियोंने रहना, गृहस्थाश्रमियोंका रहना योग्य नहीं है ऐसा कहा तब महादेव ॥ ३० ॥ पुनः कहते हैं मुझको गृहस्थाश्रमी ब्राह्मणोंका यहां वास करवाना अच्छा लगता नहीं है ॥ ३१ ॥ इसवास्ते जहां मैंने लिंग उन्नमित किया है ऐसी ऋषितोय नदीके तट ऊपर अति उत्तम नगर निर्माण करो ॥ ३२ ॥ शिवका वचन सुनते विश्वकर्माने जलदीसे करोड शिल्पियोंको लेके नगर बनाया ॥ ३३ ॥ जो लोकमें उन्नत ऐसा कहते हैं यह नगर पश्चिम समुद्र नजीक काठियावाड देशमें देलवाडा गामके पास जिसको उना ऐसा कहते हैं उस नगरको देखके शिव प्रसन्न होयके ॥ ३४ ॥ सब ब्राह्मणोंको बुलायके कहनेलगे हे ब्राह्मणो ! यह विश्वकर्मानिर्मित उत्तम स्थान है ॥ ३५ ॥ इसके अधीन चारों तरफ हजार गांव हैं नगरके चारों तरफ नवग्रह देश बडा पुण्यरूप है

ग्नहरः स्मृतः ॥३६॥ नग्नो भूत्वा हरो यत्र देशे भ्रांतो यदृ-
च्छया ॥ तं नग्नहरमित्याहुर्देशं पुण्यतम जनाः ॥ ३७ ॥
अष्टयोजनविस्तीर्णं व्यायामं व्यासतस्तथा ॥ पूर्वे वै शंकरा-
र्या च पश्चिमे न्यंकुमन्यपि ॥ ३८ ॥ उत्तरे कनकनंदा च
दक्षिणे सागरोवधिः॥गृह्यतां नगरं श्रेष्ठ प्रसीदध्वं द्विजोत्तमाः
॥३९॥ अत्र भुक्तिश्च मुक्तिश्च भविष्यति न संशयः ॥ इत्यु-
क्तास्ते तदा विप्राः सर्वे प्रोचुर्महेश्वरम् ॥ ४० ॥ ईश्वराज्ञां
वृथा कर्तुं न शक्या परमात्मनः ॥ तपोग्निहोत्रनिष्ठानां वेदा-
ध्ययनशालिनाम् ॥ ४१ ॥ अस्माकं रक्षिता कोऽस्ति कलि-
काले च दारुणे ॥ को दाताऽऽरोग्यदः कश्च को वै मुक्तिं प्रदा-
स्यति ॥ ४२ ॥ ईश्वर उवाच ॥ ॥ महाकालस्वरूपेण
स्थित्वा तीर्थे महोदये ॥ नाशयिष्यामि शत्रून्वः सम्यगारा-
धितो ह्यहम् ॥४३॥ उन्नतो विघ्नराजस्तु विघ्नच्छेत्ता भवि-
ष्यति ॥ गणनाथस्वरूपोऽयं धनदो निधिनां पतिः ॥ ४४ ॥
युष्मभ्यं दास्यति द्रव्यं सम्यगाराधितोऽपि सः ॥ आरोग्यदा-
यको नित्यं दुर्गादित्यो भविष्यति ॥ ४५ ॥ विप्रा ऊचुः ॥
यदि तीर्थानि तिष्ठंति सर्वाणि सुरसत्तम ॥ संगालेश्वरतीर्थे

॥ ३६ ॥ जहां शिव अपनी इच्छासे नग्न होयके फिरे हैं उस भूमिको लोक नग्न-हर देश अति पुण्यकारक कहते हैं ॥ ३७ ॥ वह देश लंबा चौडा बत्तीस कोस है पूर्वमें शंकरार्या नदी है पश्चिममें न्यंकुमनी है ॥ ३८ ॥ उत्तरमें कनकनंदा दक्षिणमें समुद्र अवधि है ऐसा नगर ग्रहण करो और प्रसन्न हो ॥ ३९ ॥ यहां भुक्ति और मुक्ति होवेगी इसमें संशय नहीं है तब सब उनेबाल ब्राह्मण कहनेलगे ॥४०॥ ईश्वरकी आज्ञा तोडनेको कौन समर्थ है हे शिव ! हम तप अग्निहोत्र वेदाध्ययनमें निष्ठ रहेंगे ॥ ४१ ॥ उस बखत दारुण कलिकालमें हमारा रक्षण कौन करेगा आरोग्यता और मुक्ति कौन देवेगा। ॥४२॥ ईश्वर कहनेलगे हे ब्राह्मणो ! महाकाल स्वरूपसे यह महोदय तीर्थमें रहके तुम्हारे शत्रुवोंका नाश करूंगा॥४३॥ और उन्नत विघ्नराज विघ्नकूं छेदन करेंगे ॥४४॥ उन गणपतिका आराधन करोगे तो तुमको बहुत धन देवेगा दुर्गादित्य हैं वे तुमकूं आरोग्य करेंगे ॥४५॥ उन्नत-

च तथा देवकुले शिवः॥४६॥ कलावपि महारौद्रे चास्माकं पावनाय च॥स्थातव्यं तर्हि गृह्णीमो नान्यथा च महेश्वर ॥४७॥ स तथेति प्रतिज्ञाय ददौ तेभ्यःपुरं वरम् ॥ ददर्श विश्वकर्माणं प्रांजलिं पुरतः स्थितम् ॥ ४८ ॥ विलोक्यतां महादेव नगरं नगरोपमम् ॥ सौवर्णस्थलमारुह्य निर्मितं त्वत्प्रसादतः ॥ ॥ ४९ ॥ विश्वकर्मवचः श्रुत्वा आरुह्य स्थलकं हरः ॥ पुरं विलोकयामास रम्यं मुनिगणैः सह ॥ ५० ॥ ऋषयस्तुष्टुवुः सर्वे स्वर्णस्थं त्रिपुरान्तकम् ॥ तानुवाच महादेवो वृणुध्वं वरमुत्तमम् ॥ ५१ ॥ उनेवाला ऊचुः ॥ ॥ यदि तुष्टो महादेव स्थलकेश्वरनामभृत् ॥ अवलोकयंश्च नगरं सदा तिष्ठ स्थले हर॥५२॥ इत्युक्तो भगवाञ् शंभुः स्थलकेऽस्मिन्सदा स्थितः॥ कृते रत्नमयं देवि त्रेतायां च हिरण्मयम् ॥ ५३ ॥ रौप्यं च द्वापरे प्रोक्तं स्थलमश्ममयं कलौ ॥ एवं तत्र स्थितोदेवः स्थलकेश्वरनामतः ॥ ५४ ॥ पूजितश्च सदान्यैश्च ह्युन्नतक्षेत्र-

वासी ब्राह्मण कहनेलगे हे शिव ! जो कभी सब तीर्थ यहां वास करेंगे और देवकुलके वहा शिव जो निवास करेंगे ॥ ४६ ॥ और कलियुगमें हमकूं पावन करनेके वास्ते रहेंगे तो इस नगरका प्रतिग्रह करते हैं नहीं तो प्रतिग्रह लेते नहीं ॥४७॥ तब शिव उनका वचन अंगीकार करके ब्राह्मणोंको पुरदान देके हाथ जोडके रहे जो विश्वकर्मा ॥ ४८ ॥ उनको शिव कहते हैं हे विश्वकर्मा ! नगरको और महादेवको देखो ॥ ४९ ॥ तब विश्वकर्मा स्थलस्थ जो शिव उनको और अपने नगरको देखते भये ॥ ५० ॥ सब ऋषीश्वर सौवर्णस्थलस्थ शिवकी स्तुति करनेलगे तब शिव प्रसन्न होयके कहनेलगे कि तुम वर मांगो ॥५१ ॥ उनेवाला ब्राह्मणोंने कहा हे शिव ! आप प्रसन्न भये हो तो स्थलकेश्वर नामसे इस स्थलमें वास करो और नगर देखतेरहो ॥५२॥ ऐसा ब्राह्मणोंका वचन सुनते वहां निरन्तर वास किया वह स्थल सत्ययुगमें रत्नमय था त्रेतायुगमें सुवर्ण मयथा ॥ ५३ ॥ द्वापरयुगमें रूपेकाथा कलियुगमें पाषाणमय है ऐसे उस स्थलमें स्थलकेश्वर नामसे शिवजी निवास करते हैं ॥ ५४ ॥ उनेवाल ब्राह्मणोंसे और दूसरे भी

वासिभिः ॥ इत्येतत्कथितं देवि ह्युन्नतस्य कथानकम् ॥५५॥
श्रुतं पापहरं नृणां सर्वकामफलप्रदम् ॥ ५६ ॥

इति ब्राह्मणोत्पत्तिमार्तण्डे उन्नतवासिब्राह्मणोत्पत्तिवर्णनं
नाम षोडशप्रकरणम् ॥ १६ ॥

इति पञ्चद्राविडमध्ये गुर्जरसंप्रदायः आदितः मूलश्लोकसंख्या २१६१.

लोकोंसे नित्य पूजे जाते हैं हे पार्वति ! इस प्रकार मैं उन्नतक्षेत्रका प्रभाव कहा ॥ ५५ ॥ वह प्रभाव कैसा है कि श्रवण करते मनुष्यके पाप दूर होते हैं सब काम सिद्ध होते हैं ॥ ५६ ॥

इति उनेवालब्राह्मणोंकी उत्पत्ति प्रकरण ॥ १६ ॥

अथ गिरिनारायणब्राह्मणोत्पत्तिप्रकरण ॥ १७॥

अथ गिरिनाराणब्राह्मणोत्पत्तिसारमाह ॥ उक्तं च प्रभासखंडांतर्गते वस्त्रापथक्षेत्रमाहात्म्ये ॥ नारद उवाच ॥ ॥ महापुण्यतमे क्षेत्रे शुचौ वस्त्रापथे द्विजाः ॥ गिरिनारायणास्ते वै निवसंति पितामह ॥ १ ॥ गिरिनारायणाख्या वै कथमेषामभूत्किल ॥ तत्र संबंधिनः केन कृतास्तद्ब्रूहि मेऽनघ ॥ २ ॥ ब्रह्मोवाच ॥ पुरा हरिहरौ देवौ चन्द्रकेतौ कृपापरौ ॥ रैवतं ययतुः साक्षान्मूर्तिमंतौ महाबलौ ॥ ३ ॥ निर्जने च तपोदेशे भगवानित्यचिन्तयत् ॥ ब्राह्मणेन विनात्रैव कथं स्थास्ये च निर्जने ॥ ४ ॥ ततो नारद सस्मार ब्राह्मणं स्वात्मरूपिणम् ॥ इति संचित्य भगवान् गिरौ रैवतके वसन् ॥५॥

अब गिर्नारे ब्राह्मणोंकी उत्पत्ति कहते हैं नारद ब्रह्माको पूछनेलगे हे गुरु ! परम पवित्र ऐसा जो वस्त्रापथ क्षेत्र उसमें गिरिनारायण नाम करके जो ब्राह्मण रहते हैं ॥ १ ॥ उनका गिरिनारायण नाम कैसे भया किसने किया सो कहो ॥२॥ ब्रह्मा बोले पूर्वकालमें विष्णु और शिव यह दोनों देवता चंद्रकेतु राजाके ऊपर कृपा करनेके वास्ते रैवताचल पर्वतके ऊपर आयके ॥ ३ ॥ एकांत जनवर्जित जगहमें बैठे तब भगवान् विचार करनेलगे कि ब्राह्मण विना इस स्थलमें कैसे रहना ॥ ४ ॥ इसवास्ते हे नारद ! ऐसा जानके आपरूप ब्राह्मणका स्मरण किया ॥५॥

गिरिनारायण इति विप्रो दामोदरो ययौ ॥ तदा नारद गंगाया-
अब शेणवी सारस्वत ब्राह्मणोंकी उत्पत्ति कहते हैं सह्याद्रिखंडमें स्कंदशिवकूं पूछतहैं ब्राह्मण दश प्रकारके जो कहेहैं पंचगौड पंचद्राविड उन सबोंकी उत्पत्ति मुझको कहो ॥ १ ॥ शिव कहनेलगे ब्राह्मण दश प्रकारके हैं वे सब ऋषिकुलोत्पन्न हैं सबोंकूं ब्रह्मगायत्री और वेदकर्म यथायोग्य हैं ॥२॥ पंच गौड-सारस्वत १ कान्यकुब्ज २ गौड ३ औडिये ४ मैथिल ५ यह हैं ।पंचद्रविड-कर्नाटक १ तैलंग २द्राविड ३महा-राष्ट्र४गुर्जर५यह पांच हैं उसमें अन्यग्रंथका मत है--त्रिहोत्र ब्राह्मण १ आग्निवेश्य ब्राह्मण २ कान्यकुब्ज ३ कन्नौज ४ मैत्रायण ऐसे यह पंच गौड कहेजातेहैं ॥ ३ ॥ प्रथम परशुराम तीर्थयात्राके निमित्तसे शूर्पारकक्षेत्रमें आयके विमलतीर्थ निर्मलतीर्थ

पूर्वमेव हि ॥ तन्मध्ये तु कृतावासः पर्वते चतुरंगके ॥ ४ ॥ श्राद्धार्थं चैव यज्ञार्थं मंत्रिताः सर्वब्राह्मणाः ॥ नागता ऋषयः सर्वे क्रुद्धोभूद्भार्गवस्तदा ॥ ५ ॥ पश्चात्परशुरामेण ह्यानीता मुनयो दश ॥ त्रिहोत्रवासिनश्चैव पंचगौडांतरास्तथा ॥ ६ ॥ गोमांचले स्थापितास्ते पंचक्रोशी कुशस्थली ॥ भारद्वाजः कौशिकश्च वत्सः कौंडिन्यकश्यपौ ॥ ७ ॥ वसिष्ठो जामदग्निश्च विश्वामित्रश्च गौतमः ॥ अत्रिश्च दश ऋषयः स्थापितास्तत्र एव हि ॥ ८ ॥ श्राद्धार्थं चैव यज्ञार्थं भोजनार्थं तथैव च ॥ मठग्रामे कुशस्थल्यां कर्दली नाम तत्पुरे ॥९॥ आनीता भार्गवेणैते गोमांताख्ये च पर्वते ॥ मांगीरीशो महादेवो महालक्ष्मी च म्हालसा ॥१०॥ शांता दुर्गा च नागेशः सप्तकोटेश्वरः शुभः ॥ तथा च बहुला देवा आनीता जामदग्न्यतः ॥११॥ स्थापिता भक्तकार्यार्थं तत्रैव च शुभस्थले ॥ ते देवा

खदिरतीर्थादि हरिहरेश्वर बाणकोटकेपास मुक्तेश्वर कलुकेश्वर वालकेश्वर बाणगंगा। कुलस्थली। कुट्टाला। मठग्राम माटगांव। गोमंतकके ऊपर गोरक्षनामकतीर्थ। राम कुंड आदि अनेक तीर्थोंकी स्थापना करके और शूर्पारकक्षेत्र भी परशुरामने निर्माण करके चतुरंग नामक पर्वतके ऊपर निवास करतेभये ॥ ४ ॥ पीछे कई एक दिन गये बाद श्राद्धयज्ञके वास्ते सब ब्राह्मणोंकूं आमंत्रण किया परंतु कोई ब्राह्मण आये नहीं उससे परशुराम कुपित भये ॥ ५ ॥ पीछे श्राद्धयज्ञके वास्ते ब्राह्मण तो चाहिये तब परशुरामने त्रिहोत्रपुरनामक देशमें रहनेवाले पंचगौडांतर्गत दश ब्राह्मण लायके ॥ ६ ॥ गोमांतकमें पंचक्रोश कुशलस्थली इत्यादि क्षेत्रोंमें उन दश ब्राह्मणोंकी स्थापना की उनके नाम–भारद्वाज कौशिक वत्स कौंडिण्य कश्यप वसिष्ठ जमदग्नि विश्वामित्र गौतम अत्रि ऐसे इन दशब्राह्मणोंका श्राद्धमें यज्ञादिकमें भोजनमें व्यवहार चलानेके वास्तेत्रिहोत्रदेशस्थ पंचगौडांतर्गत सारस्वत ब्राह्मणोंको मठग्राममें कुट्टलांतमें केलाशीमें गोमांच इत्यादि स्थानोंसे स्थापन किये ॥ ७–९ ॥ और उनकी कुलदेवता मांगिश कहते मंगेश महादेव महालक्ष्मी म्हालसा ॥ १० ॥ शांता दुर्गा नागेश सप्त कोटेश्वरादिक हैं श्रेष्ठ ऐसे देवताओंको परशुरामने लायके ॥ ११ ॥ उस शुभस्थलमें भक्तके कार्यके वास्ते

वीर्यवंतश्च भक्ताभीष्टप्रदायकाः ॥ १२ ॥ स्मरणान्नश्यति क्षिप्रं पापं सत्यं वदाम्यहम् ॥ स्कंद उवाच ॥ कथाः सर्वा जगन्नाथ श्रुताश्च त्वत्प्रसादतः ॥ १३ ॥ दश गोत्रकरा विप्रा-स्त्रिहोत्रपुरवासिनः ॥ आनीताः पर्शुरामेण स्वकार्यार्थस्य सिद्धये ॥ १४ ॥ हे शंभोस्तस्य विस्तारं कथयस्व समासतः ॥ ॥ ईश्वर उवाच ॥ शृणु पुत्र साधु पृष्टं को योगश्च कथं स्थितिः ॥ १५ ॥ ब्राह्मणा दशगोत्राश्च कुलं षट्षष्टिकं स्मृतम् ॥ कुशस्थल्यां च बुद्धल्यां गोत्राणि स्थापितानि हि ॥१६॥ कौत्सं वत्सं च कौंडिन्यं गोत्रं दशकुलान्वितम् ॥ एते त्रिगोत्रजा विप्रा उत्तमा राजपूजिताः ॥ १७ ॥ सुदर्शनाः सदाचाराश्चतुराः सर्वकर्मसु ॥ मठग्रामो वरेण्यं च लोटली च कुशस्थली ॥ १८ ॥ षडेवैतेषु ग्रामेषु कुलानि स्थापितानि वै ॥ चूडामणिमहाक्षेत्रे कुलानि दश एव हि ॥ १९ ॥ स्थापिताश्च त्रयो देवा भार्गवेण तु यत्नतः ॥ द्वीपवत्यां कुलं चाष्टं स्थापितं च यथाविधि ॥ २० ॥ गोमाचले मध्यभागे द्वादशं स्थापितं

स्थापन किया और ये देवता जाज्वल्यतासे भक्तके मनोरथ पूर्ण करनेवाले हैं ॥१२॥ जिनके स्मरण करनेसे संचित सब पाप नाश पावताहै यह सत्य कहताहूं तब स्कंद पूछनेलगे हे जगतके नाथ! तुम्हारे अनुग्रहसे कथा तुमने कही सो श्रवण करी ॥ १३ ॥ परंतु परशुरामने जो त्रिहोत्र पुर देशस्थ दशब्राह्मणोंकूं लायके अपने कार्यके निमित्त स्थापन किया ॥ १४ ॥ उनकी कथा सविस्तर मेरेकूं कहो तब शिव कहनेलगे हे पुत्र! अच्छा प्रश्न किया ब्राह्मणोंका योग और स्थिति कहताहूं श्रवणकर ॥१५॥ वह ऐसी कि दश दश ब्राह्मण जो लायेगये उनके छासठ कुल थे उनमेंसे कुशस्थली। केळासी इन दो क्षेत्रोंमें कौत्स वत्स और कौंडिन्य इन तीन गोत्रोंकूं दश दश कुल सहित स्थापित किये यह तीनों गोत्रोंके ब्राह्मण राजपूजित ॥१६॥१७॥ रूपवंत संपूर्ण कर्ममें कुशल आचारवंत थे और मठग्राम। वरेण्य (नार्वे) अंबुजी और लोटली मिलके इन चार गावोंमें छः कुल स्थापित किये चूडामणि नामक महाक्षेत्रमें दश कुल ॥ १८ ॥ १९ ॥ तीन देवता इस करके युक्त स्थापित किये दीपवतीमें आठ कुलस्थ और गोमांचलके मध्यभागमें बारह कुलमें

कुलम्॥एवं षट् षष्टिका विप्राः स्थापिताश्च परस्परम् ॥२१॥ प्रादाय तेषां रामेण कुशस्थलनिवासिनाम् ॥ स षष्टिद्विजमुख्यानामधिकारं ददौ तदा ॥२२॥ अन्यच्च दशप्रकरणग्रंथे ॥ इत्थं सह्याद्रिखंडेऽपि भेदश्च परिकीर्तितः ॥ तेन पूर्वोक्तविप्राणां साष्टीकर इतीरितम् ॥ २३ ॥ संति भेदाश्च बहवः सारस्वतद्विजातिषु ॥ प्रथमस्तेष्वयं भेदः साष्टीकर इतीरितः ॥ २४ ॥ शाणवीति द्वितीयस्तु भेदस्तेषामुदाहृतः ॥ तथा च कोंकणा इत्थं भेदाः संति ह्यनेकशः ॥ २५ ॥ वृत्तिभेदात्तु नामानि गौडानां मिलितानि हि ॥ तस्मादेषां नामभेदाद्विप्रत्वं नैव गच्छति ॥ २६ ॥ अत्रार्थेऽपि च दृष्टांतः कथ्यते लोकरूढितः ॥ लेखनस्याधिकाराच्च कुलकर्णीति कथ्यते ॥२७॥ यथा चिटनीस इत्थं हि नाम तद्वृत्तिदर्शकम्॥षट्षष्टिग्रामे वासात्तु सासष्टीत्युपनामकम् ॥ २८ ॥ अधिकाराच्च ग्रामाणां प्राप्तमय न संशयः ॥ विप्रान्सारस्वता-

स्थापन किया इस प्रकारसे परशुरामने कुलदेवतासहित वे सब ब्राह्मण छासठ गांवोंमें स्थापन किये ॥२०॥२१॥ और उनके उदरपोषणार्थ छासठ ग्रामोंका अधिकार दिया॥२२॥ इस प्रमाणसे सह्याद्रिखंडमें यह सारस्वत गौडोंका आगमनानुरूप कुलभेदका वर्णन किया है यह उत्तम प्रकारसे अवलोकन करना । अब उस अधिकारके लिये सासष्टि (साष्टी कर) ऐसी संज्ञा प्राप्तभई ॥२३॥ और इसी प्रकारसे यह गौडमें देश काल परत्व करके बहुत नामभेद प्राप्त भयेहैं उनमें (साष्टीकर) यह प्रथम भेद जानना ॥ २४ ॥ शाणवी दूसरा भेद जानना कोंकणे देशपरत्वकरके तीसरा भेद जानना ऐसे अधिकारपरत्व करके अनेक भेद हैं ॥ २५ ॥ वृत्तिके भेदसे गौडोंकूं नाम मिलेहैं इसवास्ते नामके भेदसे कुछ ब्राह्मणत्व नष्ट होता नहीं है ॥ २६ ॥ इसके ऊपर लोकरूढिसे दृष्टांत कहते हैं सो देखो हिसाब किताब लिखनेसे कुलकर्णी कहते हैं ॥ २७ ॥ चिटणीसके काम करनेसे चिटणीसे कहतेहैं वैसा छासठगांवमें रहनेसे साष्टिकर नाम भयाहै ॥ २८ ॥ ग्रामोंके अधिकारसे नाम प्राप्तभयाहै इसमें संशय नहीं है । अब शेणवी यह नाम प्राप्तहोनेका कारण कहतेहैं । पहले कर्णाटक प्रांतमें मयूरवर्मा नाम करके राजा था उसका पौत्र

न्पूर्वं राजा तु शिखिसंज्ञकः ॥ २९ ॥ अधिकारं षण्णवतिग्रामाणां च ददौ किल ॥ एतद्ग्रामाधिकाराच्च शाण्णवीत्युपनामकम् ॥ ३० ॥ प्राप्तं हि तेन विप्रत्वं गच्छतीति न शंक्यताम् ॥ शुद्धशाण्णविशब्दोऽयं दशपांड्यादिशब्दवत् ॥ ३१ ॥ यथा आंग्र्यादिशब्दाद्या अपि वृत्त्याभिधायकाः ॥ तथा शाण्णविशब्दोऽयमपि वृत्त्यैव वाचकः ॥ ३२ ॥ वृत्तिभेदेन विप्राणां शाण्णवीत्यभिधीयते ॥ न विरुद्धं च शब्दानामेषामुपपदे सति ॥ ३३ ॥ अतः सिद्धं शाण्णवित्वं तत्त्वेन व्यवहारतः ॥ ब्राह्मण्यमपि सिद्धं नः संशयोऽतोन युज्यते ॥ ॥ ३४ ॥ अस्मत्कोंकणनाम्नो हि शक्यते यत्तु केनचित् कथ्यते तन्निरासार्थं नामरूढिप्रमाणकम् ॥ ३५ ॥ देशस्थतौलवादीनां देशस्था तौलवा इति ॥ वदंति देशभेदाच्च तथैते कोंकणाः खलु ॥ ३६ ॥ शुद्धः कोंकणशब्दोऽयं तौलवादिकशब्दवत् ॥ तद्देशवासिविप्राणामेकवाचक ईरितः ॥ ३७ ॥

शिखिवर्मा ॥ २९ ॥ उसने इन सारस्वत ब्राह्मणोंकूं छन्नूग्रामका अधिकार दिय इसवास्ते शास्त्रमें छन्नू अंकका नाम षण्णवती है इसवास्ते शाण्णवी ऊर्फ शेणवीं उपनाम भया है ॥ ३० ॥ इस नामकी प्राप्तिसे ब्राह्मणत्व जाताहै ऐसी शंका मत करो शुद्ध शेणवी शब्द जो है सो देसाई पांडे शब्द सरीखा जानना ॥ ३१ ॥ देखो वृत्तिके भेदसे आंग्रे । मराठे । म्हार । कमाठी । देसाई इत्यादि शब्द जैसे वृत्ति निमित्तसे है वैसा शाण्णवी ऊर्फ शेणवी शब्द जानना ॥ ३२ ॥ वृत्तिके भेदसे इन सारस्वत ब्राह्मणोंकूं शाणवी कहते हैं उसमें कुछ विरुद्ध नहीं है ॥ ३३ ॥ इसवास्ते शाणवी शब्द यथायोग्य सिद्ध होता है और ब्राह्मणत्व भी सिद्ध है इसवास्ते संशय करना योग्य नहीं है॥३४॥अब हमारे इन सारस्वतोंका कोंकणे नामक जो तीसरा भेद है उसके ऊपरसे जो कोई शंका करते हैं उसका नाम रूढिप्रमाणसे निराकरण करते हैं ॥ ३५ ॥ सो ऐसा कि देशमें रहे इसवास्ते देशस्थ तौल (तुलव) देशमें रहे इसवास्ते तुलवे ब्राह्मण उसीमुजब तैलंग द्रविड कर्नाटक गुर्जर इत्यादि भेद जैसे तत्तद्देशनिवास करनेसे प्राप्त भये उन सरीखा कोंकणका नाम जानना ॥ ३६ ॥ उसमें कोंकण यह शुद्ध शब्द तौलवादिक शब्द सरीखा तद्देशवासी ब्राह्मणोंका वाचक है । जैसे गुजराती ब्राह्मण परन्तु गुजरातीमें चौरासी भेद हैं ॥ ३७ ॥

कोंकणाः कोंकणा इत्थं व्यवहारस्य तत्त्वतः ॥ शंखावल्याद्य-ग्रहारनिवारस्य विधानतः ॥ ३८ ॥ शंखावल्यादिसंज्ञाभि-रेतेषां व्यवहारतः ॥ केरलाश्च तुलंगाश्च तथा सौराष्ट्रवासिनः ॥ ३९ ॥ कोंकणा करहाटाश्च वरालाटाश्च बर्बराः ॥ इति भैरवखंडेहि केरलादिषु सप्तसु ॥ ४० ॥ देशेषु भिन्नाभाषाणां सप्तकं समुदाहृतम् ॥ सर्वेषां ब्राह्मणादीनां सा वै भाषा नचे-तरा ॥ ४१ ॥ यथा वै केरले देशे द्विजानां च सतामपि ॥ एका केरलभाषैव शूद्राणामपि नेतरा ॥ ४२ ॥ तथैव कोंकणे देशे या भाषा विप्रजेषु सा ॥ दृश्यते सहजा तेन सिद्धं कोंकणकेषु च ॥ ४३ ॥ आचारः कुलमाख्याति देशमा ख्याति भाषितम् ॥ संभ्रमः स्नेहख्याति वपुराख्याति भोज-नम् ॥ ४४ ॥ आचारेण च विप्रत्वं कोंकणत्वं च भाषया ॥ अस्मासु त्वं विनिश्चित्य निश्चितो भव पंडित ॥४५॥ पंच-विंशतिसंस्कारैः संस्कृता ये द्विजातयः ॥ ते पवित्राश्च योग्याः

उसमें शुद्ध कोंकणी भाषा यह सारस्वत कोंकण ऊर्फ शाणवी ब्राह्मणोंकूं प्रत्यक्ष दीख पडती है । और शंखावली आदि करके जो अग्रेहार है उसमें रहनेसे कोंकण, साक्रवळकर, कुडालेकर, कायसुळकर, इत्यादि जो नाम चला सो आजपर्यंत विख्यात है ॥ ३८ ॥ और दूसरा ऐसा है कि केरल (मलबार) तुलंग (तुळु) सौराष्ट्र कोंकण कारहाट (कऱ्हाड) वरालाटा बर्बर इत्यादि यह सात देश भैरवखंडमें वर्णन किये हैं ॥ ३९ ॥ ४० ॥ और उन देशोंकी प्रत्येक भाषा भिन्न है । तब प्रत्येक देशमें ब्राह्मणादिकोंकी वही भाषा भई दूसरी नहीं ॥ ४१ ॥ जैसा केरल देशमें केरल ब्राह्मणोंकी और दूसरे सब वर्णोंकी भी भाषा केरली है ॥ ॥ ४२ ॥ वैसी कोंकण देशमें ब्राह्मणादिकोंकी कोंकणी भाषा दीख पडती है ॥ ॥ ४३ ॥ आचार कुलको बताता है । भाषा देशको बताती है संभ्रम प्रीतिको बताता है । शरीर खान पानको बताता है ॥ ४४ ॥ अर्थात् यह चारों पदार्थोंसे कुलादिकका ज्ञान होता है इसवास्ते यह सारस्वत शाणवीका आचारसे ब्रह्मणत्व भाषासे कोंकणत्व सिद्ध हैं । यह जानके हे पंडित ! शंका खटपट छोडके स्थिरचित्त रखो ॥ ४५ ॥ गर्भाधानादि पच्चीस संस्कार करके जो

स्युः श्राद्धादिषु सुमंत्रिताः ॥ ४६ ॥ एवं कोंकणवर्गीयब्राह्मण्ये बलवत्तरम् ॥ अस्ति प्रमाणं प्रत्यक्षं तत्तु सम्यक् प्रदर्शितम् ॥ ४७ ॥ अस्य स्फुटावलोकेन सम्यग्बोधो भविष्यति ॥ षट्कर्मनिरता ह्येते मत्स्यमांसादिभोजनाः ॥ ४८ ॥ यथा देशस्तथा दोषः स्वस्वदोषेण कथ्यते ॥ चर्मांबु गुर्जरेदेशे दास्याः संगस्तु दक्षिणे ॥ ४९ ॥ न दन्तशुद्धिः कर्णाटे काश्मीरे भट्टमारिजा ॥ गोवाहनं च तैलङ्गे प्रातरन्नं हि द्राविडे ॥ ५० ॥ गुर्जरी कच्छहीना च विधवा च सकंचुकी ॥ कान्यकुब्जो भ्रातृजायागामी दोषास्तु देशजाः ॥५१॥ एवं मुनिकुलं श्रेष्ठं ब्राह्मण्यं चैव विस्तरम् ॥ सर्वकर्मसु शुद्धं च नात्र तस्य विचारणा ॥ ५२ ॥

इति ब्राह्मणो० मार्तण्डाध्याये शेणवीसारस्वतब्राह्मणोत्पत्तिवर्णनं नाम प्रकरणम् ॥ २३ ॥

इति पंच गौडमध्ये सारस्वतसंप्रदायः ॥ आदितः पद्यसंख्या ॥ २८७५ ॥

ब्राह्मण संस्कृत भये हैं वे श्राद्धादिक कर्ममें योग्य होते हैं ॥ ४६ ॥ एवं यह कोंकण शेणवी सारस्वत ब्राह्मणोंका ब्रह्मत्वविषयमें जो बलवत्तर प्रमाण था सो दिखाया ४७ इसके स्पष्ट विचार देखनेसे उत्तम बोध होवेगा यह ब्राह्मण षट्कर्ममें तत्पर हैं मत्स्य मांसादिकोंको सेवन करते हैं ॥ ४८ ॥ जैसा देश वैसा दोष अपने अपने दोषसे कहते हैं । गुजरात देशमें चर्मपात्रस्थ जलका पान करना दक्षिणमें दासीगमन प्रत्यक्ष करना ॥ ४९ ॥ कर्णाटक देशमें दंतधावन अच्छा नहीं करना काश्मीरमें भट्टमारीदोष तैलंग में गौवृषभके ऊपर बैठना द्रविडदेशमें प्रातःकालमें पहिले दिनका भात तक्रमें भिजोयके रखाहुवा उसका भोजन करना ॥ ५० ॥ और गुजरातमें स्त्री कच्छहीन, विधवा चोली पहिने कान्यकुब्ज देशमें भाईकी स्त्रीसे भोग करना ऐसे यह देशोंके दोष वर्णन किये ॥ ५१ ॥ ऐसा ऋषिकुल श्रेष्ठ है । ब्रह्मत्व सबकर्ममें शुद्धहै इसमें विचार करना नहीं परन्तु सारांश यह है कि यहां ऊपर लिखेहुवे देशके दोष हैं वे विधिसे ग्राह्य नहीं हैं । जहांतक बने वहांतक त्याग करना उत्तम है ॥ ५२ ॥

इति शेणवी सारस्वतब्राह्मणोत्पत्ति प्रकरण संपूर्ण भया ॥ २३ ॥

अथ सारस्वतब्राह्मणक्षत्रियोत्पत्तिप्रकरणम् ॥ २४ ॥

आदौ सारस्वतब्राह्मणोत्पत्तिमाह ॥ उक्तं च स्कांदे हिंगुलाद्रिखंडे पूर्वसंहितायाम् ॥ ॥ सुरथ उवाच ॥ ॥ हिंगुला नाम या देवी तदुत्पत्तिं वदस्व मे ॥ सारस्वतस्य विप्रस्य तथा क्षात्रकुलस्य च ॥ १ ॥ सुमेधा उवाच ॥ ब्रह्मणो दिवसस्यांते ववृधे जलमंबुधेः ॥ कल्पादौ च महाविष्णुर्योगनिद्रां तमाश्रितः ॥ २ ॥ एकार्णवं हरिर्दृष्ट्वा सृष्टिं कर्तुं मनो दधौ ॥ ततो भगवतो देहात्समुद्भूता च हिंगुला ॥ ३ ॥ इच्छाशक्तिर्महादेवी तामाराध्य विभुः स्वयम् । ससर्ज विविधं विश्वं शांतद्वीपेऽवसच्च सा ॥ ४॥ एकदा हिंगुलादेव्याः स्थितताया मेरुपर्वते ॥ स्वप्रभावस्य विस्तारं कर्तुमिच्छा ततोऽभवत् ॥ ५ ॥ पाणिना पाणिमाघृष्य हिंगुलामानसं सुतम् ॥ ससर्ज जसराजाख्यं स्वमते च समाहितम् ॥ ६ ॥ कृतांजलिपुटं वीरमथाह हिंगुला स्वयम् ॥ देशेदेशे च मद्रूपं स्थापयस्व यतेंद्रिय॥ ॥ ७ ॥ तथेत्याहाथ वीरः स नानादेशस्थलेषु च ॥ स्थापया

अब सिंधी कच्छी हालारि गुर्जरसंप्रदायि सारस्वत ब्राह्मण और लोवाणे क्षात्रियोंकी उत्पत्ति कहते हैं । सुरथ राजा पूछनेलगे हे सुमेधा ऋषि ! हिंगुला जो देवी और सारस्वत ब्राह्मण और क्षत्री उनकी उत्पत्ति कहो ॥ १ ॥ तब सुमेधा ऋषि बोले ब्रह्माके सायंकालमें नैमित्तिक प्रलय हुवा फिर कल्पके आरंभमें ब्रह्माके प्रातःकाल समयमें विष्णुने योगनिद्राका त्याग करके ॥ २ ॥ सब जलमय पृथ्वीको देखके सृष्टि करनेकी इच्छा की इतनेमें श्रीभगवान्‌के देहमेंसे हिंगुला नाम करके ॥ ३ ॥ इच्छाशक्ति एक देवी प्रगट भई । फिर उस देवीका आराधन करके नाना प्रकारकी सृष्टी कियी ॥ ४ ॥ एक बखत वह हिंगुला देवी मेरुपर्वतके ऊपर बैठी हुई थी और उसकूं अपने प्रताप विस्तार करनेकी इच्छा भई ॥ ५ ॥ तब अपने दोनों हाथ घर्षण करनेसे जसराज नामका एक मानस पुत्र पैदा किया ॥ ६ ॥ वह हाथ जोडके खडा रहा । तब देवी कहनेलगी हे जसराज । देशदेशमें मेरी मूर्त्तिकी स्थापना करो ॥ ७ ॥ तथास्तु कहके उस वीरने द-

मास तां नाना रूपनामसमन्विताम् ॥ ८ ॥ एवं सा हिंगुला देवी कपाटक्षेत्रमुत्तमम् ॥ आसाद्य संस्थिता तत्र सर्वदेवैःप्रपूजिता ॥९॥ मणिद्वीपं तमेवाहुर्यत्र देवी सुसंस्थिता ॥ अथ यात्रानिमित्तेन द्विजोत्पत्तिः प्रकथ्यते ॥ १० ॥ रामायणे च संपूर्णे रामो लक्ष्मणसंयुतः ॥ चित्रकूटं समागत्य गंभीरायास्तटे शुभे ॥११॥ आगतो वानरैस्सार्धं हनुमत्प्रमुखैस्ततः ॥ प्रसंगात्कुरुते वार्त्तां श्रीरामः कपिना सह ॥ १२ ॥ यदाऽयोध्यां गमिष्यामि प्राप्स्यामि विपुलां श्रियम् ॥ हनुमंश्छ्रूयतां वीर नियमोऽयं पुरा कृतः ॥ १३ ॥ यदापि प्राप्स्यते सीता तदा यास्ये कपाटकम् ॥ प्रयाणं च ततश्चक्रेवानरैर्बहुभिर्युतः ॥ १४ ॥ ततः सप्तदशे चाह्नि श्रीरामोऽगाद्बलोधने ॥ महाघोरे महारण्ये दृष्ट्वा सुप्तं च कार्पटिम् ॥ १५ ॥ हनुमान् बोधयामास रामं दृष्ट्वाब्रवीच्च सः ॥ आस्यतामास्यतां राम जातो भाग्योदयो मम ॥ १६ ॥ तस्य तद्वचनं श्रुत्वा रामः

द्भुत स्थलोंमें उस देवीको स्थापन किया ॥ ८ ॥ सो वह देवी मुख्य करके सिंधुदेशमें और बलूचिस्थान इन दोनोंके बीचमें समुद्रके नजदीक हिंगुलपर्वतके पास कपाटक्षेत्र है वहां निवास करती भयी ॥ ९ ॥ उस स्थानकूं मणिद्वीप कहते हैं । सब देवता उस हिंगुला देवीकी पूजा कहतेहैं । अब उस हिंगुलादेवीकी यात्राके निमित्त जो सारस्वत ब्राह्मण उत्पन्नभये सो कथा कहते हैं ॥ १० ॥ जिस समय रामचंद्र रावणको मारके लक्ष्मण सीता हनुमानादि सहित चित्रकूट पर्वतके नजदीक गंभीरा नदींके तट ऊपर ॥ ११ ॥ आयके बैठे और हनुमान्के साथ अनेक तरहकी वार्ता करते करते ॥ १२ ॥ कहनेलगे कि हे हनुमान् ! मैंने पहले ऐसा निश्चय किया था कि जिस बखत सीतासहित अयोध्या राजधानींमें आऊंगा तो पहिले हिंगुलादेवीके दर्शन करके बाद राजगादीपर बैठूंगा ऐसा कहके हनुमानादि वानरोंसहित प्रयाण किया ॥१३॥१४॥सो सत्रहवें दिन श्रीरामचंद्र हिंगुलसे थोडे दूर बडे घोर वनमें आये वहां एक कार्पटी रास्तेमें सोया था॥१५॥उसकूं हनुमान्ने जगाया तब वह कार्पटी उठके रामचंद्रकूं देखके बडा हर्षित होके कहने लगा कि आओ आओ आज मेरा भाग्योदय हुवा ॥१६॥तब रामचंद्रने पूछा तुम

प्रोवाच को भवान् ॥ सोऽप्याह राम सिद्धोहं कार्पटीदग्धकिल्बिषः ॥ १७ ॥ षड्विंशद्युगपर्यंतं निद्रासंसक्तमानसः ॥ नाम मे कार्पटी राम कपाटे चाश्रमो मम ॥ १८ ॥ अथरामोऽब्रवीत्सिद्धं भोः सिद्धःश्रूयतां वचः॥कपाटं मे दर्शयाद्य त्वंभविष्यति महद्गुणः ॥१९॥ तथेत्युक्त्वा ततः सिद्धो कार्पटीवेषधारकः ॥ अग्रे गच्छंस्ततो रामो विहारं ददृशे परम् ॥ २० ॥ तं प्रोवाच सवनस्कंधो महाप्राज्ञ उदारधीः ॥ भुज्यतां राम चात्रैव पश्चाद्यामोहि हिंगुलाम्॥२१॥ तस्य तद्वचनं श्रुत्वा प्रोवाच राघवस्तदा ॥ अधुना न वयं भोज्यं कुर्महे ब्राह्मणैर्विना ॥ २२ ॥ लक्षमेकं वृताः पूर्वं भोजनार्थे मयानघ ॥ प्रस्थमेकं ददे चाहं द्विजेभ्यो हेम निर्मलम् ॥ २३ ॥ तस्करस्य भयेनैव सर्वे विप्राः पलायिताः॥विना विप्रान्न भोक्ष्येऽहं यावन्नो नियमः कृतः ॥ ॥२४॥रामस्य नियमं श्रुत्वा कार्पटिर्वाक्यमब्रवीत् ॥ उद्वेगं मा कृथा राम दर्शयामोऽधुना द्विजान् ॥२५॥ रामस्य पश्यतस्तत्र प्रादुरासीत्सरस्वती॥रामं प्रोवाच सा देवी वरं वृणु हृदी

कौन हो, वह कहनेलगा मैं कार्पटी सिद्धहूं ॥ १७ ॥ छब्बिस युग पर्यंत मैंने निद्रा कीहै मेरा आश्रम कपाटक्षेत्रमें हिंगुलादेवीके पास है ॥ १८ ॥ तब रामने कहा कि हे कार्पटि ! हमको उन हिंगुलादेवीका दर्शन करावो तुमकूं बडा पुण्य होवेगा ॥ १९ ॥ तथास्तु कहके वह कार्पटी सिद्ध पुरुष जिनकूं हालके वखतमें उस सिंधके लोग हिंगुलादेवीके रास्तेमें अगुवा ऐसा कहतेहैं वह आगे चलनेलगा पीछे सपरिवार रामचंद्र चलनेलगे तो आगे एक उतरनेका सुंदर स्थल आया ॥ २० ॥ रामचन्द्रको देखके वह सिद्ध कार्पटी कहनेलगा कि हे राम ! यहां भोजन करके बाद अपने सब हिंगुलाकूं जावेंगे ॥ २१ ॥ ऐसा कार्पटीका वचन सुनके रामने कहा कि अभी भोजन नहीं करनेका ॥ २२ ॥ कारण मैंने पहले लक्ष ब्राह्मणोंका भोजनका संकल्प किया है और उनको सेर सेर सुवर्णका दान देनेका है ॥ २३ ॥ सो ब्राह्मण तो चोरके भयसे पलाये हुवे हैं और उनके भोजन किये बिना मेरा भोजन नहीं होनेका ॥ २४ ॥ ऐसा रामका वचन सुनके उस कार्पटी सिद्धने कहा कि तुम चिंता मत करो मैं ब्राह्मणोंकूं दिखाता हूं ॥ २५ ॥ ऐसा कहतेही सरस्वती देवी प्रत्यक्ष प्रकट होके रामकूं

प्सितम् ॥२६॥ तदा रामः स्ववृत्तान्तं चोक्त्वा वव्रे द्विजान्मम देहीति शेषः॥तदा सा शारदादेवी स्वपाणी घृष्य भूतले ॥२७॥ सारस्वतास्तदोत्पन्ना दीप्तपावकसन्निभाः ॥ त्रयोदशशतं तेषां चतुर्न्यूनं तथैव च ॥२८॥ दत्त्वा रामाय विप्रांस्तांस्ततश्चांतर्दधे सती ॥ तेऽपि सारस्वता विप्राः शारदातिलकं यथा ॥ ॥२९॥ रामोऽपि तान्द्विजान् सर्वान् भोजयित्वा वरान्नकैः ॥ प्रत्येकं प्रस्थमात्रं वै सुवर्णं दक्षिणामदात् ॥ ३० ॥ मुखवासं ततो दत्त्वा स्वयं वै बुभुजे ततः ॥ बंधुभिः सहितं पश्चात्क्षेत्रे क्षीराभिधे तदा ॥ ३१ ॥ सारस्वताश्च ते जाता वेदवेदांगपारगाः ॥ विभज्यादाच्च विप्रेभ्यो देशलोकान्पृथक्पृथक् ॥३२॥ केचिच्च प्रेषिताः पूर्वं केचिच्च दिशमुत्तराम्॥ केचिच्च पश्चिमदिशि दक्षिणायां च केचन ॥ ३३ ॥ एवं सर्वान्द्विजान्रामः स्थानं दत्त्वा जगाम ह ॥ तेऽपि सारस्वता विप्रा विख्याता जगतीतले ॥ ३४ ॥ एवं सारस्वतोत्पत्तिर्व्यैंकटस्य सूनुना ॥ हरिकृष्णेन रचिता हिंगुलाद्रिपुराणजा ॥ ३५ ॥ अतः परं प्रवक्ष्यामि लवणाक्षत्रियस्य च ॥ उत्पत्तिभेदं विपुलं श्रुतो

कहनेलगी कि हे राम ! तुम मनईप्सित वरदान मांगो ॥ २६ ॥ तब रामने अपना वृत्तांत कहके ब्राह्मण मांगे तब सरस्वतीने पृथ्वीमें अपने हाथ घिसे ॥ २७ ॥ वहांसे अग्निसरीखे तेजस्वी बारह सौ छानवे १२९६ ब्राह्मण पैदा भये ॥२८॥ सो रामचंद्रकूं देके सरस्वती गुप्त होगयी वे ब्राह्मण सरस्वतीने पैदा किये इसवास्ते सारस्वत ब्राह्मण ऐसा उनका नाम विख्यात भया ॥ २९ ॥ फिर रामचंद्रने उन ब्राह्मणोंकूं सुंदर पक्कान्नसे भोजन करवायके एकएक सेर सुवर्णका दान किया॥३०॥ तांबूलका दान देके बाद बंधुसहित रामने भोजन किया ॥ ३१ ॥ ऐसे वे सारस्वत ब्राह्मण वे वेदवेदांगपारंगत भये उनकूं एकएक देशका दान दिया ॥ ३२ ॥ कितनेक ब्राह्मणोंकूं पूर्वदिशा, कोईकूं उत्तर, कोईकूं पश्चिमदिशा, कितनेकूं दक्षिणदिशाका स्थान ॥ ३३ ॥ देके रामचंद्र हिंगुलादेवीके दर्शनकूं चलेगये बाद वे ब्राह्मण सारस्वत नामसे पृथ्वीमें विख्यात भये ॥ ३४ ॥ ऐसा सारस्वत ब्राह्मणोंकी उत्पत्तिसार मैंने वर्णन किया ॥ ३५ ॥ अब उनके जो लवाणा नाम करके

द्विजमुखाच्च यः ॥ ३६ ॥ इक्ष्वाकुगोत्रप्रभवो रामनामा महाप्रभुः॥ तस्य पुत्रो लवः प्रोक्तो राठोरास्तत्कुलोद्भवाः ॥ ३७ ॥ सूर्यवंशोद्भवास्तेषां रत्नादेवी कुलांबिका ॥ मरुधन्वाख्ये देशे वै ग्रामे योद्धपुरे पुरा ॥ ३८ ॥ रजपूतकुलोत्पन्नो जयचंद्रो नृपोत्तमः॥ तस्य राज्यप्रणेतारश्चतुराशीतिसंख्यकाः ॥ ३९ ॥ तेन साकं नृपस्यासीद्विरोधः स्तेयसंभवः ॥ तदा राज्ञा प्रतिज्ञा वै कृता चैव सुदुस्तरा ॥ ४० ॥ मारणीया इमे दुष्टा मदाज्ञोल्लंघने रताः ॥ इति तन्निश्चयं ज्ञात्वा सारस्वतकुलोद्भवः ॥ ॥ ४१ ॥ दुर्गादत्ताभिधो विप्रो दसोंदीत्युपनामकः ॥ गत्वा नृपसमीपं वै राज्यमान्यद्विजोत्तमः ॥४२॥ कोपं च शमयामास भूपतेरतिदुस्तरम् ॥ ॥ नृप उवाच ॥ तवाज्ञयाधुना दुष्टान्नाहं हन्मि द्विजोत्तम ॥ ४३ ॥ षण्मासानंतरं नूनं हनिष्यामि न संशयः ॥ इत्युक्त्वा नृपतिस्तेषामधिकाराञ्जहार ह ॥४४॥ तदानृपतिना साकंदुर्गादत्तप्रसंगतः ॥ संधिकर्तुं प्रयत्नं

क्षत्रिय यजमान हैं उनकी उत्पत्ति ब्राह्मणोंके मुखसे सुनीहुई कहताहूं ॥ ३६ ॥ इक्ष्वाकुगोत्रमें रामचंद्र भगवान् पैदाभये उनका पुत्र लव नाम करके भया उसके वंशमें राठोर जिनकूं राजपूत या ठाकर कहते हैं वो पैदाभये ॥ ३७ ॥ वे सब सूर्यवंशी हैं उनकी गोत्रदेवी रत्नादेवी है मारवाड देशमें एक योद्धपुर करके गांवहै वहां कन्नौजमें जयचंद नाम करके राजा था उसके राज्य चलानेवाले चौरासी ८४ जागीरदार सरदार थे ॥३८॥ उन्होंने कुछ राज्यके काममें धनकी चोरी किियी उसके लिये राजाके साथ बडा विरोध भया और उन्मत्तताकी बातें करने लगे उसके लिये राजाने प्रतिज्ञा किियी कि ॥३९॥४०॥ इन लोकोंकूं मारना ऐसा निश्चय किया सो सुनके सारस्वत ब्राह्मण दसोंदी दुर्गादत्त राजाको बडा पूज्य (दसोंदि कहते धनका दसवां हिस्सा लेनेवाला)उस राजाके पास जायके ॥ ४१॥४२ ॥ राजाके जो मारनेका कोप चढाथा सो शांत करवाया तव राजाने दुर्गादत्तको गौरवसे कहा तुम्हारी आज्ञासे अभी तो नहीं मारता ॥ ४३ ॥ परंतु छः महीने बाद निश्चयकरके इन चौरासी सरदारोंकूं मारूंगा ऐसा कहके उनका अधिकार छीनलिया ॥ ४४ ॥ फिर उन सरदारोंने राजाके साथ मेल करनेके वास्ते दुर्गादत्तजीकी तरफसे प्रयत्न

ते चक्रुः परमदुस्तरम् ॥४५॥ ज्ञात्वा तं ब्राह्मणं राजा परपक्ष-समाश्रितम् ॥ गृहान्निर्वासयामास स्वकीयात्कोपसंयुतः ॥४६॥ दुर्गादत्तस्यापमानं ज्ञात्वा ते रजपूतकाः ॥ बहुमानेनचानिन्युः स्वसमूहे ततः परम् ॥ ४७ ॥ ऊचुश्च ब्राह्मणश्रेष्ठ दसोंदी भव नोपिच ॥ सारस्वताश्च गुरवस्तस्मात्त्वमपि भूसुर ॥ ४८ ॥ साहाय्यं च प्रकर्त्तव्यं तव योगान्नृपं जये ॥ दुर्गादत्तप्रसंगेन चान्ये लोकाः सहस्रशः ॥ ४९ ॥ क्षत्रिया ब्राह्मणाश्चैव साहाय्यार्थे समागताः ॥ तदा तानब्रुवंस्ते वै ब्राह्मणान्भो द्विजोत्तमाः ॥ ५० ॥ अद्य प्रभृति युष्माकं दत्तमाचार्यकं किल ॥ अथोचुः क्षत्रियास्ते वै यदि राज्यं लभामहे ॥५१॥ तदा यूयं वयं सर्वे निश्चयं समभागिनः ॥ एवं ते समयं कृत्वा जग्मुर्देशांतरम् प्रति ॥ ५२ ॥ साहाय्यार्थेऽन्यनृपतीन्कर्तु ते केपि नागताः ॥ तदा निराशास्ते सर्वे सिंधुदेशं गता यदा ॥५३॥ दिनान्यष्टावशिष्टानि प्रतिज्ञाया नृपस्य च ॥ आगच्छति

किया ॥ ४५ ॥ तब राजाने उस दुर्गादत्तके वचन सरदारोंके पक्षपात सरीखे सुनके कोपसे उस दुर्गादत्त ब्राह्मणकूं घरमें आनेकी मनाई करादियी ॥ ४६ ॥ ऐसा राजाने उस दुर्गादत्तका अपमान किया यह सुनके वह सरदार रजपूत लोक बडे सन्मानसे अपने जथेमें लेगये ॥ ४७ ॥ और कहनेलगे कि हमारे भी तुम दसोंदि दशवें हिस्सेके मालिक हो सारस्वत हमारे आचार्य हैं इसवास्ते आप सारस्वत और योग्य हो ॥ ४८ ॥ राजाको जीतनेके वास्ते सहायता करना। तब दुर्गादत्तकी शीलतासे हजारों लोक ॥ ४९ ॥ रजपूत क्षत्रिय और सारस्वत ब्राह्मण सहायता करनेकूं आये। तब वे सरदार ब्राह्मणोंकूं कहने लगे कि ॥ ५० ॥ आजसे तुमकूं आचार्य पदवी हमने दी है फिर क्षत्रियोंकूं कहा कि जो कभी हमको राज्य मिला तो ॥ ५१ ॥ तुम हम सब राज्यका भाग समान (बराबर) लेंगे। ऐसा सबके साथ ठहराव करके ॥ ५२ ॥ दूसरे राजावोंको सहायतार्थ लेनेके वास्ते देशांतरकूं गये । परंतु जयचंद्र राजाके पराक्रमके लिये किसीभी राजाने सहायता नहीं की तब वे सब सरदार लोक उदास होके सिंधुदेशमें चलेगये ॥ ५३ ॥ अब छः महीने बाद इनकूं मारूंगा ऐसी जो राजा-

नृपोऽस्माकं हननार्थं ससैन्यकः ॥ ५४ ॥ तच्छ्रुत्वा भयभीतास्ते पप्रच्छुर्द्विजसत्तमम् ॥ अस्माकं रक्षिता को वा उपायः क्रियतामिह ॥५५॥ दुर्गादत्तस्तदोवाच यूयं वै रामवंशजाः॥ तस्मात्सागरदेवस्य कर्तव्योपासना शुभा ॥ ५६ ॥ तथेत्यंगीकृते तैस्तु प्रतिज्ञामकरोद्द्विजः॥ यदा सागरदेवस्य दर्शनं नो भविष्यति ॥ ५७ ॥ तदान्नजलपानादि करिष्यामि न चान्यथा ॥ इत्युक्त्वा स्तुतिमारेभे सागरस्य द्विजोत्तमः ॥ ५८ ॥ दिनत्रये व्यतिक्रांते प्रसन्नः सागरः स्वयम् ॥ वरं वरय भद्र तं ह्युवाच द्विजपुंगवम् ॥ ५९ ॥ यदि देव प्रसन्नोऽसि ह्यभयं देहि मे प्रभो ॥ तदोवाच समुद्रस्तु इतो वै क्रोशमात्रके ॥ ॥ ६० ॥ दुर्गो लोहमयः श्रेष्ठो दृष्टिमार्गे भविष्यति ॥ गत्वा निवासः कर्तव्यो जयस्तत्र भविष्यति ॥ ६१ ॥ स दुर्गः स्थास्यति भुवि दिनानि चैकविंशति॥ निर्गन्तव्यं बहिस्तस्मात्ततो गुप्तो भविष्यति ॥ ६२ ॥ लोहदुर्गे निवासत्वाल्लोहवासाभिधाश्च वै ॥ अद्य प्रभृति युष्माकमहं वै कुलदेवता ॥६३॥

ने प्रतिज्ञा की थी उसमें आठ दिन बाकी रहगये राजा जयचंद्र सेना लेके मारनेकूं आताहै ॥ ५४ ॥ यह बात सुनते वो सरदारलोक भयभीत होयके दुर्गादत्तकूं पूछने लगे कि हमारा रक्षण करनेका उपाय करो ॥ ५५ ॥ तब दुर्गादत्तने कहा बहुत अच्छा तुम रामवंशी हो सागरदेवकी उपासना करना ऐसा कहके ॥ ५६ ॥ प्रतिज्ञा कियी कि जब सागर देवका मेरेकूं दर्शन होवेगा तब अन्न जल लेऊंगा ऐसा कहके स्तुतिका आरंभ किया ॥ ५७ ॥ ५८ ॥ दिन तीन गये बाद सागरदेव प्रत्यक्ष होके वरदान मांगो ऐसा कहनेलगा ॥ ५९ ॥ तब दुर्गादत्तने कहा कि जो आप प्रसन्न भये हो तो हमकूं अभय देवो । तब समुद्रने कहा कि यहांसे कोसभरके ऊपर ॥ ६० ॥ लोहेका गढ तुमको दीखेगा वहां जायके निवास करना तुम्हारा जय होवेगा ॥ ६१ ॥ और वह गढ एक्कीस दिन रहेगा । बाद अंतर्धान होवेगा । इसवास्ते एक्कीस दिनके अंदर उस किल्लेसे बाहर निकलना ॥ ६२ ॥ लोहेके किल्लेमें वास करनेसे लोहवास ऐसा नाम तुम्हारा होवेगा । लोहवासके ठिकाने लोवाणे ऐसा कहेंगे । और आजसे तुम्हारी

पूजा मदीया कर्त्तव्या ततः श्रेयो भविष्यति ॥ इत्युक्त्वा सागरो देवस्ततश्चांतर्दधे प्रभुः ॥ ६४ ॥ चतुरशीतिकाः सर्वे सर्वलोकसमन्विताः ॥ लोहदुर्गे प्रवेश्याथ शत्रूञ्जिग्युस्ततः परम् ॥ ६५ ॥ अष्टादशदिनस्यांते दुर्गान्निर्गत्य तद्बहिः निर्ममुः सुमहद्ग्रामं सर्वलोकसुखावहम् ॥ ६६ ॥ तत्स्थानं वर्तते चाद्य सिंधुलाहोरमस्तके ॥ ततः कतिपये काले गते तेषां मिथो यदा ॥ ६७ ॥ पुत्रपुत्रीविवाहार्थं संकोचो ह्यभवन्महान् ॥ तदा तत्प्रार्थनायोगाद्दुर्गादत्तो द्विजोत्तमः ॥ ६८ ॥ चतुरशीतिभेदान्वै कृत्वा प्रोवाच तान्प्रति ॥ त्यक्त्वा स्ववर्गं भो शिष्याः पाणिं गृह्णतु निर्भयम् ॥ ६९ ॥ (॥ दोहरो ॥ चौरासी सरदारते, नुख चौरासी नाम ॥ अपनो अपनो वर्ग तजि, करो ब्याहको काम ॥ १ ॥) दुर्गादत्तवचः श्रुत्वा तथा चक्रुर्विवाहकम् ॥ विवाहसमये तेषां सारस्वतद्विजन्मनाम् ॥ ७० ॥ आचार्यदक्षिणार्थं वै विवादः समभून्मिथः ॥

सब जातिका मैं कुलदेवता हूं ॥६३॥ मेरा एक स्थान करके पूजा करना तुम्हारा कल्याण होवेगा ऐसा कहके वह सागरदेव अंतर्धान होगये। सो आजतक दरियास्थानमें जायके सब लोवाणे अपने इष्टकी सेवा करते हैं ॥ ६४ ॥ फिर वे सब सरदार दुर्गादत्तकूं और दूसरे सब लोकोंकूं साथ लेके लोहगढमें रहके शत्रुकूं जीत तेभये ॥ ६५ ॥ फिर उस किल्लेमेंसे अठारह दिनके बाद सब लोक बाहर निकलके बडागाँव बसायके वहां रहतेभये ॥ ६६ ॥ अभी वह स्थान सिंधुदेश और लाहोरके बीचमें विख्यात है। ऐसा वह लोवाणोंका स्थान भया। फिर कुछ काल पीछे कन्या पुत्र बहुत भये ॥ ६७ ॥ उनकूं लेने देनेका संकोच बहुत होने लगा तब दुर्गादत्तकी प्रार्थना कियी कि हमने विवाहसंबंध कैसा करना ? तब ॥ ॥ ६८ ॥ दुर्गादत्तने उन सब क्षत्रियोंके चौरासी भेद करके कहा कि तुमने अपना वर्ग छोडके दूसरे वर्गमें विवाह संबंध निर्भयतासे करना ॥ ६९ ॥ ऐसा दुर्गादत्तका वचन सुनके वैसा करनेलगे। फिर वे सरदार चौरासी जो थे उनके साथ सारस्वत ब्राह्मण आये थे उनकी ९६ नुखाथी नुख कहते छानबे वर्ग थे सो विवाहके बीचमें ॥ ७० ॥ आचार्यदक्षिणाके

द्विजा षण्णवतिस्तत्र वेदाष्टौ क्षत्रियास्तदा ॥ ७१ ॥ न्यूनाधिक्ये विवादोऽभूत्तदासौ द्विजसत्तमः ॥ नियमं कृतावान्श्रेष्ठं यथा न कलहो भवेत् ॥७२॥ यावद्वर्गाः क्षत्रियस्य तावद्वर्गा द्विजन्मनाम् ॥ एकैकस्य च वर्गस्य एकैको ब्राह्मणस्तदा ॥ ॥ ७३ ॥ अवशिष्टब्राह्मणान्वै धनं द्वादशलक्षकम् ॥ दत्त्वा प्रसन्नानकरोत्ते गताश्च दिगंतरम् ॥ ७४ ॥ तत्काले च यथा मान्यो दुर्गादत्तो द्विजोत्तमः ॥ तथैवाद्यादिमान्यश्च तद्वंशीयो न संशयः ॥ ७५ ॥ क्षत्रियाणां विशेषेण मान्यःपूज्यश्च सर्वथा ॥ नामत्रयेण विख्यातद्वंशीयोभवत्तदा ॥ ७६ ॥ सारस्वतस्य विप्रस्य लवणात्क्षत्त्रियस्य च ॥ उत्पत्तिभेदः कथितो यथा दृष्टो यथा श्रुतः ॥ ७७ ॥

इतिश्रीहरिकृष्णविनिर्मिते बृहज्ज्योतिषार्णवेषष्ठेमिश्रस्कंधेब्राह्मणोत्पत्तिमार्तंडाध्यायेसारस्वतब्राह्मणलवाणाक्षत्रियोत्पत्तिवर्णनंनामप्रकरणम् २४

पंचगौडमध्ये प्रथमा जातिः ॥

वास्ते परस्पर कलह होने लगा । सारस्वत ब्राह्मणकी नुख ९६ लोवाणे क्षत्रियों की नुख ८४ तब उनमें न्यूनाधिकके योगसे कलह होनेलगा ॥ ७१ ॥ सो देखके दुर्गादत्त दसोंदीने नियम किया जिससे कलह न होवे ॥७२॥ जितनी लोवाणोंकी नुख थीं उतनी नखोंको एक एक सारस्वत ब्राह्मणकी नुख दैके ॥ ७३ ॥ बाकी बारह वर्ग जो ब्राह्मणोंके रहे उनकूं एकएक लक्ष रुपये देके प्रसन्न किया वे बारह वर्ग देशांतरकूं चलेगये ॥ ७४ ॥ जैसा उस वखत दुर्गादत्त दसोंदीका मान्य था वैसा अभीतक उनके वंशस्थ पुरुषोंका ब्राह्मणोंमें मान्य है ॥ ७५ ॥ लोवाणोंमें विशेष करके मान्य है । और पूज्यता है और उस दुर्गादत्तके वंशस्थ पुरुष दशोंदी तथा आजाजी, तथा बागेट ऐसे तीन नामोंसे विख्यात होतेभये ॥ ७६ ॥ ऐसा पश्चिम देशस्थ सारस्वत ब्राह्मणोंकी और लोवाणें क्षत्रियोंकी उत्पत्तिका भेद जैसा हिंगुलाद्रिखंडमें देखा और जैसा शिष्टोंके मुखसे सुना सो मैंने वर्णन किया ॥७७॥

इति पश्चिमदेशीय सारस्वत ब्राह्मण और लोवाणोंका उत्पत्तिभेद पूरा हुआ प्रकरण २४

आदितः पद्यसंख्या ॥ २९५१ ॥

अथ दधीचसारस्वतब्राह्मणोत्पत्तिप्रकरणम् ॥ २९ ॥

अथ दधीचसारस्वतब्राह्मणब्रह्मक्षत्रिययोरुत्पत्तिभेदसारमाह ॥ उक्तं स्कांदोपपुराणे हिंगुलाद्रिखण्डे उत्तरसंहितायाम् ॥ ऋषय ऊचुः ॥ सूतसूत महाप्राज्ञ हिंगुलायाः समुद्भवम् ॥ वद केन च सा जाता कस्मिन्देशे कदानघ ॥ १ ॥ कैस्तु संपूजिता नित्यं पूजिता किं ददाति च ॥ सूत उवाच ॥ अत्र वः कथयिष्यामि हिंगुलायाः समुद्भवम् ॥ २ ॥ स्थिता सा सिंधुदेशांते हिंगुले पर्वतोत्तमे ॥ परा तुरोफके देशे विप्रचित्यसुरोऽभवत् ॥ ३ ॥ तस्य पुत्रौ महादुष्टौ हिंगुलः सिंदुरस्तथा ॥ ताभ्यां प्रतापिता देवाः पार्वतीं शरणं ययुः ॥ ४ ॥ पार्वती तु तदा तेषां ज्ञात्वा दुःखं महत्तरम् ॥ पुत्रमाज्ञापयामास सिन्दुरस्य वधाय वै ॥५॥ गणेशेन यदा दैत्यः सिन्दुरो निहतो युधि ॥ तदा तस्याऽनुजो दैत्यो हिंगुलस्तप उत्तमम् ॥ ६ ॥ दिव्यं वर्षसहस्रं वै चचार मेरुपर्वते ॥ तपसा तस्य संतुष्टो वरं ब्रूहीत्यजोऽब्रवीत् ॥ ७ ॥ ॥ हिंगुल उवाच ॥ ॥ वियत्पृथिव्यां पाताले जले शस्त्रैस्तथास्त्रकैः ॥ त्वद्दिष्टैर्भूतमात्रैर्मृत्युर्माभून्मम प्रभो ॥ ८ ॥ तथेत्युक्त्वा गतो ब्रह्मा

अब दधीच सारस्वत ब्राह्मण जिनकूं परोतक कहते हैं ब्रह्म और क्षत्रिय उनकी उत्पत्ति कहता हूं शौनकादिक ऋषी पूछनेलगे हे सूत ! हिंगुलादेवीकी उत्पत्ति कहो वो देवी किनसे पैदा भई ? कौन देशमें ? कौनसी वखत ? ॥ १ ॥ उनकी पूजा नित्य कौन करता है ? पूजा करनेसे क्या देती है ? सो कहो। सूत कहते हैं हे ऋषीश्वरो ! उस की उत्पत्ति कहता हूं ॥ २ ॥ वो देवी सिंधुदेशके पश्चिम अंतमें हिंगुलनामक पहाडमें विराजमान है । हिंगुला नाम कहते हैं पहले तुरोफ देशमें विप्रचिति दैत्यके दो पुत्र थे । एक हिंगुल, दूसरा सिंदुर उन दोनोंसे सब देव दुःखी होके पार्वतीके शरण आये ॥३॥४॥ फिर पार्वतीकी आज्ञासे गणपतिने उस सिंदूर दैत्यकूं मारा तब उसका छोटा भाई हिंगुलने ॥ ५ ॥ ६ ॥ देवताओंके हजार वर्ष पर्यंत मेरुपर्वतके ऊपर तप किया तब ब्रह्माने प्रसन्न होके वरदान मांगो ऐसा कहा ॥ ७ ॥ तब हिंगुल कहनेलगा हे ब्रह्मन् ! आकाशमें पृथ्वीमें पाता-

दैत्योऽसौ मदगर्वितः ॥ सेन्द्रान्संतापयामास तदा ते चाति-
दुःखिताः ॥ ९ ॥ जननीं शरणं याता हिंगुले पर्वतोत्तमे ॥
देव्याः सूक्तेन तां देवीं तुष्टुवुः कार्यसिद्धये ॥ १० ॥ देवानां
परमं दुःखं ज्ञात्वोवाच जगन्मयी ॥ भो भो देवा भव-
द्दुःखं ज्ञातं हिंगुलदैत्यजम् ॥ ११ ॥ गंतव्यं स्वाधिकारेषु
हतोऽद्य च महासुरः ॥ देव्या वचनमाकर्ण्य गताः सर्वे स्वमाल-
यम् ॥ १२ ॥ रूपं धृत्वा परं देवी तुहिनाचलसंस्थिता ॥
एतस्मिन्नंतरे तत्र हिंगुलश्च समागतः ॥ १३ ॥ क्रीडितुं तत्र
तां दृष्ट्वा मोहेनोवाच दैत्यराट् ॥ सुंदरि त्वं मया साकं वसंते
क्रीडनं कुरु ॥ १४ ॥ तच्छ्रुत्वा चकिता देवी किंचिन्नोवाच
चोत्तरम् ॥ उत्थिता सा गुहाभ्याशादागतापृथिवीतले ॥१५॥
मोहेनव्याकुलो दैत्यः पृष्ठतः स तदा ययौ॥परिभ्रमंती सा देवी
आगता सिन्धुसागरम् ॥ १६ ॥ सागरे च समासाद्य उवाच
दैत्यपुंगवम् ॥ ॥ देव्युवाच ॥ ॥ मत्पृष्ठे च किमर्थं त्वं
विचरिष्यसि भूतले ॥१७॥ त्वादृशेनासुरेंद्रेण संभोगो मम
दुर्लभः॥तस्मात्त्वं तिष्ठ वा गच्छ मासुखालोकनं कुरु ॥१८॥

लमें जलमें शस्त्रास्त्रसे तुम्हारी उत्पन्न की हुई सृष्टिमात्रसे मेरा मृत्यु नहीं होवे तथास्तु कहके ब्रह्मागये बाद वरदानसे बडा मदोन्मत्त होके इंद्रादिक देवताकूं दुःख देनेलगा तब सब देवता दुःखी होयके हिंगुल पर्वतके ऊपर जायके देवी सूक्तसे स्तुति करनेलगे ॥ ८ ॥ ९ ॥ १० ॥ तब देवीने उनका दुःख जानके कहा कि देवताओ ! तुमकूं हिंगुलदैत्यका बडा दुःख भया है ॥ ११ ॥ उस दैत्यकूं मैंने मारा ऐसा जानो तुम जावो । तब देवता उस वचनको सुनके स्वस्थानको जाते भये ॥ १२ ॥ देवी उत्तम स्वरूप धारण करके हिमालयके ऊपर बैठी उतनेमें वहां हिंगुलदैत्य आयके ॥ १३ ॥ सुंदरी देवीकूं देखके मेरे साथ क्रीडा कर ऐसा कहने लगा ॥ १४ ॥ देवी वह वचन सुनके उत्तर न देते गुहाके बाहर निकलके फिरते २ सिंधुसमुद्रके संगमके ऊपर आयी ॥ १९ ॥ मोहसे व्याकुल होयके पीछे आते हुए हिंगुल दैत्यकूं देखके देवी कहनेलगी हे दैत्य ! मेरे वास्ते क्यों फिरता है तेरे साथ मेरा संभोग दुर्लभ है ॥ मेरा एक बडा व्रत है । सो

मद्व्रतं दुष्करतरं कः कर्तुं च प्रभुर्भवेत्॥यथागतस्तथा गच्छ स्वकार्यै दितिनंदन ॥ १९ ॥ एवं श्रुत्वा वचनं दैत्यराजो मनोरथेनाभिनिविष्टचेतनः ॥ किं तद्व्रतं ते कथयाशु भद्रे करिष्येऽहं प्राणतश्चाधिकं वै ॥ २० ॥ देव्युवाच ॥ ॥ नग्नो भव महादैत्येत्युक्त्वा चांतर्हिता भवेत् ॥ अंतर्हितां तदा दृष्ट्वा क्वगता क्वगतेति च ॥ २१ ॥ ब्रुवन् परिभ्रमंल्लोके सिंधुदेशमथागमत् ॥ देवी विचारयामास मारणे कृतनिश्चया ॥ २२ ॥ सिन्धुदेशांतरे गत्वा स्थूलं रूपं चकार सा ॥ नीलांजनसमाभासं सर्वायुधविराजितम् ॥ २३ ॥ महा मोहस्य निकरं नग्नं भगशतैर्युतम् ॥ एतस्मिन्नंतरे दैत्यो हिंगुलोऽप्याजगाम ह ॥ २४ ॥ ततो देवी मतिं चक्रे तस्य दैत्यस्य मारणे ॥ नायं देवैर्न यक्षैर्वा न नरैर्नागकिंनरैः ॥ २५ ॥ सूर्यस्य चातपो यत्र न तत्र मरणं भवेत् ॥ एतस्माद्रहितस्थाने मारणं च विधीयते ॥ २६ ॥ एवं विचारयन्ती सा पुनः पूर्वस्वरूपगा ॥ पश्यतस्तस्य सा जाता दृष्ट्वा हर्षमवाप्तवान् ॥ २७ ॥ हिंगुलासुर उवाच ॥ – चिरं त्वं क्व गता देवि मद्बलं त्वं न वेत्सि

कोकूं भी करनेकूं समर्थ नहीं है इसवास्ते जैसा आया वैसा जा ॥ १-१९ ॥ ऐसा सुनते दैत्यने कहा कि प्राणसे ज्यादा होवेगा तो भी तुम्हारा व्रत करूंगा इसवास्ते मेरेकूं कहो ॥ २० ॥ तब देवीने कहा हे दैत्य ! तू नग्न होजा ऐसा कहके अंतर्धान होगई ।फिर हिंगुल दैत्य देवीकूं ढूंढता हुवा ॥ २१ ॥ सिंधुदेशमें आया तब देवीने विचार किया कि इस दैत्यका मृत्यु देव दैत्यादिक ब्राह्माकी सृष्टिसे नहीं है और जहां सूर्यका प्रकाश पडे वहां भी मरण नहीं है इसवास्ते जहां सूर्य प्रकाश न होवे ऐसी जगहमें मारना, यह विचार करके एक पर्वताकार बडे स्वरूपसे करोडों जिसके गुह्यस्थान मोहकारक दीख पडते हैं ऐसा नग्न रूप धारण किया और जो पहिला छोटा सुन्दर रूप था वह धारण किया। तब दैत्य उस स्वरूपकूं देखके हर्षित होके ॥ २२-२७ ॥ कहने लगा इतनी देरतक तू कहां गयी थी ? मेरा सामर्थ्य तू जानती नहीं है ? क्षणभरमें तुझकूं मारूंगा। मेरा

च ॥ अतस्त्वां नाशयिष्यामि क्षणेन पश्य मे बलम् ॥ २८ ॥ इत्युक्त्वा खड्गमादाय ताडितुं कृतनिश्चयः ॥ तावत्सा चंडिकादेवी देव्युपस्थे जगामह ॥ २९ ॥ तत्पृष्ठतः स्वयं दैत्यो गुरुयोनौ जगाम ह ॥ ३० ॥ स्वपृष्ठतश्चागतं दैत्यवर्यं हुंकारशब्देन तताड जज्ञौ ॥ स आहतो देविशब्दोत्थवायुना पपात यौनौ जगदंबिकायाः ॥ ३१ ॥ पतमाने च तद्देहे देहिदेहीत्यवोचत ॥ स्वप्राणाश्च गताः कंठे परां ग्लानिमवाप ह ॥ उन्मील्य नेत्रे शनकैर्देवीं स्तोतुं प्रचक्रमे ॥ ३२ ॥ त्वच्चित्ररूपेण च मोहितोऽहं न जाने त्वामाद्यशक्तिं परेशाम् ॥ ३३ ॥ देव्युवाच ॥ ॥ वरं वरय भो वत्स हिंगुलासुर योनिज ॥ हिंगुलासुर उवाच ॥ यदि मातः प्रसन्नासि वरं दातुं समागता ॥ ३४ ॥ मन्नामाख्यातिरूपेण आकल्पांतं स्थितिं कुरु ॥ वरमन्यं च वाचेहं मन्नाम्ना पूजनं तव ॥ ३५ ॥ शरणे भगरूपे ते प्रवेशं यः करोति च ॥ तस्याशु सकलानिष्टान्कामान् दात्री शुभस्मिते ॥ ३६ ॥ तथेत्योमिति तद्वाक्यमाकर्ण्यासुरराट् ततः ॥ जहौ प्राणाञ्छरण्ये च देवीसायुज्यमाप्तवान् ॥ ३७ ॥ तदा ब्रह्मादयो देवाः पुष्पवृष्टिं प्रचक्रमुः ॥

सामर्थ्य देख ॥२८॥ ऐसा कहके तरवार हाथमें लेके मारनेकूं आया इतनेमें चंडिका देवीने उस बडी देवीके भगमें प्रवेश किया ॥ २९ ॥ दैत्यने भी उसके पीछे उस बडी योनिमें प्रवेश किया ॥ ३० ॥ तब पीछे आता हुवा दैत्य उसको हुंकार शब्दसे ताडन करतेही देवीकी योनिके अंदर पडा ॥ ३१ ॥ उसका देह पडते वखत देहि देहि ऐसा बोलते २ ही पडा। कंठप्राण आया। बडी ग्लानि पाया॥३२॥फिर धीरेसे नेत्र खोलके देवीकी स्तुति किया ॥ ३३ ॥ देवीने कहा वर मांग हिंगुलासुर कहने लगा हे माता ! तुम जो प्रसन्न हुई हो और वर देती हो तो ॥३४॥ मेरे नामके रूपसे कल्पपर्यंत निवास करना । और मेरे नामसे तुम्हारी पूजा होवै ॥ ३५ ॥ और भगरूप इस स्थानमें जो प्रवेश करै उसके संपूर्ण मनोरथ सिद्ध होवैं ॥ ३६ ॥ तथास्तु ऐसा देवीका वचन सुनते हिंगुलासुर दैत्यने देहत्याग किया । और देवीकी सायुज्यमुक्तिको पाया ॥ ३७ ॥ उस वखत ब्रह्मादिक देवता पुष्पवृष्टि करके स्तुति

स्तुतिं चक्रुस्तदोवाच हिंगुला जगदंबिका ॥ ३८ ॥ दैत्याय वरदानेन जाताहं हिंगुलांबिका ॥ अतो वै देवताः सर्वास्तिष्ठंतु मम सन्निधौ ॥ ३९ ॥ सतीर्थाश्च सभोगाश्च ऋषिभिः सहितास्सदा ॥ ये केचिदागमिष्यंति शरणे भगरूपके ॥ ४० ॥ तेषां मुक्तिप्रदाश्चाथ भवितव्यं सुरेश्वराः ॥ इत्युक्त्वा सा तदा देवी हिंगुला चंडविक्रमा ॥ ४१ ॥ पश्यतां सर्व देवानां तत्रै-वांतरधीयत ॥ तेऽपि देवास्तु तत्रैव स्थितास्ते चंद्रकूपके ॥ ॥ ४२ ॥ तीर्थानि सिंधुमुख्यानि निम्नगा हिंगुलेति च ॥ जातानि सिंधुदेशांते समुद्रे संगमाभिधे ॥ ४३ ॥ गिरजा निम्नगा यत्र वृक्षाः कामदुघास्तथा ॥ बिंदुमतीमहातीर्थं देवर्षिगणसेवितम् ॥ ४४ ॥ गिरिजायास्तटे रम्ये हिंगुलः पर्वतोत्तमः ॥ हिंगुलस्य समीपे च दधीचिर्यो महामुनिः ॥ ४५ ॥ महालक्ष्म्या महाभक्तिं करोति शुद्धमानसः ॥ आवाहितानि तेनादौ कोटितीर्थानि तत्र हि ॥४६॥ कोटितीर्थमिति ख्यातं तत्तीर्थं लोकपावनम् ॥ हिंगुलस्योत्तरे देशे गव्यूतित्रयमानतः ॥ ४७ ॥ या भूमिर्वर्तते सा च कामधेनुसमा स्मृता ॥

करनेलगे। तब देवी कहनेलगी कि ॥ ३८ ॥ दैत्यको वरदान दिया इसलिये हिंगुलांबिका मेरा नाम भयाहै। तुमने भी मेरे पास रहना ॥ ३९ ॥ तीर्थ और अपने ऐश्वर्य भोग सहित और ऋषियोंसहित नित्य वास करो। और जो कोई इस भगरूपीस्थानमें आवेंगे ॥ ४० ॥ उनकूं तुमने मुक्ति देना ऐसा कहके हिंगुला देवी अंतर्धान भयी ॥ ४१ ॥ फिर उन ब्रह्मादिक देवताओंने चंद्रकूपके नजदीक वास किया ॥ ४२ ॥ जहां सिंधुनदी और समुद्रका संगम है सिंधदेशके अंतमें वहां तीर्थ बहुत भये। उस क्षेत्रका वर्णन करते हैं। जहां हिंगुला नदी गिरिजा नदी है वृक्ष कल्पवृक्षसमान हैं बिंदुमती तीर्थ है ॥ ४३ ॥ ॥ ४४ ॥ और हिंगुल नामका एक पर्वत है। उसके नजदीक दधीच मुनिका आश्रम है ॥ ४५ ॥ उस आश्रमके भीतर दधीच ऋषि महालक्ष्मीजीका ध्यान करते हैं। उनका निर्माणकियाहुवा कोटितीर्थ है॥४६॥और उस हिंगुलपर्वतके उत्तर बाजू छः कोसके ऊपर जो भूमि है सो कामधेनुसरीखी है उस क्षेत्रमें जितने वृक्ष पाषाण हैं वे सब

हिंगुलीया वृक्षखंडपाषाणगिरिकादयः ॥ ४८ ॥ तत्सर्व काञ्चनं ज्ञेयं महालक्ष्मीर्यतः स्थिताः ॥ तस्मिन् गिरौ नवं कोटचश्चामुण्डाश्चैव संस्थिताः ॥ ४९ ॥ हिंगुलाद्रेश्च कटके सरोवरमुदीरितम् ॥ विनाशरहितं तत्र सलिलं वर्तते सदा ॥ ॥ ५० ॥ तस्मिन्मीनस्वरूपेण त्रिनेत्रो वर्त्तते सदा ॥ तस्य संसर्गमात्रेणायसं कनकतामियात् ॥ ५१ ॥ हिंगुलाद्रेर्दक्षिणतो वर्तते खादिरस्तरुः ॥ तन्मूले संस्थितो ग्रावा गोपीचंदनसंनिभः ॥ ५२ ॥ तच्चूर्णताम्रसंसर्गात्कनकं जायते ध्रुवम् ॥ हिंगुलाख्यस्य शिखरे कश्चिच्चित्रतरुः स्मृतः ॥ ५३ ॥ तत्पर्णकस्य संसर्गो मृन्मये जायते यदा ॥ पंचप्रहरपर्यंतमग्नियोगे कृते पुनः ॥ ५४ ॥ रौप्यं हि जायते तत्तु नात्र कार्या विचारणा ॥ तस्मिन्वने प्रकाशात्मामृतसञ्जीविनी लता ॥ ॥ ५५ ॥ आस्ते चंडीस्वरूपा सा सर्वौषधिविनिर्मिता ॥ श्रावणस्य चतुर्दश्यां कृष्णायां रविवासरे ॥ ५६ ॥ तस्याः प्राप्तिर्निशीथे चेत्सा मृताञ्जीवयेत्क्षणात् ॥ तस्मिन् सर्पो महानास्ते मणिना सहितः शुचिः ॥ ५७ ॥ हिंगुलाद्रेरधोभागे सर्वत्र दशयोजनम् ॥ तत्रमूले स्थितं यद्यत्तत्सर्वं सिद्धि-

सुवर्णमय हैं ॥ ४७ ॥ ४८ ॥ वहां नव कोटि चामुंडा वास करती हैं उस पर्वतके नजदीक अगाधजल भराहुवा एक सरोवरहै॥४९॥५०॥उसमें मच्छके रूपसे शिवजी निवास करतेहैं वहांके जल और मृत्तिकाके योगसे लोहेका सोना होताहै ॥ ५१ ॥ और उस पर्वतके दक्षिणबाजू खैरकावृक्ष है उसके मूलके पास गोपीचंदनसरीखे सुफेद पत्थरहैं॥५२॥उनका चूरा और तांबा इनदोनोंको अग्निमें गलानेसे सुवर्ण होताहै। उस हिंगुलपर्वतके शिखर ऊपर एक चमत्कारकेझाडहैं ॥ ५३ ॥ उसके पत्तेका और मृत्तिकाका पांच प्रहर अग्निमें गजपुट फूंकके निकाले तो रूपा होताहै॥ ५४ ॥ उस वनमें अमृतसंजीविनी वेलहै उसकी प्राप्ति जो कभी श्रावण कृष्णचतुर्दशी रविवारके दिन अर्धरात्रिको होजावे तो मृतप्राणीकूंतत्काल जीवित करे ऐसीहै ॥५५॥५६॥ उस वनमें मणिधर एक बडा सर्पहै ॥५७॥ और उस हिंगुलपर्वतके चारोंतरफ ४० कोस तक जितने वृक्षके मूलहैं वे सब अनेक तरहके दूर दर्शन दूर गमन अदृश्य करणादि

दायकम् ॥ ५८ ॥ क्षेत्रसंरक्षणार्थाय पञ्च देव्यो गिरेरधः ॥ सप्तदेव्यस्तस्य गिरेः सप्तसानुषु संस्थिताः ॥५९॥ बिन्दुमत्या उत्तरस्तो गव्यूतिद्वयमानतः ॥ पुत्रदाख्यं महातीर्थं संगमत्रितयेऽस्ति हि ॥ ६० ॥ कस्मिंश्चित्समये देवा भीमदैत्यप्रपीडिताः ॥ हिंगुलाद्रेः पुरोभागे दधीचेराश्रमं प्रति ॥ ॥ ६१ ॥ गत्वा चाराधयामासुर्दुर्गां कोटितटे स्थिताः ॥ तदांबा चाहनद्दैत्यान्दिवं भेजुर्दिवौकसः ॥ ६२ ॥ कदाचित्समये भूपा निर्दयास्त्यक्तधर्मिणः ॥ असत्यतत्पराः सर्वे नास्तिकाः परघातिनः ॥ ६३ ॥ प्रजापीडासु निपुणाः क्षत्रिया म्लेच्छबुद्धयः ॥ तदाऽवतीर्णो भगवान् क्षत्त्रियांतकरो हरिः ॥ ६४ ॥ वैशाखस्य तृतीयायां शुक्लायां रविवासरे ॥ जमदग्निसुतो जातः साक्षात्सूर्य इवापरः ॥ ६५ ॥ तस्यावतारयोगेन सर्वे वै सुखिनोऽभवन् ॥ कदाचिदर्जुनो वीरो होमधेनुं जहार च ॥ ६६ ॥ जमदग्नेर्बलान्मूढश्चरंतीं नर्मदातटे ॥ रेणुका जमदग्निश्च उभौ दुःखेन पीडितौ ॥ ६७ ॥

सिद्धि देनेवाली हैं ॥५८॥ उस क्षेत्रके रक्षणके वास्ते पर्वतके नीचे पांच देवी निवास करतीहैं। शिखरके ऊपर सात देवी निवास करती हैं ॥ ५९ ॥ विंदुमती तीर्थके उत्तर बाजू चार कोसके ऊपर गिरिजा हिंगुलासमुद्रके सङ्गमके नजदीक पुत्रदा तीर्थ है ॥ ६० ॥ किसी समयमें भीमदैत्यसे पीडित हुवे देवता हिंगुलपर्वतके आगे दधीच ऋषीके आश्रममें आयके दुर्गाकी आराधना करते भये। तब देवीने वह दैत्य मारा देवता स्वर्गमें गये ॥ ६१ ॥ ६२ ॥ किसी समयमें क्षात्रिय बडे दुष्ट स्वधर्मकूं त्याग करके असत्यवादी निर्दय म्लेच्छ बुद्धि होके प्रजाकूं पीडा करते भये तब उनका नाश करनेके वास्ते भगवान्ने वैशाख शुक्ल ३ रविवारके दिन जमदाग्नि ऋषिके घर अवतार लिया॥६३--६५॥उनके अवतारसे सब लोक सुखी भये एक समय सहस्रार्जुन क्षात्रियने जमदग्निकी कामधेनु गौको जो नर्मदानदीके तटऊपर चरतीथी वहांसे बलात्कारसे हरण किया॥६६॥तब रेणुका जमदाग्नि दोनों बडे दुःखी होयके ॥ ६७ ॥

ऊचतुःस्वसुतं रामं धेनुदर्शनकांक्षिणौ ॥ धेनुर्हृता पुत्र तेन दुष्टे नार्जुनरूपिणा ॥ ६८ ॥ तां देहि त्वं महाभाग हत्वा तं क्षत्रियाधमम् ॥ ॥ राम उवाच ॥ तदानयिष्ये धेनुं वो यद्यहं भवतां सुतः ॥ ६९ ॥ राम इत्थं प्रतिज्ञाय हिंगुलाद्रिं जगाम ह ॥ चतुर्विंशति वर्षाणि तपस्तत्र चकार ह ॥ ७० ॥ विजयप्राप्तये शंभोर्दर्शने कृतनिश्चयः ॥ तदा प्रसन्नः श्रीशंभुरुवाच वचनं शुभम् ॥ ७१ ॥ लिंगं स्थापय मे राम नेत्रतोयातटे शुभे ॥ त्वद्भक्तियोगतस्तस्मिँल्लिंगे स्थास्यामि सर्वदा ॥ ७२ ॥ अद्यप्रभृति लोकेस्मिन्स्थानमेतन्ममाज्ञया ॥ रामक्षेत्रमिति ख्यातं भविष्यति न संशयः ॥ ७३ ॥ इमं गृहाण परशुमजेयस्त्वं भविष्यसि ॥ इत्युक्त्वांतर्दधे रुद्रो रामः परशुमाददे ॥ ॥ ७४ ॥ ततः परशुरामश्च गत्वा हैहयपत्तनम् ॥ हत्वार्जुनं ततः पश्चात्क्षत्त्रांताय मनो दधे ॥ ७५ ॥ सारस्वतऋषीणां च जातं स्थानं महत्तरम् ॥ ॥ ऋषयः ऊचुः ॥ सूतसूत वदास्माकं सारस्वतकुलोद्भवम् ॥ ७६ ॥ सरस्वत्याश्च कः पुत्रो जातस्तं शृण्महे वयम् ॥ सूत उवाच ॥ ॥ कैलासशि-

अपने पुत्र परशुरामको कहने लगे कि मेरी कामधेनुको दुष्ट अर्जुन हरण करके लेगयाहै उसको मारकर गौ लायके मुझे देवो ॥ ६८ ॥ तब परशुरामने कहा कि जो मैं तुम्हारा पुत्र हूं तो उस कामधेनुकूं लाऊंगा ॥ ६९ ॥ ऐसी प्रतिज्ञा करके हिंगुल पर्वतके ऊपर जायके चौबीस बरस तपश्चर्या कियी ॥ ७० ॥ जय होनेके वास्ते और शिवका दर्शन हो ऐसा निश्चय करके बैठे तब शिवजीने प्रसन्न होके कहा कि ॥७१॥ मेरे लिंगकी स्थापना करो ॥ ७२ ॥ और आजसे यह स्थान रामक्षेत्र नामसे विख्यात होवेगा ॥ ७३ ॥ और यह परशु तुम ग्रहण करो इससे तुम अजय होवोगे ऐसा कहके शिव अंतर्धान भये रामने वह शिवका दियाहुवा परशू लिया ॥७४॥ और माहिष्मती नगरीमें जायके सहस्त्रार्जुनकूं मारके क्षत्रियोंकूं मारनेका उद्योग करते भये ॥७५॥ उस क्षेत्रमें सारस्वत ऋषिका बडा स्थान भया । शौनक प्रश्न करनेलगे कि हे सूत ! सारस्वत कुलकी उत्पत्ति मुझसे कहो ॥ ७८ ॥ सरस्वतीकूं पुत्र भया

खरे प्रोक्तं षण्मुखाय शिवेन यत् ॥ ७७ ॥ तद्वदामि मुनिश्रेष्ठाः सारस्वतकथानकम् ॥ पद्मकल्पात्पुराकल्पे अनावृष्टिरजायत ॥ ७८ ॥ निरन्ने भूतले जाते सर्वे लोकाः क्षयं गताः ॥ नष्टभागस्तदा देवा ब्राह्मणं शरणं ययुः ॥ ७९ ॥ अयज्ञे भूतले देवं वयं भ्रष्टा दिवौकसः॥ मेघोत्पत्तिं कुरुष्वाद्य यस्माद्वृष्टिर्हि जायताम् ॥ ८० ॥ ब्रह्मोवाच ॥ यूयं सर्वे निवर्तध्वं मर्त्यलोके सुविस्तरे ॥ सूत्रामोत्पत्तिकरणे कृत्वा सौत्रामणिं शुभम् ॥ ८१ ॥ करिष्ये लोकरक्षार्थं यज्ञार्थं विप्रसंभवम् ॥ विचार्यैवं विभुर्देवैस्साकं भूतलमाययौ ॥ ८२ ॥ तत्र सारस्वतं तीर्थं सरस्वतिनदीतटे ॥ गत्वा देवर्षिभिः साकं वृष्टयर्थे चाकरोन्मखम् ॥ ८३ ॥ यदा संभृतसंभारो ब्रह्मा सारस्वते तटे ॥ स्थितोऽसौ प्राप्तसंदेहः कथमिंद्रो भविष्यति ॥ ८४ ॥ एवं विचार्यासौ वेधाः समाधिमगमत्तदा ॥ देवाना गौरवार्थाय जाता वाण्यशरीरिणी ॥ ८५ ॥ ॥ आकाशवाण्युवाच ॥ ॥ भोभो देवाः शृणुध्वं भो इंद्रार्थे प्रवदामि

ऐसा कहीं भी हमने सुना नहीं । सूत बोले हे ऋषीश्वरो ! पहिले कैलासपर्वतके ऊपर शिवने जो स्कंद स्वामीको कथा कही है सो कहता हूं ॥ ७७ ॥ पद्मकल्पके पहिले कल्पमें अनावृष्टि बहुत भई ॥ ७८ ॥ पृथ्वीमें अन्नका नाश बहुत भया लोक क्षय पाये देवताओंका भाग नष्ट होगया तब सब देवता ब्रह्माकी शरण आये ॥ ७९ ॥ और कहनेलगे कि भूमिमें यज्ञ होते नहीं हैं हम स्वर्गसे भ्रष्ट होगये हैं इस वास्ते मेघकी उत्पत्ति करो जिससे वृष्टि होवे ॥ ८० ॥ ब्रह्मा कहने लगे तुम सब पीछे फिरो सौत्रामणि यज्ञ करके लोकके रक्षण करनेके वास्ते इंद्रकी उत्पत्ति करेंगे ऐसा विचार करके देवताओंको साथ लेके ॥ ८१ ॥ ८२ ॥ भूतलमें सरस्वती नदीके तट ऊपर सारस्वत तीर्थमें वृष्टिके वास्ते यज्ञ करनेलगा ॥ ८३ ॥ जब ब्रह्मा सरस्वतीके तट ऊपर यज्ञके साहित्य लेके बैठे और मनमें विचार करनेलगे कि इंद्रकी उत्पत्ति कैसी होवेगी ॥ ८४ ॥ ऐसा विचार करके समाधि चढायके बैठे तब आकाशवाणी हुई ॥ ८५ ॥ कि हे देवो ! इंद्रोत्पत्तिके वास्ते उपाय श्रवणकरो । एक कलशमें सूत्रामणि अमृत भरके रखो फिर अश्विनी-

भोः ॥ भास्करप्रतिमौ देवौ नासत्यौ सूयनौ यदा ॥ ८६ ॥ सरस्वत्या संगतौ वै तदेंद्रो वो भविष्याति ॥ कुंभमेकं सुसंस्थाप्य सूत्रामणिसुपूरितम् ॥ ८७ ॥ कुमारयोः सरस्वत्या रेतस्तस्मिन्यदा पतेत् ॥ तदा पुत्रस्य चोत्पत्तिः सृष्ट्यर्थे संभविष्यति ॥ ८८ ॥ एतावदुक्त्वा वचनं वाणी चांतर्हिताभवत् ॥ ततो देवगणाः सर्वे तुष्टुवुस्तां सरस्वतीम् ॥ ८९ ॥ स्तुता देवी तदा साक्षात्तीर्थात्तस्माद्विनिर्गता ॥ कोटिसूर्यप्रतीकाशां दृष्ट्वोवाच पितामहः ॥ ९० ॥ देवी त्वद्दर्शनादेव प्रसन्नं मम मानसम् ॥ जातं कार्यं कुरुष्वाद्य देवांस्त्वंपरिपालय ॥ ॥ ९१ ॥ अयज्ञपीडिता देवा मुनींद्राः पन्नगासुराः ॥ अत इंद्रसमुत्पत्तिं तद्गर्तां जायतां यदा ॥ ९२ ॥ तदा त्वद्गर्भजश्चेन्द्रो वृष्टिं कुर्यादलौकिकीम् ॥ एतदर्थं श्रुता वाणी त्वद्रूपा गगनेचरी ॥९३॥ भिषजोर्हंसगागर्भात्पुत्रो भवति निश्चितम् ॥ एवंश्रुत्वा लज्जिता सा प्रोवाच वचनं तदा ॥ ९४ ॥ भवद्भिर्यदि कार्यार्थं स्वभागश्च स्वकं बलम् ॥ दीयते अश्विनौ देवौ तर्हि गर्भं विधारये ॥ ९५ ॥ यावन्ममोदरे पुत्रो जायतेऽसौमनो

कुमार दो और सरस्वती नदी इनके समागमसे जो वीर्यपात होवेगा और कुंभमें पडेगा उसमेंसे सृष्टिके वास्ते पुत्रोत्पत्ति होवेगी ऐसा कहके वाणी अंतर्धान भई । तब सब देव सरस्वतीकी स्तुति करनेलगे ॥ ८६–८९ ॥ स्तुति करते उसी वखत उस तीर्थमेंसे प्रत्यक्षरूप धारण करके देवी निकली । उसकूं देखके ब्रह्मा कहनेलगे ॥ ९० ॥ हे देवी ! तुम्हारे दर्शनसे मन प्रसन्न हुवा है एक कार्य करो यज्ञ विना देव ऋषी आदि सब पीडित भये हैं इसवास्ते तुम्हारे गर्भसे जो इंद्रकी उत्पत्ति होवेगी ॥ ९१ ॥ ९२ ॥ तो वह इंद्र अलौकिक वृष्टि करेगा । वैसी तुम्हारी आकाशवाणी मैंने सुनी ॥ ९३ ॥ इसवास्ते अश्विनीकुमार वैद्यके वीर्यसे तुम्हारे गर्भसे पुत्र निश्चय करके होवेगा । ऐसा ब्रह्माका वचन सुनते लज्जित होयके देवी कहनेलगी ॥ ९४ ॥ अपना भाग और अपना बल जो अश्विनीकुमारोंको देओगे तो मैं गर्भधारण करूंगी ॥ ९५ ॥ यावत्काल पर्यंत मेरे पुत्रका वंश रहे

गतः ॥ तावत्सर्वेषु संभागास्तिष्ठंतु मद्भवे कुले ॥९६॥ सरस्वतीवचः श्रुत्वा देवाः सर्वे महर्षयः ॥ अश्विनौ शरणं याताः स्वं भागं च स्वकं बलम् ॥ ९७ ॥ ददतुस्तौ स्वेष्टसिद्ध्या अश्विनौ हर्षमापतुः ॥ ब्रह्माद्याः सकला देवा कुबेरो भागमादरात् ॥९८॥ सरस्वत्याश्च हस्तौ द्वावश्विभ्यां समुपाहितौ ॥ सर्वेषां लोकपालानां बलं जगृहतुश्च तौ ॥ ९९ ॥ पीतेऽमृते च ताभ्यां वै तया देव्या सहानघ ॥ विरंचिजे जले स्नाताः स्थितास्तेऽमरपुङ्गवाः ॥ १०० ॥ व्यवायकाले संप्राप्ते प्राप्ता सा च सरस्वती ॥ सरस्वत्याश्च योन्यां वै स्वं वीर्यं चिक्षिपुश्च तौ ॥१०१॥ गर्भे जाते तदा देवी हर्षेण महतावृता ॥ शुशुभे देवसंघेषु स्वे जले हंसगामिनी ॥ १०२ ॥ षष्ठमासे गते काले गर्भोऽभूच्चन्द्रपांडुरः ॥ कश्चिद्दैववशादेव पतितश्चाप्यकालतः ॥ ॥ १०३ ॥ गर्भे च पतिते तत्र हाहाकारो महानभूत् ॥ हिरण्यगर्भजा देवी दुःखेन महता वृता ॥ १०४ ॥ ततो देवैश्च सहितो ब्रह्मा लोकपितामहः ॥ गर्भं गृहीत्वा स्वे पाणौ घटमध्ये न्यपातयत् ॥ १०५ ॥ सौत्रामण्यमृतेनापि औषधीभिः कुशैस्तथा ॥ पूरिते पूर्णतोयेन कन्याहस्ते ददावसौ ॥१०६॥

वहां तक भाग रहे ॥९६॥ ऐसा सरस्वतीका वचन सुनते सब देव ऋषी अश्विनीकुमारोंकी शरण जायके अपने भाग और बल देते भये॥९७॥तब वे दोनों बडे हर्षित भये । सबोंके सामने सरस्वतीके हाथ धरलिये ॥ ९८ ॥ ९९ ॥ अश्विनीकुमारोंसे अमृतपान किया और देवीकूं साथ लेके सरस्वतीके जलमें सब देव भी स्नान करते भये ॥ १०० ॥ फिर रतिक्रीडाके समयमें सरस्वतीकी योनिमें वीर्यस्थापन किया ॥ १०१ ॥ तब देवी बडी हर्षित होके अपने जलमें शोभने लगी ॥ १०२ ॥ इतनेमें छः महीने हुवे । तो दैवयोगसे उस गर्भका पात होगया ॥ १०३ ॥ तब बडा हाहाकार हुवा । सरस्वती बडी दुःखी भई ॥१०४॥ फिर देवोंसहित ब्रह्माने उस गर्भको अपने दो हाथोंमें लेके सौत्रामणि अमृतका भराहुवा जो कलश उसमें डालके

हस्ते गृहीत्वा सा कुंभं जलमध्ये स्थिता तदा ॥ ददृशे साच तं कुम्भं गर्भमेकं द्विधाकृतम् ॥ १०७ ॥ तदा विचारयामास देवी गर्भव्यवस्थितिम् ॥ एकं देवा ग्रहीष्यंति द्वितीयमहमुत्तमम् ॥१०८॥ विचार्यैवं विभुं प्राह मद्गर्भो वर्धतामिति ॥ देवानां तेजसा तत्र गर्भो वृद्धिमगात्तदा ॥ १०९ ॥ हर्षेण युक्ता च तदा सरस्वती कुंभांतरे निश्चलमानसा सा ॥ विलोक्य पुत्रस्य युगं सुकोमलं ततोऽस्य वृत्तिं सुसुखां चकार ह ॥ ११० ॥ एवं वर्षशतं देवी तमालोक्य पुनः पुनः ॥ जाते शतेऽब्दे पूर्णे सा गर्भस्य च षडानन ॥ १११ ॥ शकले कलशस्थे द्वे जाते गर्भोऽप्यभूत्तथा ॥ तटस्थे नयने कृत्वा विलोक्य स्वसुतं यदा ॥ ११२ ॥ तदेंद्रो लोहितो नाम जातो वेदेषु गीयते ॥ जाते पुत्रयुगं देवाः संशयाविष्टमानसाः ॥ ११३ ॥ इच्छितोऽप्येकपुत्रोऽपि जातं च युगलं कथम् ॥ ॥ सरस्वत्युवाच ॥ ॥ इमौ द्वौ तनयौ जातौ युष्मदर्थकरौ प्रियौ ॥ ॥ ११४ ॥ एकं चाहं ग्रहीष्यामि मत्प्रीतिकरणे सदा ॥ यूयं

सरस्वतीके हाथमें दिया ॥ १०५ ॥ १०६ ॥ सरस्वतीने वह कलश लेके जलमें जायके देखा तो एक गर्भके दो भाग भये हैं ॥ १०७ ॥ तब मनमें विचार करने लगी कि एक भाग देवता लेवेंगे और दूसरा भाग मैं रखूंगी ॥ १०८ ॥ ऐसा विचार करके ब्रह्मदेवकूं कहने लगी कि मेरा गर्भ वृद्धिंगत हो तब देवतावोंके तेजसे वह गर्भ वृद्धिकूं पाया ॥ १०९ ॥ तब सरस्वती बडी हर्षित होयके कुम्भमें कोमल दो पुत्रोंकूं देखके उनकी पुष्टताके वास्ते उत्तम योजना करती भई ॥११०॥ ऐसे सौ बरस तक बारंबार उस गर्भकूं देखती भई ॥ १११ ॥ सौ बरस जब पूरे हुवे तब तटस्थ नेत्रसे देवीने पुत्रकूं देखा ॥ ११२ ॥ वह लालरंग होगया सो लोहितेन्द्र ऐसा नाम वेदमें विख्यात है दो पुत्रोंको देखके देव आश्चर्य करने लगे कि हमने एक पुत्रकी इच्छा की थी यहां दो कैसे भये ! तब सरस्वती कहने लगी यह दोनों पुत्र मेरे प्रिय करनेवाले हैं ॥ ११३ ॥ ॥ ११४ ॥ मेरी प्रीतिके वास्ते एककूं मैं लेऊंगी और दूसरा जो लोहितेंद्र

सर्वे देवसंघा वृष्ट्यर्थं कार्यसाधनम् ॥ ११५ ॥ लोहितेंद्रेण कर्तव्यं गंतव्यं च त्रिविष्टपे ॥ मन्नाम्नाप्यपरः पुत्रः सारस्वतदधीचकः ॥ ११६ ॥ देवसंघेषु ऋषिषु तापसेषु तथैव च ॥ उपकारेषु सर्वेषु देवेषु परिगीयते ॥११७॥ ऋषिजातिर्दश प्रोक्ता कर्मणा तपसाऽपि वा ॥ दशाधिक्यो हि मत्पुत्रो भविष्यति न संशयः ॥११८॥ अतः परं भवद्भिश्च कर्तव्यं यज्ञकारणम् ॥ लोहितेंद्रेण सहिताः सौत्रामणिर्विधीयताम् ॥ ॥११९॥ मम पुत्रप्रभावेण ह्यन्नवृष्टिर्भविष्यति ॥ देव्या वचनमाकर्ण्य चक्रुः सौत्रामणिं सुराः ॥ १२० ॥ यज्ञं सरस्वतीतीरे सर्वे स्वं भागमाययुः ॥ वृष्ट्यर्थं च कृतो यज्ञः सौत्रामणि रतंद्रिणा ॥१२१॥ तेनेंद्रेत्यभिधा जाता सूत्रामालोकवंदितः ॥ देवा हर्षं परं प्रापुर्वृष्टिर्जाता ह्यलौकिकी ॥ १२२ ॥ जाता सर्वसमृद्धिश्च सरस्वत्याः प्रभावतः ॥ तदा सरस्वतीदेवी दधीचेंद्रप्रहर्षिता ॥१२३॥ जग्राह परमप्रीत्या स्तन्यदानं चकार सः ॥ पीते स्तन्ये तदा पुत्रौ पूर्णतां प्रापितौ क्षणात् ॥१२४॥ एतस्मिन्नंतरे वेधास्त्रिदशांस्तानुवाच ह ॥ अयमिंद्रः क्षत्रवृत्त्या ब्रह्मक्षत्रं च रक्षति ॥ १२५ ॥ अयं पुत्रो दधीचस्तु सारस्वत-

है उसकूं वृष्टिके वास्ते तुम लेके स्वर्गमें जाना और मेरा पुत्र सारस्वत दधीच नामसे विख्यात होवेगा ॥ ११५ ॥ ११६ ॥ सब देव ऋषिके बीचमें अधिक यशस्वी होवेगा ॥ ११७ ॥ दश जातिके ब्राह्मण जो हैं उनमें यह पुत्र श्रेष्ठ होवेगा ॥ ११८ ॥ अब आगे लोहितेंद्रकूं लेके तुम सौत्रामणि यज्ञ करो ॥ ११९ ॥ इस मेरे पुत्रके प्रतापसे अन्नवृष्टि होवेगी ऐसा देवीका वचन सुनते देवोंने सौत्रामणि यज्ञ किया ॥ १२० ॥ सरस्वतीके तट ऊपर वृष्टिके वास्ते सौत्रामणि यज्ञ लोहितेंद्रने किया ॥ १२१ ॥ उससे सूत्रामा नाम प्रसिद्ध भया देव हर्षित भये अलौकिक वृष्टि भई ॥ १२२ ॥ अन्नकी समृद्धि भई तब सरस्वतीने सारस्वतदधीचकूं और लोहितेंद्रकूं अपने उत्संगमें बिठायके स्तनपान करवाया ॥ १२३ ॥ ॥ १२४ ॥ इतनेमें ब्रह्मदेव देवोंको कहने लगे कि यह इंद्र क्षत्रिय धर्मसे ब्रह्मक्षत्रियका रक्षण करेगा ॥ १२५ ॥ और यह दधीच सारस्वतकुलका

कलाधिपः ॥ भविता मृत्युलोकेषु ऋषीणां कुलपालकः ॥
॥ १२६ ॥ यस्मिञ्छास्त्राणि सर्वाणि पुराणानि यदृच्छया ॥
तथैव वेदाः सांगास्तु तिष्ठंतु ते न संशयः ॥ १२७ ॥ अतो
दौहित्रकार्यार्थं कर्तव्यं व्रतबन्धनम् ॥ तथोद्वाहोऽपि कर्तव्य
आर्षश्चार्षिकुलोचितः ॥ १२८ ॥ इत्येवमुक्त्वा वचनं देवी तत्र
चकार ह ॥ सारस्वतस्य चंद्रस्य व्रतबंधं च चक्रिरे ॥ १२९ ॥
ब्रह्मचर्यपदार्थांश्च ददुर्देवाश्च तौ प्रति ॥ एवं चोपनये जाते
चक्राते ब्रह्मचर्यताम् ॥ १३० ॥ वर्षद्वादशपर्यंतं तावद्देवाश्च
तत्रगाः ॥ चरित्वा ब्रह्मचर्यं तौ गार्हस्थ्यव्रतगौ कृतौ ॥१३१॥
जातूकर्णस्य द्वे कन्ये एका वेदमतीति च ॥ द्वितीया तु शची
चैव उद्वाहार्थे समानयत् ॥ १३२ ॥ सारस्वतदधीचाय दत्ता
वेदमतीति च ॥ लोहितेंद्राय च शची नानारूपगुणान्विता ॥
॥ १३३ ॥ एवं विवाहे सञ्जाते जातं परममंगलम् ॥ इंद्रं
गृहीत्वा ते देवाः शच्या सह विमानगाः ॥ १३४ ॥ त्रिविष्टपं
च जग्मुस्ते हर्षेण परिपूरिताः ॥ सभार्यो न्यवसत्तत्र सारस्वत
दधीचकः ॥ १३५ ॥ दधीचिना वेदमत्यामुत्पन्ना ये बृह-

अधिपति होवेगा ऋषियोंका पालन करेगा ॥ १२६ ॥ जिनके पास वेद और शास्त्र पुराण सब रहेंगे ॥१२७॥ इसवास्ते इन दोनोंका यज्ञोपवीत उपनयन संस्कार और आर्ष विवाह करो ॥१२८॥ ऐसा ब्रह्माका वचन सुनके सरस्वतीने दोनोंका व्रतबंध किया ॥ १२९ ॥ देवतावोंने दोनों पुत्रोंको ब्रह्मचर्यके सब पदार्थदिये उन्होंने ब्रह्मचर्य पालन किया ॥१३०॥ बारह बरस तक सब देवता भी वहां रहे ॥१३१॥पीछे जातूकर्ण्य ऋषिकूं दो कन्याथीं एक वेदमती सो दधीचके वास्ते दूसरी शची सो लोहितेंद्रके वास्ते लाये॥१३२॥यथाविधि दोनोंका विवाह किया ॥ १३३ ॥ बडा आनंद भया पीछे शचीसहित लोहितेंद्रको लेके सब देव स्वर्गमें गये और सारस्वत दधीचने स्त्रीसहित उसीक्षेत्रमें वास किया ॥१३४॥१३५॥फिर उनको पुत्र तो बहुत

त्तया ॥ ऋषयो बहुशो जाताः संख्यां कर्तुं न शक्यते ॥
॥ १३६ ॥ तेषां मुख्यतरान् वक्ष्ये अष्टाशीतिप्रसंख्यया ॥
पुरुषौ ब्रह्मदालभ्यौ जैमिनिस्तांडवस्तथा ॥ १३७ ॥ दिक्पा-
लदक्षौ प्राची च कण्वो दाक्षायणस्तथा ॥ गोपालशंखपालौ
च शाकिनी शांभवस्तथा ॥ १३८ ॥ नंदी आदी समालाशः
शक्तिः पातंजलिस्तथा ॥ पालाशी गोमयश्चैव दीपदेवश्च
निष्णुकः ॥ १३९ ॥ रुद्रकः क्षेत्रपालश्च सुसिद्धश्चापरः
परः ॥ धर्मो नारायणश्चैव तिमिरो धर्मिणस्तथा ॥ १४० ॥
तैत्तिरो दर्दुरश्चैव जमदग्निर्जगत्तथा ॥ कपालिः सभ्यकश्चैव
सुदर्शः शिशुमारकः ॥१४१॥ च्यवनः शुककश्चन्द्रः सुचंद्रश्चैव
मानदः ॥ आक्रंदकस्तथा नंदो मानकश्चैव मानसाः ॥१४२॥
चंपकश्च तथा व्यासः पिप्पलादोऽप्यघातुकः ॥ देवलो घृत-
कौश्यश्च सूर्यो मर्कोजभैरवौ ॥ १४३ ॥ कृष्णात्रिर्विश्वपालश्च
नरपालश्च तुंबरुः ॥ तुलसी वामदेवश्च वामनाकारकारकः ॥
॥ १४४ ॥ ब्रह्मचारी ब्रहश्चैव भैरवो नरपालकः ॥ बकश्चैव तु

भये हैं उनकी संख्या करनेकूं कोई समर्थ नहीं है ॥ १३६ ॥ परंतु उनमेंसे जो मुख्य मुख्य हैं सो कहताहूं-पुरुष १ ब्रह्म२दालभ्य ३ जैमिनि ४ तांडव ५ दिक्पाल ६ दक्ष ७ प्राची ८ कण्व ९ दाक्षायण १० गोपाल ११ शंख १२ पाल १३ शाकिनी १४ शांभव १५ नंदी १६ आदी १७ समालाश १८ शक्ति १९ पातंजलि २० पालाशी २१ गोमय २२ दीपदेव २३ निष्णुक २४ रुद्र २५ क्षेत्रपाल २६ सुसिद्ध २७ अपर २८ पर २९ धर्म ३० नारायण ३१ तिमिर ३२ धर्मिण ३३ ॥ १३७-१४० ॥ तैत्तिर ३४ दर्दुर ३५ जमदग्नि ३६ जगत् ३७ कपालि ३८ सभ्यक ३९ सुदर्श ४० शिशुमारक ४१ च्यवन ४२ शुकक ४३ चन्द्र ४४ सुचंद्र ४५ मानद ४६ आक्रंदक ४७नंद ४८ मानक ४९ मानसा ५० चंपक ५१ व्यास ५२ पिप्पलाद ५३ अघातुक ५४ देवल ५५ घृत ५६ कौश्य ५७सूर्य ५८ मर्क ५९ अज ६० भैस ६१ कृष्णात्रि ६२ विश्वपालक ६३ नरपाल ६४ तुंबरु ६५ तुलसि ६६ वामदेव ६७

दालभ्यस्तथैव सुभ्रुवः कपिः ॥ १४९ ॥ अष्टाशीतिः स्मृता ह्येते प्रवरा वै महर्षयः ॥ गांग्याः सांकृतयः प्रोक्ताः क्षेत्रोपेता द्विजातयः ॥ १४६ ॥ संस्मृताप्यंगिरः पक्षे बृहत्क्षत्रस्य संस्थितिः ॥ बृहत्क्षत्रस्य दायादः सुहोता परमधार्मिकः ॥ १४७ ॥ सुहोत्रस्य बृहत्पुत्रः सारस्वतकुले परः ॥ मालिनी केशिनी चैव धूमिनी च वरांगना ॥ १४८ ॥ इत्येताः कन्यका जाता वेदमत्यां भृगूद्वह ॥ इति वंशानुवंशाच्च गोत्राणि वंशजानि च ॥ १४९ ॥ जातानि तानि वक्तुं वै कोऽपि वक्त्रैश्चतुर्मुखः इत्येव कथितो विप्राः सारस्वत कुलोद्भवः ॥ १५० ॥ वंशं च शृण्वतो नित्यमश्वमेधायुतं फलम् ॥ संप्राप्नोति नरः पुण्यं पुत्रपौत्रादिवृद्धिदम् ॥ १५१ ॥ सारस्वतेन ऋषिणा रक्षितं क्षत्रियं कुलम् ॥ निःक्षत्रिकरणे काले रामात्क्षत्रिकुलांतकात्॥ ॥ १५२ ॥ ॥ ऋषय ऊचुः ॥ ॥ ब्राह्मणै रक्षितं क्षात्रं क्षत्रं ब्राह्ममभूत्कथम् ॥ एतत्सर्वमशेषेण ब्रूहि त्वं सूतनंदन ॥ ॥ १५३ ॥ सूत उवाच ॥ हैहये निहते रामः क्षत्रांताय मनो

वामनाकारकारक ६८ ब्रह्मचारी त्रह ६९ भैरव नरकपालक बक दालभ्य सुभ्रुव कपि ॥ १४१ ॥–१४९ ॥ यह आदि लेके अठासी ऋषि कहेहैं सो ऋषि गोत्रोंके प्रवर जानना गांग्य और सांकृति यह ब्रह्मक्षत्रीके गोत्र जानने ॥ १४६ ॥ और अंगिरा-गोत्र भी है ब्रह्मक्षात्रिंका दायाद सुहोता होता भया ॥१४७॥ उनका ज्येष्ठ पुत्र एक सारस्वत कुलमें भयाहै और मालिनी केशिनी धूलिनी यह तीन कन्या सारस्वत दधीचको भई हैं ऐसा यह वंशानुवंश गोत्र जो भया है उसका संपूर्ण वर्णन करनेको कोई समर्थ नहीं है यह सारस्वत कुलका उद्भव कहा ॥ १४८–१५० ॥ यह वंश जो श्रवण करेगा उसको अयुत अश्वमेध यज्ञ करनेका पुण्य होवेगा और पुत्र पौत्रादिककी वृद्धिहोवेगी ॥ १५१ ॥ इसी सारस्वत दधीचने परशुरामके भयसे क्षत्रिय कुलका रक्षण कियाहै ॥१५२॥ शौनक प्रश्न करतेहैं कि ब्राह्मणोंने क्षात्रियोंका रक्षण किया और क्षत्र ब्रह्मकुल कैसा हुवा सो कहो ॥१५३॥ सूत कहनेलगे सहस्रार्जुनकूं मारके

दधे॥गतोऽसौ पूर्वदेशांते निःक्षत्रकरणाय वै ॥ १५४ ॥ एवं दक्षिणदेशांते पश्चिमांते तथोत्तरे ॥ परिभ्रमन् सदा देशे सिंधुदेशमथागमत् ॥ १५५ ॥ सिंधुदेशांतरं राममागतं तु तथाविधम् ॥ ज्ञात्वा जातास्तदा सर्वे भयभीता भृगूद्वह ॥१५६॥ क्षत्रियाणां परं स्थानं नगरस्थानमेव यत् ॥ ज्ञात्वा रामोऽपि स्वस्थानं स्थानं पंचदिनात्मकम् ॥ १५७ ॥ चक्रे क्षत्रियनाशार्थमत्र क्वापि स्थितोधुना ॥ एतस्मिन्नन्तरे काले क्षत्रियणां क्षये तदा ॥ १५८ ॥ सूर्यवंशोद्भवो राजा सौरव्रतपरायणः ॥ रामस्य च भयात्पूर्वं रत्नसेनो महीपतिः ॥ १५९ ॥ स्थितोऽसौ गुप्तरूपेण भार्यापंचकसंयुतः ॥ रामबाणभयोद्विग्नश्चिंतयामास चेतसि ॥ १६० ॥ रामबाणादहो त्राता न भूतो न भविष्यति ॥ अतोऽत्र किमनुष्ठेयं रामात्क्षत्रकुलांतकात् ॥ ॥ १६१ ॥ पलायनं वरं मन्ये सस्त्रीकं गर्भसंयुतम् ॥ ऋषीणामाश्रमे स्थानं कर्तव्यं वनगोचरे ॥ १६२ ॥ ऋषेराश्रमसंयोगे रामबाणभयं न हि ॥ यदा कदाचिज्जायेत मत्प्राणगमनं

परशुरामने निःक्षत्रिय पृथ्वी करनेकी इच्छा करी तब वह ॥१५४॥ पूर्व दक्षिण उत्तर पश्चिम चारों दिशाओंमेंके क्षत्रियोंको मारतेहुवे सिंधुदेशमें आये ॥१५५॥ सिंधुदेशमें परशुराम आयेहैं यह बात सुनते सब क्षत्रिय भयभीत होगये ॥ १५६ ॥ उस देशमें नगरनाम करके क्षत्रियोंका बडी राजधानीका स्थान है ऐसा जानके परशुरामने वहां पांच दिन निवास किया ॥ १५७ ॥ क्षत्रियोंकूं मारनेके वास्ते तब क्षत्रियोंका नाश भया ॥१५८॥ उस नगरका सूर्यवंशीसूर्यका परम भक्त रत्नसेनकरके राजा था वह परशुराम आनेवाले हैं यह वृत्तांत मालूम करके उनके पहिले ही ॥ १५९ ॥ पांच स्त्रियोंको लेके गुप्तरूपसे रहा और मनमें विचार करनेलगा॥१६०॥ अहो परशुरामके बाणके भयसे रक्षण करनेवाला न है न हुवा न होवेगा इसवास्ते यहांमैंने क्या करना॥१६१॥यह विचार कर गर्भवती पांचों स्त्रियोंको लेके यहांसे भागके ऋषिके आश्रममें जायके वास करना उत्तम है ॥ १६२ ॥ वहां रामबाणका भय होवेगा नहीं कदाचित् मेरा प्राण जावेगा परंतु मेरी गर्भगत संतति रह जावेगी इसमें संशय

च यत् ॥ तदा तत्संततिस्तिष्ठेद्गर्भगा तु न संशयः ॥ १६३॥ एवं विचार्याथ च भूपतिस्तदा निशीथमध्ये नगराद्विनिर्गतः ॥ भार्या गृहीत्वा निजपादचारिणीं स्वयं जगामाथ वनं वनांतरम् ॥ १६४ ॥ चन्द्रास्या पद्मिनी पद्मा सुकुमारा कुशावती ॥ भार्यापञ्चकसंयुक्तो प्रभाते चाश्रमे शुभे ॥ १६५ ॥ ऋषिश्रेष्ठं ददर्शाथ सारस्वतदधीचिकम् ॥ नमस्कृत्य स्थितस्तत्र सिंधुसौवीरकाधिपः ॥ १६६ ॥ ॥ रत्नसेन उवाच ॥ ॥ भगवन् किं न विदितं रामः क्षत्रियसूदनः ॥ आगतः सिंधुदेशाते नगरस्थानके यदा ॥ १६७ ॥ तदाहं भीतभीतः सन्भार्याभिः सह निर्गतः ॥ रक्ष त्वं मत्प्रसूतिं च शरणागतवत्सल ॥ १६८॥ मन्नारीपंचकं विप्र सगर्भं मम भाति यत् ॥ इत्युक्त्वा विरतं खिन्नं राजानमृषिरब्रवीत् ॥ १६९ ॥ ऋषिरुवाच ॥ ॥ राजंस्त्वन्मानसं दुःखं विहाय च सुखं चर ॥ ममाश्रमाद्बहिर्यातो मरिष्यसि न संशयः ॥१७०॥ भक्षयस्व नृपश्रेष्ठ कंदमूलफलादिकम् ॥ इत्युक्त्वा प्रददौ स्थानं स्वाश्रमे मध्यमांतरे ॥ १७१ ॥ दधीचेश्च प्रतापेन सुखेन च महीपतिः ॥

नहीं है ॥ १६३ ॥ ऐसा विचार करके अर्धरात्रिके समय अपनी स्त्रियोंको साथ लेके पांवसे वन वनांतरकूं चलागया ॥१६४॥ चंद्रमुखी पद्मिनी, पद्मा, सुकुमारा, कुशावती ऐसी पांच स्त्रियों सहित प्रातःकाल ॥ १६५ ॥ दधीच ऋषिके आश्रममें आये वहां ऋषिकूं देखके नमस्कार करके सिंधुसौवीरदेशका राजा रत्नसेन कहनेलगा ॥ १६६ ॥ हे भगवन् ! आप सब जानते हो परशुराम क्षत्रियोंको मारनेके वास्तेनगरस्थानमें आयेहैं ॥ १६७ ॥ उनके भयसे स्त्रीसहित मैं आपके शरणागत हुवाहूं रक्षण करो ॥१६८॥मेरी पांचों स्त्रियां गर्भवती दीखती हैं ऐसा कहके उदास होके बैठा तव ऋषि कहनेलगे ॥ १६९ ॥ हे रत्नसेन ! तुम मनका दुःख छोडके सुखसे यहां वास करो मेरे आश्रमके बाहर गयातो तुरन्त मरेगा इसमें संशय नहीं है ॥१७०॥हे राजा! कंद मूल फल भक्षण करो ऐसा कहके अपने आश्रममें अंदर जगा दियी ॥१७१॥ फिर गर्भवती स्त्रियों सहित राजा सारस्वत दधीचके प्रतापसे सुखसे

स्थितस्तदाश्रमे रम्ये सगर्भवनितायुतः ॥ १७२ ॥ एवं पूर्णतरे काले गर्भिण्यः सुषुवुः प्रजाः ॥ चन्द्रास्यायां समुद्भूतस्तन्नाम जयसेनकः ॥ १७३ ॥ पद्मिन्यां यः समुद्भूतो बिंदुमान् भविता नृपः ॥ पद्मायां च समुत्पन्नो विशालो राजसत्तमः ॥ १७४ ॥ सुकुमार्यां समुत्पन्नश्चंद्रशालेति विश्रुतः ॥ कुशावत्याश्च तनयो भरतेत्यभिगीयते ॥१७५॥ इत्येवं नाम करणं कृतवान्स दधीचकः ॥ ततस्तदाश्रमोपस्थाः क्रीडामृषिकुलोचिताम् ॥ १७६ ॥ चक्रुस्ते ऋषिबालेन साकं वै पंचमाब्दजाम्॥एवं जातेऽथ पंचाब्दे कदाचित्स महीपतिः ॥ १७७ ॥ मृगयां कर्तुमगमदेकाकी गहनं वनम् ॥ तदग्रे दैवयोगेन यज्जातं तन्निबोधत ॥ १७८ ॥ श्रांतः स राजा विपिनांतरात्पुनर्विनिर्गतस्तं च विहाय सूकरम् ॥ विचारयन्वै किमिदं मया कृतं विनिर्गतोऽहं च ऋषेः शुभाश्रमात् ॥ १७९ ॥ एवं विचार्यमाणोसौ रामश्च परवीरहा ॥ नगरस्थानके चास्मिनदेशे वै सिंधुवीरके ॥ १८० ॥ नास्थितः क्षत्रियः कश्चिदिति ज्ञात्वा विनिर्ययौ ॥ देशाद्देशांतरं गच्छन्पुनस्तद्देशमागतः ॥ १८१ ॥

वास करनेलगा ॥ १७२ ॥ नव मास पूर्णभये तब पांचों स्त्रियोंकूं पुत्र भये चंद्रमुखीकूं जयसेन नामका पुत्र भया ॥ १७३ ॥ पद्मिनीकूं बिंदुमान्, पद्माकूं विशाल, सुकुमारीकूं चंद्रशाल, कुशावतीकूं भरत ऐसे पुत्र भये ॥ १७४ ॥ १७५ ॥ ऋषिने उनके नाम करण किये तब वे पांचों बालक ऋषिके बालकनके साथ ऋषिकुलसरीखी क्रीडा करनेलगे ॥ १७६ ॥ ऐसी क्रीडा करते पांच वर्ष गये । एक दिन रत्नसेन राजा ॥ १७७ ॥ शिकार खेलनेके वास्ते आश्रमकूं छोडके घोर वनमें चलागया वहां प्रारब्ध योगसे क्या हुवा सो सुनो ॥ १७८ ॥ राजा शिकार करनेसे श्रान्त हुवा डुकरकूं छोडके घरकूं आनेलगा । तब मनमें विचार हुआ कि मैंने यह क्या किया । ऋषिके आश्रमकूं छोडके बाहर आया ॥१७९॥ ऐसा विचार करते करते परशुरामके सन्मुख आगया ॥१८०॥अब परशुरामभी पहिले उस नगरस्थानमें कोई भी क्षत्रिय नहीं रहा ऐसा जानके वहांसे निकलगयेथे । सो फिर देशदेशांतर फिरते फिरते पुनः उस सिंधुसौ वीर

राम दृष्ट्वा परं क्रूर कुठारेण समन्वितम् ॥ सन्नद्धं कवचेनाथ राजा त्रासमवाप सः ॥१८२॥ तत्याज स्वधनुर्बाणं रामदृष्टिपथं ययौ ॥ रामोऽथ दृष्ट्वा तं भूपं क्षत्रियोऽयं पलायते ॥ ॥ १८३ ॥ एवं ज्ञात्वा बाणमेकं स संधाय महाप्रभुः ॥ मुमोच हृदये चास्य कंठं भित्त्वा विनिर्गतः ॥ १८४ ॥ स राजा रत्नसेनाख्यो मृतिं प्राप्य दिवं ययौ ॥ क्षत्रियं च मृतंदृष्ट्वा रामोऽप्यन्यवनांतरम् ॥ १८५ ॥ गतः क्षत्रियनाशार्थं गंगातीरे सुविस्तरे ॥ एतस्मिन्नंतरे पत्न्यः पञ्च ताश्चारुलोचनाः ॥ ॥ १८६ ॥ ऊचुः पुत्राः क्व राजासौ गतः किं स्वाश्रमांतरात् ॥ दीर्घकालः परं जातो ह्यद्यापि स्वाश्रमे न हि ॥ १८७ ॥ भवद्भिर्ऋषिपुत्रैश्च सहितैस्त्वैर्वनांतरात् ॥ आनीयतां च त्वरया भोजनावसरो गतः ॥ १८८ ॥ एतन्मातुर्वचः श्रुत्वा गतास्ते राजनन्दनाः द्रष्टु सरस्वतीतीरे ऋषिपुत्रैश्च संयुताः ॥१८९॥ विलोक्य सकलं तीरं दुःखेन महतावृताः ॥ तदा निर्गमने कालेदृष्टं राज्ञो मृतं वपुः ॥ १९० ॥ हाहा कृत्वा वने तत्र स्वाश्रमे पुनरागताः ॥ तेभ्यो राज्ञी ऋषिश्रेष्ठा ज्ञात्वा

देशमें आये ॥ १८१ ॥ तब महाक्रूर परशुरामकूं देखके राजाको बडा त्रास भया ॥ १८२ ॥ अपने धनुष बाण त्यागकिये और भागने लगा ॥ १८३ ॥ तब परशुरामने एक बाण हृदयमें मारा सो कंठ भेदकरके बाहर निकलगया ॥ १८४ ॥ रत्नसेन राजा मृत्युको पाया । उसकूं देखके राम दूसरे वनमें चलेगये ॥ १८५ ॥ दूसरे क्षत्रियोंकूं मारनेके वास्ते गंगातीरकूं गये फिर राजाकी पांच स्त्रियां जो थीं ॥ ॥ १८६ ॥ सो पुत्रोंकूं कहनेलगीं कि हे पुत्रो ? तुम्हारा पिता कहां गया ? क्या आश्रमके बाहर गया उनको बडी देर भई । अभीतक आश्रममें आये नहीं ॥ १८७ ॥ इसवास्ते ऋषियोंके पुत्रोंकूं लेकेवनांतरमें जायके पिताकूं ले आवो भोजनका वखत टलगया ॥ १८८ ॥ ऐसा माका वचन सुनके वे सब राजपुत्र ऋषिपुत्रोंको साथ लेक सरस्वतीके तट ऊपर देखनेको आये ॥ १८९ ॥ सो सब तट देखे परंतु राजाका शोध लगा नहीं ॥ तब दुःखी होके पीछे फिरनेलगे । इतनेमें राजाका देह मृत पडा देखा ॥ १९० ॥ तब हाहाकार करनेलगे । अपने आश्रममें आयके वृत्तांत कहा सो सबोंने श्रवणकरते

नृपमृतिं यदा ॥ १९१ ॥ तदा सर्वाः प्रजग्मुर्वै यत्र राज्ञो मृतं वपुः ॥ रुरुदुः सुस्वरं तत्र विलेपुस्ताः क्षणंक्षणम् ॥ १९२ ॥ ऋषिणा तस्य बाणस्य शल्यं कंठान्तरात्ततः ॥ निष्कासितं सपुंखं च चित्यां देहमथाकरोत् ॥ १९३ ॥ तदा राज्ञः स्त्रियः सर्वास्त्यक्त्वा मायां सुदुस्त्यजाम् ॥ आरोप्य पुत्रानृषिवर्यस्य चांके चितामथारोपयदद्रिसानुनि ॥ १९४ ॥ स्नात्वा सरस्वतीतोये पंच ताश्चारुलोचनाः ॥ रुरुदुस्ताश्चितायां वै पतिलोकं समाययुः ॥ १९५ ॥ सांपरायं तदा कर्म कृत्वा तेपि वनांतरात् ॥ आगताः स्वाश्रमे सर्वे दुःखेन महतावृताः ॥ १९६ ॥ मातृपितृविहीनाश्च हतराज्या वनांतरे ॥ अतो वै क्षत्रिपुत्राश्च रक्षणीयाः प्रयत्नतः ॥ १९७ ॥ इत्थं विचार्याथ च राजपुत्रानुवाच वाक्यं शरणे कृपापरः ॥ मामेव मातापितरौ विचार्यतां विधाय कामाश्च सुखेन तिष्ठताम् ॥ १९८॥ ततस्ते जयसेनाद्याः पंच पुत्रास्तदाश्रमे ॥ विहरंति सुखेनैव पक्कमूलफलाशिनः ॥ १९९ ॥ एतस्मिन्नंतरे काले भार्गवः क्षत्रियांतकः ॥ आगतोऽथ दधीचिं च द्रष्टुं

पांचों स्त्रियां ऋषिबालक यह सब ॥ १९२ ॥ जहां राजाका देह मृतहोके पडाथा, वहां आये स्त्रियां विलाप करने लगीं ॥ १९२ ॥ ऋषिने राजाके कंठमेसे बाण निकालके चिताके ऊपर देहकूं स्थापन किया ॥ १९३ ॥ तब पांचों स्त्रियोंने कोईसे त्याग न होवे ऐसी संसारमायाकूं त्यागकरके अपने पुत्र सारस्वत दधीचकूं सौंप करके ॥ १९४ ॥ सरस्वतीके जलमें स्नान करके सर्वोने पतिकी चितामें प्रवेश किया अंदर जायके बैठीं और पतिलोकमें गईं ॥ १९५ ॥ फिर ऋषि पुत्रोंके हाथसे सर्वोकी उत्तरक्रिया करवायके महादुःखी होयके पुनः अपने आश्रममें आयके ॥ १९६ ॥ विचार करने लगे कि इन बालकोंके मातापिता नहीं हैं और राज्यादिक नहीं है इसवास्ते इनोंका रक्षण करना अवश्य है ॥ १९७ ॥ ऐसा विचार करके राजपुत्रोंकूं कहने लगे कि मेरेकूं तुम माता पिता जानके क्रीडा करो सुखसे रहो ॥ १९८ ॥ फिर वो जयसेनादिक पाचों पुत्र कंदमूल फल भक्षण करके आनंदसे ऋषिके आश्रममें निवास करते भये ॥ १९९ ॥ पीछे थोडेक कालमें परशुराम सारस्वत दधीच ऋषिकूं देखनेके वास्ते उनके आश्रममें

तस्याश्रमं पुनः ॥ २०० ॥ दधीचिः पूजयामास रामं स्वाश्रममागतम् ॥ उवाच श्लक्ष्णया वाचा कस्मादत्र तवागमः ॥ ॥ २०१ ॥ ॥ राम उवाच ॥ ॥ भगवन् क्षत्रियांताय विचराम महीतलम् ॥ एवं वदति रामे तु दृष्टास्ते नृपतेः सुताः ॥ ॥ २०२ ॥ कस्येमे पुत्रकास्तात सत्यं ब्रूहि ममाग्रतः ॥ रामस्य वचनात्पूर्वं दधीचिर्वाक्यमब्रवीत् ॥ २०३ ॥ सत्यं वच्मि परं राम ऋषिपुत्राः परंतप ॥ एवं ऋषिवचः श्रुत्वा रामो वचनमब्रवीत् ॥ २०४ ॥ ब्राह्मणस्य इमे पुत्रा न संति तव मंदिरे॥ ब्राह्मणानां परं रूपं भिन्नं क्षत्रकुलस्य च ॥ २०५ ॥ इमे पुत्राः क्षत्रियाणां संति त्वत्रैव गोपिताः ॥ मारयिष्ये न संदेहःपश्यतस्तव भूसुर ॥ २०६ ॥ इत्थं रामवचः क्रूरं श्रुत्वा स ऋषिसत्तमः ॥ उवाच वचनं राम सत्यंसत्यं तु विप्रजाः ॥ २०७ ॥ परीक्षस्व भृगुश्रेष्ठगायत्र्या वेदरूपया ॥ वेदैः सांगोपनिषदैर्योगैः सांख्यैस्तथैव च ॥ २०८ ॥ इत्थं ऋषिवचः श्रुत्वा स तदा भृगुनन्दनः ॥ परीक्षिष्याम्यहं पश्चात्कृत्वा माध्याह्निकीं क्रियाम् ॥ २०९ ॥ एतावदुक्त्वा विरराम रामः कोदंडपाणिः कृतवल्कलांबरः ॥ जगाम कर्तुं सकलं च कर्म स प्राप तीरं स्वज

आये ॥२००॥ उनकूं देखके दधीचिने रामकी पूजा करके कहा कि आपका आगमन काहेके वास्ते हुआ ॥२०१॥ तब परशुराम कहतेहैं हे ऋषि ! क्षत्रियोंका नाश करनेके वास्ते फिरताहूं इतनेमें वो राजपुत्रोंकूं देखके कहा ॥२०२॥ यह पुत्र किसके हैं सो सत्य मेरे सामने कहो तब ऋषि कहते हैं कि॥२०३॥हे राम ! मैं सत्य कहताहूं ऋषिपुत्र हैं ॥२०४॥ तब परशुरामनें कहा ब्राह्मणके पुत्र तुम्हारे मंदिरमें नहीं हैं । ब्राह्मणका और क्षत्रियका रूप जुदा रहताहै ॥२०५॥ यह क्षत्रियपुत्र हैं तुमने गुप्त राखेहैंइसवास्ते तुम्हारे सामने मारूंगा संदेह नहींहै।ऐसा परशुरामका क्रूरवचन सुनते ऋषिने कहाहे राम!यह ब्राह्मणपुत्र हैं मैं सत्य २ कहताहूं॥२०६॥२०७॥वेदअंग सांख्य उपनिषद गायत्री इनोंसे परीक्षा करो ॥२०८॥ तब रामने कहा अच्छी बात है मध्याह्न संध्या करके आताहूं पीछे परीक्षा करताहूं॥२०९॥ऐसा कहके सरस्वती

जातनद्याः ॥ २१० ॥ कृत्वा माध्याह्निकं रामो यावद्गच्छति चाश्रमे ॥ तावद्दधीचिस्तेषां तु कंठे सूत्रं स्वकं ददौ ॥२११॥ तेषां च मस्तके हस्तौ दत्त्वा वाक्यमथाब्रवीत् ॥ ऋषिरुवाच ॥ ॥ राजेन्द्रपुत्राः शृणुत मद्वाक्यं भावगर्भकम् ॥ ॥२१२॥ निर्भयं भार्गवस्याग्रे वदतां वेदसंततिम् ॥ वेद उच्चारिते पश्चाद्रामान्मृत्युभयं न हि ॥ २१३ ॥ वेदाञ्श्रुत्वा परं रामः किंकर्ता तन्नवेद्म्यहम् ॥ यावद्दधीचिना प्रोक्तं तावद्रामो प्यगात्पुनः ॥२१४॥ बुभुजे परमान्नं वै तृप्तः प्रोवाच तान्प्रति ॥ ॥ राम उवाच ॥ यूयं यदि क्षत्रियजा वधिष्यामि न संशयः ॥ २१५ ॥ यदि चेद्ब्रह्मजाताश्च वेद उच्चार्यतां खलु ॥ तस्येत्थं वचनंश्रुत्वा जयसेनपुरःसराः ॥ २१६ ॥ सांगं वेदं ततोचुस्ते सांख्ययोगेन संयुतम् ॥ गृहीत्वा तुपरीक्षां तां वेदपरायणे पराम् ॥२१७॥ ऋषिं प्रोवाच रामोसौ इमे वेदपरायणाः ॥ ब्राह्मणाः खलु विप्रर्षे मम संदेहकारकाः ॥ ॥२१८॥ भवता एकपात्रे च एकेन सहितं यदा ॥ भोजनं च

के तट ऊपर संध्या करनेकूं गये ॥ २१० ॥ अब संध्या करके जबतक आते हैं इतनेमें दधीच ऋषिने उन्होंके कंठमें अपना यज्ञोपवीत पहनाया ॥ २११ ॥ और उनोंके मस्तकके ऊपर हाथ रखके कहा हे राजपुत्रो ! मेरा वचन सुनो ॥ २१२ ॥ तुम परशुरामजीके सामने निर्भय होके वेदपाठ करो तो तुमकूं उनसेमृत्यु होनेका नहीं ॥ २१३ ॥ तुम्हारे मुखसे वेद श्रवण करके पीछे क्या करेंगे सो जानता नहीं ऐसा दधीचि बोल रहे हैं इतनेमें परशुराम आये ॥ २१४ ॥ भोजन करे बाद पुत्रोंकूं कहने लगे तुम जो क्षत्रिय पुत्र हो तो तुमकूं मारूंगा संशय नहीं है ॥ २१५ ॥ और जो ब्राह्मण पुत्र हो तो वेदका उच्चारण करो तब जयसेन आदि पांचों पुत्र ॥ २१६ वेद अंग सांख्य सब पठन करगये वेदपारायण बरोबर किया सो सब परीक्षा लेके ॥ २१७ ॥ परशुराम कहते हैं हे दधीच ! यह ब्राह्मण हैं निश्चय करके परन्तु संदेहकारक हैं ॥ २१८ ॥ इसवास्ते एकपात्रमें तुम इनके साथ भोजन करोगे तो मेरा संशय दूर होवेगा ॥ २१९ ॥ तब ऋषिने तथास्तु ब्राह्म-

प्रकर्तव्यं शंका ममगमिष्यति॥२१९॥एतद्रामवचः श्रुत्वा शर
णागतवत्सलः ॥ सारस्वतदधीचिश्च तं तथेत्यवदत्पुनः २२०॥
भगवन् ब्राह्मणार्थे च भुनज्मि सहितं च तैः ॥ एतावदुक्त्वा
वचनं आनीय कदलीदलम् ॥२२१॥ अंगुष्ठेनांतरे रेखां कृत्वा
ह्यवधिकारिणीम् ॥ अंतरान्नं गृहीत्वा च अंतरेण च तैः सह ॥
॥२२२॥ अंतरांतरतस्तैश्च साकमादन्महाऋषिः ॥ आश्चर्यं
परमं दृष्ट्वा रामो वचनमब्रवीत् ॥ २२३ ॥ राम उवाच ॥
भगवन् ज्ञातसर्वार्थं ब्राह्मणानां कुलं खलु ॥ किं नाम ज्येष्ठ-
पुत्रस्य वद विष्णुजजासुत ॥ २२४ ॥ नाम्नि ज्ञाते मया पश्चा
त्स्वीकारं छात्रसंभवम् ॥ सरहस्यं धनुर्वेदं कथयिष्ये न
संशयः ॥ २२५ ॥ एतद्वचनमाकर्ण्य प्रोवाच ऋषिपुंगवः ॥
ज्येष्ठोयं जयरामाख्यः शिष्योपकरणे शुभः ॥२२६॥ तं गृही-
त्वाशुगच्छ त्वं यदिच्छसि तथाकुरु ॥ एवं रामेणतद्वाक्यमा-
कर्ण्य सहसोत्थितः ॥२२७॥ गृहीत्वा जयशर्माणं गंडक्यां
पुनरापतत्॥इत्थं गते वै भृगुराज पुत्रो राजन्यपुत्रे जयसेनके
गते ॥२२८॥ शोकाकुलास्ते चतुरोपि वंधवः स्थितास्तथा वै
ऋषिसन्निवासे ॥ उवास कतिवर्षाणि गंडक्यां वै भृगूद्वहः ॥

णके वास्ते भोजन करता हूं ऐसा कहके एक केलीका पत्ता मंगायके ॥ २२० ॥
॥२२१॥ अंगुष्ठसे पात्रमें ब्राह्मणक्षत्रियकी मर्यादारूपी अंतररेखा करके वो पुत्रोंके
साथ भोजन किया ॥ २२२ ॥ वो अत्यंत आश्चर्य देखके परशुराम कहते हैं
॥ २२३ ॥ हे भगवन् ऋषे ! सब सत्य मैंने जाना ये ब्राह्मणकुल हैं इसवास्ते
सबसे बडे पुत्रका नाम क्या है सो कहो ॥२२४॥ नाम मालूम पडे बाद शिष्यरूपसे
मैं पास रखके रहस्ययुक्त धनुर्वेद पठन करावूंगा ॥ २२५ ॥ ऐसा परशुरामका वचन
सुनके दधीच कहतेहैं हे राम!यह बडा जयरामनामक बालक है सो आपके शिष्यत्वके
योग्यहै ॥ २२६ ॥ इसकूं लेके जाव और जैसी इच्छा होवे वैसा करो ऐसा ऋषिका
वचन सुनके ॥ २२७ ॥ परशुराम वो जयशर्माकूं लेके गंडकी नदी ऊपर जातेभये
जय सेनके गये पीछे चारों भाई शोकव्याप्त होयके रहे ॥२२८॥ अब परशुरामने शि-

स्वशिष्यं जयशर्माणं परीक्षन्गुरुशिक्षया ॥ २२९ ॥
एवं द्वादशवर्षाणि शुश्रूषा तु कृता यदा ॥ तदा त्वसौ प्रस-
न्नात्मा उवाच नृपनंदनम् ॥ २३० ॥ ॥ राम उवाच ॥
जयसेन भवान् सत्यं शिष्याणां परमो वरः ॥ अतस्त्वामु-
पदेक्ष्यामि अस्त्रविद्यां महामते ॥ २३१ ॥ स्नानं कुरु महा-
भाग गंडक्यां शुद्धभावनः ॥ एवं रामवचः श्रुत्वा स्नात्वासौ
भक्तिकारणात् ॥ २३२ ॥ आगतस्तत्समीपे च गृहीत्वा तु
समित्कुशान् ॥ राम उवाच ॥ ॥ त्वत्सेवया प्रसन्नोहं
दास्ये विद्यां यथोचिताम् ॥ २३३ ॥ वेदाश्च सर्वे पठिता-
स्त्वया यथा बाल्ये दधीचेः खलु चाश्रमे शुभे ॥ तथा धनु-
र्वेदमतोऽविषह्यं गृहीष्व सर्वं मम शक्तिगौरवात् ॥ २३४ ॥
ऋषीणामुभयं कृत्यं शापादपिशरादपि अग्रतश्चतुरो वेदाः
पृष्ठतः सशरं धनुः ॥ २३५ ॥ अतस्त्वां कथयिष्यामीत्युक्त्वा
तां प्रददौ हरिः ॥ सर्वशस्त्रास्त्रविद्या वै जग्राह स तदाज्ञया ॥
॥ २३६ ॥ शस्त्राण्यमोघवीर्याणि दत्त्वा रामोप्यनुग्रहात् ॥

ष्यकी परीक्षा करनेके वास्ते वो गंडकी ऊपर कईक बरस निवास किया ॥ २२९ ॥ सो बारह बरसतक जयशर्माकी गुरुशुश्रूषा देखके प्रसन्न होयके परशुराम कहते हैं ॥ ॥२३०॥ हे जयशर्मा ! तू सब शिष्योंमें बडा श्रेष्ठ है इसवास्ते तेरेकूं मैं अस्त्रविद्याका उपदेश करता हूं ॥ २३१ ॥ शुद्ध अंतःकरणसे गंडकी नदीमें स्नानकर । ऐसा रामका वचन सुनके भक्तिसे स्नान करके ॥ २३२ ॥ शमी दर्भ हाथमें लेके रामके पास आयके खडा रहा तब राम कहते हैं हे जयशर्म्मा ! तेरी सेवासे मैं प्रसन्न हुवा हूं ॥२३६॥ और सब वेद तो पहिले दधीचिके आश्रममें बाल अवस्थामें तुझने पाठ कियें हैं अब जो बडा धनुर्वेद है सो मेरी शक्तिसे ग्रहणकर ॥ २३४ ॥ कारण ऋषिके दोनों कृत्य हैं अपराधीकूं शापदेके दंड देवे अगर बाणसे शिक्षा करे आगे चारोंवेद और पीछे जिनके धनुर्बाण ऐसे ब्राह्मण प्रतापी हैं ॥ २३५ ॥ इस वास्ते तेरेकूं धनुर्विद्या कहता हूं ऐसा कहके विद्या दियी जयशर्माने रामकी आज्ञासे सब विद्या ग्रहण करी ॥ २३६ ॥ बडे पराक्रमी बाणभी देके पीछे

गृहीत्वा जयशर्माणं प्रभासं पुनरागमत् ॥ २३७ ॥ स्थितः सरस्वतीतीरे मध्याह्ने घर्मपीडितः ॥ उवाच जयशर्माणं निद्रया पीडितो हरिः ॥ २३८ ॥ राम उवाच ॥ सरस्वत्यास्तटे शीते उत्संगे च तवोत्तमे ॥ स्वपामि घर्मजां पीडां शमयामि मतिर्मम ॥ २३९ ॥ सधनुष्कोथ सशरो मम हस्तो निषेव्यताम् ॥ ममनिद्राविभंगं तु मा कुरुष्व ममाज्ञया ॥ ॥२४०॥ निद्राभंगकरो यस्तु स वध्यो नात्र संशयः ॥ रामोक्तं स तदाकर्ण्य तथेत्योमिति तद्वचः ॥ २४१ ॥ प्रतिगृह्य तटे गत्वा रामो निद्रावशं ययौ ॥ उत्संगे च शिरः कृत्वा दत्त्वा च सशरं धनुः ॥ २४२ ॥ रामोप्यतितरां प्राप्तः सुषुप्तिं कोष्णपीडितः ॥ रामे निद्रावशं प्राप्ते जयसेनश्च स्वात्मनि ॥ २४३॥ विचारयामास तदा विद्यायाश्च परीक्षणम् ॥ भावयित्वा तदा राजा विधिना सुविमोहितः ॥२४४॥ शस्त्रास्त्रं प्रकटीकृत्यबाणं धनुषि संदधे ॥ संधायमाने शस्त्रे च ब्राह्मे शैवे सवैष्णवे २४५॥ इन्द्रादयो भयोद्विग्नाश्चितामापुर्दुरत्ययाम् ॥ देवर्षिस्तत्र चागत्य वृत्तान्तं जयशर्मणः ॥ २४६ ॥ इंद्राय कथयामास

जयशर्माकूं लेके प्रभास क्षेत्रमें आये ॥ २३७ ॥ सरस्वती नदीके तट ऊपर बैठे मध्याह्नकालके सूर्य किरणके तापसे पीडित भये तब परशुराम जयशर्माकूं कहने लगे ॥२३८॥ हे शिष्य ! छायाकी जगहमें तेरे उत्संग ऊपर मस्तम रखके निद्रा करता हूं बहुत ताप होरहा है तो शांत होवेगा ॥२३९॥ धनुषमें बाण करके सज्ज होके बैठ मेरी निद्राभंग करो मत ॥२४०॥ जो कोई मेरी निद्राभंग करेगा वो हमारे हाथसे मरण पावेगा ऐसा रामका वचन सुनते तथास्तु कहके ॥ २४१ ॥ वचन स्वीकार किया सरस्वतीके शीतलतट ऊपर जायके अपने धनुर्बाण शिष्यकूं देके उत्संगके ऊपर मस्तक रखके निद्रावश भये ॥ २४२ ॥ परशुरामकूं जब बहुत निद्रा आई तब जयसेन मनमें विचार करने लगा कि धनुर्विद्याकी परीक्षा करना ऐसा मनमें लाया होनहार भविष्य बलवान् है उसके लिये ॥ २४३ ॥ २४४ ॥ शस्त्रास्त्र प्रकट करके ब्रह्मास्त्र शैवास्त्र वैष्णवास्त्र तीनों धनुषके ऊपर चढाये ॥ २४५ ॥ तब इन्द्रादिक देवता उस तापसे बडे व्याकुल भये चिंता करने लगे इतनेमें नारदजी वहां आयके जयशर्म्माका वृत्तांत ॥ २४६ ॥ आद्यंत इंद्रकूं कहा इन्द्र

चोत्पत्त्याद्यन्तपूर्वकम्॥नारदात्तत्प्रभावं वै श्रुत्वा देवान् वचोऽब्रवीत् ॥ २४७ ॥ इंद्र उवाच ॥ ॥ क्षत्रवंशसमुद्भूतो विप्रवेषेण गोपितः ॥ परशुरामस्य कृपया मन्यते तृणवज्जगत् ॥ २४८ ॥ गुरुभक्तिपरो नित्यं तस्य विघ्नं कथं भवेत् ॥ एवं विचार्य मनसि किं कर्तव्यं क्षणांतरे ॥ २४९ ॥ अस्त्रशस्त्रौघहानिः स्यान्निद्राभङ्गश्च भार्गवे ॥ रामे तु जागृते चैव ज्ञाते क्षत्रियनंदनम् ॥ २५० ॥ वधिष्यति न संदेह इति मद्भावितं भवेत्॥इत्थं विचार्य इंद्रोऽपि गतो रामस्य सन्निधिम् ॥२५१॥ भ्रामरं रूपमास्थाय धरित्र्यां प्रविवेश ह ॥ येन केन प्रकारेण रामो निद्रां परित्यजेत् ॥ २५२ ॥ उत्संगं जयसेनस्य दष्टं चातिविषाग्निना ॥ दष्टोत्संगे तदा धैर्यान्न चचाल तदा नृपः ॥२५३ ॥ केनचिज्जंतुना चैव उत्संगो दंशितो मम ॥ मयि चेच्चलिते जाते निद्राभंगो भविष्यति ॥ २५४ ॥ एवं कृत्वा महाबाहुर्निश्चलोऽथ जडाकृतिः ॥ स्थितश्चास्त्राणि त्यक्त्वाशु वेदनामभजत्तदा ॥२५५॥ भ्रमरश्च तदोत्संगं भित्त्वा च रुधिराप्लुतम्॥भार्गवस्य च कर्णोपि दष्टः स च तदा लघुः॥२५६॥

जयशर्म्माका प्रताप सुनके देवतावोंकूं कहताहै ॥ २४७ ॥ अहोदेव हो क्षत्रियकुलमें उत्पन्न होके ब्राह्मणके वेशसे गुप्त होके रहाहै और परशुरामकी कृपासे सब जगतकूं तृणसरीखा गिनता है ॥ २४८ ॥ गुरुकी सेवामें तत्पर रहताहै इसकूं विघ्न कैसा होवेगा अपने क्या उपाय करना ॥ २४९ ॥ जो परशुरामकी निद्रा भंग होवे तो शस्त्रास्त्रका नाश होवेगा और इसकूं क्षात्रियपुत्र जानेंगे ॥ २५० ॥ तो तत्काल मारेंगे तो अपना काम होवेगा ऐसा विचार करके इंद्रभी परशुरामके नजदीक गया ॥ २५१॥ भ्रमरेका रूप लेके पृथ्वीमें प्रवेश करके परशुराम जैसे जागे वैसा॥२५२॥ जयसेनके उत्संगकूं बडे विषसे दंशलिया तब जयसेनने दुःख तो बहुत किया परंतु धैर्य रखके चंचल नहीं भया ॥ २५३ ॥ कोई कीडा मेरेकूं काटताहै मैं चलायमान हुवा तो गुरुकी निद्रा भंग होवेगी ॥ २५४ ॥ ऐसा जानके शस्त्रास्त्रकूं त्याग करके रहा ॥ २५५ ॥ भ्रमरने जयसेनके उत्संगकूं दंशकरके रुधिरकी धारा चलरही है

तेनोत्थितस्तदा रामोऽप्यसहन्कर्णपीवरम् ॥ राममुत्थितमालोक्य स्वर्पतिः स्वर्गमास्थितः ॥ २५७ ॥ हृष्टं तत्क्षत्रियेंद्रस्य गुरुजागृतिरूपकम् ॥ महत्कर्मेदमुद्भूतं शापदोषो भविष्यति॥२५८॥रामोऽपि जयशर्माणमुवाच ललितं वचः॥ ॥ राम उवाच ॥ ॥ केन मे कर्णपीडा च निद्रात्यागश्च केन च ॥ २५९ ॥ कृतस्तद्वद भो विप्र नो चेच्छापं ददामि ते ॥ इति रामवचः श्रुत्वा जयशर्मा द्विजाकृतिः ॥ २६० ॥ उवाच वचनं सत्यं रामायामिततेजसे ॥ ॥ जयसेन उवाच ॥ ॥ स्वामिनिद्रावसाने तु मया तु विकृतः कृतः ॥ २६१ ॥ अस्त्रविद्या मया त्यक्ता लोकलोकाहले परा ॥ तदाहमुत्संगतल दष्टः केन विषाग्निना ॥ २६२ ॥ तेनैव स्फोटितोत्संगोगतं च रुधिरं बहु ॥ ममोत्संगाग्निना कर्णे पीडा जाता तव प्रभो ॥२६३॥ तेन त्वया त्याजिता च निद्रा मे त्वं क्षमाकुरु॥ इति तस्य वचः श्रुत्वा विलोक्य रुधिरं बहु ॥ २६४ ॥ धैर्यं तस्य च तज्ज्ञात्वा नायं विप्रोहि मन्यते ॥ यथा विप्रस्य रुधिरं न तथा क्षत्रियस्य च ॥२६५॥ विप्रस्य रुधिरं शीत-

पीछे थोडाक रामके कर्णकूं काट खडा रह्या ॥ २५७ ॥ और कहने लगा कि गुरु जागृत हुवेहैं अच्छा हुवा अब शाप होवेगा ॥ २५८ ॥ रामभी जागृत होके जयशर्मांकूं कहतेहैं हे शिष्य ! मेरे कानकूं पीडा और निद्राभंग किसने किया सो कह ॥ २५९ ॥ नहीं तो शाप देऊंगा ऐसा रामका वचन सुनते जयशर्मा कहताहै हे स्वामिन् आपको निद्रा आई उस बखत एक विचार मैंने किया ॥ २६० ॥ १६१ ॥ अस्त्रविद्या मैंने छोडी तब लोकमें बडी गडबड होनेलगी इतनेमें कोई जंतुने मेरे उत्संगकूं नीचेसे दंश किया ॥ २६२ ॥ उसमें मेरा उत्संग फूटा रुधिर बहुत गया वो उत्संगकी गरमीसे आपके कर्णकूं पीडा हुई होवेगी ॥ २६३ ॥ उससे आपने निद्रा त्याग किये मेरा अपराध क्षमा करो ऐसा जयशर्म्माका वचन सुनके और रुधिरस्राव भी बहुत हुवाहै सो देखके ॥ २६४ ॥ उसका धैर्य देखके मनमें विचारकिया कि यह ब्राह्मण नहीं दीखता जैसा ब्राह्मणका रुधिर रहताहै वैसा क्षत्रियका नहीं है ॥ २६५ ॥ ब्राह्मणका रुधिर शीतल रहताहै

मुष्णं क्षत्रकुलस्य च ॥ रक्तं रक्तात्परं धैर्यं को विप्रो धैर्यवा-
न्भवेत् ॥ २६६ ॥ इत्थं विचार्य तज्ज्ञात्वा प्रोवाच जयसेन-
कम् ॥ ॥ राम उवाच ॥ ॥ कस्त्वं क्षत्रियदायाद निद्राभं-
गस्त्वयाकृतः ॥ २६७ ॥ धैर्येण महता त्वं हि ह्यशस्त्रौ तान्
युनक्षि च ॥ ममाज्ञामथ चोल्लंघ्य कृतं कर्म महत्तरम्
॥ २६८ ॥ वद सत्यं तु विप्रो वा क्षत्रियो वा कथं वद ॥ एत-
द्रामवचः श्रुत्वा सशरो जातवेपथुः ॥ २६९ ॥ उवाच रामं
शरणे सर्वं त्वं वेत्सि भार्गव ॥ मारणे तारणे दक्षस्त्वदधीनो-
स्म्यहं मुने ॥ २७० ॥ ब्राह्मणत्वं दधीचेश्च क्षत्रियो विषया-
त्तव ॥ ब्रह्मक्षत्रोस्म्यहं जातो यथेच्छसि तथा कुरु ॥ २७१ ॥
एवं रामेण तद्वाक्यं श्रुतं तद्धैर्यमादरात् ॥ ज्ञातोऽयं क्षत्रियः
शुभ्रो मारयेऽहं सुतं यदि ॥ २७२ ॥ तर्हि येनापि वेदाश्च
अधीता ब्राह्मणो भवेत् ॥ हनने ब्रह्महत्यास्याद्रक्षणे चाप्रति-
ज्ञता ॥ २७३ ॥ कर्तव्यं चोभयं तत्र भवेल्लोके विपूज्यता ॥

क्षत्रियका उष्ण रहता है इसवास्ते एकतो इसका रुधिर उष्ण दूसरा धैर्य इसवास्ते यह ब्राह्मण न होवे ॥२६५॥ ऐसा जानके राम कहते हैं अरे तू कौन क्षात्रियपुत्र है मेरा निद्राभंग किया ॥ २६७ ॥ धैर्य तेरा बडा है और शस्त्रविना शस्त्रविद्या चलाई मेरी आज्ञा उल्लंघन करी बडा महत्कर्म किया ॥२६८॥ इसवास्ते तू ब्राह्मण है सो सत्य बोल । ऐसा रामका वचन सुनते कंपायमान होयके ॥२६९॥ कहने लगा हे राम ! तुम सब जानते हो तुम्हारे शरण आयाहूं तुम मारो या तारो तुम्हारे आधीन हूं ॥ २७० ॥ दधीचिसे ब्राह्मण हूं और तुम्हारे उपदेशकर्मसे क्षत्रिय भया इसवास्ते मैं ब्रह्मक्षत्र भया आगे तुम्हारी इच्छामें आवे वैसा करो ॥ २७१ ॥ ऐसा जयशर्माका वचन सुनके रामने जान लिया कि यह क्षत्रियबालक है ॥ २७२ ॥ जो कभी इसकूं मारताहूं तो वेदशास्त्राध्ययन किया है ब्राह्मण हुवा मारनेसे ब्रह्महत्या होवेगी और जो रक्षण करताहूं तो मेरी प्रतिज्ञा भंग होती है ॥ २७३ ॥ दोनों वात कैसे होवे मेरेसे इसकूं अस्त्रविद्याप्राप्त भई है सो मरेगा क्या मरनेका नहीं ॥२७४॥

मत्तः प्राप्तास्त्रविवरो मृत्युं किं प्राप्नुतेधुना ॥२७४॥ शस्त्रास्त्र-
विफले शापो दीयतां मा विलंबितम् ॥ राम उवाच ॥ गुप्तो
ज्ञातिवधेनैव मृत्युभीतो द्विजोऽभवत् ॥ २७५ ॥ मारये तर्हि
दासस्त्वं शृणु त्वं शापकारणम् ॥ मत्तः प्राप्तास्त्रविद्या या
निष्फलास्ता भवंति ते ॥ २७६ ॥ ब्रह्मक्षत्रियनाम्ना हि विच-
रस्व यथासुखम् ॥ इति रामस्य तच्छापं श्रुत्वा च जयसेनकः
॥ २७७ ॥ ननाम चरणौ तस्य प्रार्थयामास दुःखितः ॥
तव सेवाफलं राम किं मां दुःखतरं भवेत् ॥ २७८ ॥ ममास्त्र-
विद्यानाशे च देहनाशं करोम्यहम् ॥ किं जीविते क्षत्रियाणा-
मतस्त्वं जहि माद्रुतम् ॥ २७९ ॥ राम उवाच ॥ माभैषीर्भूप
सहसा कथंचिन्मच्छापरूपं विफलं न तद्भवेत् ॥ अहं हि
यास्यामि महेंद्रपर्वते त्वं पृच्छतामाशु ऋषिं दधीचिम् ॥
॥ २८० ॥ सारस्वतात्प्राप्तवेदोऽसि च त्वं मत्तः प्राप्तः शस्त्र-
विद्यासमूहम् ॥ जातो लोके ब्रह्मक्षत्रस्य मूलं दधीचिस्त्वां
वक्ष्यते मूलमंत्रम् ॥ २८१ ॥ इत्युक्त्वा च गते रामे जयसे-

इसवास्ते विद्या निष्फल हो ऐसा जलदी शाप दिया चाहिये।राम कहते हैं जयशर्मा ज्ञातिवधके निमित्तसे गुप्त रहा और प्रत्यक्ष मृत्युके भयके लिये ब्राह्मण भया॥२७५॥ जो अब तेरेकूं मारताहूं तो मेरा दास है इसवास्ते शाप देताहूं कि मेरे पास जितनी शस्त्रविद्या पढी सो निष्फल होवेगी ॥ २७६ ॥ और ब्रह्मक्षत्रिय नामसे जगतमें फिरो ऐसा रामका शाप सुनके जयसेन ॥ २७७ ॥ साष्टांग नमस्कार करके प्रार्थना करने लगा हे राम ! तुम्हारी सेवाका फल क्या दुःखरूप होवेगा ? ॥ २७८ ॥ मेरी अस्त्रविद्या जो नाश पाई तो मैं देहत्याग करूंगा क्षत्रियोंकूं अस्त्र विना जीना व्यर्थ है इसवास्ते मरकू भी मारो ॥२७९॥तब राम कहते हैं हे राजन् !तू भयभीत होवे मत मेरा शाप तो कुछ मिथ्या होवेगा नहीं इसवास्ते दधीचिके पास जाव॥२८०॥ इनसे तेरेकूं वेदविद्या प्राप्त भईहै और मेरेसे शस्त्रविद्याप्राप्तभई इसवास्ते लोकमें ब्रह्मक्षत्रजाति कर मूल तू भया है और दधीचि तेरेकूं मूलमंत्र कहेंगे ॥२८१॥ ऐसा कहके राम तो

नाथ गंडकीम् ॥ मर्त्तुकामोऽभ्यगात्तत्र गौतमस्तमथाब्रवीत् ॥ २८२ ॥ उत्तिष्ठ नृपशार्दूले गच्छ सारस्वतं प्रति ॥ स ते मनोगतां विद्यामुपदेक्ष्यति निश्चितम् ॥ २८३ ॥ तेन मंत्रप्रभावेण ब्रह्मक्षत्राह्वयं पदम् ॥ प्राप्स्यसि त्वं सदा लोके बंधुना सहितः परः ॥ १८४ ॥ एतावदुक्त्वा वचनं गृहीत्वा तं करेण च ॥ गौतमस्तु दधीचिश्च प्राप्तवान् ऋषिसंसदि ॥ २८५ ॥ स गौतमं नृपं दृष्ट्वा दधीचिर्वाक्यमब्रवीत् ॥ कच्चित्ते नाम सुस्वस्ति चिराद्दृष्टोऽसि पुत्रक ॥ २८६ ॥ मुखकांत्या तवैवात्र दुर्मना इव लक्ष्यसे ॥ २८७ ॥ श्रुत्वा दधीचेर्वचनं स राजा दुःखेन युक्तो वचनं च सादरम् ॥ उवाच शापं भृगुवंशकेतोर्वनांतरे यत्कृतकर्मगर्ह्यम् ॥ २८८ ॥ एतस्मिन्नंतरे काले बंधवः समुपागताः ॥ ऋषीणां पश्यतां तत्र प्रोवाच मधुरं वचः ॥ भ्रातृणां पश्यतां चापि दधीचिं ऋषिसत्तमम् ॥ २८९ ॥ जयसेन उवाच ॥ किं जीवितं क्षत्रियाणां बंधूनां परिशोचताम् ॥ भार्गवात्प्राप्तविद्योहं तस्माच्छापमवाप्तवान् ॥ २९० ॥ अतो ब्रह्मसुतातीरे

महेंद्रपर्वतके ऊपर चलेगये और जयसेन देहत्याग करनेके वास्ते गंडकी नदी ऊपर आया तब गौतम ऋषि कहतेहैं ॥२८१॥ अरे हे नृप! काहेके वास्ते देहत्याग करता है सारस्वतदधीचके पास जावो तेरे मनकी इच्छा पूर्ण करेंगे उनके मंत्रप्रतापसे तेरे बंधु सहवर्तमान जगत्में ब्रह्मक्षात्रिय पदवीकूं पावेगा ॥ ॥२८२–२८४॥ ऐसा कहके जयसेनका हाथ धरके गौतम ऋषि दधीचि ऋषिके पास आये ॥२८५॥ तब गौतम साहित जयसेनकूं देखके दधीच पूछते हैं हे जयसेन ! पुत्र तू कुशल तो है बहुत दिन गये बाद आज तेरेकूं देखा ॥ २८६ ॥ तू उदास काहेसे दीखताहै सो मेरेकूं कहो ॥ २८७ ॥ तब जयसेनने परशुरामका जो शाप भया वो सब वृत्तांत वर्णन किया इतनेमें चारों भाई आये ॥ २८८ ॥ चारों भाई अब सब ऋषि देखते हैं उनके सामने सारस्वतदधीचकूं मधुरतासे जयसेन कहताहै ॥२८९॥ हे ऋषि ! जिसके भाईबंद शोक करते होवें उसका जीना व्यर्थ है रामसे शस्त्रविद्या मिली फिर उन्होंकाही शाप हुवा ॥२९०॥ इसवास्ते सर-

प्राणांस्त्यक्ष्यामि निश्चितम् ॥ इति तद्वचनं श्रुत्वा दधीचिस्तमुवाच ह ॥२९१॥ शृणु त्वं मम वाक्यं हि माकार्षीःसाहसं च तत् ॥ पुरोहितमृषिं कंचित्कुरुष्व नृपनन्दन ॥२९२॥ पुरोहिते कृते पश्चाज्जपसिद्धिर्भविष्यति ॥ विना पुरोहितेनापि मंत्रसिद्धिर्न वै भवेत् ॥ २९३ ॥ पुरोहितः कथं भाव्यो वेत्ता भूतभविष्ययोः ॥ शापानुग्रहकारश्च स पुरोहित उच्यते ॥ २९४ ॥ अतस्त्वं त्वरया राजन् पुरोहितमुपाव्रज ॥ तदुक्तवचनं श्रुत्वा राजोवाच तदा ऋषिम् ॥२९५॥ एतत्तवैव सकलं तस्मात्त्वं मे गुरुर्भव ॥ त्वं पिता त्वं च जननी पालितःपोषितस्त्वया ॥२९६॥ त्वया चाध्यापिता वेदाः पौरोहित्यं कुरुष्व ह ॥ ॥ दधीचिरुवाच ॥ ॥ पौरोहित्यं क्षत्रियस्य तथा कर्तुं न शक्यते ॥२९७॥ यजमानस्य यत्पापं तत्पापं तु पुरोहिते ॥ यदि त्वदिच्छा स्याच्चेद्वै तर्ह्येकं शृणु मद्वचः ॥ ॥२९८॥ मद्वंशजो द्विजः कश्चित्त्वद्वंशः क्षत्रनंदनः ॥ तेन्योन्यं तु गुरुत्वेपि तथैव यजमानके ॥ २९९ ॥ कुर्वंति चेद्भिदा

स्वती नदीके किनारे निश्चय करके प्राणत्याग करताहूं ऐसा वचन सुनते दधीच कहते हैं ॥ २९२ ॥ हे जयसेन ! ऐसा साहस कर्म मत करो मेरा वचन श्रवणकर और एक पुरोहित कर ॥ २९२ ॥ पुरोहित करनेसे जपसिद्धि होवेगी गुरुविना मंत्रसिद्धि होती नहीं है ॥ २९३ ॥ पुरोहित कैसा चाहिये जो भूत भविष्य वर्तमानकालकूं जाने और शाप देनेकूं अनुग्रह करनेकूं जो समर्थ उसकूं पुरोहित करना ॥ २९४ ॥ इसवास्ते हे राजा ! अब जलदी तू पुरोहित कर तब राजा सारस्वतदधीचकूं कहते हैं ॥ २९५ ॥ हे ऋषि ! यह पौरोहित्य आपही करो मेरे गुरु हो माता पिता तुम हो पालन पोषण तुमने हमारा किया है ॥ २९६ ॥ वेद तुमने पढाया है इसवास्ते पौरोहित्य तुम्ही करो तब सारस्वतदधीच ऋषि कहते हैं हे नृप ! क्षत्रियका पौरोहित्य करना उत्तम नहीं है ॥२९७॥काहेसे कि यजमानका जो पाप वह पुरोहितकूं होताहै परंतु तेरी जो ऐसी इच्छा है सो मेरा एक वचन सुन॥२९८॥मेरे वंशका कोईभी ब्राह्मण और तेरे वंशका कोई भी क्षत्रिय तो परस्पर गुरु यजमानके भावसे रहना॥२९९॥और जो कभी भेद

भेदं ते वै निरयगामिनः ॥ तद्वंशब्रह्मक्षत्रो वा तथा सारस्वता-
द्व्रकः ॥ ३०० ॥ एकीकृत्य चरिष्यंति मद्वाक्यं नान्यथा
भवेत्॥सारस्वतस्य वंशस्य पदपूजापरो यदि ॥३०१॥ भवि-
ष्यति च राजेन्द्र करिष्यामि गुरुव्रतम् ॥ एतद्वाक्यं तदाकर्ण्य
हर्षेणोवाच तं नृपः॥३०२॥ त्वद्वाक्यमन्यथा कर्तुं कश्चिन्मद्वं-
शजो नृपः ॥ कर्म कुर्याद्विहाय त्वां तस्य वंशक्षयो भवेत् ॥
॥३०३॥ पातालः स्वर्गतां यातु पृथिवी जलरूपताम्॥शेषोऽपि
रज्जुतां यातु मद्वाक्यं नान्यथा भवेत् ॥३०४॥ अतस्त्वं मम
वंशे च भार्गवे ब्रह्मक्षत्रजे ॥ पौरोहित्यं सुखेनाशु कुरुष्व सुस-
माहितः ॥ ३०५ ॥ ॥ दधीचिरुवाच ॥ ॥ त्वद्वाक्यसत्येन
सुपूजितोऽहं मद्वाक्यसत्येन सुपूजितस्त्वम् ॥ अद्यैवमारभ्य
दिनानि यावत्पुरोहितोऽहं तव संप्रवृत्तः ॥ ३०६ ॥ त्वं राजन्
हिंगुलां दीक्षां गृह्णीष्व नृपनंदन ॥ महामंत्रं विना राजन् हिंगुले
दर्शनं न हि ॥३०७॥ भवतीति प्रयत्नेन उपोष्याराधनं कुरु ॥
इत्युक्त्वा तां ददौ विद्यां द्वात्रिंशदक्षरां च तान् ॥ ३०८ ॥ हिंगु-
लादीक्षामंत्रः ॥ ॐ हिंगुले परमहिंगुले अमृतरूपिणि तनुश-

रखेंगे तो नर्कवासी होवेंगे तेरे वंशके जो ब्रह्मक्षत्रिय और मेरे वंशके जो सारस्वत-
दधीच ॥ ३०० ॥ यह दोनों एक मिलकर रहना मेरे वचनकूं उल्लंघन करना नहीं
सारस्वत ब्राह्मणके पादपूजामें जो तत्पर रहैंगे तो मैं पौरोहित्य करताहूं ऐसा
ऋषिका वचन सुनते बडे हर्षसे जयसेन राजा कहता है हे ऋषि ! मेरे वंशका कोई
भी राजा तुम्हारे वंशस्थ पुरोहितकूं त्याग करके जो कर्म करेंगे तो उन्होंका वंश-
क्षय होवेगा ॥ ३०१–३०३ ॥ एकवखत न होनेकी बात होवे पातालस्वर्गमें
जायके बैठे पृथ्वी जलरूप होजावे शेष सूत्रतंतु सरीखा होजावे परन्तु मेरा वचन
कभी मिथ्या होनेका नहीं ॥ ३०४ ॥ इसवास्ते यह ब्रह्मक्षत्र जो भार्गववंश है
उसमें आप सुखसे पौरोहित्य करो ॥ ३०५ ॥ सारस्वतदधीच कहते हैं हे राजा !
तेरे सत्यवचनसे मैं पूजित हुवा और मेरे वाक्य सत्यसे तूं पूर्ण हुवा इसवास्ते
आजरोजसे कल्पांतपर्यंत तेरा पुरोहितभया ॥ ३०६ ॥ अब तू हिंगुलादेवीकी दीक्षा
लेवो महामन्त्र विना देवीके दर्शन होनेके नहीं ॥ ३०७ ॥ इसवास्ते उपोषण करके
मंत्राराधन कर ऐसा कहके बत्तीस अक्षरात्मक ॐ हिंगुले परमहिंगुले अमृतरूपि-

क्तिमनःशिवे श्रीहिंगुलायै नमः स्वाहा ॥ एवं तान् दीक्षितान् सर्वान् गृहीत्वा ऋषिसत्तमः ॥३०९॥ जगाम हिंगुलाक्षेत्रंदेवी- दर्शनकाम्यया ॥ ऋषिभिः सहितास्ते वै तेपुस्तत्रमहत्तपः ॥ ॥ ३१० ॥ एवं समाराधयतां द्वादशाब्दव्यतिक्रमात् ॥ परि- तुष्टा जगन्माता प्रत्यक्षं प्राह हिंगुला ॥३११॥ ॥ श्रीहिंगु- लोवाच ॥ ॥ प्रसन्नाहं शृणुध्वं वो वरान् कामपरायणान् ॥ ॥ जयसेन उवाच ॥ शस्त्रविद्या विनष्टा मे भार्गवस्य च शापतः ॥ ३१२ ॥ तस्मादंब कृपां कृत्वा शस्त्रास्त्राणि प्रदीय- ताम् ॥ ॥ देव्युवाच ॥ ॥ भार्गवस्य च शापो हि अन्यथा स कथं भवेत् ॥३१३॥ तथापि कथयिष्यामि हितं तव मही- पते ॥ नग्नो भव महीपाल बंधुभिः सहितः शुचिः ॥३१४॥ मुष्टिं बद्ध्वा पुष्पफलैः शरण्ये भगरूपके ॥ प्रविश्य च सुपुण्ये- न मद्भगे पूजनं कुरु ॥३१५॥ इदं भगं मत्स्वरूपं रामेण पूजितं पुरा ॥ मद्योनिगस्तु पुरुषो मातृयोनौ न गच्छति ॥ ३१६ ॥ एतस्माद्वर्षसाहस्रं बंधुभिः परिवारितः ॥ राज्यं कुरु महाराज नगरस्थानजं शुभम् ॥ ३१७ ॥ इमान् सारस्वतान् विप्रान्

णि तनुशक्तिमनःशिवे श्रीहिंगुलायै नमः स्वाहा यह मंत्रविद्याका उपदेश पांचों पुत्रोंकूं किया पीछे उन सबोंकूं लेके ऋषि ॥ ३०८ ॥ ३०९ ॥ हिंगुलाक्षेत्रमें आये सब तपश्चर्या करने लगे ॥ ३१० ॥ जब बारहबरस हुवे तब देवी प्रत्यक्ष होके कहने लगी ॥ ३११ ॥ हे क्षत्रिय ! मनेप्सित वरदान मांगो जयसेन कहता है हे देवी ! परशुरामके शापसे मेरी शस्त्रविद्या नष्ट होगई है ॥ ३१२ ॥ सो तुम कृपा- करके शस्त्रास्त्र देवो हिंगुला कहती है हे नृप ! परशुरामका शाप तो मिथ्या होनेका नहीं ॥ ३१३ ॥ तथापि तेरा हित कहती हूं सुन हे राजा ! तेरे बंधुसहव- र्तमान नग्न होयके पवित्रतासे ॥ ३१४ ॥ हाथमें फलपुष्पकी मुठी बांधके भगरूपी मेरे स्थानमें प्रवेश करके पूजा कर ॥ ३१५ ॥ यह भगस्थान मेरा स्वरूप है जो मेरी योनिमें आया उसकूं पुनर्जन्म होता नहीं ॥ ३१६ ॥ इस पूजाके प्रतापसे बंधुसहवर्तमान हजार वर्षपर्यंत नगरस्थानका राज्य कर ॥ ३१७ ॥ सारस्वत

पूजयस्व ममाज्ञया ॥ ब्राह्मणस्य यथा कर्म यथा वै क्षत्रियस्य च ॥३१८॥ ब्रह्मक्षत्रस्य यत्कर्म चाथर्वणविधिं चर ॥ त्वद्वंशे कुशमाताहं जाता वृद्धिफलप्रदा ॥३१९॥ मत्पूजा शारदी चैव होमविप्राग्नितर्पणैः॥कर्तव्या नियते काले मम संतोषकारिका ॥ ३२० ॥ मांसेन सुरया वापि पायसेन घृतेन वा ॥ पुत्रपौत्रधनादीनां लाभदा च भवाम्यहम् ॥ ३२१ ॥ मन्त्रस्य मम वै राजन्नृषिराथर्वणो महान् ॥ चतुर्भुजं त्रिनयनं स्मर त्वं नृपनंदन ॥ ३२२ ॥ तथैव तव वंशेषु मज्जन्मदिवसे क्वचित् ॥ विहर्षो नैव संतिष्ठेद्यदीच्छेच्छुभमात्मनः ॥ ३२३ ॥ अत ऊर्ध्वं च राजेंद्र राजानो दश भाविनः ॥ ते निरस्त्राः शस्त्रहीना विचरंतो महीतले ॥ ३२४ ॥ तदाहं विश्वकर्माणं प्रेरयाम्युपजीवने ॥ एतेषां मंत्रशस्त्राणि उपजीवनिकानि च ॥ ३२५ ॥ वदिष्यति तदा लोके तेन सौख्यं भविष्यति ॥ उत्तिष्ठ त्वं महाराज भ्रातृभिः परिवारितः ॥ ३२६ ॥ गच्छस्व नगरस्थाने राज्यं कुरु स्ववंशजम्॥एतावदुक्त्वा वचनं देवी चांतर्हिता तदा ॥ ३२७ ॥

ब्राह्मणोंकी पूजा कर और ब्राह्मणका जो कर्म और क्षत्रियका जो कर्म ॥ ३१८ ॥ वैसा ब्रह्मक्षत्रियका कर्म आर्थवणविधि आचरण करो तुम्हारे वंशमें कुलदेवी कुशमाता नामकी मैं फल देनेवाली हूं ॥ ३१९ ॥ शारदीनवरात्रमें दरवरसकूं मेरी पूजा करना होम करना ब्राह्मण भोजन करवाना ॥ ३२० ॥ मांस मदिरा दूधघृतसे मेरा संतोष किया तो उन्होंकूं पुत्रपौत्र धनका लाभ देनेवाली होऊंगी ॥३२१॥ हे राजा ! मेरे मंत्रकी देवता आथर्वण ऋषिहै त्रिनेत्र चतुर्भुजका तू ध्यान कर ॥३२२॥ और मेरे जन्मके दिन तेरे वंशमें जो पुरुष है उसने अपने कल्याणकी इच्छा होवे तो शोकातुर रहना नहीं ॥३२३॥तेरे उपरांत दशराजा होवेंगे वे वेदशास्त्रहीन भूमिमें फिरेंगे ॥ ३२४ ॥ तब तुम्हारे उपजीविकार्थ विश्वकर्माकूं भेजूंगी वो दशोंके उपजीविकार्थ शस्त्र होवेंगे ॥३२५॥ उनसे तुमको सुख होवेगा हे राजा ! उठ सर्वोकूं लेके॥३२६॥ नगरस्थानमें जायके राज्य कर । इतना कहके देवी अंतर्धान भई॥३२७॥फिरऋषि-

तेपि सर्वे सऋषयो यात्रां कृत्वा यथाविधि ॥ नगरस्थानमागत्य राज्यं चक्रुः प्रहर्षिताः ॥ ३२८ ॥ अतः परं विवाहं वै चक्रुस्ते पंचभ्रातरः ॥ तद्वंशीयाः परां वृद्धिं प्राप्ताः कालेन भूयसा ॥ ३२९ ॥ षट्पंचाशद्देशजाताः कन्याः संजगृहुश्च ते॥ ततो बहुतिथे काले म्लेच्छैर्बर्बरजैर्यथा ॥ ३३० ॥ राज्यं हृतं बलेनैव तदा तद्वंशजा नृपाः॥बिदूरथादयः सर्वे सपुत्रपशुबांधवाः ॥ ३३१ ॥ ताडिता म्लेच्छवर्गैश्च आशापूर्णांबिकां ययुः ॥ तत्र द्वौ च महामुख्यौ श्रुतसेनविदूरथौ ॥ ३३२ ॥ देवीमाराधयंतौ द्वौ द्वादशाब्दमहर्निशम् ॥ परितुष्टा जगद्धात्री वचनं तौ प्रति द्विज ॥ ३३३ ॥ देव्युवाच ॥ ॥ भो भोः क्षत्रियदायादाः श्रूयतां पूर्वकारणम् ॥ जयसेनाय कथितं तद्वदाचरतां ध्रुवम् ॥३३४॥ ब्रह्मक्षत्रा भवंतो वै पूर्वं जाता ममाज्ञया ॥ न शस्त्राणि न चास्त्राणि प्रभवंति कदाचन ॥ ३३५ ॥ रामशापात्परे काले किं बाहू स्वस्य कारणम् ॥ इतितौ देविवाक्यं च श्रुत्वा दुःखेन चेष्टितम् ॥ ३३६ ॥ ऊचतुस्तौ पुनर्देवीम-

सहवर्तमान जयसेनादिक सब यथाविधि यात्रा करके नगरस्थानमें आयके राज्यकरनेलगे ॥ ३२८ ॥ पीछे पांचों भाइयोंने विवाह किया वंश वृद्धिंगत हुवा, छप्पन देशकी कन्या जिनोंने ग्रहण करी ऐसे बहुतकाल गये बाद बलूचिस्थानमें मुसलमानोंने बलात्कारसे ॥३२९॥३३०॥ नगरस्थानका राज्य छीन लिया तब जयसेनके वंशस्थ विदूरथादिक जो थे वोह अपने स्त्रीपुत्रादिकोंकूं लेके॥३३१॥आशापूर्णा देवीके नजदीक गये उन सबोंमें श्रुतसेन विदूरथ यह दोनों मुख्य थे ॥३३२॥ उन्होंने बारा बरस देवीका आराधन किया तब देवी प्रसन्न होयके कहती है॥३३३॥हे क्षत्रियपुत्र पूर्वका कारण सुनो जयसेनकूं मैंने जैसा कहाहै वैसा तुम आचरण करो ॥३३४॥ तुम ब्रह्मक्षत्रिय भयेहो अस्त्रशस्त्र तुमकूं प्रताप देनेके नहीं ॥ ३३५ ॥ रामके शापसे तुम्हारा पराक्रम तुम्हारा हाथ है तो दुःखी होनेका क्या कारणहै तब वो दोनों बडे दुःखी होयके कहने लगे॥३३६॥ हे माता ! फिर हमारी जीविका कैसे चलेगी हम

स्मद्वृत्तिः कथं भवेत् ॥ न वयं क्षत्रधर्मं वै त्यजामः प्राणसंकटे ॥ ३३७ ॥ कथं ब्रह्मपरं धर्मं योजनाध्यापनादिकम् ॥ न कुर्व इति तद्वाक्यं श्रुत्वा सा जगदंबिका ॥ ३३८ ॥ आहूय विश्वकर्माणं वचनं चेदमब्रवीत् ॥ देव्युवाच॥ इमौ क्षत्रियदायादौ निरस्त्रौ शस्त्रसंयुतौ ॥ ३३९ ॥ अतोऽनयोर्जीविकोपायं त्वं चिंतयमाचिरम् ॥ इति श्रुत्वा वचो देव्या विश्वकर्मा महीभृतौ ॥३४०॥ उवाचाऽऽनीयतां वत्सौ धनुर्बाणादिकानि च ॥ तदा तद्वचनं श्रुत्वा पूजयित्वा प्रजापतिम् ॥३४१॥ धनुर्बाणं तथा खड्गं परशुं शक्तिमेव च ॥ मुशलं च तथा कुंतं लांगलं च न्यवेदयत् ॥ ३४२ ॥ पुरतः स्थापयामास विश्वकर्मा समंत्रकम् ॥ पूजयित्वा तु शस्त्राणि उपजीव्यं पराणि च ॥ ३४३ ॥ अकरोद्विश्वकर्मा वै देवीवाक्य प्रसादतः ॥ उपजीव्यपराण्येव अष्टशस्त्राणि चादरात् ॥ ३४४ ॥ अकरोत्त्वाष्ट्रशिल्पाय जीवनं जीविकां च सः धनुषा धनुषीकृत्वा बाणस्य शिल्पिनं तथा ॥ ३४५ ॥ खड्गस्यारां च परशोर्नैतन्यां च तथाकरोत् ॥ मंथलो लांगलस्यैव मुशलस्य वराख्यया ॥ ३४६ ॥ शक्त्या ऋक्षस्तथा

क्षत्रियधर्म छोडनेके नहीं ॥ ३३७ ॥ और दान प्रतिग्रह यज्ञ करवाना वेद पढवाना यह ब्रह्मवृत्तिभी करनेके नहीं। तब देवीने ॥ ३३८ ॥ विश्वकर्माकूं बुलायके कह्यो कि यह क्षत्रिय पुत्र हैं इनोंकूं शस्त्रविद्या नहीं है इसवास्ते उपजीविका दिखाव तब विश्वकर्मा देवीका वचन सुनके राजपुत्रकूं कहने लगे ॥ ३३९ ॥ ३४० ॥ हे पुत्र ! तुम धनुष्य बाण आदि करके सब शस्त्र लाव तब विश्वकर्माका वचन सुनके उनकी पूजा करके ॥ ३४१ ॥ धनुर्बाण तरवार फरसा शक्ति मूसल लोहांगी लांगल यह शस्त्र विश्वकर्माके सामने रख दिये ॥ ३४२ ॥ फिर विश्वकर्माने समंत्रक उन शस्त्रोंका स्थापन करके पूजा किये और जो ब्रह्मक्षत्रियोंकी उपजीविका थी ॥ ३४३ ॥ वह आठ शस्त्रोंसे चलाई नाना प्रकारकी कारीगरीके काम करना शस्त्रोंका व्यापार करना पाषाणके ऊपर रत्न बनायके बेचना यह आदि लेके अनेक जो मेरे शास्त्रमें शिल्पविद्या है वह

चक्रे द्विधा कृत्कुंतलस्यच ॥ लक्षं वसु गां च तथा पत्रं केत-
किसंभवम् ॥ ३४७ ॥ पाषाणस्तीक्ष्णशस्त्रेषु अग्निसंचरणे
ददौ ॥ एतानि संघशस्तेन दत्तानि विश्वकर्मणा ॥ ३४८ ॥
ऋषीणां च पुरोभागे दत्त्वा चोवाच चांबिकाम् ॥ विश्वकर्मो-
वाच ॥ क्षत्रियश्चार्षिसंसर्गाज्जातो मूर्द्धावसिक्तकः ॥ ३४९ ॥
ब्रह्मक्षत्रस्य धर्मे वै अधिकः स प्रकीर्तितः ॥ ३५० ॥
अश्वं रथं हस्तिनं च वाहनं तस्य तद्भवेत् ॥ अथवा काष्ठ-
शिल्पं च शस्त्रैरेतैः प्रकल्प्यताम् ॥ ३५१ ॥ जीवनार्थं सदा
कार्यो धान्यसंग्रह एव च ॥ जीवनार्थं सुसंगृह्य कर्तव्यं चोप-
जीवनम् ॥३५२॥ अश्वं रथं गजं धेनुं तथा कन्यां च दासि
काम् ॥ लाक्षारागोद्भवं कर्म परं मुद्रापकारकम् ॥३५३॥ घृतं
क्षौद्रं तथा सर्वांस्तैलेन रहितान् रसान् ॥ धनुर्बाणं च शस्त्रं
च तथा धातुमयं न च ॥३५४॥ स्वीकुर्याज्जीवनार्था ब्रह्मक्ष
त्रकुले परे ॥ इत्युक्त्वा विश्वकर्मा वै स्वर्गलोकमथागमत्
॥३५५॥ देव्युवाच ॥ ॥ वचनं श्रूयतां वत्स यदुक्तं विश्व-
कर्मणा ॥ तदन्यथा च यः कुर्याद्भ्रश्यते च निजात्कुलात् ॥

उपजीविकार्थ होवेगी ऐसा कहके देवीकूं विश्वकर्मा कहते हैं यह क्षात्रिय ऋषिसंस-
र्गसे उत्पन्न भया है सो मूर्द्धावसिक्त जाति भया ॥ ३४४-३४९ ॥ परन्तु ब्रह्मक्षत्र
धर्ममें अधिक है अथर्वणका जो उपवेद विश्वकर्मा शास्त्र उससे जीविका और वो
वेदसे नित्यनैमित्तिक सब वेदोक्त कर्म करना ॥३५०॥ घोडा हाथी रथ यह वाहन
करना पूर्वोक्त शस्त्रोंसे लकडेका काम करना ॥ ३५१ ॥ अथ उपजीविका वास्ते
धान्यका व्यापार करना ॥ ३५२ ॥ घोडा हाथी रथ गौ कन्या दासी इनका जीवि-
कार्थ संग्रह करना लाखका रंग निकालके रंगना कपडेपर छापे डालना ॥ ३५३ ॥
घी शहत आदि लेके तेलविना सब रस जीविकार्थ बेचना और सुवर्न चांदीके छुरी
तरवार, बंदूक, धनुर्बाण, यह शस्त्र पास रखके नौकरी करना निर्वाहवास्ते ऐसा
कहके विश्वकर्मा स्वर्गमें गये ॥ ३५४ ॥ ३५५ ॥ देवी कहती हैं हे बालको !
विश्वकर्माने जो उपाय कहे हैं उनकूं जो छोडदेगा तो अपने कुलसे भ्रष्ट होवेगा ॥

॥ ३५६ ॥ इमे सारस्वता विप्रा ब्रह्मलभ्यादयान्वये ॥ एतेषां पूजनं चैव कर्तव्यं शुभमिच्छता ॥३५७॥ यथा विदूरथो वंशः श्रुतसेनस्तथा तव ॥ उभौ सत्यं ब्रह्मपराः क्षत्रधर्मं विदुः क्रमात ॥३६८॥ युष्मत्पुत्रा महिष्यां वै जायंत इत उत्तरम् ॥ ते ते मद्भक्तियुक्ताश्च वसंतु स्वस्थलेषु च ॥ ३५९ ॥ एतावदुक्त्वा वचनं तत्रैवांतरधीयत ॥ ऋषिभिः सहितौ तौ च श्रुतसेन विदूरथौ ॥ ३६० ॥ जग्मतुः सहितौ ताभिर्योषिद्भिर्नगरं प्रति ॥ सुखेन तस्मिन्नगरराज्यं तौ वै शताब्दकम् ॥ ३६१ ॥ दृष्ट्वा पुत्रान्प्रवयसान्राज्ये स्थाप्य सुविस्तरे ॥ जग्मतुस्तावुभौ तस्मान्नगराद्योषिदाज्ञया ॥ ३६२ ॥ हिंगुलां तौ ततो गत्वा कार्पटीयं व्रतं तथा ॥ चक्राते आत्मसंसिद्ध्यै काले लोकमवापतुः ॥ ३६३ ॥ निर्गते तु वने ताते सर्वे ते सुकुमारकाः ॥ किंचित्कालमथावासं चक्रुस्ते नगरांतरे ॥ ३६४ ॥ एतस्मिन्नेव काले तु बर्बरस्य बलं महत्॥ आगतं नगरं रोद्धुमितिज्ञात्वा विनिर्गताः ॥ ३६५ ॥ राजपुत्राः सपुत्राश्चसभार्याश्च समातृकाः ॥ यत्र यत्र सुखं जातं तं तं देशं च ते गताः ॥३६६॥ तद्देशाचारतः सर्वे जातास्ते सुकुमारकाः ॥ अंगवं-

॥३५६॥ अपने कल्याणके वास्ते यह सारस्वत ब्राह्मणोंकी पूजा करना ॥ ३५७ ॥ जैसा विदूरथका वंश वैसा श्रुतसेनका वंश ब्रह्मक्षत्री जानो ॥ ३५८ ॥ तुम्हारे आगे जो पुत्रादिक होवेंगे वे मेरे भक्त होवेंगे और जो हाल हैं सब मेरे ऊपर भावरखके अपने स्थलमें रहो ॥ ३५९ ॥ ऐसा कहके देवी अंतर्धान भई पीछे वो दोनोंजने ऋषि और स्त्रीबालक आदि सबोंकूं लेके अपने नगरमें गये सौ बरस सुखवास किया ॥ ३६० ॥ ३६१ ॥ पीछे प्रौढपुत्रोंकूं राज्य सौंप करके स्त्रियोंकी आज्ञा लेके ॥ ३६२ ॥ हिंगुलाक्षेत्रमें जायके कार्पटीका वेष लेके आत्मप्राप्ति होनेके वास्ते तप करते करते विदूरथ श्रुतसेन दोनों सालोक्य मुक्तिकूं पाये॥३६३॥ दोनोंके गये बाद सब पुत्र थोडेक वर्ष नगरस्थानमें रहे ॥ ३६४ ॥ इतनेमें बलूचिस्थानके म्लेच्छनकी सेना आई और नगरकूं रोक लिया सो देखके ॥ ३६५ ॥ अपने अपने स्त्रीपुत्र मातानकूं लेके जहां जहां सुख भया वो वो देशमें चले गये ॥ ३६६ ॥ और वो देशके आचार युक्त भये कितनेक अंगदेशमें कितनेक बंगा-

गादिके देशे स्थितास्ते तु पुरा परे ॥३६७॥ केचिच्छस्त्रपराः केचिच्छिल्पकारास्तथापरे ॥ धान्यविक्रयकाराश्च रसविक्रयकारकाः ॥ ३६८ ॥ सुखिनः संतु ते पुत्राः सुखिनः संतु ते शिवाः ॥ ब्रह्मक्षत्रान्वये जाता महाहर्षपरायणाः ॥ ३६९ ॥ एतद्वः समुपाख्यातं ब्रह्मक्षत्रकथानकम् ॥ तथा सारस्वतो वंशः श्रुत्वा कुलकरः परः ॥ ३७० ॥ अपुत्रो लभते पुत्रं निर्धनो धनवान्परः ॥ सर्वान्कामानवाप्नोति ब्रह्मलोके महीयते ॥ ॥३७१॥ अथान्यं ब्रह्मक्षत्रियज्ञातिभेदमाह-हरिकृष्णः--तथान्यब्रह्मक्षत्रस्य ज्ञातिर्या दृश्यतेऽधुना ॥ सापि चोत्पत्तिभेदेन विज्ञेया द्विजसत्तमैः ॥ ३७२ ॥ तदुत्पत्तिप्रमाणे तु वाक्यानि संलिखाम्यहम् ॥ श्रीमद्भागवतोक्तानि सारभूतानि चादरात् ॥३७३॥ वैवस्वतमनोः पुत्रः पंचमो धृष्ट इत्यपि ॥ धृष्टाद्धार्ष्टमभूत्क्षत्रं ब्रह्मभूयं गतं क्षितौ ॥३७४॥ अन्यच्च ॥ मनोर्वैव-

लेमें आदिशब्द करके काशीप्रयागनिजाम हैद्राबाद, पंजाब गुजरात भरोच यह स्थानोंमें रहे ॥ ३६७ ॥ वहां जायके कितनेक शस्त्र हाथमें रखके राजाकी नौकरी करने लगे कितनेक तरह तरहकी धातु काष्ठोंकी जिन्नसा बनायके बेचनेका व्यवहार करने लगे कितनेक अनाजका व्यापार रसका व्यापार किनारी गोटेका व्यापार कपडेका व्यापार करनेलगे ॥ ३६८ ॥ सब सुखी भये हर्षसे निवास करते भये ॥ ३६९ ॥ हे शौनक ! तुमकूं ब्रह्मक्षत्रियका और दधीच सारस्वतका वंश कहा ॥३७०॥ जो कोई इस वृत्तांतकूं श्रवण करेगा तो अपुत्रकूं पुत्र निर्धनकूं धन और सब कामना प्राप्त होवेगी ब्रह्मगति होवेगी ॥ ३७१ ॥ अब और ब्रह्मक्षत्रियकी ज्ञातिभेद कहतेहैं पहिले जो जयसेन राजाके निमित्तसे ब्रह्मक्षत्रियोंकी उत्पत्ति कही वे क्षत्रियजाति गुर्जरसंप्रदायसे प्रसिद्धहैं तथा कहते उसी रीतिसे अन्या कहतेदूसरी भी ब्रह्मक्षत्रियज्ञाति इस कालमें जो नासिकपूना आदि नगरोंमें महाराष्ट्रादि संप्रदायसे दीख पडती हैं वो ज्ञाति उत्पत्तिके भेदसे ब्राह्मणोंने जानना ॥ ३७२ ॥ उस ज्ञातियोंके प्रमाणभूत श्रीमद्भागवतोक्त सारभूत वाक्य लिखता हूं ॥ २७३ ॥ वैवस्वतमनुका पांचवां पुत्र धृष्टनाम करके भया उससे धार्ष्टनाम करके क्षत्रियकुल ब्राह्मणत्वकूं पाया ॥ ३७४ ॥ प्रकारांतर वैवस्वतमनुका पुत्र नभग उसका पुत्र

स्वतः पौत्रो नाभाग इति विश्रुतः ॥ नाभागादंबरीषोऽभूद्वि-
रूपस्य रथीतरः ॥ ३७५ ॥ रथीतरस्याप्रजस्य भार्यायां तंतवे
र्थितः ॥ अंगिरा जनयामास ब्रह्मवर्चस्विनः सुतान् ॥३७६॥
एते क्षेत्रे प्रसूता वै पुनस्त्वांगिरसा स्मृताः ॥ रथीतराणां
वराः क्षेत्रोपेता द्विजातयः ॥ ३७७ ॥ अन्यच्च ॥ ययातेः पंच
पुत्राणां योंतिमः पुरुसंज्ञकः ॥ तमारभ्य क्षेमकांतं पुरुवंशः
प्रकीर्तितः ॥३७८॥ ब्रह्मक्षत्रस्य वै प्रोक्तो वंशो देवर्षिसत्कृतः ॥
क्षेमक प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ ॥ ३७९ ॥
एवं पूर्वोक्तवंश्यानां स्थानतादात्म्ययोगतः ॥ अद्यापि व्यव-
ह्रीयंते ब्रह्मक्षत्रियभेदतः ॥ ३८० ॥

इति ब्राह्मणोत्पत्तिमार्तण्डाध्याये ब्रह्मक्षत्रियभेदवर्णनसहितं दधीचसार-
स्वतब्राह्मणज्ञातिवर्णनं नाम प्रकरणम् ॥ २५ ॥ पद्यसं० ३३३१

नाभाग, नाभागका अंबरीष पुत्र उसका पुत्र विरूप विरूपका रथीतर ॥ ३७५ ॥
रथीतरकूं जब पुत्र नहीं भया तब गुरुकी प्रार्थना किये तब अंगिराने रथीतरकी
भार्याके विषे पुत्र उत्पन्न किये ॥ ३७६ ॥ वे रथीतरोंके क्षेत्रमें पैदा भये सो क्षात्रिय
युक्त आंगिरसंब्राह्मण ज्ञाति भयी ॥ ३७७ ॥ तीसरा भेद ॥ ययातिराजाके पांच-
पुत्रोंमें जो कनिष्ठपुत्र पुरुराजा वहांसे आरंभ करके क्षेमकराजा पर्यंत पुरुवंश श्रीम-
द्भागवतमें कहाहै ॥ ३७८ ॥ वो ब्रह्मक्षत्रियका वंश देवऋषि जिनोंका सत्कार करे
वो वंश कलियुगमें क्षेमक राजातक चलेगा पीछे समाप्ति पावेगा ॥ ३७९ ॥ ऐसे
पूर्वोक्त जो तीन भेद कहे हैं उन्होंके स्थानादिकोंके तादात्म्यभावसे ब्रह्मक्षत्रिय
नामसे अद्यापि व्यवहार कररहे हैं सो जानना जहां जहां जिनोंका अंश मिलता
होवे वहां अपना भेद जानलेना ॥ ३८० ॥

इति श्रीब्राह्मणोत्पत्तिमार्तंडग्रन्थभाषामें ब्रह्मक्षत्रियोंकी उत्पत्तिसहित दधीचसारस्वत
ब्राह्मणोत्पत्ति वर्णन प्रकरण २५ संपूर्ण ॥

अथनर्मदोत्तरवासिसारस्वतब्राह्मणोत्पत्तिप्रकरणम् २६.

अथ नर्मदोत्तरवासिसारस्वतब्राह्मणोत्पत्तिप्रसंगमाह—उक्तं च महाभारते गदापर्वणि ॥ वैशंपायन उवाच ॥ यत्रेजिवानुडुपती राजसूयेन भारत ॥ तस्मिंस्तीर्थे महानासीत्संग्रामस्तारकामयः ॥ १ ॥ तत्राप्युपस्पृश्य बलो दत्त्वा दानानि चात्मवान् ॥ सारस्वतस्य धर्मात्मा मुनेस्तीर्थं जगाम ह ॥ २ ॥ तत्र द्वादशवार्षिक्यामनावृष्ट्यां द्विजोत्तमान् ॥ वेदानध्यापयामास पुरा सारस्वतो मुनिः ॥ ३ ॥ ॥ जनमेजय उवाच ॥ कथं द्वादशवार्षिक्यामनावृष्ट्यां द्विजोत्तमान् ॥ वेदानध्यापयामास पुरा सारस्वतो मुनिः ॥ ४ ॥ ॥ वैशंपायन उवाच ॥ ॥ आसीत्पूर्वं महाराज मुनिर्धीमान्महातपाः ॥ दधीच इति विख्यातो ब्रह्मचारी जितेंद्रियः ॥ ५ ॥ तस्यातितपसः शक्रो बिभेति सततं विभो ॥ न स लोभयितुं शक्यः फलैर्बहुविधैरपि ॥ ६ ॥ प्रलोभनार्थं तस्याथ प्राहिणोत्पाकशासनः ॥ दिव्यामप्सरसं पुण्यां दर्शनीयामलंबुषाम् ॥ ७ ॥ तस्य तर्पयतो देवान् सरस्वत्यां महात्मनः ॥ समीपतां महा-

अब नर्मदाकी उत्तरबाजू जो सारस्वतब्राह्मण हैं उनकी उत्पत्ति कहते हैं वैशंपायन ऋषि जनमेजय राजाकूं कहतेहैं कि एकसमयमें बलदेवजी तीर्थयात्रा करनेकूं निकले सो जहां तारकासुर दैत्यके वास्ते बडासंग्राम हुवा और चंद्रमाने जहां राजसूर्य यज्ञ किया ॥ १ ॥ वहां आयके स्नान करके दानपुण्य करके सारस्वत मुनिके तीर्थ ऊपर गये ॥ २ ॥ वहां पूर्वमें बारावरस अनावृष्टि भई उसवखत सारस्वत मुनिने सब ब्राह्मणोंकूं वेद पढाये और पालन किये ॥ ३ ॥ जनमेजय राजा पूछतेहैं कि बारावरस अनावृष्टि कालके विषे सारस्वत मुनिने वेद कैसे पढाये सो कहो ॥ ४ ॥ वैशंपायन कहते हैं हे राजा! पूर्वमें महातपस्वी बडा बुद्धिमान् जितेंद्रिय ब्रह्मचारी दधीच नाम करके ऋषि विख्यात होता था ॥ ५ ॥ उसकी तपश्चर्यासे इंद्र भयभीत होयके वरदान लोभायमान करनेकूं प्रयत्न किया परन्तु ऋषि लोभित नहीं भया ॥ ॥ ६ ॥ फिर इंद्रने दधीचऋषीकूं मोहित करनेके वास्ते अलंबुषा अप्सराकूं भेजी ॥ ७ ॥ सो अप्सरा ऋषि तर्पण करते थे सरस्वतीके तट ऊपर

राज सोपातिष्ठत भामिनी ॥८॥ तां दिव्यवपुषं दृष्ट्वा तस्य-र्षेर्भावितात्मनः ॥ रेतः स्कन्नं सरस्वत्यां तत्सा जग्राह निम्नगा ॥९॥ कुक्षौ चाप्यदधद्धृष्टा तद्रेतः पुरुषर्षभ ॥ सा दधार च तं गर्भं पुत्रहेतोर्महानदी ॥ १० ॥ सुषुवे चापि समये पुत्रं सा सरितां वरा ॥ जगाम पुत्रमादाय तमृषिं प्रति च प्रभो ॥११॥ ऋषिसंसदि तं दृष्ट्वा सा नदी मुनिसत्तमम् ॥ ततः प्रोवाच राजेन्द्र ददती पुत्रमस्य तम् ॥१२॥ ब्रह्मर्षे तव पुत्रोऽयं त्वद्भक्त्या धारितो मया ॥ दृष्ट्वा तेऽप्सरसं रेतो यत्स्कंन्नं प्रागलंबुषाम् ॥ ॥ १३ ॥ तत्कुक्षिणा वै ब्रह्मर्षे त्वद्भक्त्या धृतवत्यहम् ॥ न विनाशमिदं गच्छेत्त्वत्तेज इति निश्चयात् ॥१४॥ प्रतिगृह्णीष्व पुत्रंस्त्वंमयादत्तमनिंदितम् ॥ इत्युक्तःप्रतिजग्राह प्रीतिंचावाप पुष्कलाम् ॥१५॥स्वसुतं चाप्य जिघ्रत्तं मूर्ध्नि प्रेम्णा द्विजो-त्तमः॥परिष्वज्यचिरं कालं तदा भरतसत्तम ॥१६॥ सरस्वत्यै वरं प्रादात्प्रीयमाणो महामुनिः ॥ विश्वेदेवाः सपितरो गन्ध-र्वाप्सरसां गणाः॥१७॥ तृप्तिं यास्यंति सुभगे तर्प्यमाणास्त-वांभसा॥इत्युक्त्वा स तु तुष्टाव वचोभिर्वै महानदीम् ॥१८॥

वहां आयके खडी रही ॥ ८ ॥ तब सुंदरी अप्सराकूं देखके वह तपस्वी ऋषि थे तथापि सरस्वतीके जलमें उनका वीर्यस्खलित होगया सो सरस्वती नदीने पुत्र इच्छाकर ऋषि का वीर्य गर्भमें स्थापन किया ॥ ९ ॥ १० ॥ फिर नव महीने बाद पुत्र प्रसव भया उनकूं लेके वो सरस्वती नदी दधीचके पास जायके ॥ ११ ॥ सभामें बैठे हुये ऋषिकूं देखके पुत्र उनकूं दके कहती है ॥ १२ ॥ हे ऋषि अलंबुष अप्सराकूं देखके जलमें जो तुम्हारा वीर्य स्खलित हुवा ॥१३॥सो मैंने अपने गर्भमें तुम्हारी भक्तिसे धारण किया सो तुम्हारे तेजसे नाश नहीं पाया ॥ १४ ॥ इस-वास्ते हे ऋषि ! यह शुद्धपुत्रकूं ग्रहण करो ऐसा सरस्वतीका वचन सुनके बडे प्रसन्न भये पुत्रकूं ग्रहण करके ॥ १५ ॥ प्रेमसे उसका मस्तक सूंघके चिरकाल आलिंगन करके ॥ १६ ॥ सरस्वतीको वरदान देते हैं हे देवी ! तेरे जलसे तर्पण करनेसे विश्वेदेव पितृ गधर्व अप्सरा आदि सब तृप्ति पावेंगे ऐसा कहके वे नदीकी

चौदह सौ ब्राह्मण भये ॥ २६ ॥ और छोटे भाईने कहा कि हम तो दान लेनेके नहीं तब उसके मतसे चलनेवाले ब्राह्मण अढाई सौ भये ॥२७॥ ऐसा दोनों भाइयोंका गडबडाहट भया तब राजाने गांवके दरवाजे बंद करवाये ॥ २८ ॥ तब वे छोटे भाईके अनुयायी २५० निर्धन ब्राह्मण गांवकी भीत ऊपरसे उलंघन करके जलदीसे गांवके बाहर होगये ॥२९॥ ईडरसे बाहर होगये वे बाजे खडेवाल ब्राह्मण भये, बडे धर्म कर्ममें निष्ठा रखनेवाले प्रतिग्रह करते नहीं हैं हालमें बडेबडे गृहस्थ गुजरातमें ओट उमरेट प्रांतमें तैलंग द्रविड देशमें चीनापट्टन मधरा पंचनद तंजापुर त्रिणवल्ली आदि गावोंमें प्रसिद्ध हैं ॥ ३० ॥ अब वेणुवत्स राजा परोपकार करनेकूं बडा तत्पर वेद शास्त्रमें पारंगत उन बाज खेडावालोंकूं देखकर ॥ ३१ ॥ उनका नाम गोत्र सब जानकर ब्राह्मणोंकूं मालूम न होवे उस रीतिसे गोत्र और ग्रामके नामकी चिठ्ठी तांबूलकी बीडीमें रखकर ॥३२॥ चौबीस गोत्रोंके ब्राह्मणोंकूं लकार अक्षर जिसके अंतमें है ऐसे चौबीस गांव दिये ॥३३॥ अब वेणुवत्सके समीप जो ब्राह्मण थे उन्होंने सुवर्ण गोदानका प्रतिग्रह किया ॥ ३४ ॥ तब राजा प्रसन्न

स्वकीये खेटके पुरे ॥ ३५ ॥ नृपमंत्रिवणिग्जातिर्लाड इत्य-
भिविश्रुतः ॥ प्रतिज्ञामकरोत्तत्र सभामध्ये विशेषतः ॥ ३६ ॥
मदीयाः संति ये सर्वदेशे ग्रामे पुरे तथा ॥ ते युष्मान् पाल-
यिष्यंति नात्र कार्या विचारणा ॥ ३७ ॥ वयं सर्वे क्षत्रियाश्च
लाटदेशसमुद्भवाः ॥ कालयोगाद्धर्मभ्रष्टा जाताः सर्वे मुनी-
श्वराः ॥ ३८ ॥ ते सर्वे लाडवणिजः सच्छूद्रा वर्णधर्मतः ॥
नमस्कारेण मंत्रेण पंचयज्ञाः सदैव हि ॥ ३९ ॥ आधानादि-
विवाहांताः संस्कारा ये प्रकीर्तिताः ॥ ते सर्वे च प्रकर्तव्या वेद-
मन्त्रैर्विना द्विजाः ॥४०॥ पौरोहित्यं च तेषां वै कर्तव्यमविशं-
कितम् ॥ येऽवमानं करिष्यंति ते हि दंड्या न संशयः ४१॥
एवं य खेटके ग्रामे स्थापिता वेणुना द्विजाः ॥ ते खेटकेवासिनो

होकर उन चौदह सौ ब्राह्मणोंकूं अपने ब्रह्मखेटक पुरमें रहनेकूं स्थल दिया॥३५॥ वहां राजाका प्रधान मंत्री लाड बनियां था उसने सभाके बीचमें विशेष करके प्रतिज्ञाकी कि ॥ ३६ ॥ मेरे ज्ञातिके जितने देशगांव नगर पुरोंमें रहनेवालेहैं वे सब तुम्हारा पालन करेंगे इसमें संशय नहीं है ॥ ३७ ॥ हम सब क्षात्रिय हैं पूर्वी लाटदेशमें रहनेवाले हैं इसवास्ते हमारे ज्ञातीसमूहका नाम लाड भया है परंतु हे मुनिश्वरो ! कालयोगसे क्षात्रिय धर्मसे भ्रष्ट हो गयेहैं॥ ३८ ॥ वे सब लाड बनिये सच्छूद्रके धर्मसे चलते हैं उनने नमस्कार मंत्रसे पंचमहायज्ञ करना ॥ ३९ ॥ गर्भाधानसे विवाहांत षोडशकर्म सब करना सो वेदमंत्र रहित पौराणिक मंत्रसे करना कितनेक देशमें वे लोक अपनेकूं सच्छूद्र वर्ण मानतेहैं कितनेक क्षत्रियत्व कितनेक वैश्यत्व मानते हैं और धनलोभी ब्राह्मण उनकूं वैश्य कहतेहैं कर्म वैश्यसरीखा मुखसे कहते हैं परंतु शूद्रके योग्य भी कर्म करवाते नहीं हैं परंतु वे लाड बनिये धनगर्वित ऐसे अभ्वतर हैं कि जिनकूं कर्ममें ज्ञान नहींहै मुखके वचनमात्रसे वैश्यत्व मानकर आनंद पाते हैं ऐसा देखो प्राचीन यह लोक क्षत्रियवर्ण हैं और हालके वखतमें सच्छूद्रवर्णके धर्मसे चलतेहैं और मुखसे वैश्यत्व कहतेहैं यही फिर्याद हमने किसकूं कहना हे कलिराजा ! तुमकूं धन्य है ऐसी गडबड दूसरे बनियोंमें भीहैं॥४०॥ अब राजाका प्रधान कहताहै हेब्राह्मणो ! तुम सब यह लाडबनियेंको पौरोहित्य शंका छोडकर करना जो तुम सबका अपमान करेगा वह दंड पात्र होवेगा ॥ ४१ ॥ ऐसा ब्रह्मखेटमें वेणुवत्सने जो ब्राह्मण स्थापन किये वे ग्रामके भीतर रहनेवाले खेडावाल

विप्रा ग्रामाभ्यंतरवासिनः ॥ ४२ ॥ एवं खेटकविप्राणां भेदोऽयं समुदाहृतः ॥ अथ तेषां च गोत्रादिनिर्णयं प्रवदाम्यहम् ॥ ४३ ॥ शांडिल्यासितदेवलेतिप्रवरत्रयोपेतं शांडिल्य गोत्रं ऋग्वेदः उमा देवी सुरेली ग्रामः प्रथमः ॥४४॥ आंगिरसबार्हस्पत्यच्यवनोपमन्यवसमानेति पंचप्रवरोपेतम् ॥ कपिलगोत्रमृग्वेदो मलायीदेवीराहोलीग्रामोद्वितीयः ॥ ४५ ॥ उपमन्यववत्साश्रितभारद्वाजेतिप्रवरत्रयोपेतमुपमन्यवसगोत्रमृग्वेदो विश्वावसुदेवी विष्णोली ग्रामस्तृतीयः ॥ ४६ ॥ चित्रानस विश्वामित्रदेवराजेति प्रवरत्रयोपेतं चित्रासनसगोत्रमृग्वेदः कुलेश्वरीदेवी त्रिणोलीग्रामश्चतुर्थः । अत्र केषां चिन्मधुमच्छंददेवराजऔद्दालेति त्रिप्रवरांतरमपि वर्तते ॥४७॥ जातूकर्ण्य विश्वामित्रवत्सेति त्रिप्रवरोपेतं जातूकर्ण्यगोत्रंयजुर्वेदोदिवाकरवायी देवी आंत्रोलीग्रामः पञ्चमः ॥ ४८ ॥ भारद्वाजांगिरसबार्हस्पत्येतिप्रवरत्रयोपेतं भारद्वाजगोत्रमृग्वेद आशापुरी देवी पंचोलीग्रामषष्ठः ॥ ४९ ॥ विश्वामित्रदेवराजऔद्दलेति प्रवरत्रयोपेतम् ॥ अथवा देवराजउपनस्विविश्वामित्रेति प्रवरत्रयोपेतमुपनसगोत्रमृग्वेदः मोराही देवी सिंगालीग्रामः सप्तमः ॥ ॥ ५० ॥ उपराप्रवरभारद्वाजजमदग्निच्यवनेति पंचप्रवरोपेतं वत्ससगोत्रमृग्वेदः महालक्ष्मीदेवी मोधोलीग्रामोऽष्टमः ॥ तस्मिन्नेव गोत्रे प्रवरांतरमाह ॥ भार्गवच्यवनाप्नवऔर्वजामदग्न्येति पंचप्रवराणि ॥ ५१ ॥ गौतमांगिरसौथ्येति प्रवरत्रयोपेतं गौतमगोत्रमृग्वेदश्चामुंडेश्वरीदेवी वडेली ग्रामो नवमः ॥ ५२ ॥ शामानसभार्गवच्यवनौर्वजामदग्न्येति पंच प्रवरोपेतं

ब्राह्मण भये ॥४२॥ ऐसा खेडागलोंका भेद मैंने कहा और इनका गोत्रादि निर्णय चक्रमें स्पष्टहै॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२॥

शामानसगोत्रमृग्वेदो महालक्ष्मीर्देवी कंकालीग्रामो दशमः ॥ ॥ ५३ ॥ लम्बकर्णासितदेवराजेतिप्रवरत्रयोपेतं लम्बकर्णसगोत्रमृग्वेदो वडेयी देवी वडेलीग्राम एकादशः ॥५४॥ काश्यपावच्छन्दनैध्रुवेति प्रवरत्रयोपेतं काश्यपगोत्रं सामवेदः श्रीयादेवी शीहोली ग्रामोद्वादशः ॥ ५५ ॥ कौंडिन्यवसिष्ठमित्रावरुणेति प्रवरत्रयोपेतं कौंडिन्यगोत्रमृग्वेदो महालक्ष्मीर्देवी शियोलीग्रामस्त्रयोदशः ॥ ५६ ॥ अगस्त्यसामानसइंद्रवाहेति प्रवरत्रयोपेतं लातपसगोत्रं यजुर्वेदो मूलेश्वरी देवी रेनालीग्रामश्चतुर्दशः ॥ ५७ ॥ आंगिरसगौतमभारद्वाजेति प्रवरत्रयोपेतं शजानसगोत्रं यजुर्वेदो रविदेवी लिहाली ग्रामः पंचदशः ॥ ५८ ॥ आगस्त्यवैनाधजानायतेति प्रवरत्रयोपेतं बिल्वसगोत्रमथर्वणवेदो नित्या देवी नालोलीग्रामष्षोडशः ॥ ॥ ५९ ॥ आंगिरसबार्हस्पत्यास्तिके प्रवरत्रयोपेतंपौनसगोत्रं सामवेदः पिठायी देवी आदरोलीग्रामः सप्तदशः ॥६०॥ उशिकविश्वामित्रदेवलेतिप्रवरत्रयोपेतंकृष्णात्रिगोत्रं यजुर्वेदः कृष्णायी देवी काछेलीग्रामोऽष्टादशः ॥ ६१ ॥ आंगिरसबार्हस्पत्यभारद्वाजेति प्रवरत्रयोपेतं गार्ग्यसगोत्रमृग्वेदो बिल्वयीदेवी मारेलीग्रामः एकोनविंशः ॥ ६२ ॥ मुद्गलांगिरसभारद्वाजेति प्रवरत्रयोपेतं मुद्गलगोत्रमृग्वेदो वेहेमायी देवी भूयेलीः ग्रामो विंशः ॥ ६३ ॥ विश्वामित्रदेवराजौद्दलेति प्रवरत्रयोपेतं लौकानसगोत्रं यजुर्वेदो मलायी देवी खुटालिग्राम एकविंशः ॥ ६४ ॥ प्रवरत्रयोपेतं बार्हसं गोत्रमथर्ववेदः पिट्ठायी देवी कालोलीग्रामो द्वाविंशः ॥ ६५ ॥ अभ्यर्चनशि-

॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥
॥ ६३ ॥ ६४ ॥ ६५ ॥

षशिवेति प्रवरत्रयोपेतमांगिरसगोत्रं यजुर्वेदः चंगेली देवी चंगेलीग्रामश्चत्रयोविंशः ॥ ६६ ॥ आंगिरसनैध्रुवशौनकेतिप्रवरत्रयोपेतमांगिरसगोत्रंयजुर्वेदः हिरायी देवी हिरोलीग्रामश्चतुर्विंशः ॥ ६७ ॥ एवं गोत्रादिरचनाः संक्षेपेण प्रकीर्तिताः ॥ बाह्यानां खेटविप्राणां तथाऽन्येषां द्विजन्मनाम् ॥ ६८ ॥ श्रुत्वा विप्रमुखादेतं वृत्तांतं पूर्वकालिकम् ॥ निबंधनं च कृतवान् हरिकृष्णो द्विजः सुधीः ॥६९॥

इति श्रीब्राह्मणोत्पत्तिमार्तण्डाध्यायं खेटकब्राह्मणोत्पत्तिवर्णनं नाम प्रकरणम् ३३ संपूर्णम् ॥ आदितः पद्यसंख्या ॥ ३७४६ ॥

॥ ६६ ॥ ६७ ॥ ऐसी गोत्रादिकी रचना संक्षेपमें मैंने कही बाह्य भीतर खेडावाल ब्राह्मणोंमेंसे एक खेडुवा ब्राह्मण भेद भया है वे ब्राह्मण औदुंबर ब्राह्मणं वृत्ति करते हैं ॥ ६८ ॥ यह सब कथा पूर्वकालकी भईहुई उत्तम बहुश्रुत ब्राह्मणके मुखसे सुनकर हरिकृष्णने निबंधन किया ॥ ६९ ॥

इति खेडवाल ब्राह्मण लाड बनियोंकी उत्पत्ति संपूर्ण भई प्रकरणम ॥ ३३ ॥

अथ खेडावालब्राह्मणानां ग्रामगोत्रप्रवरकुलदेवीज्ञानचक्रम्.

सं.	ग्रामनाम	कुलदे.	गोत्र	प्रवराः	वेद	शाखा
१	मुरंली	समादेवी	शांडिल्य	शांडिल्यअसितदेवल	ऋ	आ
२	राहोली	मलावा	कपिल	आंगिरसबार्हस्पत्यच्यवनउपमन्यवसभानस	ऋ	आ
३	विष्णोला	विश्वावसु	उपमन्यव	उदमन्यववसिष्ठाश्रितभारद्वाज	ऋ	आ
४	त्रिणाली	कुलेश्वरी	चित्रानत	चित्रानसविश्वामित्रदेवराज	ऋ	आ
५	आत्रोली	दिवाकरबाई	जातूकर्ण	जातूकर्ण्यविश्वामित्रचक्रुस	य	आ
६	पंचोली	आशापुरी	भारद्वाज	भरद्वाजआंगिरसबार्हस्पत्य	ऋ	आ
७	सिगासी	मोराही	उपनस	विश्वामित्रदेवराजऔद्दल	ऋ	आ
८	मोघोली	महालक्ष्मी	वत्सस	उरपराप्रवभारद्वाजजमदग्निच्यवन	ऋ	आ
९	बडॅली	चामुण्डेश्वरी	गौतम	गौतमआंगिरसऔतथ्य	ऋ	आ
१०	कंगाली	महालक्ष्मी	शामानस	शामानसभार्गवच्यवनऔर्वजमदग्नि	ऋ	आ
११	वडेळा	बंडयी	लंबुकर्णस	लंबुकरणअसितदेवराज	ऋ	आ
१२	शीघोली	धिया	काश्यप	काश्यपअवछंदनैध्रुव	सा	कौ
१३	हियोली	महालक्ष्मी	कौडिन्य	कौडिन्यवसिष्ठमित्रावरुण	ऋ	आ

१४ रेनाली	मृलेश्वरी	लातपस	अगस्त्यसामानइंद्रवाह	य	मा
१५ लिहाली	रविदेवी	शजानस	आंगिरसगौतमभारद्वाज	य	मा
१६ नालोळी	नित्यादेवी	विल्वस	आगस्त्यवेनाधत्रानायत	अ	सा
१७ आदरोली	पिठायी	पौनस	आंगिरसवार्हस्पत्यआस्तिक	सा	कौ
१८ काछेली	कृष्णाई	कृष्णात्री	उशिकविश्वामित्रदेवल	य	मा
१९ मारेली	विल्वयी	गार्ग्यस	आंगिरसबार्हस्पत्यभारद्वाज	ऋ	आ
२० भूपेली	वेहेमायी	मुद्गल	मद्गलआंगिरसभारद्वाज	ऋ	आ
२१ खुटाली	मालायी	लौकानस	विश्वामित्रदेवराजऔद्दल	य	मा
२२ काकोली	मिठाई	वार्हस	३	अ	सा
२३ चंगेली	चंगेली	आगिरस	अत्रिअर्चनशिवशिव	य	मा
२४ हिरोली	हिरायी	आंगिरस	आंगिरसनैध्रुवशौनक	य	मा

अथ रायकवालब्राह्मणोत्पत्तिप्रकरणम् ॥ ३४ ॥

अथ रायकवाल ब्राह्मणोत्पत्तिसारमाह हरिकृष्णः ॥ सत्यपुंगवनामा वै ऋषिरासीत्पुरा महान् ॥ द्विनंद द्वादशशतै १२९२-र्मुनिशिष्यैः समन्वितः ॥ १॥ नंद्यावर्तें वसन् पूर्वं स्वकर्मपरिनिष्ठितः ॥ वेदवेदांगशास्त्रज्ञो यज्ञकर्मविशारदः ॥ २ ॥ गुर्जरे विषये ग्रामं कठोदरमिति स्मृतम् ॥ तत्र स्थितो महीपालः यज्ञार्थे चाकरोन्मतिम् ॥ ३ ॥ यज्ञं कारयिता को वा ब्राह्मणो मे मिलिष्यति ॥ इति चिंतातुरे राज्ञि सेवको वाक्यमब्रवीत् ॥ ४ ॥ नंद्यावर्तें महायोगी सर्वविद्याविशारदः ॥ सत्य पुंगवनामा वै ऋषिरस्ति तमाह्वय ॥५॥ मुनेरानयने चाराः प्रेषिताश्च महीभृता ॥ अष्टादश गोत्रयुतैर्मुनिशिष्यैः सम-

अब रायकवाल ब्राह्मणोंकी उत्पत्ति कहते हैं पूर्वमें सत्यपुंगवनाम करके बडे ऋषी होतेभये वह मुनि बारहसौ ब्यानवे १२९२ शिष्योंके साथ वर्तमान ॥ १ ॥ नंद्यावर्त्तमें वास करते हुए वे ऋषि बडे स्वकर्मनिष्ठ वेदवेदांग शास्त्रोंको जाननेवाले और यज्ञकर्ममें विशारद थे ॥ २ ॥ एक समयमें गुजरातदेशमें वह मुनि कठोदरनामकगांव है वहांके राजाने यज्ञ करनेकी इच्छा कियी ॥ ३ ॥ परंतु उत्तम यज्ञ करानेवाला ब्राह्मण कहां मिलेगा ऐसी चिंता करनेलगे इतनेमें सेवक कहनेलगे ॥ ४ ॥ नंद्यावर्तमें सब विद्याओंमें निपुण महायोगी एक सत्यपुंगव नाम करके ऋषि रहते हैं उनको बुलाओ ॥ ५ ॥ तब राजाने मुनि को बुलानेके वास्ते दासोंको भेजा तब सत्यपुंगव ऋषिने राजदूतोंका वचन सुनके अठारह गोत्रोंके

न्वितः ॥ ६ ॥ आगतो मुनिराट् तत्र उपचारैः समावृतः ॥ यज्ञं च कारयामास विधिना बहुदक्षिणम् ॥ ७ ॥ यज्ञांतेऽवभृथं स्नात्वा प्रसन्नोऽभूदृनृपोत्तमः ॥ गुरवे च स शिष्याय मुदाऽदाद्ग्रामपंचकम् ॥ ८ ॥ कठोदरं च प्रथमं कौबेरस्थलमुत्तमम् ॥ तृतीयं कणभाराढ्यं कुजाडाख्यं चतुर्थकम् ॥ ९ ॥ कल्लोलं पंचमं दत्त्वा वासयामास तान्द्विजान् ॥ तत्र स्थित्वा स मुनिराट् लक्ष्म्याराधनतत्परः ॥ १० ॥ एवं बहु गते काले विश्रांतः श्रमकर्षितः ॥ कस्मिंश्चिद्दिवसे योगी निद्रावशमुपागतः ॥ ११ ॥ तदागत्य महालक्ष्मीर्वरं ब्रूहीति चाब्रवीत् ॥ न श्रुतं मुनिना तत्र सापि चांतर्हिता क्षणात् ॥ १२ ॥ देव्यामंतर्हितायां तु मुनिर्जागृतिमाप्तवान् ॥ क्व रायश्च क्व रायश्चेत्येवं शिष्यान् पप्रच्छ ह ॥ १३ ॥ शिष्या ऊचुर्न जानीमो रायः कुत्र गतो गुरो ॥ मुनिस्तु क्रोधसंयुक्तस्तान्शशाप द्विजोत्तमान् ॥ १४ ॥ रायश्चात्रगतः सर्वैर्युष्माभिः काममोहितैः ॥

बारहसौ बानवे १२९२ शिष्योंकूं साथ लेके राजाके दूतसहित कठोदर गांवमें आयके राजाको विधिसे यज्ञ करवाया जिसमें बहुत दक्षिणा दिये ॥ ६ ॥ ७ ॥ यज्ञसमाप्तिमें अवभृथस्नान करके प्रसन्न भया। पीछे राजाने अपने गुरुकूं ९ गांव दान दिये ॥ ७ ॥ कठोर १ कुबेरथली २ कणभार ३ कुजाड ४ ॥ ९ ॥ ककोले ५ ऐसे पांच गांवोंका दान करके सब शिष्योंकूं गुरुके वहां निवासकरता भया।पीछे सत्यंपुगव ऋषि कठोदरगांवमें रहके श्रीमहालक्ष्मीका आराधना करनेलगे ॥ १० । लक्ष्मीका अनुष्ठान करते २ बहुत दिन भये एकादिन श्रमसे थकेहुए सत्यपुंगव ऋषि आसनके ऊपर बैठे जपकरते थे और श्रमसे निद्रावश भये ॥ ११ ॥ इतनेमें महालक्ष्मी वहां आयके वरं ब्रूहि वरं ब्रूहि ऐसा कहनेलगी परंतु निद्रामें मुनिने सुना नहीं और लक्ष्मी तो उसी बखत अंतर्धान भई तब ऋषि जागृत होयके रायः क्व रायःक्वरायः कहते धनका नाम है इसवास्ते शिष्योंको पूछनेलगे कि धन कहां गया ॥ १३ ॥ शिष्य कहनेलगे हे गुरो! राय लक्ष्मी कहां गई सो हम जानते नहीं हैं। तब ऋषिकूं क्रोध आया सो शिष्यकूं शाप देतेभये ॥ १४ ॥ हे शिष्यो ! लक्ष्मी यहां आई

न दृष्टो न श्रुतश्चापि न चित्ते चावधारितः ॥ १५ ॥
अद्य प्रभृति तस्माद्वै यूयं सर्वे द्विजोत्तमाः ॥ रैक्यवासाश्च
नाम्ना वै भुवि विख्यातकीर्त्तयः ॥ १६ ॥ रायः क्वेति स्थल-
स्यैवं नामैतत्परिकीर्तितम् ॥ तत्र वासकृतस्तस्माद्रैक्यवासेति
नामकम् ॥ १७ ॥ एषां गोत्रादिकं सर्वं प्रवक्ष्यामि विशेषतः॥
श्रुत्वा द्विजमुखादेतद्धरिकृष्णेन निर्मितम् ॥ १८ ॥ कस्य
चित्पद्यानि ॥ कुत्सोवत्सवसिष्ठगालवभरद्वाजोपमन्य्वादयः
कृष्णः काश्यपशांडिलोऽत्रिकुशिकाः पाराशरो गौतमः ॥ गर्गो-
द्दालककौशिकांगिरसकाः कात्यायनोऽष्टादश गोत्रेशाऋष-
योऽत्ररैक्यजकुले कुर्वंतु वो मङ्गलम् ॥ १९ ॥ आराध्या ललि-
तांबिकाकुलपतिः श्रीमूलनाथोहरःस्थानं चैव पुरा कठोदरपुरं
चैषां यजुर्वेदनाम् ॥ भक्तिज्ञानविरक्तिशास्त्रनिपुणा माध्यंदि-
नीशाखिनोरैक्यास्ते भुवि पुण्यकर्मकुशलाः कुर्वंतु वो मंग-
लम् ॥ २० ॥ एषामेकसहस्रवर्षसमये नैमित्तिके कर्मणि
क्लेशेनैव विभागकोत्र पतितो ज्येष्ठः कनिष्ठाभिधः ॥ तुष्टा श्री
ललिता तथा च भगवान् ज्वालाकपाली शिवे राजा राम-

और तुमने काम मोहित होके न देखा न शब्द सुना न उनोंका लक्षण चित्तमें गये ॥ १५ ॥ इसवास्ते आजसे तुम सब ब्राह्मण मेरे शिष्यमात्र रैक्यवास-नामसे पृथ्वीमें विख्यात हो ॥ १६ ॥ रायः कहते लक्ष्मी क्व कहते कौनसे स्थलमें है ऐसा स्थलका नाम है वहां तुमने निवास किया है इसवास्ते रैक्यवासनाम है ॥ ॥ १७ ॥ यह रायकवाल ब्राह्मणोंके गोत्रादिक कहता हूं और यह पूर्वोक्त वृत्तांत ब्राह्मणके मुखसे श्रवण करके हरिकृष्णने वर्णन किया ॥ १८ ॥ अब रायकवाल ब्राह्मणोंके गोत्र कहते हैं कुत्स १ वत्स २ वसिष्ठ ३ गालव ४ भरद्वाज ५ उपमन्यव ६ कृष्णात्रेय ७ कश्यप ८ शांडिल्य ९ अग्नि १० कुशिक ११ पाराशर १२ गौतम १३ गर्ग १४ उद्दालक १५ कौशिक १६ आंगिरस १७ कात्यायन १८ यह अठारह गोत्र रायकवालमें हैं ॥ १९ ॥ इनोंकी कुलदेवी ललितांबिका है और मूलनाथ शिव हैं स्थान कठोदर पुर है सबोंकी यजुर्वेद माध्यंदिनी शाखा है कोकिलमतकूं मानते हैं ॥ २० ॥ यह रायकवाल ब्राह्मणोंके

मते निवासमकरोज्ज्येष्ठः कनिष्ठस्तथा ॥ २१ ॥ श्रीसंवद्गत-
विक्रमार्कसमये चैकोनविंशच्छते वर्षे त्रिशतिकाधिके १९३०
तृतयके मेषे रवौ माधवे ॥ कृष्णे युग्मतिथौ द्वयोः सुमिलनं
देवीप्रसादेन ॥ वै राजारामप्रयत्नतो मयपुरे जातं शतं
संमतात् ॥ २२ ॥

इति श्रीब्राह्मणोत्पत्तिमार्तण्डाध्याये रायकवालब्राह्मणोत्पत्तिवर्णनं नाम प्रकरणम् ॥ ३४ ॥

पश्चद्राविडमध्ये गुर्जरसंप्रदायः ॥ आदितः श्लोकसंख्याः ॥ ३७६८ ॥

हजार वर्षके शुमारमें कुछ कर्मनिमित्तसे ज्ञातिमें २ भाग भये सो एक तड बडा एक तड छोटा ॥ २१ ॥ फिर संवत् १९३० के मेषका सूर्यवैशाख शुक्लपक्षमें द्वितीयाके दिन ललितांबिकाके अनुग्रहसे राजारामने दोनों तडवाले इकठे किये ॥ २१ ॥

इति रायकवालब्राह्मणोत्पत्तिप्रकरण ॥ ३४ ॥

अथ रोयडवालादिब्राह्मणोत्पत्तिप्रकरणम् ॥ ३५ ॥

अथरोयडादिब्राह्मणोत्पत्तिमाह ॥ हरिकृष्णः॥ रोयडाख्यब्राह्म-
णानां भेदं वक्ष्यामि सांप्रतम् ॥ पुरौदीच्यसहस्राणां स्थितिः
सिद्धपुरे ह्यभूत् ॥ १ ॥ तेभ्यः केचन विप्राश्च मरुदेशे गताः
किल ॥ तत्र ग्रामाद्वयं मुख्यं रोयडावजवाणयम् ॥ २ ॥
चिरकालं तत्र वासः कृतस्तैश्चद्विजोत्तमैः ॥ रोयडग्राममध्ये
वै निवासश्च कृतः पुरा ॥ ३ ॥ रोडवासब्राह्मणास्ते जाताग्रा-
मस्य नामतः ॥ कृषिकर्मरताः केचिच्छास्त्रमार्गरताः परे ॥ ४ ॥

अब रोयडा ब्राह्मण नापल ब्राह्मण बोरसदा ब्राह्मण हरसोरा ब्राह्मण गोरवाल वावीसा ब्राह्मण गारुड ब्राह्मण ऐसे ब्राह्मणोंकी उत्पत्ति कहतेहैं उसमें पहिले रोडवाल ब्राह्मणोंका भेद कहताहूं पूर्वी औदीच्य ब्राह्मणोंकी प्रतिष्ठा सिद्धपुर क्षेत्रमें भई ॥ १ ॥ उसमेंसे कितनेक ब्राह्मण मारवाड देशमें चलेगये पीछे मारवाड देशमें जायके रोयडा करके एकगांव दूसरा वजवाणु करके गांव ॥२॥ ऐसे दोगांवमें जायके वो ब्राह्मणोंने बहुतकालपर्यंत निवास किया ॥३॥ तब वे रोयडा गांवमें रहे उस करके रोडवाल

कुलदेवी स्मृता तेषां राजराजेश्वरीति च ॥ भोजनं बहुधा सर्वैः कन्यादानं स्ववर्गके ॥ ५ ॥ एषां ज्ञतिर्गुर्जरेपि वर्तते ग्रामपंचके ॥ अथ नापलब्राह्मणबोरसदाब्राह्मणोत्पत्तिमाह ॥ नापलब्राह्मणा ये च द्विजा बोरसदाभिधाः ॥६॥ तेषामुत्पत्तिभेदं वै प्रवक्ष्यामि शृणुष्व ह ॥ औदीच्यज्ञातिमध्यस्थौ पुरा द्विजकुमारकौ ॥ ७ ॥ सर्वविद्यासु कुशलौ पंडितौ तौ बभूवतुः ॥ गुर्जरे विषये कश्चिद्राजा परमधार्मिकः ॥८॥ तस्यैव नियमश्चासीत्तच्छृणुष्व वदाम्यहम् ॥ ब्राह्मणः पंडितः कश्चिद्भार्यया सह चागतः ॥ ९ ॥ तस्मै ग्रामः प्रदातव्यो निश्चयस्तस्य भूपतेः॥श्रुत्वा तन्निश्चयं राज्ञस्तौ द्वौ ब्राह्मणबालकौ ॥ १० ॥ भार्यां विना ग्रामदानं न करिष्यति भूपतिः ॥ अन्यजात्युद्भवे कन्ये द्वे गृहीत्वा सभार्यकौ ॥ ११ ॥ भूत्वा राजसभां गत्वा परीक्षां ददतुश्चिरम्॥ तयोर्विद्यां समालोऽक्य प्रसन्नाभून्नृपस्तदा ॥१२॥ ददौ बोरसदग्राममन्यस्मै नापलं तथा ॥ नवखेटक

ब्राह्मण नाम भया वे ब्राह्मण बहुत करके खेती कहतेहैं कितनेक वेदशास्त्रका अभ्यास करतेहैं ॥ ४ ॥ उनोंकी कुल देवता राजराजेश्वरी जानना उन्होंका भोजन व्यवहार गुजरातमें बडोदरा छोड इनोंके साथ होताहै कन्याविवाहसंबंध अपने रोडवालमें होताहै अन्यत्र नहीं होता ॥ ५ ॥ यह ज्ञातिहाल गुजरातमें पांचगांव--कठलाद १ सरोडा २ वाकानेर ३ मेहेमदाबाद ४ धोडासर ५ वगेरेगावोंमें है ॥ अब नापल ब्राह्मण और बोरसदे ब्राह्मणोंकी उत्पत्ति कहतेहैं ॥ ६ ॥ पूर्वी औदीच्य सहस्रब्राह्मणज्ञातिमेंके दो ब्राह्मणके छोकरे ॥ ७ ॥ सकलविद्यामें कुशल भये और बडे पंडित भये तब गुजरात देशमें एकराजा बडा धर्मात्मा था ॥ ८ ॥ उसका ऐसा नियम रहा सो मैं कहताहूं श्रवण करो जो कोई ब्राह्मण उत्तम विद्याभ्यास करके अपनी स्त्रीकूं साथ लेके राजाके पास आवे तो ॥ ९ ॥ उसकूं ग्रामका दान देना ऐसा वो राजाका निश्चय सुनके वे दोनों ब्राह्मणके छोकरे ॥ १० ॥ मनमें विचार करने लगे कि अपने विद्याकी तो परीक्षा देवेंगे परंतु स्त्रीविना राजा ग्रामदान करनेका नहीं तब दूसरे कोई अन्यज्ञातिकी दो कन्याकूं साथ लेके सभार्यसंरीखे होयके ॥११॥ राजसभामें जायके विद्याकी परीक्षा देते भये तब राजाने दोनोंकी विद्याका बल देखके ॥१२॥ एक ब्राह्मणकूं बोरसद ग्रामका दान दिया दूसरेकूं नापल नामका

संयुक्तं ततस्तौ द्वौ कुमारकौ ॥ १३ ॥ कृतकार्यौ प्रसन्नौ च स्वगृहं ययतुस्ततः ॥ कन्यां प्रत्यूचतुः स्वंस्वं गृहं गच्छ च मा चिरम् ॥१४॥ तदा द्वे कन्यके ताभ्यां प्रोचतुः कोपसंयुते॥ अस्मत्प्रतिग्रहं नो चेत्करिष्यथ तदा नृपम् ॥१५॥ गत्वाविज्ञापयामोद्य तदा दंडो महान्भवेत् ॥ न करिष्यथ त्यागं नो तदा सौख्य चिरं भवेत् ॥ १६ ॥ तयोर्वाक्यं समाकर्ण्य सुविचार्य परस्परम् ॥ पूर्ववर्गात्पृथग्जातौ स्वस्ववर्गस्य पोषकौ ॥ १७ ॥ भोजनव्यवहारश्च कन्यासंबंध एव च ॥ स्वस्ववर्गे च भवति नान्यवर्गे कदाचन ॥ १८ ॥ एवमुत्पत्तिभेदश्च मया प्रोक्तः पुरातनः ॥ हारिश्चंद्रपुरस्थानामथ वक्ष्ये कथानकम् ॥ १९ ॥ गुर्जर विषये चास्ति हरिश्चंद्रपुरं महत् ॥ तत्रस्थेन नृपेणैव

ग्राम दिया नापल ग्रामके ताबेमें दूसरे नवग्राम हैं नापु १बोरियु२गाना ३ मोगीर ४ नावली ५ वेमी ६ नोमेण ७ शिंगराय ८ पुरी ९ यह नवग्राम जानना दानप्रतिग्रह करे बाद दोनों ब्राह्मणके छोकरे ॥ १३ ॥ अपना कार्य सिद्ध भया प्रसन्न भये अपने घरकूं आये पीछे वे दोनों कन्याकूं कहने लगे कि तुम दोनों अपने अपने घरकूं चली जाव देर करो मत ॥१४॥ तब दोनों कन्या क्रोधायमान होयके कहती हैं हे ब्राह्मण। जो तुमने हमारा प्रतिग्रह न किया तो राजाके पास॥१५॥ जायके अभी जो तुम्हारा कपट वृत्तांत कहदें तो तुमकूं बडा दंड होवेगा और जो हमकूं न छोडोगे तो तुमकूं सुख बहुत कालपर्यंत होवेगा ॥ ॥ १६ ॥ ऐसा दो कन्याका वचन सुनते दोनों ब्राह्मणोंने आपसमें दूर विचार उत्तम करके वे अन्यजातिकी कन्याका प्रतिग्रह किया उस करके पूर्व जो अपनी जातिथी उस वर्गसे बहिष्कृत होगये पीछे कितनेक इष्ट मित्र संबंधीको बोरसद वाले ब्राह्मणोंने पोषण किया वे बारसदे ब्राह्मण भये और नापलगाँवके अधिपतिने अपने इष्टमित्र संबंधीका पोषण किया इस वास्ते वे नापल ब्राह्मण भये यह सब दोनों यजुर्वेदी माध्यंदिनी शाखाके हैं ॥ १७ ॥ इनोंका भोजन व्यवहार कन्या व्यवहार अपने अपने जथेमें होता है अन्यत्र नहीं होताहै ॥ १८ ॥ ऐसा यह प्राचीन भेद मैंने कहा अब हरसोले ब्राह्मणोंकी कथा कहताहूं ॥ १९ ॥ गुजरात देशमें हरिश्चंद्रपुरी करके एक गाँव है उसको हालमें हरसोला करके कहते हैं हरसोलग्राम अमदाबादसे ईशान दिशामें २२ बावीस कोसके ऊपर है कोई ऐसा कहते हैं कि सामलाजी जहां विराजतेहैं वो हरिश्चंद्रपुरी है

कृतो यज्ञः सदक्षिणः ॥ २० ॥ ऋत्विजस्तत्र ये जातास्तेभ्यो ग्रामं ददौ नृपः ॥ सेवार्थं वणिजो वैश्यान्स्थापयामास प्रेमतः ॥ २१ ॥ ग्रामनाम्ना च विख्याता ह्यभवन् वणिजस्तथा ॥ ब्राह्मणा ग्रामनाम्ना च वेदशास्त्रविशारदाः ॥ २२ ॥ षड्गोत्राणि ब्राह्मणानां मुद्गलः कौशिकस्तथा ॥ भारद्वाजश्च शांडिल्यः पाराशरस्तथाऽपरः ॥ २३ ॥ कुलदेवी स्मृता चैषां नाम्ना वै सर्वमंगला ॥ अष्टादशभुजा दवी तत्राद्यापि हि दृश्यते ॥२४॥ मालियाणादिगोत्राणि वणिजां द्वादशैव हि ॥ गांधिमेहेताशाहाद्याश्च प्रत्येकमवटंककम् ॥ २५ ॥ एषां ज्ञातिसमूहस्तु सांप्रतं वर्तते बहुः ॥ सूर्यादिषु पुरेष्वेव भुवि प्रख्यातकीर्तयः ॥ २६ ॥ गोरवालब्राह्मणानामुत्पत्तिं प्रवदाम्यहम् ॥ उदेपुरनृपेंद्रस्तु कस्मिंश्चित्समये पुरा ॥२७॥ विप्रानोदीचसाहस्रान्समानीय स्वके पुरे ॥ यज्ञं कृत्वा विशेषेण ग्रामदानं

इसका मुख्य प्रमाण स्कंदपुराणोक्त रुद्रगया माहात्म्यमेंदेखना अस्तु वो हरिश्चंद्र नगरीमें रहनेवाले राजाने यज्ञ किया ॥२०॥ तब यज्ञमें जो ऋत्विज भये उनोंकूं राजाने वो पुर दान किया और ब्राह्मणोंकी सेवा करनेके वास्ते वैश्य बनियेस्थापन किये बडे हर्ष प्रेमसे ॥२१॥ तब वे बनिये गांवकेनामसे हरसोले बानिये विख्यात भये और ब्राह्मण भी हरसोले नामसे विख्यात भये ॥ २२ ॥ ब्राह्मणके छगोत्रहैं मुद्गल १ कौशिक २ भारद्वाज३ शांडिल्य ४ पाराशर ५ आदि एक और है ॥ २३ ॥ इनोंको कुलदेवी सर्वमंगलानाम करके अठारह जिनके हाथहैं ऐसी प्रत्यक्षअभी सामलाजीमें विराजमान हैं दर्शन दीख पडता है ॥२४॥ और बनियेंके मालियाणु १ मोरियाणु २ शशियाणु ३ शियाणु ४ गांदियाणु ५ गजेंद्र ६ यक्षाणु ७पीपलाणु ८ कश्याणु ९ आदिलेके बारह गोत्रहैं गांधि १ मेहेता २ शाहा ३आदिलेके प्रत्येक गोत्रके अवटंक जानना ॥२५॥ यह हरसोले ब्राह्मण और बनिये हालके समयमें १ सुरतझाडबंदर १ खानदेश २ निमाड जिल्हा ३ काशी ४ हरसोल गांव १इन गावोंमें इनका समुदाय रहताहै प्रख्यातहै॥२६॥अब गोरवाल बावीसै ब्राह्मणोंकी उत्पत्ति कहतेहैं पूर्व उदयपुरके राजाने॥२७॥औदीच्य सहस्रब्राह्मणोंकूंअपने गांवमें बुलायके अति उत्तम

चकार ह ॥२८॥ द्वाविंशतिलघुग्रामैः सहितं गोलसंज्ञकम् ॥ ग्रामं ददौ द्विजेंद्रेभ्यो गोहिण्यादिकं तथा ॥ २९ ॥ ततस्ते ब्राह्मणाः सर्वे गोलादिग्रामवासिनः ॥ बभूवुस्तेन ते जाता गोरवाला द्विजातयः ॥ ३० ॥ द्वाविंशतिग्रामवासा द्वाविंशास्ते प्रकीर्तिताः ॥ अथ गरुडगलियाब्राह्मणोत्पत्तिमाह ॥ गुर्जरे च प्रसिद्धा ये गारुडा ब्राह्मणाधमाः ॥ ३१ ॥ नाममात्रब्राह्मणाश्चह्यत्यजानां पुरोहिताः ॥ कंठे सूत्रं करे मालामुष्णीषे तिथिपत्रकम् ॥ ३२ ॥ धारयंति विशेषेण धर्मबाह्या न संशयः ॥ अस्पृश्यास्ते च विज्ञेयाः किमन्यत्कथयामि वः ॥ ३३ ॥

इति श्रीब्राह्मणोत्पत्तिमार्तंडाध्याये षड्विधब्राह्मणोत्पत्ति वर्णनं नाम प्रकरणम् ॥ ३५ ॥

इति पूर्वपंचब्राह्मणानां पंचद्रविडमध्येगुर्जरसंप्रदायः शूद्रसंप्रदायः ॥ आदितःपद्यसंख्याः ॥ ३८०१ ॥

यज्ञ किया पीछे विशेष करके ग्रामदान करताभया ॥ २८ ॥ वे ब्राह्मणोंकूं बावीस गांव सहवर्तमान गोल ग्रामका दान दिया और गौदान सुवर्णदानदिया ॥ २९ ॥ तब वे सब ब्राह्मण गोलगांव आदि लेके बावीस गांवमें रहे इस वास्ते उनोंकूं बावीस ब्राह्मण भी कहतेहैं अब गरुडगलिये ब्राह्मणकी उत्पत्ति कहते हैं गुजरातप्रांतमें प्रसिद्ध गारुड उर्फ (गरुड गलिये) ब्राह्मण जो हैं वे अधम हैं॥३०॥३१॥ नाममात्र ब्राह्मण हैं चांडाल टेडे जो हैं उनोंके घरका पुरोहितपणा सराधविवाहादिक कर्म कराते हैं कंठमें यज्ञोपवीत हाथमें माला पगडीमें तिथिग्रहदेखनेका पंचाग रखतेहैं ॥३२॥ परंतु यह ब्राह्मण ब्राह्मण धर्मसे बारहैं स्पर्श करनेकूं योग्य नहीं हैं ज्यादा तुमकूं क्या कहूं ॥ ३३ ॥

इति श्रीब्राह्मणोत्पत्तिमार्तंडभाषामें रोयडाब्राह्मण १नापलब्राह्मण२बोरसदाब्राह्मण३हरसोला ब्राह्मण ४ गोरवालबावीसब्राह्मण ५ गरुडगलिया ब्राह्मण ६ वर्णन प्रकरण ॥ ३५ ॥

अथ भार्गवब्राह्मणोत्पत्तिप्रकरणम् ३६७.

अथ भार्गवब्राह्मणोत्पत्तिमाह । उक्तं च वायुप्रोक्तरेवाखंड-शिव उवाच । अतः परं प्रवक्ष्यामि भृगुतीर्थमनुत्तमम् ॥ दशाश्वमेधतीर्थाद्वै तदशीतिक्रमांतरे ॥ १ ॥ भृगुर्नाम महान्देवि ब्राह्मणो मानसः सुतः ॥ रेवयाश्चोत्तरे तीरे चचार विपुलं तपः ॥ २ ॥ नंदिनच्छलयोगेन यदा क्रोधोऽभवदृषेः ॥ तदोवाच शिवः साक्षादृषिं प्रति सदाशिवः ॥ ३ ॥ भोभो भृगो द्विज-श्रेष्ठ क्रोधस्ते न समंगतः ॥ यस्मात्तस्मादिदं वत्स क्रोधस्थानं भविष्यति ॥ ४ ॥ वरं वृणीष्वाभिमतं यत्ते मनसि वर्तते ॥ भृगुरुवाच ॥ प्रसन्नो यदि देवेश यदि देयो वरो मम ॥ ५ ॥ सिद्धक्षेत्रमिदं स्थानं मम नाम्ना भवत्विति ॥ शिव उवाच ॥ श्रियायुतमिदं पूर्वं किं न ज्ञातं त्वया द्विज ॥ ६ ॥ अनुमान्य श्रियं देवीं यथा तन्मन्यते भवान् ॥ करोतु तदभिप्रेतं त्वत्कृतं न तदन्यथा ॥ ७ ॥ मार्कण्डेय उवाच ॥ एवमुक्त्वा गते देवे स्नात्वाऽऽगच्छद् भृगुः श्रियम्॥ उवाच परमं वाक्यं कन्ये ते रोचते यदि ॥ ८॥ त्वयावृते महाक्षेत्रे स्वस्थानं च करोम्य-

अब भार्गव ब्राह्मणोंकी उत्पत्ति कहते हैं शिव कहते हैं हे पार्वती! इस उपरांत भृगुतीर्थका माहात्म्य कहता हूं दशाश्वमेध तीर्थसे ऐसी क्रमके आगे ॥ १ ॥ ब्रह्मपुत्र भृगुने रेवाजीके उत्तर बाजू बडा तप किया ॥ २ ॥ नंदीके छल करनेसे जब भृगुकूं क्रोध भया तब शिव कहते हैं ॥ ३ ॥ हे भृगुऋषि! तुम्हारा क्रोध अभी शांत नहीं भया इसवास्ते इस जग्गेमें क्रोधस्थान होवेगा ॥ ४ ॥ जो इच्छित होवे वो वरदान मांगो भृगु कहते हैं हे शिव! तुम जो प्रसन्न भये हो और वरदान देते हो तो ॥ ५ ॥ जहाँ मैंने तप किया है वो स्थान सिद्धरूप मेरे नामसे विख्यात हो । शिव कहतेहैं हेभृगु! यह स्थान पूर्वमें लक्ष्मीका है यह तुमकूं मालूम नहीं है क्या ?॥६॥इसवास्ते अनुमत लेके जैसा ध्यानमें आवे वैसा करो लक्ष्मीका मत लिये विना करो मत ॥७॥ मार्कंडेय कहते हैं ऐसा कहके शिवके गये बाद भृगुऋषि स्नान करके लक्ष्मीके पास आयके कहते हैं हे कन्ये! तेरी इच्छा होवे तो॥८॥तेरा जो यह क्षेत्र है यहां मैं अपना स्थान

हम् ॥ इत्युक्त्वा च श्रिया साकं कूर्मं संप्रार्थ्य यत्नतः ॥९॥ नंदने वत्सरे माघे पंचम्यां शुक्लपक्षके ॥ शस्ते तथोत्तरायोगे कुंभस्थे च नृपोत्तम ॥ १० ॥ रेवाया उत्तरे कूले कूर्मपृष्ठे महत्स्थलम् ॥ विचिंत्य विश्वकर्माणं चकार मुदितो भृगुः ॥ ॥ ११ ॥ कूर्मपृष्ठे स्थितं यस्माद् भृगुकच्छमिति स्मृतम् ॥ततः कालेन महता कस्मिंश्चित्कारणांतरे ॥ १२ ॥ देवलोकं जगामाशु लक्ष्मीर्ऋषिसमागमे ॥ समर्प्य कुंचिकां तालं भृगवे ब्रह्मवादिने ॥ १३ ॥ स्थानं मे पालयस्वेति तातमुक्त्वा जगाम सा ॥ देवकार्याण्यनेकानि कृत्वा श्रीः पुनरागता ॥ १४ ॥ भृगुकच्छं महापुण्यं कोटितीर्थसमन्वितम् ॥ ययाचे कुंचिका तालं स्वगृहं स परिच्छदम् ॥ १५ ॥ यदा तदा भृगुः पार्थ तां मिथ्यैवावदन्मुनिः ॥ एवं विवादः संजातो गरीयांस्तु गरीयसोः ॥ १६ ॥ ममैव वै ममैवेति न ते स्थानं न ते इति ॥ एवं कालेन महता भृगुः परममन्युमान् ॥ १७ ॥ चातुर्विद्यान् प्रमाणार्थं चकार महतीं गिराम् भृगुरुवाच ॥

करताहूँ ऐसा कहके लक्ष्मीकूं साथलेके कूर्मकी प्रार्थना करके ॥ ९ ॥ नंदन संवत्सर माघ शुक्ल पंचमीके दिन उत्तराभाद्रपदा नक्षत्रका चंद्र कुंभका सूर्य उसादिन ॥ १० ॥ रेवाजीके उत्तर तटके ऊपर कूर्मकी पीठ ऊपर विश्वकर्माकूं बुलायके बडा स्थल बनाया ॥ ११ ॥ कूर्मके पीठ ऊपर भृगुने स्थान निर्माण किया इसवास्ते भृगुकच्छ नाम विख्यात भया पीछे बहुत कालगये बाद कोई समयमें ॥ १२ ॥ लक्ष्मी अपने पिता भृगुकूं स्थानकी कुंजी ताला सुपुर्द करके देवलोकमें जाते बखत ॥ १३ ॥ कहती हैं हे पिता ! यह स्थान मेरा संभालो ऐसा कहके देवलोकमें जायके अनेक कार्य करके पुनः अपने स्थानपर आयके पितासे स्थानकी कुंजी ताला मांगने लगी ॥ १४ ॥ १५ ॥ तब हे युधिष्ठिर ! भृगुकन्याका वचन सुनके मिथ्याभाषण करने लगे दोनोंका बडा विवाद चला भृगुकहतेहैं स्थान मेराहै तेरा नहींहै लक्ष्मी कहती है स्थान मेराहै तेरा नहींहै ऐसा कहते कहते बहुतकाल गया पीछे भृगु परम क्रोधी उन्होंने ॥१६॥१७॥ चातुर्वेदी ब्राह्मणोंकूं सत्य कौनहै सो प्रमाण करनेके वास्ते बुलायके कहाकि हेकन्यके!

प्रमाणं मम ते तात चातुर्विद्या न संशयः ॥ १८ ॥ चातु-
र्विद्या द्विजाः सर्वे यथा जानंति पृच्छ तान् ॥ श्रीरुवाच
प्रमाणं मम ते तात चातुर्विद्या न संशयः ॥ १९ ॥ मदीयं वा
त्वदीयं वा कथयंतु द्विजोत्तमाः ॥ ततः सर्वेऽपि ते तत्र संप्रधार्य
परस्परम् ॥ २० ॥ द्विजाः अपि कलिं दृष्ट्वा ब्राह्मणा ह्यनृतं
वचः ॥ अष्टादश सहस्राणि नावोचन् किंचिदुत्तरम् ॥ २१ ॥
अष्टादशसहस्रश्च भृगो कोपभयान्नृप ॥ उक्तं तालकहस्तो
यस्तस्येदं स्थानमुत्तमम् ॥ २२ ॥ एतच्छ्रुत्वा तु सा दवी
नगरं नैगमैः सह ॥ क्रोधेन महताक्रांता शशाप द्विजपुंगवान्
॥ २३ ॥ श्रीरुवाच ॥ यस्मात्सत्यं समुत्सृज्य लोभोपहतचे-
तसैः ॥ लुप्तं मत्स्थानमनृतैस्तस्माच्छृण्वंतु मे गिरम् ॥ २४ ॥
न भविष्यति वो विद्या धनं न पुरुषत्रयम् ॥ न द्वितीयं तथा
वेदं पठिष्यंति द्विजाः हि वः ॥ २५ ॥ गृहाणि न द्विभौमानि
नच भूतिः स्थिरा द्विजाः ॥ पक्षपातस्थिरो धर्मो नच नैश्रेयसं
कृतम् ॥ २६ ॥ दृष्ट्वा गोत्रजने किंचिल्लोभेनावृतमानसाः ॥
नच द्वैधं परित्यज्य स्वैकमत्यं भविष्यति ॥ २७ ॥

यह स्थान मेरा है या नहीं यह सब वृत्तांत चातुर्वेदी ब्राह्मण जानते हैं उन्होंकूं पूछा लक्ष्मी कहती है हे पिता ! चातुर्वेदी ब्राह्मण हमकूं भी मान्य हैं ॥१८॥१९॥ यह स्थान मेरा है या तेरा है सो कहो पिछे सब ब्राह्मण परस्पर विचार करके ॥ २० ॥ उसमेंसे अठारह हजार ब्राह्मणोंने कलहका भयजानके कोई बातका उत्तर दिया नहीं ॥ २१ ॥ और आठारह हजार दूसरे रहे उनोंने भृगुऋषिके कोपसे भयके लिये कहा कि जिसके हाथमें ताला कूची है उसका स्थान है ॥ २२ ॥ ऐसा वचन सुनते लक्ष्मी कोपायमान होयके ब्राह्मणोंको शाप देती है ॥ २३ ॥ श्री कहती है हे ब्राह्मणो ! तुमने सत्यता छोडके लोभग्रस्त होके खोटी साक्षीभरके मेरा स्थान छीन लिया इसवास्ते मेरा वचन सुनो ॥ २४ ॥ तुम्हारे तीनवंशतक धन और विद्या रहनेकी नहीं एक वेद होके दूसरे वेदमें गति होनेकी नहीं ॥२५॥घर भूमी स्थिर रहनेकी नहीं तुमने भृगुका पक्षपात किया धर्म नहीं रखा ॥ २६ ॥ और तुम्हारे सब ब्राह्मणोंमें एकचित्त होनेका नहीं ॥ २७ ॥

अद्य प्रभृति सर्वेषामहंकारो द्विजन्मनाम् ॥ न पिता पुत्रवाक्यार्थी न पुत्रः पितृवाक्यकृत् ॥२८॥ अहंकाररताः सर्वेऽप्येवमुक्त्वा दिवं ययौ ॥ गतान्दृष्ट्वा ततो देवानृषींश्चापि तपोधनान् ॥ २९ ॥ परमेष्ठी भृगुः सोथ विषादमगमत्परम् ॥ प्रसादयामास पुनः शंकरं त्रिपुरांतकम् ॥ ३० ॥ तपसा महता पार्थ ततस्तुष्टो महेश्वरः ॥ उवाच वचनं काले हर्षयन् भृगुसत्तमम् ॥ ३१ ॥ ईश्वर उवाच ॥ किं विषण्णोऽसि विप्रेंद्र किं वा संतापकारणम् ॥ मयि प्रसन्नेपि तव ब्रूह्येतत्सर्वमंजसा ॥ ३२ ॥ भृगुरुवाच ॥ शप्त्वा स्थानं द्विजांश्चापि लक्ष्मीः कोपाद्दिवं गता ॥ अयोग्यमिति मन्वानाः स्थानं देवर्षयो गताः ॥३३॥ किं करोमि क्व गच्छामि कथं मे स्थानयोगता ॥ ॥ शिव उवाच ॥ ॥ क्रोधस्थानं न संदेहस्तथान्यमपि मे शृणु ॥ ॥ ३४ ॥ अत्र स्थानसमुद्भूता अन्यतो ह्यागतास्तथा ॥ ब्राह्मणा मत्प्रसादेन भविष्यति न संशयः ॥ ३५ ॥ वेदविद्याव्रतस्नाताः सर्वशास्त्रविशारदाः ॥ मत्प्रसादाद्देवगणैः सेवितं च भविष्यति ॥३६॥ ये च भृग्वीश्वरं देवं तथा सौभाग्यसुंदरीम्॥

आजसे तुमकूं अहंकार बहुत होवेगा पिता पुत्रके वाक्यकी इच्छा करनेका नहीं और पुत्र पिताका वचन करनेका नहीं ॥ २८ ॥ ऐसा कहके स्वर्गमें चली गयी लक्ष्मीके गये बाद ॥ २९ ॥ भृगु ऋषिकूं परम खेद भया शिवका आराधान किया ॥ ३० ॥ तब शिव प्रसन्न हो के भृगुकूं कहते हैं ॥ ३१ ॥ हे भृगु ! उदास कायसे भये हो संताप कायके वास्ते करते हो मैं प्रसन्न भयाहूं जो इच्छा होवे सो कहो ॥ ३२ ॥ भृगु कहते हैं हे शिव ! लक्ष्मी मेरे स्थानकूं और ब्राह्मणोंकूं शाप देके क्रोध करके स्वर्गमें चलीगई तब स्थान अयोग्य है ऐसा जानके देवऋषि भी चलेगये॥३३॥ अब मैं क्या करूं कहाँ जाऊं मेरास्थान योग्य कैसा होवे शिव कहते हैं स्थान तो क्रोध युक्त रहेगा परंतु दूसरी बात सुनो॥३४॥ इस स्थानमें जो उत्पन्न भये ब्राह्मण हैं और अन्यस्थलसे जो आयेहुवे ब्राह्मण हैं वे मेरे अनुग्रहसे ॥३५॥ वेदशास्त्रमें कुशल होवेंगे धर्म तत्पर रहेंगे और इस स्थानमें देवगण वास करेंगे ॥३६॥जो कोई मनुष्य

पूजयिष्यंति मनुजाश्चैत्रमासे विशेषतः ॥ ३७ ॥ तेषां कार्याणि सिध्यंति शिवलोकं व्रजंति च ॥ मार्कंडेय उवाच ॥ यत्र क्षेत्रे दशाष्टौ च दुर्गास्ता दिक्ष्ववस्थिताः ॥ ३८ ॥ पालयंति सदा क्षेत्रं क्षेत्रपालास्तु षोडश ॥ स्वयंभुवस्थितास्तत्र रुद्रा रुद्रमिता नृप ॥ ३९ ॥ तथैव द्वादशादित्यास्तावंतश्च गणेश्वराः ॥ नागाश्चैवैकविंशाश्च साध्याश्च वसवस्तथा ॥ ४० ॥ एते पवित्रं क्षेत्रं पाल्यते चान्वहं नृपः ॥ ततः कतिपये काले गते स ऋषिसत्तमः ॥ ४१ ॥ तपश्चचार विपुलं भृगुर्वर्षसहस्रकम् ॥ भृगोः ख्यातां समुत्पन्ना पुरा श्रीः स्त्रीशिरोमणिः ॥ ४२ ॥ तस्या विवाहः संजातो यदा श्रीपतिना सह ॥ तदा देवर्षयः सर्वे मुनयश्च तपोधनाः ॥ ४३ ॥ कश्यपोऽत्रिर्भरद्वाजो विश्वामित्रोऽथ गौतमः ॥जमदग्निर्वसिष्ठश्च च्यवनःपैंगुरेव च ॥ ४४ ॥ असितो देवलश्चैव तथा नारदपर्वतौ ॥ मतंगश्चापि हारीतो जातूकर्ण्योऽथ बाष्कलः ॥ ४५ ॥ शाकल्यः शौनको मंगुर्मंडूकः सुरभिर्यमः ॥ ऋतुर्वेदशिराः सौम्यः शंखश्च लिखितस्तथा ॥ ४६ ॥ शतर्चनो गृत्समदः सुमंतुर्जै-

भृग्वीश्वर महादेव सौभाग्यसुंदरी देवीकूं चैत्रमासमें पूजा करेंगे तो ॥ ३७ ॥ उनोंके सब काम सिद्ध होवेंगे मार्कंडेय कहते हैं हे युधिष्ठिर ! जिस क्षेत्रमें अठारह दुर्गादेवी ॥ ३८ ॥ सोलह क्षेत्रपाल ग्यारह रुद्र ॥३९॥ बारह सूर्यमूर्ति बारह गणपति एकवीसनागमूर्ति साध्यगण वसुगण निवास कहते हैं॥४०॥ ऐसा यह स्थान पवित्र सब देवसे रक्षित है फिर कईक दिन गये बाद भृगु ऋषि ॥ ४१ ॥ हजारवर्षकी तपश्चर्या किये भृगुकी ख्याति नाम करके स्त्री हती उससे श्रीनामकी कन्या उत्पन्न भई हती ॥ ४२ ॥ उसका जब विवाह विष्णुके साथ भया उस बखत देव ऋषि मुनि बहुत आये ॥ ४३ ॥ कश्यप अत्रि भरद्वाज विश्वामित्र गौतम जमदग्नि वासिष्ठ च्यवन पैंगु ॥ ४४ ॥ असित देवल नारद पर्वत मतंग हारीत जातूकर्ण्य बाष्कल ॥ ४५ ॥ शाकल्य शौनक मंगू मंडूक सुरभि यम ऋतु वेदशिरा सौम्य शंख लिखित ॥ ४६ ॥ शतर्चन गृत्समद सुमंत जैमिनि इत्यादि अनेक ऋषि ॥ ४७ ॥ वो विवाहोत्सवमें

मिनिस्तथा ॥ इत्येव माद्या ऋषयस्तथान्येऽपि च कोटिशः ॥
॥ ४७ ॥ आगताश्चोत्सवे तत्र पुरं चासीत्सुशोभनम् ॥ ब्राह्म-
णांस्तत्र वै राजन् विवेशयितुमुद्यताः ॥ ४८ ॥ लक्ष्मीः श्री-
पतिनामानमाह चेदं वचस्तदा ॥ एतान् वै ब्राह्मणान् शिष्या-
न्भृगवादीन्नियतव्रतान् ॥ ४९ ॥ विवेशयितुमिच्छामि त्वत्प्र-
सादादिहोद्यतान् ॥ प्राजापत्यांश्चतुर्विंशत्सहस्राणि सुरेश्वर ॥
॥ ५० ॥ ब्रह्मचर्यव्रतस्थानां पदं ब्राह्मंजयैषिणाम् ॥ द्वादशैव
सहस्राणि संति वै सुरसत्तम ॥ ५१ ॥ नारदस्य वचः श्रुत्वा
देवा देवर्षयोऽपि च ॥ साधुसाध्विति मन्वाना नोचुः किंचन
किंचन ॥ ५२ ॥ श्रीस्ततस्तान्समाकार्य ब्राह्मणान् भक्तिसं-
युता ॥ शिरःप्रणम्य प्रोवाच प्रसादः क्रियतामिति ॥ ५३ ॥
षड्त्रिंशच्च सहस्राणि वैश्यानामत्र संस्थितिः ॥ विश्वकर्मकृ-
तानां च तेषु तिष्ठंतु वै द्विजा ॥ ५४ ॥ ते तथेति प्रतिज्ञाय
स्थिताः संप्रीतमानसाः ॥ ऋग्वेदादिचतुर्वेदाध्यायिनः परमो-
ज्ज्वलाः ॥ ५५ ॥ धनधान्यसमृद्धाश्च वांछितप्राप्तलक्षणाः ॥
सर्वकामोपसंपन्ना गृहक्लेशविवर्जिताः ॥ ५६ ॥ इति संस्थापि-

आये पुर शोभायमान भया है उस बखत लक्ष्मीने मनमें विचार किया कि ब्राह्म-
णोंका स्थापन करना ॥ ४८ ॥ फिर अपने पतिकूं कहती हैं हे विष्णो ! ये जो
भृगवादिक ऋषि हैं ब्राह्मण उन्होंका ॥ ४९ ॥ यहां स्थापन करनेकी इच्छा करती
हूं और चौबीस हजार प्रजापतिकूं स्थापन करना ॥ ५० ॥ और बारह हजार
ब्रह्मपदकी इच्छा करनेवाले ब्रह्मचारी हैं ॥ ५१ ॥ नारदका भी ऐसा वचन सुनके
देव ऋषि सब उत्तम मानके उत्तर कुछ न देते भये ॥ ५२ ॥ पीछे लक्ष्मीजी भक्ति
युक्त होके नम्रतासे ब्राह्मणोंकूं कहती हैं हे ब्राह्मणो ! अनुग्रह करो ॥ ५३ ॥
और छत्तीस हजार वैश्य विश्वकर्माने जो उत्पन्न किये हैं उन्होंका स्थापन करतीहूं
और अठारह हजार ब्राह्मण भी यहां रहो ॥ ५४ ॥ तब वे सब ब्राह्मण और वैश्य
तथास्तु कहके प्रसन्न चित्तसे वास करते भये चार वेदके पठन करनेवाले परम
तेजस्वी ॥ ५५ ॥ धनधान्यसे समृद्ध गृहक्लेशसे रहित ॥ ५६ ॥ ऐसे ब्राह्मणोंका स्था

तान्विप्रान्श्रीः सदा प्रत्यपालयत् ॥ गोनागोनीति सुमहत्तीर्थं तत्रैव भारत ॥ ५७ ॥ एकदा पार्वतीं रंतु वत्सो भूत्वा शिवः स्वयम् ॥ स्वपत्नीं मृगयामास तीर्थात्तीर्थं गृहाद्गृहम् ॥ ५८ ॥ गोहं नामास्य तैर्लोकैः संबोधनपदे कृतम् ॥ भंगारवमिषेणैवसुमाऽह्वानपरो हरः ॥ ५९ ॥ भ्रमन्नत्यर्थमायातो ह्यश्विनौ यत्र तेपतुः ॥ नीलरूपो महादेवः तावती वत्सिका ययौ ॥ ६० ॥ शुक्ले भाद्रपदे मासि दशम्यां संगमस्तयोः ॥ उद्वाहितौ च तीर्थेऽस्मिन् लोकैस्तैः पांडुनंदन ॥ ६१ ॥ गोना गोनीति नाम्ना तौ लोकैरुक्तं युधिष्ठिर ॥ एतस्मिन्नेव कालेतु भृगुस्तत्र समागतः ॥ ६२ ॥ प्रदक्षिणीकृत्य तयोः प्रणाममकरोद्भुवि ॥ तदा विहाय तद्रूपं शंकरो वाक्यमब्रवीत् ॥ ६३ ॥ आवयोर्यत्रसंयोगो यत्र देवः श्रियःपतिः ॥ यत्राश्विनौ भृगोः स्थानं विवाहस्तत्रशोभनः ॥ ६४ ॥ अस्मिन्मासे नभस्ये तु शुक्ले च दशमीदिने ॥ लग्ने गोधूलिके कुर्याद्विवाहं मनुजः किल ॥ ६५ ॥ विकल्पभ्रांतरहितं संशयोद्वेगवर्जितम् ॥

पन करके लक्ष्मी सर्वकाल पालन करती भई ऐसा वो भृगुक्षेत्रमें गोना गोनी नाम करके एक तीर्थ है ॥ ५७ ॥ गोना गोनी तीर्थकी उत्पत्ति कहते हैं एक दिन शिव गोवत्सका रूप लेके पार्वतीके साथ क्रीडा करनेके वास्ते भार्याकूं अनेक तीर्थोंमें ढूंढने लगे ॥ ५८ ॥ गोजातिका शब्द करते जातेहैं और पार्वतीको बुलाते हैं ॥ ५९ ॥ ऐसे फिरते फिरते जहां अश्विनीकुमार तप करतेहैं वहां आयके नीलवत्सका रूप शिवने धारण किया है वैसा वत्सीका रूप धारण करके पार्वती वहां आयीं ॥ ६० ॥ भाद्रपदशुक्लदशमीके दिन लोकोंने नीलवत्स और वत्सीका उस तीर्थमें विवाह किया वहां दोनोंका संगम हुवा ॥ ६१ ॥ उस समय लोकोंने उन दोनोंकूं गोना गोनी ऐसा कहते भये इतनेमें वहां भृगुऋषि आये॥ ६२ ॥दोनोंकूं प्रदक्षिणा करके प्रणाम किया तब शिवने वत्सरूप छोडके भृगुकूं कहते हैं॥ ६३ ॥हे ऋषि ! जहां हमारा समागम हुवाहै और जहां विष्णु जहां अश्विनीकुमार जहां भृगुका स्थान वहां विवाह करना उत्तम है ॥ ६४ ॥ यह भाद्रपद शुक्लदशमीके दिन गोधूलि लेका लग्नमें मनुष्यने निश्चय करके विवाह करना॥ ६५ ॥ मनमें कल्पना भ्रांति संशय चिंता न करते अवश्य जो विवाह करेगा तो शुभ फल हो

अवश्यं क्रियमाणे तु विवाहे शुभदं भवेत् ॥ ६६ ॥ क्रोधः स्थानं न संदेहस्तथान्यदपि तच्छृणु ॥ तत्र स्थानं समुद्भूता महद्भयविवर्जिताः ॥ ६७ ॥ ब्राह्मणा मत्प्रसादेन भविष्यंति न संशयः ॥ वेदविद्याव्रतस्नातसर्वशास्त्रविशारदाः ॥ ६८ ॥ मत्प्रसादादिदं विप्र गोनागोनीतिविश्रुतम् ॥ स्थानमेतत्सुरर्षीणां मर्त्यानां च हिताय वै॥६९॥भृगुक्षेत्रे स्थिता ये तु भार्गवास्तव संज्ञया ॥ विवाहस्त्विह तैःकार्यो यस्मिन्काले ममाज्ञया ७० अस्मिँस्तीर्थे नरः स्नात्वा नभस्ये दशमीदिने ॥ प्राप्ते गोरजलग्ने वै विवाहं कारयेत्ततः ॥ ७१ ॥ शोभनं मंगलं विद्यात्तत्रैवं शास्त्रनिश्चयः ॥ गोनीयं पार्वती देवी गोना शब्दादहं शिवः ॥ ७२ ॥ ताभ्यां मेलापको यत्र विवाहस्तत्र शोभनः ॥ अहमत्र वसिष्यामि प्रिययांबिकया सह ॥ ७३ ॥ मत्प्रसादाद्द्विजश्रेष्ठ भृगुक्षेत्रं भविष्यति ॥ हरिकृष्णः ॥ अद्यापि भार्गवाः सर्वे गोनागोन्युद्भवं जलम् ॥ ७४ ॥ विवाहमध्ये चानीय तेन कुर्वंति पूजनम् ॥ दशाविसाप्रभेदश्च येषां मध्येऽस्ति सांप्र-

वेगा ॥ ६६ ॥ इन स्थानमें क्रोध बहुत रहेगा परंतु इस स्थानमें जो उत्पन्न भये हैं महाभय वर्जित हैं ॥ ६७ ॥ मेरे अनुग्रहसे ब्राह्मण वेद शास्त्र व्रत स्नातक धर्ममें कुशल होवेंगे ॥ ६८ ॥ और मेरे अनुग्रहसे सब लोकोंके हितकारक यह स्थान गोना गोनी नामसे विख्यात होवेगा ॥ ६९ ॥ भृगुक्षेत्रमें जो ब्राह्मण रहते हैं वे सब तुम्हारे नामसे (भार्गव ब्राह्मण ऐसे नामसे) विख्यात हों और उन्होंने यह गोनागोनी तीर्थमें अवश्य पूर्वोक्त समयमें मेरी आज्ञासे विवाह करना ॥ ७० ॥ इस तीर्थमें स्नान करके भाद्रपदशुक्ल दशमीके दिन गोरजलग्नमें विवाह करें ॥ ७१ ॥ तो मंगल शुभफल जानना ऐसा शास्त्रका निश्चय है गोनी पार्वती है गोना शब्दसे मैं हूं ॥ ७२ ॥ दोनोंका जहां मिलाप भयाहै वहां विवाह शुभ जानना मैं अंबिका सह वर्तमान यहां निवास करताहूं ॥७३॥ मेरे अनुग्रहसे यह सब भृगुक्षेत्र होवेगा अभीतक भार्गव ब्राह्मण गोना गोनी तीर्थका जल ॥७४॥ लायके विवाहमें पूजनादिक करते हैं और दशा बीसा भेद इन्होंमें है॥७५॥

तम् ॥ ७५ ॥ कामलेजपुरे चास्ति भार्गवाणां समूहकः ॥ तेषां भोजनसंबंधः कन्यासंबंध एव च ॥ ७६ ॥ न क्षेत्रस्थद्विजैः साकं भवत्येव कदाचन ॥ क्षेत्रस्थिता द्विजाः सर्वे स्वधर्मपरिनिष्ठिताः ॥ ७७ ॥

इति श्रीब्रा० भार्गवब्राह्मणोत्पत्तिवर्णनं नाम प्रकरणम् ॥ ३६ ॥

इति पंचद्रविडमध्ये गुर्जरसंप्रदायः ॥ आदितः श्लोकसंख्याः ॥ ३८७८ ॥

कामलेज गांवमें जो भार्गवका जथाहै वे स्वधर्ममें आलस्य बहुत रखते हैं उसके लिये उन्होंका भोजनसंबंध कन्यासंबंध ॥ ७६ ॥ भृगुक्षेत्रस्थ ब्राह्मणोंके साथ होता नहीं क्षेत्रस्थ जो ब्राह्मण हैं वे सब स्वधर्मकर्मांनिष्ठ रहते हैं ॥ ७७ ॥

इति ब्राह्म० भार्गव ब्राह्मणोंको उत्पत्ति संपूर्ण भई प्रकरण ॥ ३६ ॥

अथ तलाजियाब्राह्मणोत्पत्तिप्रकरणम् ३७.

॥ श्रीगणेशाय नमः ॥ श्रीजगदंबायै नमः ॥ श्रीषण्मुख उवाच ॥ शृण्वगस्त्य प्रवक्ष्यामि प्रभासे तीर्थमुत्तमम् ॥ रामतीर्थमिति ख्यात सर्वपापप्रणाशनम् ॥ १ ॥ पुरा त्रेतायुगे राजा रामो दशरथात्मजः ॥ निष्कंटकां चकारोर्वीं राक्षसानां वधात्प्रभुः ॥ २ ॥ तस्य राज्ये कश्चनाभूद्दुःखी न व्याधिपीडितः ॥ अल्पायुर्निर्धनो लोको रतिभुक्तिविवर्जितः ॥ ३ ॥ एवं शासति राजेन्द्रे लोकः सर्वो महासुखी ॥ पृथिव्यां सर्वजातीनां शासते वै विशेषतः ॥ ४ ॥ तत्र द्विजवरः कश्चिद-

अब तलाजीये ब्राह्मणोंकी उत्पत्ति कहतेहैं स्कंद अगस्तिमुनिकूं कहतेहैं हे अगस्ति! प्रभासक्षेत्रमें रामतीर्थ करके एक पवित्र तीर्थ है ॥ १ ॥ पूर्व त्रेतायुगमें रामचंद्रने राक्षसकूं मारके निष्कंटक पृथ्वी किये ॥२॥जिनके राज्यमे कोई रोगी या चिंतातुर या कोई अल्पायुषी या कोई निर्धन भोग सुखरहित न होता भया जिनके राज्यमें सब लोक सुखी भये ॥३॥४॥ परंतु वहां एक ब्राह्मण अपने पुत्रका अकाल मृत्यु हो

काले मृत्युमागतम् ॥ समादाय सुतं स्कंधे राजद्वारमुपागमत् ॥५॥ तत्र स्थित्वा रामनिंदां चकार मुनिपुंगवः ॥ द्विज उवाच ॥ शोचनीयासि वसुधे या त्वं पंक्तिरथाच्च्युता ॥ ६ ॥ रामहस्तमनुप्राप्ता कष्टात्कष्टतरं गता ॥ निंद्यमानं तदा रामं श्रुत्वा स्वं निंदनं हरिः ॥७॥ तमागत्याब्रवीद्रामो किं ते कष्टमभूद्द्विज ॥ द्विज उवाच ॥ हा कष्टं शृणु मे राजन् त्वयिराज्यं प्रशासति ॥८॥ अल्पायुर्मम पुत्रोऽयं दोषात्तव मृतः किल ॥ मृते पितरि स्वस्थे तु राज्यकर्तरि कस्य न ॥ ९ ॥ दुःखमेतर्हि त्वद्राज्ये पुत्रोऽल्पायुर्मृतो मम ॥ इति निंदां द्विजमुखाच्छ्रुत्वा रामोऽतिदुःखितः ॥ १० ॥ माभैरिति द्विजं प्राह तव दुःखं प्रमार्ज्म्यहम् ॥ ततो रामो रथवरमारुरोहायुधान्वितः ॥ ॥ ११ ॥ दिशमैंद्रीं जगामाशु वह्निं संयमनीं ततः ॥ नैर्ऋतीं वारुणीं वायोः सौम्येशान्यौ ततः परम् ॥ १२ ॥ तासु कुत्रापि नापश्यत्पापमूलमरिंदमः ॥ ततः सर्वां भुवं रामः पर्यभ्रामद्रथेन वै ॥ १३ ॥ विपिनं वृक्षसंकीर्णं सिंहव्याघ्रसमाकुलम् ॥ प्रविश्य तद्वनं रामो वटशाखावलंबिनम् ॥ १४ ॥

गया उसकूं कंधके ऊपर डालके राजद्वारपर आयके ॥५॥ बैठा और रामकी निंदा करनेलगा ब्राह्मण कहताहै हे पृथ्वी ! तू बडी शोककरने लायक है कारण धर्म पांवसे कमी होगई ॥६॥ और रामचंद्रके आधीनभये बडे कष्टसे कष्ट भया ऐसी अपनी निंदा श्रवण करके राम कहतेहैं॥७॥हे ब्राह्मण! तुमको क्या कष्ट है सो कहो ब्राह्मण कहताहै हे राजन्!तुम्हारे राज्यमें दोषसे मेरा पुत्र अल्पायुषी मृत्युपाया, हे राम ! तुम्हारे पिताके राज्यमें अल्पायु कोई नहीं भया ॥ ८ ॥ ९ ॥ और तुम्हारे राज्यमें मेरा पुत्र अल्पायुके होयके मृत्यु पाया ऐसी ब्राह्मणके मुखसे निंदा श्रवण करते रामचंद्र अति दुःखी होयके ॥ १० ॥ कहते हैं हे ब्राह्मण ! तुम भय पाव मत तुम्हारा दुःख दूर करता हूं ऐसा कहके आयुध लेके रथमें बैठकर ॥ ११ ॥ इंद्र अग्नि यम नैर्ऋत वरुण वायु कुबेर ईशान्य इनोंकी सब नगरी देखे ॥ १२ ॥ परंतु वो लोकमें कोई भी ठिकाने पापका लेश नहीं है पीछे रथमें बैठकर सब पृथ्वीमें फिरे ॥ १३ ॥ फिरते फिरते एक

अधोमुखं चोर्ध्वपादं धूम्रपानकरं तदा ॥ तं दृष्ट्वा विपिने
तस्मिन् रामः प्रहरतां वरः ॥ १५ ॥ तमुवाच तदा वाक्यं
कोऽसि कोऽसि ब्रवीतु नः ॥ अथोवाच तदा सोऽपि तपस्विवेष
धृङ्नरः ॥ १६ ॥ शूद्रोऽहं शंबुको नाम्ना वांछामि ब्रह्मणः
पदम् ॥ ततः क्रोधातिताम्राक्षो रामो राजीवलोचनः ॥ १७ ॥
तमुवाच तदा शूद्रं शंबुकं तापसाधमम् ॥ रे दुष्ट मां न जाना-
सि त्वादृशामंतकं प्रभुम् ॥ १८ ॥ त्वं वै जघन्यजो भूत्वा
तपस्तपसि दुश्चरम् ॥ अतस्त्वां निहनिष्यामि नान्योऽप्येवं
करिष्यति ॥ १९ ॥ एवं ब्रुवाणः खड्गेन शूद्रस्य चिच्छिदे
शिरः ॥ शम्बुकोऽथागमल्लोकं ब्रह्मणः परमात्मनः ॥ २० ॥
विमानवरमारुह्य ह्यप्सरोभिः समावृतः ॥ हत्वा रामस्ततः
शूद्रमयोध्यां प्रागमत्तदा ॥ २१ ॥ स्वपुरं प्रविशन्नेव वसिष्ठेन
निराकृतः ॥ रामोऽब्रवीत्तदा वाक्यं वसिष्ठं मुनिपुंगवम् ॥
॥ २२ ॥ अपराधं मया किं ते वद ब्रह्मर्षिपुंगव ॥ वसिष्ठ
उवाच ॥ रामराम महाबाहो तव द्वारि मृतं शिशुम् ॥ २३ ॥

अघोरवनमें आये तो वहां बडके झाडसे पावँ बँधेहुवे हैं ॥१४॥ नीचे मुख है ऊपर पावँ हैं धूम्रपान करता है ऐसा उस तपस्वीकूं देखके रामचंद्र ॥ १५ ॥ कहते हैं अरे हे तपस्वी तू कौनहै कौनहै तब वो तपस्याका धारण करनेवाला कहताहै॥१६॥ हे राम! मैं शंबुकनामका शूद्र ब्रह्मपद पानेकी इच्छा करताहूं तब इतना वचन सुनते ही रामचंद्र क्रोधसे लाल जिनके नेत्र होगये हैं ॥१७॥ वो शंबुक शूद्रकूं कहते हैं हे दुष्ट! तेरे सरीखेकूं दंड देनेवाला मैं सो मेरेकूं नहीं जानता ॥१८॥ अरे तू शूद्रजाति होयके दुश्चर तपश्चर्या करता है इसवास्ते तेरेकूं मारताहूं कि आजसे दूसरा कोई शूद्र ऐसा करे नहीं ॥१९॥ ऐसा कहके खड्गसे शूद्रका मस्तक छेदन करडाला रामहस्तसे मृत्यु होके शंबुक शूद्र तो ब्रह्मलोककूं गया ॥ २० ॥ विमानमें बैठकर अप्सरागण सह वर्तमान गया पीछे रामचंद्र शूद्रकूं मारके अयोध्यामें आये ॥ २१ ॥ पुरमें प्रवेश करती वखत वसिष्ठने निवारण किया तब राम कहते हैं ॥२२॥ हे वसिष्ठ! मैंने क्या अपराध किया है सो कहो वसिष्ठ कहते हैं हे राम! तुम्हारे राजद्वारमें ब्राह्मणका मृत बालक पडाहै ॥ २३ ॥ उसकूं सजीवन करो तब

द्विजेनानीतमाशु त्वं राजन् जीवय जीवय ॥ ततोऽपश्यन्मृतं तस्य पुत्रं वै विप्रजन्मनः ॥ २४ ॥ हस्तं दत्त्वा तच्छरीरे मृतो रामेण जीवितः ॥ ततः स्वपुत्रमादाय द्विजो राममथाब्रवीत् ॥ २५ ॥ रामराम महाराज यशस्ते प्रथितं भुवि ॥ पुत्रपौत्रैः समायुक्तो कुरु राज्यमकंटकम् ॥ २६ ॥ आशीर्भिरभिनंद्याथ रामं राजीवलोचनम् ॥ स्ववेश्मनि गतो विप्रः पुत्रमादाय जीवितम् ॥ २७ ॥ कर्तुं राज्यं ततो राम उद्योगं समुपस्थितः ॥ तं वशिष्ठोऽब्रवीद्वाक्यं राज्यं कर्तुं न चार्हसि ॥ २८ ॥ यस्मात्ते निहतो राजन् शूद्रस्तापसवेषधृक् ॥ हत्या तस्यैव शूद्रस्य जाता ते किल सर्वथा ॥ २९ ॥ ॥ श्रीराम उवाच ॥ ॥ केन कृत्वा शूद्रहत्या नश्यति द्विजपुंगव ॥ कथयस्व महाभाग तव वाक्यं करोमि तत् ॥ ३० ॥ वसिष्ठ उवाच ॥ ॥ गच्छ प्रभासं भद्रं ते तत्र तीर्थानि संति वै ॥ तत्र स्नानादिकं कृत्वा ततः शुद्धिमवाप्स्यसि ॥ ३१ ॥ वसिष्ठस्य ऋषेर्वाक्यं श्रुत्वा रामोऽतिविह्वलः ॥ स्यंदनेन तु तेनैव प्रभासं प्रति चागमत् ॥ ३२ ॥ ततः समुद्रतीरेण गच्छन्

रामने वो मृतबालककूं देखके ॥ २४ ॥ उसके शरीर ऊपर हाथ फिरातेही वो मृतबालक सजीवन भया तब पुत्रकूं लेके ब्राह्मण रामकूं कहताहै ॥ २५ ॥ हे राम ! हे महाराज ! तुम्हारा यश पृथ्वीमें प्रख्यात भया और पुत्र पौत्रादिक सह वर्तमान निष्कंटक राज्य करो ॥२६॥ ऐसा आशीर्वाद देके पुत्र लेके ब्राह्मण अपने घरकूं गया ॥२७॥ ब्राह्मणके गये बाद रामचंद्र राज्य गादी ऊपर बैठनेलगे तब वसिष्ठ कहते हैं हे राम ! तुम राज्य करनेकूं योग्य नहीं हो ॥ २८ ॥ जिसवास्ते तुमने तपस्वी शूद्रका नाश किया है वो शूद्रहत्या तुमकूं भई है ॥ २९ ॥ श्रीराम कहतेहैं हे वासिष्ठ ! क्या करनेसे शूद्रहत्या दोषसे मुक्त हो जाऊँ वो उपाय बतावो मैं करूंगा ॥ ३० ॥ वसिष्ठ कहते हैं हे राम ! प्रभासक्षेत्रमें जाव वहां अनेक तीर्थ हैं वहां स्नानादिक करनेसे शुद्धि होवेगी ॥ ३१ ॥ वसिष्ठका वाक्य श्रवण करते राम अतिविह्वल होके रथमें बैठकर प्रभासक्षेत्रमें आये ॥ ३२ ॥ समुद्रतटके

राजा स राघवः ॥ स्वरथेनाशुवेगेन देशान् दृष्ट्वा बहूनसौ ॥
॥ ३३ ॥ ततः सौराष्ट्रमगमत्तत्र देशे ददर्श सः धृष्ट नाम्ना
तु विख्यातं समुद्रस्य समीपतः ॥ ३४ ॥ तत्र कश्चित्तरालाख्यो
राक्षसो निवसन् भुवि ॥ सो वै बकानुजो मार्गे पीडयामास वै
जनान्॥३५॥ततो लोकाः समाजग्मू रुहांबां तस्य शांतये ॥
रुहो नाम्ना नृपः कश्चित्तस्मिन्देशेऽवसत्पुरा ॥ ३६ ॥ सा त-
त्कुलांबिका ख्याता रुहांबा तत्र कीर्तिता॥सा रुहाम्बा भगव-
ती प्रत्यक्षाभून्महेश्वरी ॥ ३७ ॥ लोकानुवाच रुद्राणी किं वो
दुःखमुपस्थितम् ॥ ॥ लोका ऊचुः ॥ ॥ रक्षःकश्चित्तरालाख्यो
लोकान् पीडयतेऽधुना ॥ ३८ ॥ तं हनिष्यसि मातर्नो मह-
त्सौख्यं भविष्यति ॥ ततः खड्गमुपादाय निर्गता तां दिशं
प्रति ॥३९॥ सा गत्वा रक्षसा तेन युयुधे वै दिनत्रयम् ॥ देव्या
हत तु तद्रक्षः खनित्वा स्थापितं भुवि ॥ ४० ॥ रैवतस्य गिरेः
शृंगं तस्योपरि न्यधाच्छिवा ॥ तत्र सान्यत्स्वरूपं स्वं स्था-
पयामास वै शिवा ॥ ४१ ॥ द्वारवासिनीति विख्याता भक्ताना-
मभयप्रदा ॥ आगता सा रुहांबा वै निवेशनमथात्मनः ॥४२॥

ऊपर फिरते फिरते बहुत देश देखते देखते ॥ ३३ ॥ सौराष्ट्रदेशमें आये तो वहाँ एक धृष्टनाम करके देश देखा ॥ ३४ ॥ वो देशमें तरालनामक राक्षस रहता है और रस्तेमें आनेजानेवाले लोकोंकूं पीडा करता है ॥ ३५ ॥ तब सबलोक तराल दैत्यसे भयभीत होयके रुहांवा देवीके शरण गये रुह नाम करके वो देशका पूर्वमें एक राजा था ॥ ३६ ॥ उसकी वो कुल देवता थी इसवास्ते उस दिनसे वो देवीका नाम रुहांबा प्रसिद्ध भया ॥ ३७ ॥ ऐसी वो रुहांबा देवी सब लोकोंकूं पूछती है कि तुमकूं क्या दुःख है लोक कहते हैं हे देवि ! एक तराल दैत्य है वो लोकोंकूं पीडा करता है ॥ ३८ ॥ उसकूं मारो तो हमकूं सुख होवेगा तब देवी हाथमें खड्ग लेके जहां दैत्य था ॥ ३९ ॥ वो दिशामें जायके तीनदिन पर्यंत दैत्यके साथ युद्ध किया दैत्यको मारके भूमीमें गाड दिया ॥ ४० ॥ आगे उसके ऊपर रैवत-पर्वतका शृंग स्थापन किया फिर वो शृंगके ऊपर अपना एकस्वरूप स्थापन किया ॥ ४१ ॥ उसका नाम द्वारवासिनी भक्तकूं अभय देनेवाली है फिर रुहांबा

भ्राजते सा महादेवी चतुर्वर्गफलप्रदा ॥ रैवतं शृंगमानीतं संस्थिता द्वारवासिनी ॥ ४३ ॥ तस्मिन् शृंगे वसंति स्म धीवराः पापबुद्धयः ॥ हत्वा मत्स्यान्छागराशीन्मेषराशींस्ततः परम् ॥४४॥ महिषांस्तु ततो जघ्नुस्तस्यै देव्यै समर्पयन् ॥ चतुर्थांशं तु मांसस्य राशीकृत्य तदग्रतः ॥ ४५ ॥ नौभिः समुद्रमासाद्य नावोलुंठन् सयात्रकाः ॥ तद्धनं गृहमादाय चतुर्थांशं ददुः किल ॥ ४६ ॥ ततस्तेनैव मार्गेण रामस्तं देशमागमत् ॥ आश्विनाख्यतदा मासः संप्राप्तः कालवेगतः ॥ ४७ ॥ ततो रामोऽपि तद्देशे नवरात्रमथावसत् ॥ तां देवीं पूजयामास उपवासपरो नृपः ॥ ४८ ॥ नवरात्रे ततः पूर्णे होमांते च कुमारिकाम् ॥ अभ्यर्च्य वस्त्रालंकारैर्भोजयित्वा यथाविधि ॥ ४९ ॥ विप्रेभ्यो भोजनं दत्त्वा दक्षिणांते विसर्जिताः ॥ ततो वै भूयसीं प्रादादेकं द्विजवरं प्रति ॥ ५० ॥ निष्को निष्कः प्रदातव्यो मनस्येवं व्यचारयत् ॥ ततो विप्राः समाजग्मुर्देशेभ्यो बहवस्तदा ॥ ५१ ॥ निष्कं ग्रहीतुमायाता

देवीने अपने पूर्वस्थानमें प्रवेश किया ॥ ४२ ॥ धर्म अर्थ काम मोक्ष चारफलकूं देनेवाली शोभती है अब वो रैवतशृंगके ऊपर जो द्वारवासिनी विराजती है ॥४३॥ वो शृंगके ऊपर धीवर नामकी हीन जातिके बडे पापीलोक रहते हैं उन्होंका ऐसा नेम है कि बकेरे मेंढे हेले आदि पशुकूं मारना उसका चतुर्थांश देवीकूं अर्पण करके बाकीका संसार खर्चमें लाते हैं ॥ ४४ ॥ ४५ ॥ और नावमें बैठके समुद्र-यात्रामें जो बडे बडे वाहाण झाझ आगबोट आवती जाती होवे उसकूं लूट लेना जो धन मिले सो चतुर्थांश देवीके सामने अर्पण करदेना बाकीका संसार खर्चमें लेना ॥ ४६ ॥ पीछे कईक दिन गये बाद रामचंद्र भी उसी मार्गसे वो द्वारका-वासिनीके नजीक आय पहुंचे उस वखत आश्विनमास आय पहुँचा ॥ ४७ ॥ तब रामचन्द्र नवरात्रका व्रत करके देवीकी पूजा करते भये ॥ ४८ ॥ नवरात्र पूर्णभये बाद दुर्गाका होम करके कुमारिका पूजा करके वस्त्रालंकार भोजन-देके ॥ ४९ ॥ ब्राह्मणोंकूं भोजन देके दक्षिणा देके विसर्जन किया पीछे एक एक ब्राह्मणकूं एक एक ॥ ५० ॥ निष्क निष्क सुवर्ण देना ऐसा मनमें विचार किया तब यह वृत्तांत सुनके देशदेशसे बहुत ब्राह्मण आये ॥ ५१ ॥ उसमें जो

वारिधेस्तीरमुत्तमम् ॥ धीवराणां तदा तेषां मध्ये केचित्तु
धीवराः ॥ ५२ ॥ विप्रवेषं गृहीत्वा ते भूयसीं दक्षिणां प्रति ॥
षण्मुख उवाच ॥ आयताः स्वभिद्दष्टास्ते श्रीरामेण तदा मुने
॥ ५३ ॥ निष्कास्य खङ्गं श्रीरामस्तान्हंतुं स मनो दधे ॥
द्वार्वासिनी ततो देवी दृष्ट्वा तान्हंतुमुद्यतम् ॥ ५४ ॥ त्वरया-
गत्य रामं सा बभाषे परमेश्वरी ॥ देव्युवाच ॥ राम मा
साहसं कार्षीरेते भक्ता ममैव हि ॥ ५५ ॥ हंतुं योग्या न वै
संति विप्रवेषाः खला अपि ॥ शूद्रो ह्येकस्त्वया राम हतः
क्वापि वनांतरे ॥ ५६ ॥ तद्धत्या न गता राजन्निमां हत्यां क्व
मार्जसि ॥ द्वार्वासिनीवचः श्रुत्वा रामो देवीमथाब्रवीत् ॥
॥ ५७ ॥ राम उवाच ॥ दुष्टा ह्येते कलौ प्राप्ते करिष्यंति हि
संकरम् ॥ ततो देव्यब्रवीद्राममेते ब्राह्मणवेषिनः ॥ ५८ ॥
बंदिनः समजायंतां सशिखासूत्रधारिणाः॥ ततस्ते धीवरा रामं
प्रणम्य तस्थिरेऽग्रतः ॥ ५९ ॥ रामवाक्यात्ततो जग्मुर्ग्रामं
त्रिस्तत्र संज्ञितम् ॥ तत्र यज्ञोपवीतानि गृहीतानीति तैस्तदा ॥
॥ ६० ॥ ग्रामं गत्वा द्विकर्णाख्यं कर्णवेधस्ततः कृतः ॥ तेषां

धीवरजातिके बहुत लोक थे उनमेंसे निष्कर्षकी लालसासे ॥ ५२ ॥ ब्राह्म-
णोंका वेष लेके भूयसी दक्षिणा लेनेकूं रामचंद्रके पास आये स्कंद कहते हैं हे
अगस्ति ! तब राम वे धीवर ब्राह्मणका वेश लेके आये हैं उनकूं देखके ॥ ५३ ॥
खड्ग निकालके मारने लगे इतनेमें द्वारवासिनी देवी मारनेकूं तैयार हुवे ऐसे
रामकूं देखके ॥ ५४ ॥ जलदी आयके रामकूं कहती है हे राम ! ये मेरे भक्त हैं
इनकूं मारो मत ॥ ५५ ॥ यद्यपि यह लोक दुष्ट हैं तथापि मारने योग्य नहीं हैं हे
राम ! एक शूद्र कोई वनमें तुमने मारा वो हत्या अभी भी गई नहीं है तो यह
हत्या करनेसे कैसे मुक्त होओगे ऐसा देवीका वचन सुनके राम कहते हैं ॥ ५६ ॥
॥ ५७ ॥ हे देवि ! यह लोक दुष्ट हैं कलियुगमें वर्णसंकर करेंगे तब देवी कहती है
हे राम ! यह सब ब्राह्मण वेषधारी ॥ ५८ ॥ बंदी लोक होजावें शिखायज्ञोपवीत
धारण करना तब वे सब धीवर रामकूं प्रणाम करके सामने खडे रहे ॥ ५९ ॥ पीछे
रामकी आज्ञासे वे सब ब्राह्मण त्रिनामक गाममें गये वहां जनेऊ धारण
किये ॥ ६० ॥ द्विकर्ण गांवमें जायके कर्णवेध किया उन तलाजिये ब्राह्मणोंके

गोत्राणि सप्तैव स्थापितानीश्वरेण वै ॥ ६१ ॥ अतस्त्रिस्ते च द्विकर्णे ग्रामौ भूमौ पृथां गतौ ॥ पादांगुष्ठोदके दक्षे न श्राद्धे चाधिकारिता ॥ ६२ ॥ केवलं द्विजमात्रास्ते सोपवीता ह्यमंत्रकाः ॥ तडाडजा द्विजास्ते वै जाता रामप्रसादतः ॥ ६३ ॥ संस्थाप्य तास्ततो रामो द्वार्वासिन्याः प्रसादतः ॥ प्रभासं गतवान् पश्चात् प्राच्यां स्नात्वा यथाविधि ॥ ६४ ॥ चन्द्रचूडामणिं शंभु ज्योतिर्लिंगमपूजयत् ॥ सिंधौ स्नात्वा ततो रामः कृत्वा स्वाख्याभिसंज्ञतिम् ॥ ६५ ॥ रामतीर्थं तत्र देवं रामेशमिति संज्ञतिम् ॥ स्थापयित्वात्र श्रद्धानि पितृणां स चकारह ॥६६॥ ब्राह्मणान्भोजयित्वा तु दत्त्वा तेषां च दक्षिणा ॥ वासोलंकारधेनूश्चदत्त्वादानान्यनेकशः ॥ ६७ ॥ पंचरात्रंस्थितं-तत्र प्रस्थानमकरोत्ततः ॥ रथमारुह्य स्वं रामः साकेतं जग्मिवां-स्ततः ॥६८॥भ्रातृभिर्द्विजवृद्धैश्च सहरामोऽविशत्पुरम् ॥ विप्राणां

गोत्र कात्यायन मांडव्य सूक्ष्मण आदि ७ ईश्वरने स्थापन किये ॥ ६१ ॥ वे त्रिग्राममें द्विकर्णमें वास किया इसवास्ते जडाजिये नाम प्रख्यात भया यह ब्राह्मणोंके पादतीर्थ लेनेका अधिकार नहीं और श्राद्धमें अधिकार नहीं है ॥ ६२ ॥ केवल नाममात्र ब्राह्मण अमंत्रक जिनोंकूं यज्ञोपवीत है तडाज गांवमें रहे इसवास्ते रामके अनुग्रहसे तलाजिये ब्राह्मण ॥ ६३ ॥ यह गांव गुजरात नजीक गोल्वाड देशमें भावनगरसे पश्चिम दिशामें बारह कोसके ऊपर तुलजापुर या तलाजा गांव है गोपनाथ जिनके पास है द्वारवासिनी जिनकी कुलदेवी है उसके अनुग्रहसे रामने उनोंका तलाज गांवमें स्थापन किया उससे तलाजिये भये इनका जथा हालमें गांव तलाजाझांझमेर पीथल पुर सथरा उचडी यह गावोंमें है इस रीतिसे तलाजिये ब्राह्मणोंका स्थापन करके प्रभास तीर्थमें जायके यथाविधि प्राचीन सरस्वतीमें स्नान करके ॥ ६४ ॥ सोमेश्वरकी पूजा किये बाद समुद्रमें स्नान करके अपने नामसे रामतीर्थ रामेश्वर शिवका स्थापन किया ॥ ६५ ॥ पितरोंका श्राद्ध किया ॥ ६६ ॥ ब्राह्मण भोजन करवाये दक्षिणा दिया वस्त्रालंकार गौ और दूसरे अनेक दान किये ॥ ६७ ॥ पांच रात्रि वहां रहके प्रस्थान किया रथमें बैठकर अयोध्यामें आये ॥ ६८ ॥ इष्ट मित्र भाई बन्धु ब्राह्मणों सहित नगरमें प्रवेश

वंदनं कृत्वा भ्रातृभिः सोऽपि वंदितः ॥ ६९ ॥ हत्या शूद्रस्य सा नष्टा निष्पापस्तत्क्षणादभूत् ॥ वसिष्ठं पूजयित्वा तु स्वराज्यं प्रशसास ह ॥ ७० ॥ इत्थं कथानकं श्रुत्वाह्यगस्त्यो मुनिराट्र ततः ॥ आनदं परमं लेभे कार्तिकेयप्रसादतः ॥ ७१ ॥

इति श्रीस्कंदपुराणे ब्राह्म० तडाङ्जाब्राह्मणोत्पत्ति प्रकरणम् ॥ ३७ ॥
इति पंचद्रविडमध्ये गुर्जरसंप्रदायः आदितः पद्यसंख्याः ॥ ३९४१ ॥

करके ब्राह्मणोंकूं नमस्कार किया सब भ्रातृवर्ग आयके पांव पडे ॥६९॥ इसप्रकार रामचंद्रकी शूद्रहत्या दूर भई वसिष्ठकी पूजा किथी ॥ धर्मसें राज्य करनेलगे ॥७१॥ यह कथा श्रीस्कंदस्वामीके मुखसे श्रवणकरके अगस्तिमुनि वडे प्रसन्न भये ॥७१॥

इति तिलाजियं ब्राह्मणोत्पत्तिप्रकरण समाप्त ॥ १७ ॥

अथ मेदपाठब्राह्मणोत्पत्तिप्रकरणम् ३८.

श्रीगणेशाय नमः ॥ अथ मेदपाठब्राह्मणोत्पत्तिसारमाह पाद्मे पातालखण्डे एकलिंगक्षेत्रमाहात्म्ये ॥ श्रीविंध्यवासिनी देवी नाम्ना कात्यायनी च या ॥ ढुंढिक्षेत्रपतिं चैव कश्यपं मुनिपुंगवम् ॥१॥ एकलिंगं शिवं साक्षात्तीर्थं पावनसंज्ञकम् ॥ त्रिकूटं पर्वतं गंगां नत्वा वक्ष्यामि संस्फुटम् ॥ २ ॥ शौनक उवाच ॥ भट्टहराख्यक्षेत्रस्य माहात्म्यं वद सूतज ॥ मेदपाठाख्यविषये चैकलिगाश्रितस्य च ॥ ३ ॥ सूत उवाच ॥ एकदा पुष्पदंतोऽमुं भगवंतमपृच्छत ॥ त्वया यत्पृष्टमधुना मुने तेनापि तत्तथा ॥ ४ ॥ एकदा नारदो योगी पवित्रीकर्तुमागतः॥

अब मेवाडे ब्राह्मण और बानियोंकी उत्पत्ति कहते हैं प्रथम श्रीकात्यायनी नामक जो विंध्यवासिनी देवी और ढुंढी गणपती कश्यप मुनि॥१॥एकलिंगी महादेव पावन तीर्थ त्रिकूट पर्वत गंगा नदी इनको नमस्कार करके स्पष्ट कथा कहता हूं ॥ २ ॥ शौनक पूछने लगे हे सुत!मेवाड देशमें एकलिंगी महादेवमे अधिष्ठित जो भट्ट हरक्षेत्र उसका माहात्म्य कहो ॥ ३ ॥ सूत बोले हे शौनक ! तुमने जैसा अभी प्रश्न किया वैसा एक दिन पुष्पदंत गंधर्व शिवकूं पूछता भया ॥ ४ ॥ एक दिन जगत्में फिरने-

पातालगंगापुलिने नागान्वै वीक्ष्यनारदः ॥५॥ अनंतमभिग
म्यासौ दत्तः स्वागतिकासनः ॥ पृष्टः प्राह कृपानाथो वचो
विस्मयकारकम् ॥ ६ ॥ भवतां विभवश्चैव जगदानंदवर्धनः ॥
आह्लादयति भूभारधारिणः सुकृतस्थितेः ॥ ७ ॥ अतिवसंतु-
ष्टमना आगतोऽस्मि विलोकितुम् ॥ भवतां वंशतंतुस्तु पाताले
विस्तृतिं गतः ॥ ८ ॥ नवास्ति गारुडी भीतिः क्वापि सामा
न्यभोगिनाम् ॥ स्वामिन्येवं निगदति प्रीत्या तस्मिन्मुनी-
श्वरे ॥ ९ ॥ तक्षकः प्राह सहसा स्वात्मानं बहु मानयन् ॥
मुने सर्वत्र भवतां गतिरव्यभिचारिणी ॥ १० ॥ अकुतोभी-
तिरस्माभिः सदृशः क्वापि वीक्षितः ॥ ततः स भगवानाह
मानिनं प्रहसन्निव ॥ ११ ॥ नारद उवाच ॥ भवादृशो न
कुत्रापि निर्भीतिः क्वापि दृश्यते ॥ एवंविधो भवतां वंशो
भस्मीभविष्यति ॥ १२ ॥ तक्षकस्यापराधेन केनचिन्नोदि-
तस्य ह ॥ अस्मादृशिसमायाति तव वाक्यंश्रुतेरपि ॥१३॥

बाले नारदयोगी पातालगंगाके तट ऊपर नागोंकूं पवित्र करनेके वास्ते आये ॥ ५ ॥ अनंतके पास ये तब अनंतने अर्घादि पूजा करके आसन देके पूछा तब नारद आश्चर्ययुक्त वचन कहनेलगे ॥ ६ ॥ हे अनंतादिक नागो ! तुम्हारा वैभव जगतको आनंदवृद्धिकरे ऐसा है तुम्हारी सुकृतका उदय है ॥७॥ मैं बहुत प्रसन्न मनसे देख-नेके वास्ते आयाहूं तुम्हारा संततिका समूह पातालमें विस्तार पाया है ॥८॥ और साधारण सर्पोंकूं गरुड़जीकी भीति नहीं है तब बडे सर्पोंकूं तो भीति कहांसे होवेगी इस रीतिसे नारद कहनेलगे ॥ ९ ॥ इतनेमें तक्षक नाम अकस्मात् अपनेको बडा मानके कहनेलगा हे मुने ! तुम्हारी गति सब ठिकाणे एक सरीखी है ॥१०॥ जैसे हम निर्भय हैं वैसे दूसरे कोई निर्भय कहां देखे तब नारदजी हास्य करके अभिमानी जो तक्षक उसको कहनेलगे ॥११॥ नारद बोले हे तक्षक ! तेरे सरीखा निर्भय कहीं नहीं देखा तथापि तेरा वंश दग्ध होवेगा ॥१२॥ किसीको प्रेरणा और तक्षकके अपराधसे और साभिमान वाक्य श्रवणकरनेमें आया इसके लिये वंश दग्ध होवेगा ॥ १३ ॥

अयमस्ति भवन्मुख्यो डिंडरः परमोज्ज्वलः ॥ एतच्चरणवि-
श्रामभाविनां वः सरीसृपाम् ॥ १४ ॥ उपप्लवं शमयितुं
ज्ञापिता तद्भयस्थितिः ॥ भवत्सु तुष्टिमास्थाय क्रूरयोनिगते-
ष्वपि ॥१५॥ अतस्तद्भयनाशाय भवंतस्तक्षकादयः ॥ उपक्रम-
ध्वं सेवायै नित्यमेव पिनाकिनः ॥१६॥ संतुष्टो भवतां स्वामी
भवंतस्तस्य भूषणम् ॥ सर्वभयविनाशाय प्रकारं भावयि-
ष्यति ॥१७॥ अथैवं मुनिनोक्तस्तु सुयशा वासुकिः स्वतः ॥
विचार्य च समाहूय सर्वान्सर्पकुलोद्भवान् ॥ १८ ॥ कर्को-
टकमुखान्सर्वानादिदेश तदेश्वरः ॥ अहो शृणुध्वं भवतां
ज्ञापितो भाव्युपद्रवः ॥ १९ ॥ तद्वारकः प्रयत्नोऽपि मुनि-
नात्र प्रदर्शितः ॥ तस्माद्भवद्भिः सर्वैर्हि ह्यक्रोधनपरैः सदा
॥ २० ॥ वर्तितव्यं ततः सौख्यं भवेद्वश्चक्षमावताम् ॥ एव-
मावेद्य नागेशः कैलासं वासुकिर्ह्यगात् ॥ २१ ॥ नारदादि-
ष्टविधिना भगवंतमुपासत ॥ कथयामास तत्सर्वं वासुकिश्च
कपर्दिने ॥ २२ ॥ पुष्पदंत कृतस्तोत्रमहिम्नो वासुकेरपि ॥
कष्टोच्चयविनाशाय शिवो वचनमब्रवीत ॥ २३ ॥ नागराज

यह डिंडर सर्प हैं सो तुम्हारेमें मुख्य हैं इसके चरणके आश्रयसे तुम्हारा होनेहार जो उपद्रव ॥ १४ ॥ उसकी शांती होगी सो मैनें तुमकूं सूचना किया यद्यपि तुम क्रूरहो तथापि मैं तुम्हारे ऊपर प्रसन्नहूं ॥ १५ ॥ इसवास्ते तुम सब तक्षकादिक जो हो वे भयनाश करनेकेवास्ते शिवजीकी उपासना करो ॥ १६ ॥ वे तुम्हारे स्वामी हैं तुम उनके भूषण हो इसवास्ते भय दूर होनेके वास्ते उपाय बतावेगें ॥ १७ ॥ ऐसा नारदका वचन सुनते सब नागकुलकूं बुलायके वासुकि नाग ॥ १८ ॥ कर्कोटकादिककूं कहनेलगा हे नागो!तुम्हारा भावी उपद्रव नारदजीने कहा सो सुनो ॥ १९ ॥ और उसकी शांतीका उपाय भी बतायाहै । सो सबोंने क्रोध छोडके नित्य ॥ २० ॥ क्षमा रखना इससे सुख होवेगा । ऐसा कहके वासुकि कैलासमें गया ॥२१॥ नारदजीने जैसा कहा था उसरीतिसे शिवजीकी उपासना करनेलगा और वृत्तांत सब कहा॥२२॥तब शिव बोले ॥२३॥ हे वासुके ! तुम्हारे वंशका जो

भवद्धंशविनाशविनिवारणम् ॥ मदुक्तेनाध्वना कुर्यात्कृतश्रद्धासुवासनः ॥ २४ ॥ अस्ति भारतखंडेऽस्मिन्देशः परमशोभनः ॥ मेदपाट इति ख्यातोऽनेकतीर्थसमन्वितः ॥ २५ ॥ चित्रकूटत्रिकूटादिगिरिभिः परिरक्षितः ॥ तत्र याहि त्रिकूटाद्रौ निवसंत कपर्दिनम् ॥ २६ ॥ एकलिंगं भवत्प्रेम तत्रस्थं मासुपास्व च ॥ एवमादिष्ट ईशेन वासुकिः प्रहसन्निव ॥ २७ ॥ करं निधाय पदयोः प्रणम्य स पुनर्ययौ ॥ त्रिकूटं तत्र विश्वेशं सेवयामास भक्तितः ॥ २८ ॥ एक लिङ्गः प्रसन्नोऽभूद्वासुकिं प्रोक्तवांस्ततः ॥ संतुष्टोऽस्मि भवद्भक्त्या वासुके वरमर्थय ॥ २९ ॥ वासुकिरुवाच ॥ स्वामिन्नस्माकमागामि भयनाशं करोषि चेत् ॥ संतुष्टोऽसि कृपानाथ तदेशो वाक्यमब्रवीत् ॥ ३० ॥ वासुके नागराज त्वं मदुक्तं त्वरितं कुरु ॥ निदानमेतदेवास्ते तदुपप्लवनाशनम् ॥ ३१ ॥ मदंतिके तीर्थभूः सा वर्तते ऋषिसेविता ॥ तस्यां निवासय पुरं वास्तुनिर्माणभासुरम् ॥ ३२ ॥ तत्र वासय विप्राग्र्यान्मदीयान्स्थापनाविधिः ॥

विनाशहोनहारहै उसकी शांत्यर्थ मेरे वचनप्रमाणसे चलोगे और श्रद्धा रखोगे तो कार्य होवेगा ॥ २४ ॥ भरतखंडमें एक मेवाड देश है । सो बडा सुशोभित । है जिसमें अनेक तीर्थ हैं ॥२५॥ चित्रकूट त्रिकूट आदि पर्वत हैं वहां पर्वतके उपर एक लिंग महादेव बिराजते हैं उनके पास जा ॥२६॥ और वहां मेरी सेवाकर ऐसा शिवका वचन सुनते वासुकी प्रसन्न होके ॥ २७ ॥ शिवकूं नमस्कार करके मेवाडदेशमें एकलिंगमहादेवके पास आयके भक्तिसे सेवा करने लगा ॥ २८ ॥ तब एकलिंग महादेव प्रसन्न होके कहनेलगे हे वासुकी ! मैं प्रसन्न भयाहूं वर मांगो ॥ २९ ॥ वासुकी कहनेलगा हे शिव ! आप जो प्रसन्न भये हो तो हमारे भावी उपद्रवका नाश करो तब शिव बोले ॥ ३० ॥ हे वासुके ! मेरा कहाहुवा काम तुरंत करो यहही तुम्हारे उपद्रव नाशकरनेका परम निदान हैं ॥ ३१ ॥ मेरे नजदीक तीर्थभूमिहै वहां ऋषि रहतेहैं उस ठिकाने उत्तम पुर निर्माण करके ॥३२॥ उसही ठिकाने ब्राह्मणोंका विधिसे स्थापनः करो । और वह मेरे ऐसा जानकर

तावकानिव तान्मत्वा नितरां परिपालय ॥ ३३ ॥ ततःप्रभृति ते सर्वे युष्मभ्यं करुणान्विताः ॥ आशीःशतैर्वेदिष्यंति श्रेयसामागमं मुहुः ॥ ३४ ॥ तेषां तु परिचर्यायै तावंतः सान्वयान् हि तान् ॥ द्विजाग्र्यानपरान् स्थाने स्थापयाशु मनीषिणः ॥ ३५ ॥ तथा च तेषां सेवायै स्थापयात्र ततोऽपरान्॥ वणिजः शिल्पिनश्चापि वास्तुविद्याविशारदान् ॥ ३६ ॥ सर्वर्द्धिगृहदानादिपुरस्कारविधानतः ॥ वास्तुके प्रयतो भूत्वा भज तान् हररूपिणः ॥ ३७ ॥ तत्रैव निवसिष्यामि तेषां प्रेमवशो ह्यहम्॥ कात्यायनी च तत्रैव पुरे स्थास्यति निश्चितम् ॥ ॥३८॥ भटत्वप्राप्तिजन्येन हेतुना भयहृद्भवान् ॥ तस्माद्भयहरं नाम पुरमेतद्भविष्यति ॥ ३९ ॥ भट्टाहरा इव यतोनिवसिष्यंति सुद्विजाः ॥ अतो भट्टहरं नाम पुरस्यास्य भविष्यति ॥४०॥ संति ये वैदिकाशीर्भिर्नागान्भयसमागमान् ॥ निर्भीकरणात्स्थितया सर्वदाप्युपकारिणः ॥ ४१ ॥ नागरानिति तस्मात्तान्वदंति कवयस्त्विमान् ॥ सार्थकानि पुरस्यास्य नामानि त्रीणि तान्यथ ॥ ४२ ॥ पुरनामानुसारेण द्विजनाम

पालन करो ॥ ३३ ॥ तो वे ब्राह्मण दयायुक्त होके उस दिनसे तुमकूं सैकडों आशीर्वाद देवेंगे ॥ ३४ ॥ और उनकी सेवा करनेके वास्ते उतनेही दूसरे उत्तम ब्राह्मण स्थापन करो ॥३५॥ और उन ब्राह्मणोंकी सेवा करनेके वास्ते बनिये तथा सुतार वगैरह जातिको स्थापन करो ॥ ३६ ॥ पुरमें उत्तम घर बनायके उसमें सब पदार्थ रखके दान विधिसे देके स्थिरचित्त रहके शिवरूपी उन ब्राह्मणोंका सेवन करो ॥ ३७ ॥ उनके प्रेमसे मैं भी वहां निवास करूंगा और कात्यायनी देवी उस पुरमें निवास करेंगी ॥ ३८ ॥ अब पुरके तीन नाम कहते हैं । भट्ट ब्राह्मणोंको दान देनेसे भयहरण करनेवाला तू भया इस वास्ते भयहर ऐसा पुरकानाम होवेगा ॥ ३९ ॥ इस पुरमें भट्टब्राह्मण जो हरसरीखे निवास करेंगे इसवास्ते भट्टहर ऐसा पुरका नाम दूसरा होवेगा ॥ ४० ॥ जो ब्राह्मण वैदिक मंत्रोंके आशीर्वादसे नागोंका रक्षण करतेहैं वह सर्वदा उपकारी हैं ॥ ४१ ॥ इसवास्ते नागर भी उनको कहतेहैं इस पुरके तीन नाम सार्थक हैं ॥ ४२ ॥ पुरके नामके अनुसारसे

भविष्यति ॥ स्युर्भट्टाहरनामानो नागरा नागरक्षणात् ॥ ॥ ४३ ॥ भट्टाहराश्च ते भट्टा वेदपाठाः प्रसिद्धितः ॥ वासुकिरुवाच ॥ भगवञ्छ्रीमदादिष्टं करवाणि मुदान्वितः ॥ ४४ ॥ तदर्थं भगवन्मह्यं दर्शनीयास्तु ते द्विजाः ॥ इत्युक्तो भगवाञ्छम्भुर्दर्शयित्वा द्विजोत्तमान् ॥ ४५ ॥ उवाच परमप्रीतो वासुके शृणु मे वचः ॥ चतुर्विंशतयस्त्वेते इमे वत्स समागताः ॥ ४६ ॥ इमान् स्थापय नागेंद्र वैभवं रक्षितुं तव ॥ श्रीमद्भट्टहरेर्भट्टान्मेदपाठान्द्विजोत्तमान् ॥ ४७ ॥ चतुर्विंशतयो गोत्रपतयःपुण्यवृत्तयः ॥ प्रत्येकं तत्र ते स्थाप्या वणिजोऽपि प्रवृत्तये ॥ ४८ ॥ गृहकार्यादिकर्तव्यविधये च चतुर्गुणाः ॥ तदर्धं शिल्पिनः स्थाप्या वास्तुविज्ञानसुंदराः ॥ ॥४९॥ तद्गेहकार्यविधये सदाचारे प्रसंगिनः ॥ तेषां तदाभिधानेन ज्ञातिनामापि च क्रमात् ॥ ५० ॥ कर्तव्यमहिनातेन विश्वनाथानुसारिणा ॥ वणिजो भट्टसंयुक्ता मेदपाठाः पुनस्त्वमी ॥ ५१ ॥ शिल्पिनाऽपि च ते भट्टमेदपाठा गुणान्विताः ॥ एतेषामेत एव स्युर्गुरवस्तत्सुवंशजाः ॥ ५२ ॥

ब्राह्मणोंके भी नाम होवेंगे भयहर मेवाडे, नागर मेवाडे ॥ ४३ ॥ भट मेवाडे नामसे प्रसिद्ध हैं वासुका कहनेलगा हे शिव ! तुम्हारी आज्ञा हर्षसे मैं स्वीकार करताहूं ॥ ४४ ॥ उस वास्ते उन ब्राह्मणोंके दर्शन करावो ऐसा वासुकीका वचन सुनते शिवजी ब्राह्मणोंको दिखायके ॥ ४५ ॥ परम प्रसन्न होके कहनेलगे हे वासुके ! मेरा वचन सुन यह चौबीस गोत्रके ब्राह्मण आयेहैं ॥ ४६ ॥ इनोंको स्थापन कर वैभव रक्षण करनेके वास्ते श्रीभट्टहरपुरमें भट मेवाडे चौबीस गोत्रपति जो हैं उनका स्थापन करो । और इनकी सेवाके वास्ते चतुर्गुणित मेवाडे बानिये स्थापन करो ॥ ४७ ॥ ४८ ॥ और उसके आधे वास्तुविद्यामें कुशल ऐसे मेवाडे सुतार मेवाडे सुनार मेवाडे लोहार मेवाडे तंबोली मेवाडे नापित वगैरह स्थापन करो ॥ ४९ ॥ उनके घरके काम करनेके वास्ते सदाचार प्रसंगसे जितने दूसरे जातिके हैं वे सब मेवाडे नामसे विख्यात हों ॥५०॥ हे वासुकि ! मेरे वचनसे तुमने यह काम अवश्य करना बनिये भी भट मेवाडे बानिये नामसे विख्यात हों ॥५१॥ सोनार सुतार लोहार जो हैं वे भी भटमेवाडे ब्राह्मणोंके कालियुगमें भी

सेवका यजमानाः स्युः कलावपि मनस्विनः ॥ भट्टान्वयभवा-
नेतान्मेदपाठान्द्विजन्मनः ॥ ५३ ॥ सेवयंतो भवेयुः स्म ज्ञाति-
सिद्धा न चान्यथा ॥ एतेषामग्निहोत्राणि गार्हपत्यानुमंति च
॥ ५४ ॥ तत्र रक्ष्योपयोगेन वर्तमाना महाधियः ॥ स्थाप-
नीयाः प्रयत्नेन द्विजराजानुयायिनः ॥ ५५ ॥ एतेषामेव ये
शिष्या गुरुशुश्रूषवो द्विजाः ॥ ततो भिन्नस्थजातीयाः स्वतं-
त्रस्थितिहेतवः ॥ ५६ ॥ मदंति परिवृत्तेऽस्मिंस्त्रयंवाख्यपुरे
स्थिताः ॥ त्रवायमेदपाठास्ते ज्ञातयस्तत्पृथङ्मताः ॥ ५७ ॥
तेऽपि स्युर्मेदपाठानां भट्टाख्यानां हितैषिणः ॥ गुरुसेवाविधि-
ज्ञानवृत्तयो मुनिपुंगवाः ॥ ५८ ॥ प्रमाणिकपदार्थानां वेत्ता-
रः स्वहिते रताः ॥ तथैव तत्प्रियकृते द्विजास्तदनुयायिनः ॥
॥ ५९ ॥ चतुरशीतिकग्रामवर्त्तिनः स्थापयाशु वै ॥ ततः
पृथग्वरज्ञातिश्चतुरशीतिनामवान् ॥ ६० ॥ समभून्मेदपा-
ठाख्यो भट्टानां सोऽनुगः कृती ॥ तेषां त्रयाणामपि हि
प्रेमवाञ्ज्ञातिरुत्तमः ॥ ६१ ॥ चतुर्विंशतिकस्थानी चतुर्विं-
शाख्यवृत्तिमान् ॥ चतुर्विंशतिगोत्राणां प्रत्येकं सोऽपि

सेवक यजमान होवेंगे॥५२॥५३॥ यह ब्राह्मण अग्निहोत्रादिक कर्मकरेंगे ॥५४॥ यह सेवक यजमान ब्राह्मणके कहे मुजब चलनेवाले हैं इसवास्ते अवश्य इनका स्थापन करना ॥५५॥ इन भटमेवाडे ब्राह्मणके शिष्य भिन्न जातिके स्वतंत्र रहतेहैं ॥ ॥ ५६ ॥ उनकूं मेरे पास त्रयंवायपुरमें निवास करावे तो वे त्रवाय मेवाडे (उर्फ त्रवाडि मेवाडे) ज्ञाति जुदी विख्यात हो ॥५७॥ वे त्रवाडी मेवाडे ब्राह्मण भी भट्ट मेवाडेके हितकारी हैं। गुरुसेवा धर्मको जानतेहैं ॥५८॥ प्रामाणिक पदार्थके जानने वाले अपना हित करनेवाले हैं उसी मुजब भट मेवाडे ब्राह्मणोंकी आज्ञामें रहनेवाले॥ ॥५९॥ चौरासीग्रामोंकी वृत्ति करनेवाले जो तुम स्थापन करते हो वे चौराशी मेवाडे ब्राह्मण ॥६०॥ भटमेवाडे ब्राह्मणोंकी आज्ञामें चलनेवाले भये। और इन तीनोंका हित करनेवाला एक चौथा ज्ञातिभेद है सो चौवीस गोत्रोंमें प्रत्येक गोत्रकी जुदी

चैकक: ॥६२॥ सेवायै समभूदेव चतुर्विंशतिकाभिधः ॥ स्वबंधुत्वेन विख्यातो बंधुलः पंचविंशकः ॥६३॥ स्वतंत्रः स तु विज्ञेयो ज्ञातौ परमशोभनः ॥ भट्टानुयायी तु पुनर्भट्टानामनु सारवान् ॥ ६४ ॥ चतस्रो वृत्तयस्त्वेता ज्ञातिसिद्धाः पृथक्पृथक् ॥ भट्टो मुख्यतमस्त्वेषां गुरुत्वेनोपगीयते ॥ ६५ ॥ तस्मादेवं प्रयत्नेन ज्ञातीनां स्थापनं कुरु ॥ विज्ञापयित्वा प्रययौ वासुकिश्च ततः परम् ॥ ६६ ॥ संस्मृत्य विश्वकर्माणं पुरं निर्माणशोभनम् ॥ चतुर्विंशतिगोत्रेभ्यः स्ववंशस्य विवृद्धये ॥ ६७ ॥ श्रीमद्भट्टहरं पुरारिवचनात्स्थानं द्विजेभ्यो ददावानंदप्लुवमानपन्नगपतिः श्रीवासुकिः क्ष्मातले ॥ यत्र ब्रह्मचतुष्टयं गणपतिर्भट्टार्क ईशो हरिः ॥ ढुण्ढीक्षेत्रपतिश्च कार्मुकधरा कात्यायनी तिष्ठति ॥ ६८ ॥ यत्र क्षेत्रे महादेव एकलिंगः प्रभुर्महान् ॥ त्रिकूटः पर्वतश्रेष्ठो नदी स्वच्छजला तथा ॥ ६९ ॥ विनायकोऽर्धनारीशो वेधाः श्रीबटुकस्तथा ॥ अन्नपूर्णा च वसति वासुकिप्रीतये सदा ॥ ७० ॥

जुदी वृत्तिकरनेवाला ॥ ६१ ॥ ६२ ॥ सेवा करनेके अर्थ निश्चित भया इसवास्ते चौविसे ब्राह्मण नामसे विख्यातभया । और अपने बंधुत्वकरके विख्यात भया । सो बंधुलज्ञाति पंचिसा ब्राह्मण भया॥६३॥६४॥ वह ज्ञातिभेद स्वतंत्र है परंतु भटमेवाडे गुरुपदके ठिकाने कहेजातेहैं ॥६५॥इस वास्ते हे वासुकि ! तुं ज्ञातियोंका स्थापन कर ऐसा कहके शिव चलेगये बाद वासुकिने ॥६६॥ विश्वकर्माको बुलायके उनके हस्तसे उत्तम पुर निर्माण करवायके अपने वंशकी वृद्धि होनेके वास्ते चौबीस गोत्रोंके ब्राह्मणोंको ॥ ६७ ॥ श्रीशिवजीके वचनसे श्री भट्टहरपुरका दान दिया । उस वखत पृथ्वीमें वासुकीको बड़ा आनंद भया । जिस भट्टहरक्षेत्रमें गणपति, भट्टार्क शिव,हरि, क्षेत्रपति, कात्यायनी देवी निवास करती हैं ॥६८॥ जिस क्षेत्रमें एकलिंग महादेव मुख्य हैं त्रिकूट पर्वत बन्वास नदी॥६९॥ गणपति अर्धनारीश्वर ब्रह्मा श्रीबटुक अन्नपूर्णा देवी यह सब देवता वासुकीके प्रीतिके लिये निवास करतेभये ॥७०॥

भट्टाद्यानिपुणप्रभावविधयः श्रीमेदपाठाह्वयाः सुब्रह्मण्यनियाम-
कास्तदनु ते नागेंद्रसंस्थापिताः ॥ श्रीमंतः शिवसन्निधौ शिव-
वचोयुक्तं विधाय स्थिताः स्वाशीर्वादशतैर्निरंतरतया नंदंति
ये वासुकिम् ॥ ७१ ॥ चतुर्विंशतिगोत्राणां नामानि प्रवदा-
म्यहम् ॥ कृष्णात्रेयं च प्रथमं पराशरमतः परम् ॥ ७२ ॥
कात्यायनं च गर्गं च शांडिल्यं कुशिकं तथा ॥ कौशिकं
वत्सं वात्स्यं च भारद्वाजं च गार्ग्यकम् ॥ ७३ ॥ उपमन्योश्च
कौंडिन्यं गौतमं काश्यपं तथा ॥ मांडव्यचंद्रात्रेयं च भार्गवं
गालवं तथा ॥ ७४ ॥ विष्णुवृद्धं मुद्गलं च मौनसं वार्द्धिसंज्ञ-
कम् ॥ अत्रिगोत्रं चांतिमं वै गोत्राण्येवं विनिर्दिशेत् ॥ ७५ ॥
शौनक उवाच ॥ ॥ पञ्चविंशस्त्वया कोऽयं कथितो यश्च
बन्धुलः ॥ वद मां गोत्रमुख्योऽस्मिन् स ज्ञातिरपरः किमु
॥ ७६ ॥ सूत उवाच ॥ ॥ आसन् भट्टहरा विप्राश्चतुर्विंश-
तिसंभवाः ॥ बंधुवल्लाति यः प्रीत्या निजात्मानं परं च वा ॥
॥ ७७ ॥ प्रीतिमान्रक्षयन्नेव बंधुलत्वमवाप्नुयात् ॥ गणितो
गणनाद्वारा पृथग्भूतो द्विजः प्रियः ॥ ७८ ॥ भुजिक्रियासु
सर्वत्र स ज्ञातेरधिको हि सः ॥ सर्वत्र व्यवहारेषु गृहमेधीयक-
र्मसु ॥ ७९ ॥ मिथस्तेषां च तेषां च नांतरं कियदन्वभूत् ॥

भटमेवाडे आदि लेके सब ब्राह्मण शिवजीकी कृपासे स्थापित हुवे बडे शोभायमान शिवजीके वचनोंको मान्य करके निरंतर वासुकिको आशीर्वाद देते भये ॥ ७१ ॥ अब चौवीस गोत्रोंके जो नाम और प्रवर सो आगे चक्रमें स्पष्ट हैं ॥७२॥ ७३ ॥ ॥ ७४ ॥ ७५ ॥ शौनक प्रश्न करनेलगे पहले जो पचीसवां बंधुल नाम करके ज्ञाति भेद कहा सो जुदा है या इसमें है सो कहो ॥ ७६ ॥ सूत कहनेलगे--भट मेवाडे ब्राह्मण चौवीस गोत्रके जो हैं उन सबोंकी बंधु सरीखी प्रीति करता है ॥ ७७ ॥ रक्षण करता है इस वास्ते बंधुल ब्राह्मण पंचीसे ब्राह्मण नामसे भया गणनाके निमित्तसे यहां गिनती कियी परंतु ज्ञाति भिन्न भई ॥ ७८ ॥ यह ब्राह्म-णोंका भटमेवाडे आदि ब्राह्मणोंमें भोजनव्यवहार और सब ज्ञाति संबंध एकत्र

तथापि यूनपिंडादौ बभूव महदन्तरम् ॥ ८० ॥ निरंतरा भवेयुः स्म स्नेहतो मित्रधर्मिणः ॥ सांतराः स्युर्विवाहादौ ज्ञातिकार्येषु तेऽप्युत ॥ ८१ ॥ विवाहे च विशेषं वै प्रवक्ष्याम्यत्र तच्छृणु ॥ ततः सुवासिनी वारिकुंभद्वितीयधारिणी ॥ ८२ ॥ कुंभोपरि फलोरोपकारिणी यात्रिके गृहे ॥ वरायाचमनं दद्याद्विशते शोभनासने ॥ ८३ ॥ अन्या पुरंध्र्यो गायंत्यो तत्र ता अपि तस्थिरे ॥ संपूजयेत्सुवस्त्राद्यैरेनां सौभाग्यसुंदरीम् ॥ ८४ ॥ तया सह ततः पश्चात्कृत्वा च वरमग्रतः ॥ पूजनं चत्वरस्यैव उभयोर्मङ्गलं स्त्रियः ॥ ८५ ॥ कुर्युस्ततोऽर्घदानं च कवलग्रहणं ततः स्वगृह्योक्तविधानेन विवाहं चारुभक्षणम् ॥ ८६ ॥ पुटापुटिमयाचारं यात्रिकाणां च पूजनम् ॥ गौरवाख्यं भोजनं च कुर्वंत्येते द्विजोत्तमाः ॥ ८७ ॥ वणिजः शिल्पिनश्चैव स्वर्णकारादयः परे ॥ स्थापिता द्विजसेवार्थं नागेन पूर्वमेव

होता है ॥ ७९ ॥ इनका उनका थोडा भी अंतर रहता नहीं परंतु विवाह संबंध परस्पर नहीं होता है ॥ ८० ॥ मायासे तो केवल मित्र धर्म है परंतु विवाहमें और अपनी ज्ञातिके कार्यमें अंतर रखते हैं ॥ ८१ ॥ यह भट्टमेवाडे आदि ज्ञातिमें विवाहमें जो विशेष है सो कहता हूं विवाहके पहले एक सुवासिनी मस्तकपर दो कलश पानी भरे हुवे लेके ॥ ८२ ॥ कलशके ऊपर पंच पल्लव और फल रखा हुवा लेके जहां वर आयके उतरा होवे उस जगहमें जायके वरको आचमन देके आसन ऊपर उन कलशोंको लेनेवाली बैठे उनके नाम सौभाग्य सुन्दरी ॥ ८३ ॥ फिर दूसरी भी—गांवकी सब सुवासिनी मंगलगायन करती हुई वहां बैठें फिर उपाध्यायने चौहट्टेमें उत्तम जगहकरके वरराजाको और सौभाग्य सुंदरीकूं बुलायके दोनों तरफकी स्त्रियां मिलके मंगलगीत गायन करती हुई ॥ ८४ ॥ चत्वरपूजा करती भई पीछे वरकूं अर्घपूजा कवलग्रहणविधि पाणिग्रहण चरुभक्षण ॥ ८५ ॥ ८६ ॥ पुटापुटी आचारयात्रिक वर वाले संबंधियोंकी मानपूजा गोरवका भोजन इतना व्यवहार करते हैं ॥ ८७ ॥ सब ब्राह्मणोंकी सेवाके निमित्त वासुकीने पाहिले भटमेवाडे बानिये, सच्छूद्र भटमेवाडे सुतार भटमेवाडे सुनार भटमेवाडे तंबोली नाई-आदि करके ज्ञाति स्थापन किया ॥ ८८ ॥

हि ॥ ८८ ॥ नाम्ना ते संभविष्यंति मेदपाठभट्टादयः ॥ तेषामपि कुले धर्मः शूद्रचर्याविलासवान् ॥ ८९ ॥ ब्राह्मणस्य यथासंख्या भवेन्मुख्यपदे तथा ॥ शूद्रवर्णस्य विज्ञेया परिचर्या द्विजन्मनाम् ॥ ९० ॥ ॥ शौनक उवाच ॥ ॥ सूत भट्टहरस्थानमाहात्म्यं बहु वर्णितम् ॥ यदर्थं नागराजेन पुरमेतद्विनिर्मितम् ॥ ९१ ॥ तत्कारणं समाचक्ष्व भव्युपद्रवनाशकम् ॥ सूतउवाच ॥ ॥ पंडुवंशोद्भवो राजा परीक्षिदिति नामतः ॥ ९२ ॥ ब्रह्मशापेन मृत्युर्वै तक्षकाच्च भविष्यति ॥ तस्य तद्दुःखयोगेन तत्पुत्रो जनमेजयः ॥ ९३ ॥ मेदपाठे नागदाभूम्यां सत्रं करिष्यति ॥ तन्मध्ये सर्वसर्पाणां नाश एव भविष्यति ॥ ९४ ॥ इति निश्चित्य तत्पूर्वं वासुकिर्नागराट् तदा ॥ जरत्कारुं स्वभगिनीं गृहीत्वा त्वरयान्वितः ॥९५॥ भट्टादिमेदपाठाह्वविष्णुवृद्धकुलाय च ॥ प्रददौ धर्मपत्न्यर्थं विवाहविधिना मुदा ॥ ९६ ॥ जनयामास ह्यास्तीकं पितुः शतगुणाधिकम् ॥ तपोनिष्ठं सुतं दृष्ट्वा जर-

इन सबोंका धर्म शूद्रसमान जानना ॥ ८९ ॥ जैसी ब्राह्मणकी मुख्य स्थानमें संध्या है वैसी शूद्रोंकी ब्राह्मणसेवा मुख्य हैं ॥ ९० ॥ शौनक पूछनेलगे हे सूत! तुमने भट्टहर स्थानका माहात्म्य कहा परंतु जिस वास्ते वासुकिनागसे पुरका दान दिया है वह कारण कहो ॥ ९१ ॥ सूत बोले पंडुराजाके पाच पुत्र थे उनमें अर्जुनके पुत्र अभिमन्यु और अभिमन्युका पुत्र परीक्षित होताभया ॥ ९२ ॥ फिर उस राजाको ब्राह्मणका शाप भया कि आजसे सातवें दिन तक्षकनागसे तेरा मृत्यु होवेगा। पीछे सातवें दिन जब परीक्षितका तक्षकके निमित्तसे मृत्यु हुवा देखके उस दुःखसे परीक्षितका पुत्र जनमेजय ॥ ॥ ९३ ॥ मेवाडदेशमें नागदाहनामकी भूमिमें सर्पसत्र (यज्ञ) करेगा उस यज्ञमें सर्पोंका वहोत नाश होवेगा ॥ ९४ ॥ यह निश्चय वात सुनके उस यज्ञ होनेके बहुत काल पूर्व अपनी बहिन कूं लेके जल्दीसे ॥ ९५ ॥ भटमेवाडेमें विष्णुवृद्धगोत्रके जरत्कारुनामक ब्राह्मणको विवाहविधिसे देदिया ॥ ९६ ॥ फिर जरत्कारु आस्तिकनामक पुत्रकूं प्रसवती भई। फिर बहुत कालांतरसे रातादिन तपमें निष्ठ ऐसे

त्कारुर्वचोऽब्रवीत् ॥ ९७ ॥ तपस्तपसि तात त्वं निश्चित इव केवलम् ॥ मातामहकुलं तात विनाशमधिगच्छति ॥ ९८ ॥ श्रुत्वा मातुर्वचः सम्यगास्तीको वाक्यमब्रवीत् ॥ मातर्यामि तदर्थाय सर्पसत्रस्य मंडपम् ॥ ९९ ॥ प्रार्थयामि न्यायमार्गे रुपसर्गस्य शांतये ॥ उक्त्वेदं मातरं विप्रश्चास्तीको ऋषिसत्तमः ॥ १०० ॥ सर्पसत्रं ततो गत्वा मोहयामास भूपतिम् ॥ वरधन्वन्तरिं चैव वाक्यैर्वामनह्रूपवत् ॥ १ ॥ गृहाण मत्तो विप्रेंद्र इति राज्ञा प्रतिश्रुते ॥ तक्षकं मोचयस्वाद्य महद्रमिति चास्तिकः ॥ २ ॥ ययाचे तेन तत्रासीद्धाहाकारो जयस्तथा ॥ सर्पसत्रादुपरतो भूपतिर्जनमेजयः ॥ ३ ॥ नागराजाः शशंसुः स्म महिमानं मुनेरिमम् ॥ धन्या वयं स्वसा धन्या यया जातो महान्मुनिः ॥ ४ ॥ मातामहकुलं येन मृत्युग्रस्तं विमोचितम् ॥ तस्माद्यत्र भवन्नाम तत्र मास्त्वहिजं भयम् ॥ ॥ ५ ॥ अहयो नवजातीयकुलजा येऽवशेषितः ॥ तेषां प्राण-

पुत्रकूं देखके माता कहनेलगी ॥ ९७ ॥ हे पुत्र ! तू तो केवल तपश्चर्यामें निष्ठ रहताहै और तेरे मातामहका कुल तो नाश होरहाहै ॥ ९८ ॥ ऐसा माका वचन सुनके आस्तीक मुनि कहनेलगे हे मातः ! मैं मातामह कुलरक्षणके वास्ते सर्पसत्र (यज्ञ) के मंडपमें जाताहूं ॥ ९९ ॥ और वहां जायके न्यायमार्गमें उपद्रव शांति करनेके वास्ते प्रार्थना करताहूं ऐसा माताकूं कहके आस्तीक ऋषि ॥ १०० ॥ सर्पसत्रमंडपमें जायके नाना प्रकारके वचन चातुर्यतासे भाषण करते करते जनमेजय राजाकूं और वर धन्वंतरीकूं वामनावतारने जैसा बलीकूं मोहित किया वैसा मोहित करताभया ॥ १ ॥ तब जनमेजय राजाने कहाकि हे आस्तीकमुनि! तुमको जो इच्छित होवे वो मेरेसे ग्रहण करो ऐसी राजाकी प्रीति होते आस्तीक मुनि कहनेलगे हेराजा! जो इच्छित देतेहो तो मैं इतना मांगताहूं कि इंद्र सहित तक्षकनागको छोडदेवो॥२॥ऐसा ऋषिके मांगतेही राजवर्गके लोकमें सब हाहाकार होनेलगा और नागकुलमेंसब जयजयशब्द होनेलगा जनमेजयनें सर्पसत्र समाप्त किया॥३॥ पीछे सब नागराजा मुनिकी महिमा देखके कहनेलगे हेनागो! अपने सब धन्यहैं जिससे बडे मुनि पैदाभया ॥४॥ जिन्होंने मातामह कुलकूं मृत्युसे छुडवाया इसवास्ते आजसे हम सब कहतेहैं कि जहां आस्तिक ऐसा आपका नाम श्रवण उच्चारण भया वहां सर्पका भय नहो ॥५॥ नवकुल नागमें जो शेष रहेहैं

प्रदाता स्यादास्तिकः केवलं मुनिः ॥ ६ ॥ आस्तिकस्मृति-मात्रेण सर्पो निर्विषतामियात् ॥ यदि नेयात्सलिप्येत मृत-सर्पांहसा स्वतः ॥ ७ ॥ आस्तीकवचनं श्रुत्वा सर्पः सर्पतु सत्वरम् ॥ निर्विषीभूयवृत्तः सन् मा तं दशतु कश्चन ॥ ८ ॥ चतुर्विंशतिभट्टादिमेदपाठद्विजाशिषः ॥ सफलाः संभवेयुः स्म वासुकेर्विषमच्छिदे ॥ ९ ॥ ततो नागदहं नाम पुरं निर्माय वासुकिः ॥ ब्राह्मणान् कतिचित्तत्र स्थापयामास तत्पुरे ॥ ॥ ११० ॥ सेवायै द्विजवर्णानां वणिजो द्विगुणास्ततः ॥ नागदाहेतिनामानः स्थापिताः प्रत्यवर्तयन् ॥ ११ ॥ भट्टानां परिचर्यायै कृतसत्त्वमसूसुचत् ॥ वासुकिर्वासयामास ततोऽ-भूदकुतोभयः ॥ १२ ॥ श्रीमद्भट्टहरस्थाननिर्माणस्य प्रयोज-नम् ॥ एतच्चरित्रश्रवणात्सर्वान्कामानवाप्नुयात् ॥ १३ ॥ भट्टादिमेदपाठीयै रक्षितो नागिकान्वयः ॥ हरिकृष्णः ॥ अत्र दंतकथा चैका मया पूर्वं श्रुता किल ॥ १४ ॥ तामहं कथ-

उनसबोंके प्राणदाता आस्तीक मुनि है ॥६॥ जो कोई मनुष्य आस्तीकमुनिका नाम ग्रहण करेगा तो काटाहुवा सर्पविष निर्विषताको पावेंगे और आस्तीक नाम श्रवण करके जो सर्प उस जगहसे नहीं जावेगा तो सर्पसत्रमें जितने सर्प मृत्यु पाये हैं उनका पाप उसके सिरपर पडेगा ॥ ७ ॥ इसवास्ते आस्तिक मुनिका नाम श्रवण-करते सर्पने तुरंत वह स्थानछोडके निर्विष होजाना और किसीको दंश करना नहीं ॥ ८ ॥ चौवीस गोत्रके जो भटमेवाडे ब्राह्मण उन्होंने प्रथमसें भावी उपद्रवके नाशकरनेके वास्ते जो वासुकी प्रभृतिकूं आशीर्वाद दिये वे सब सफल भये ॥९॥ पीछे वासुकीने वहां नागदहपुर निर्माण करके कितनेक ब्राह्मणोंकूं वहां स्थापन किया ॥ ११० ॥ और उन ब्राह्मणोंकी सेवा करनेके वास्ते द्विगुणित बनिये स्थापन किये। पीछे उन ब्राह्मण और वानियोंका नाम नागदाह ऐसा स्थापनकिया ॥ ११ ॥ वे ब्राह्मण बनिये भी भटमेवाडे ब्रह्माणके आधीन रहतेभये इतना सब कृत्य करके वासुकी निर्भय भया ॥ १२ ॥ ऐसा यह भट्टहरस्थान निर्माणका प्रयोजन कहा जो कोई यह चरित्र श्रवण करताहै उसकूं सब कार्य प्राप्त होतेहैं ॥१३॥ फिर भटमेवाडोंमें आस्तिकका बंश अच्छी तरहसे रक्षितकिया ॥ अब यहां अर्वा-चीन कथा किसीके मुखसे सुनी है सो कहताहूं ॥ १४ ॥ एकदिन नागकन्याका

यिष्यामि विवाहव्यवहारिकीम् ॥ मेदपाठद्विजानां च चतुर्भेदा भवंति हि ॥ १५ ॥ एकदा नागकन्याया विवाहे समुपस्थिते ॥ आगता भट्टविप्रस्य कुमारास्त्रय एव हि ॥ १६ ॥ नागकन्या विषेणैव ज्येष्ठस्तत्र पलायितः ॥ गतो गोपुरपर्यंतं तद्वंशे भट्टसञ्ज्ञकाः ॥ १७ ॥ चतुष्पथांते द्वितीयो तदीयाश्चतुराशिकाः ॥ तृतीयो भट्टपुत्रस्तु कन्याया विषयोगतः ॥ १८ ॥ मृतवत्पतितो भूमौ सखी वाक्यमथाब्रवीत् ॥ हे कन्ये विषयोगेन यद्येवं च भविष्यति ॥१९॥ कथं तर्हि विवाहस्य सिद्धिरग्रे भवेत्तव॥ नागकन्या सखीवाक्यं निशम्य मनसि स्थिरम् ॥ १२० ॥ विचार्य गुडखण्डस्य नागं कृत्वा विषापहम् ॥ मूर्च्छितस्योपरि क्षिप्तस्तदा तूर्णं स उत्थितः ॥ २१ ॥ तेन साकं विवाहोभूत्ततस्तद्वंशजा द्विजाः ॥ त्रिपाणिनाम्ना विख्याता बभूवुर्भुवि निश्चितम् ॥ २२ ॥ त्रिपाणिविप्रसंघस्थः कश्चिद्ब्राह्मणसत्तमः ॥ मोहरेब्राह्मणज्ञातिकन्यया सह मेलनम् ॥ २३ ॥

विवाह उत्सव प्रारंभ भया । उस बखत भटमेवाडे ब्राह्मणके वास्ते आये ॥१६॥ तब बडा छोकरा नागकन्याके पास जाते ही उसके विषैले वायुसे घबरायके गांवके दरवज्जेकूं भागोल कहतेहैं वहांतक भाग गया इस वास्ते उसके वंशमें और अनुयायी सब भटमेवाडे भये ॥ १७ ॥ दूसरा भाई नागकन्याके विषैले वायुसे घबरायके चोहटे तक भागगया इस वास्ते उसके अनुयायी सब चौरासी मेवाडे । अब तिसरा भाई नागकन्याकी विष लहरसे उसी बखत ॥१८॥ मृतसरीखा मूर्छित होके पृथ्वीमें पडा तब सखी कहनेलगी कि हे नागकन्या ! तेरे जहरसे सबोंको जो ऐसा होवेगा तो ॥ १९ ॥ आगे तेरे साथ विवाह कौन करेगा ! तेरी मनोरथसिद्धी कैसी होवेगी ? ऐसा सखीका वचन सुनके नागकन्याने मनमें बहुत देर तक विचार करके ॥ १२० ॥ गुडका नाग बनायके विषउतारनेके वास्ते मूर्छित जो ब्राह्मण पडाथा उसके ऊपर डाला तब तत्काल वह तीसरा भाई उठके खडा हुआ ॥ २१ ॥ पीछे उसके साथ विवाह भया । उस दिनसे इस तीसरे भाईके अनुयायी और वंशस्थ सब त्रिपाणी (उर्फ त्रिवाडी) मेवाड नामसे विख्यात भये ॥ २२ ॥ त्रिवाडी मेवाडे ब्राह्मणोंमेंके एक ब्राह्मणने मोहोड ब्राह्मणकी कन्याके साथ विवाह किया

विवाहमकरोत्सर्वैर्वारितोऽपि रजोगुणात् ॥ तत्पक्षीयास्ततो जाता राजसा मेदपाठकाः ॥२४॥ विवाहसमयात्पूर्वं नागपूजा विधीयते ॥ इत्येवं कथितो मेदपाठविप्रसमुद्भवः ॥ १२५ ॥

इति श्रीब्राह्मणो० मेदपाठब्राह्मणभेदवर्णनं नाम प्रकरणम् ॥ ३८ ॥

पंचद्रविडमध्ये गुर्जरसंप्रदायः ॥ आदितः श्लोकसंख्या ॥ ३९७४ ॥

उस वखत सब त्रिवाडि मेवाडोंने बहुत मना किया। परन्तु रजोगुण अहंकारके कारण किसीका सुना नहीं इसवास्ते पूर्वज्ञातिमेंसे जुदे पडे। तब उसके सब पक्षपाती मिलके राजस मेवाडे नामसे विख्यात भये ॥ २४ ॥ और इस ज्ञातिमें विवाह होनेके पहिले नागपूजा करते हैं ॥ भटमेवाडे ब्राह्मणोंमें दूसरे गांवका वर होवे तो गांवके बाहर गुडके नागकी पूजा तथा दीपप्रज्वलिन करके पीछे गांवमें प्रवेश करना और एकही गांवमें होवे तो अपने घरमें गुडमय नागकी पूजा करके दीप प्रगट करके पीछे विवाहके वास्ते वरने निकलना ॥ चौरासी मेवाडे ब्राह्मणमें वर गांवका होवे या परगांवका होवे परन्तु विवाह करनेकूं जाती वखत चार रास्तेके बीचमें वरने गुड नागकी पूजा षोडशोपचार करके दीप लगायके नागस्तुति करके पीछे विवाहकूं जाना ॥ त्रिवाडी मेवाडे ब्राह्मणोंमें और राजसी मेवाडे ब्राह्मणोंमें वरने वधूके घरको जाना वहां द्वारपूजा हुईके उसी वखत पलंग (उर्फ खाटला) बिछाया होवे उसके ऊपर वरने मूर्छा आने सरीखा होके सो जाना पीछे इसके पास आयके गुडका पानी छांटे तब वर उठके खडा होवे। पीछे वरने गुडमय नागकी पूजा करना दीप प्रकट करना स्तुति करके पीछे विहाहकर्म चलाना ऐसी रीति है। ऐसा यह मेवाडे ब्राह्मणोंका उत्पत्ति भेद मैंने वर्णन किया ॥ १२५ ॥

इति ब्राह्मणोत्पत्तिग्रन्थमें मेवाडोंकी उत्पत्तिप्रकरण ॥ ३८ ॥

अथ भट्टमेवाडाब्राह्मणानां गोत्रप्रवरावटंकज्ञानकोष्ठकम्.

सं.	गोत्राणि	प्रवराः	अवटंक
१	कृष्णात्रेय	कृष्णात्रेयः अर्चिः अजावत्सश्चेति त्रय	
२	पराशर	वसिष्ठःसित्थः पाराशरश्चेति ३	
३	कात्यायन	कपिलः कात्यायनः विश्वामित्रश्चेति ३	
४	गर्गः	गर्गः च्यवनः आंगिरसश्चेति ३	
५	शांडिल्यः	शांडिल्यः असितदेवलश्चेति ३	
६	कुशक	कुशक अघमर्षणः विश्वामित्रश्चेति	
७	कौशिक	कौशिकः देवराजः विश्वामित्रश्चेति	

८	वत्स	वत्सः च्यवनः और्वः आप्नवान्जमदग्निश्चेति ५	
९	वात्स्यं	वात्स्सःच्यवनः मौद्गलः जमदग्निः ईषवश्चेति ५	
१०	भारद्वाज	भारद्वाजः आंगिरसः बार्हस्पत्यश्चेति ३	पंडया उपाध्या
११	गार्ग्यं	गार्ग्य च्यवनःआंगिरसःईषःबार्हस्पत्यश्चेति ५	
१२	उपमन्यु	उपमन्युःउतत्थ्यःआंगिरसःभारद्वाजाबार्हस्पत्यश्चेति ५	
१३	कौंडिन्य	कौंडिन्यांगिरसबार्हस्पत्याः	
१४	गौतम	गौतमांगिरसौतत्थ्येति ३	
१५	काश्यप	काश्यपःकृच्छ्रतप्तःमानातिःलोहितःभार्गवश्चेति ५	अध्याय पं.पा.भ.
१६	मांडव्य	मांडव्यः मंडकेयः विश्वामित्रश्चेनि ३	
१७	चंद्रात्रेः	चंद्रात्रेयः वत्सः कृत्स्नश्चेति	
१८	भार्गब	भार्गवः च्यवनः आप्नुवान्और्वः जमदग्निश्चेति ३	
१९	गालव	गालवः तपयक्षाः हारीतः उपकल्पितः जयंतश्चेति ५	
२०	विष्णुवृद्ध	पौतुम्युः उत्पुत्रः सदस्यः	
२१	मुद्गल	मौद्गल्यागिरसबार्हस्पत्यश्चेति ३	
२२	मौनस	मौनसभार्गववैतष्वसश्चेति	
२३	वार्द्धि	दाल्भ्यबार्हस्पत्याः	
२४	अत्रि	अत्रिगविच्छ पूर्वातिथ्यश्चेति ३	

अथ मोतालापालब्राह्मणोत्पत्तिप्रकरणम् ॥ ३९ ॥

अथ मुक्तिक्षेत्रवासिब्राह्मणोत्पत्तिमाह स्कांदे तापीमाहात्म्ये रुद्र उवाच ॥ यत्र रामसरो वत्स बाणघातेन चाभवत् ॥ तत्र स्नात्वा नरो याति ब्रह्मलोकमसंशयम्॥१॥पंचक्रोशांतरे वत्स राघवोऽत्र पुरागमत्॥दुष्टभावविनिर्मुक्तो दशाननवधातुरः ॥२॥ रामः शांतं मनो दृष्ट्वा विस्मयेन समन्वितः ॥ सुमंतं च द्विजश्रेष्ठं पप्रच्छाश्रमवासिनम् ॥ ३ ॥ राम उवाच ॥ द्विजेश महदाश्चर्यं दृष्टं चात्र मयाधुना॥दुष्टभावं मनो मेऽद्य मुक्ता मोक्षाय

अब मोताला और पालब्राह्मणोंकी उत्पत्ति कहते हैं शिवजी बोले हे स्कंद।गुजरात देश सूरत जिल्हेमें तापीनदीके पास बाण मारके रामने जहां रामसरोवर बनायाहै वहां स्नान करनेसे ब्रह्मलोककी प्राप्ति होती है ॥१॥ पहिले पांच कोसके अंदर राम जिस बखत आये उस बखत रावणके वधसे आतुरथे परन्तु रामसरोवरकी भूमिम आतेही दुष्ट स्वभावसे मुक्त हुवे ॥ २ ॥ राम अपना मन शांत देखके आश्रममें बैठे हुए सुमंत ऋषिकूं पूछने लगे ॥ ३ ॥ हे सुमंत ऋषि ! यहां बडा आश्चर्य देखा मेरा मन

गच्छति ॥ ४ ॥ सुमंत उवाच ॥ ॥ पंचक्रोशांतरे वत्स विद्यते भानुजा सरित् ॥ अत्र तस्याः प्रभावोऽयं यत्ते मोक्षस्थितं मनः ॥ ५ ॥ ॥ राम उवाच ॥ ॥ यद्येवं मुक्तिदा विप्र विद्यतेऽत्र सरिद्वरा ॥ दानं किमत्र मे देयं तन्ममाचक्ष्व विस्तरात् ॥ ६ ॥ वराश्वगजरत्नानि हेमरूप्यादिना मुने ॥ द्विजमन्यं न पश्यामि एतस्मिन्काननेऽधुना ॥ ७ ॥ सुमंत उवाच ॥ ॥ न भोगेच्छास्ति चास्माकं शुष्कपत्रजलाशिनाम् ॥ किं दानविभवैः कार्यं यतचित्तेंद्रियात्मनाम् ॥ ८ ॥ विमुक्तविषयासक्तिः परब्रह्मकृतास्पदः ॥ मुमुक्षुः समवृत्तिश्च को हि दानमभीप्सति ॥ ९ ॥ ॥ श्रीराम उवाच ॥ ॥ अथ नाथ न पश्यामि द्विजान्दानक्षमान्भुवि ॥ इति मे मानसं नूनं सशोकं वर्ततेऽधुना ॥ १० ॥ ॥ सुमन्त उवाच ॥ ॥ ज्ञानेन संवीक्ष्य द्विजान्समागतान् हिमालयाद्यत्तपतीजले च ॥ आत्रेयगर्गेन्दुवरात्रिकश्यपानादिष्टवानिष्टफलप्रदांश्च ॥ ११ ॥ ततः स हनुमान् वीर तापीतीरमगाद्द्रुतम् ॥ प्रेरणाद्रामभद्रस्य ग्रहीतुं द्विजपुंगवान् ॥ १२ ॥ दृष्ट्वा प्रणम्य तान् विप्रान्जगाद हनु-

दुष्टभावको छोडके मोक्षमार्गमें लगता है ॥ ४ ॥ सुमंत कहनेलगे हे राम ! पांच कोसकी तापी नदी है यहां उसका प्रताप है, जो तुम्हारा मन मोक्षमें जाता है ॥ ५ ॥ राम कहने लगे हे ऋषि ! जो मुक्ति देनेवाली तापी है तो मैंने यहां दान क्या करना सो कहो ॥ ६ ॥ घोडे हाथी रत्न सुवर्ण रौप्य क्या देना सो कहो इस वनमें तुम्हारे विना दूसरेको देखता नहीं हूं ॥ ७ ॥ सुमंत कहनेलगे, हे राम ! हमको भोगेच्छा नहीं है, सूखे पत्ते और जलपान करते हैं । हमको दान वैभवसे क्या प्रयोजन है ॥ ८ ॥ जिसने विषयत्याग किया परब्रह्ममें चित्त लगाया सो दान क्यों लेना ? ॥ ९ ॥ राम कहनेलगे हे ऋषि ! पृथ्वीमें दान लेनेवाले ब्राह्मण मैं देखता नहीं हूं इसवास्ते मेरा मन शोकमें बहुत है ॥ १० ॥ तब सुमंत कहनेलगे हे राम ! मैंने ज्ञानदृष्टिसे देखा है हिमालयकी तरफसे ब्राह्मण तापीके स्नानकरनेकूं अभी आये हैं अत्रि गर्ग चंद्रात्रेय कश्यप आदि गोत्रके हैं । इष्ट फलके देनेवाले हैं । सो तुमकूं मैंने बतलाये ॥ ११ ॥ तब हनुमान् जलदीसे तापी किनारे आयके रामकी प्रेरणासे ॥ १२ ॥ उन ब्राह्मणोंकूं देखके

मान् वचः ॥ प्रहृष्टः प्रांजलिर्भूत्वा प्रश्रयावनतो भृशम् ॥ ॥ १३ ॥ ॥ हनुमानुवाच ॥ ॥ आगच्छंतु द्विजश्रेष्ठा राघवो वोऽर्चयिष्यति ॥ तपत्याः पंचक्रोशांते सुमंतस्याश्रमे शुभे ॥ १४ ॥ ॥ विप्रा ऊचुः ॥ ॥ किं प्रयोजनमस्माकं राघवेण महात्मना ॥ निवृत्तविषयासक्तिर्मनो मोक्षे प्रवर्तते ॥ ॥ १५ ॥ किं दानैः किं च भोगैश्च स्थानैर्बहुविधैश्च किम् ॥ वन्यपत्रांबुवृत्तीनां मुक्तिमार्गमुपेयुषाम् ॥ १६ ॥ ॥ हनुमानुवाच ॥ ॥ भवतां मानसं विप्रा मोक्षेऽपि यदि संस्थितम् ॥ तथापि रामभद्रस्य वचोऽप्यत्रावधार्यताम् ॥ १७ ॥ नैवं चेद्भवतां पार्श्वे तपत्या उत्तरे तटे ॥ तीव्रानलं निवेक्ष्यामि ह्यकृतार्थो न याम्यहम् ॥ १८ ॥ तस्य सत्त्वाधिकं दृष्ट्वा मानसं वानरस्य च ॥ सर्वे दयान्वितास्तस्थुः स्वामि सेवापरस्य च ॥ १९ ॥ तत्तथेति च जल्पंतः सर्वे विप्रा मुदान्विताः ॥ तापीजलार्द्रगात्रस्य तस्थुः पार्श्वे हनूमतः ॥ २० ॥ ततः स हनुमान् वीरश्चंडवेगपराक्रमः ॥ विचिंत्य रामवाक्यं च झटित्यागमतत्परः ॥ २१ ॥ कांश्चिद्विधृत्य हस्तेन स्कन्धे कांश्चिन्निवेश्य सः ॥ कांश्चित्पुच्छे विधृत्याथो चोत्पपात च खे

साष्टांग नमस्कार करके हाथ जोडके नम्रतासे कहनेलगे ॥ १३ ॥ हे ब्राह्मणो ! रामचंद्रजी यहांसे पांचकोसके ऊपर सुमंतऋषिके आश्रममें हैं और वहां आपकी पूजा करेंगे ॥ १४ ॥ ब्राह्मण कहनेलगे हे वानर ! हमकूं रामचंद्रसे क्या प्रयोजन है ? ॥ १५ ॥ और दान भोग ऐश्वर्यसे हमको क्या प्रयोजन है ? हम वनपत्र जलके आहार करनेवाले मुक्तिमार्गकी इच्छा करते हैं ॥ १६ ॥ हनुमान् कहनेलगे हे ब्राह्मणो ! यद्यपि आपकी मोक्षमें इच्छा है तथापि रामचंद्रका वचन मान्य करना अवश्य है ॥ १७ ॥ और जो आप न चलेंगे तो मैं तापीके उत्तर तट ऊपर चिता तैयार करके आपके सामने देह भस्म करूंगा नहीं तो आपको लिये बिना जानेका नहीं ॥ १८ ॥ तब ऋषियोंने हनुमानका अति आग्रह दृढता देखके सबोंको दया आयी ॥ १९ ॥ तथास्तु ऐसा कहके सब ब्राह्मण हर्षित होयके स्नान करनेसे भीगाहुवा शरीर जिनका ऐसे हनुमानके पास आयके खडे रहे ॥२०॥ तब हनुमानजीने रामका वचन मनमें रखके तुरंत ॥ २१ ॥ २२ ॥

हरिः ॥ २२ ॥ मुमोच रामपार्श्वे तु वह्नितुल्यान्द्विजोत्तमान् ॥ ततो रामोऽपि वै तेषां लुठन् पादांबुजानि च ॥ २३ ॥ जगाद प्रश्रयोपेतं वाक्यं वाक्यविशारदः ॥ ॥ श्रीराम उवाच ॥ ॥ अत्र तापीप्रभावेण विमुक्तं दुष्टभावतः ॥ २४ ॥ मानसं विद्यते विप्रा दानं मे गृह्यतामतः ॥ रामवाक्यं तदा विप्रा उल्लंघयितुमक्षमाः ॥ २५ ॥ तथेति प्राब्रुवन् सर्वे मुक्तिमार्गोपदेशिनः ॥ ततो रामोऽपि बाणेन कृत्वा रंध्रान्वितां महीम् ॥ ॥ २६ ॥ सरश्चकार रामाख्यं भुक्तिमुक्तिफलप्रदम् ॥ प्रक्षाल्य पादयुग्मानि ददौ दानान्यनेकशः ॥ २७ ॥ त्रेतायां रामभद्रेण स्थापिताश्च द्विजोत्तमाः ॥ अष्टादशसहस्राणि मुक्तिस्थानेच वै गुह ॥ २८ ॥ तेषां पादोदकी वत्स संजातामुक्तिदा सरित् ॥ तत्र रामोऽपि सवनं चकारानुजसंयुतः ॥२९॥ अर्चयामास मुक्तीशं लिंगं मोक्षप्रदं परम् ॥ रामेश्वरं च संस्थाप्य संतुष्टोऽभून्महाप्रभुः ॥ ३० ॥ चकार पिंडदानं स रामकुंडे च पुत्रक ॥ ततोंऽबरेऽभवद्वाणी राज्ञो दशरथस्य च ॥३१॥

जलदी रामचंद्रके पास आयके अग्निसरीखे तेजस्वी ब्राह्मणोंकूं बिठाय दिये ॥ तब राम भी ब्राह्मणोंके चरणके ऊपर लोटने लगे ॥२३॥ और नम्रतासे कहने लगे कि हे ब्राह्मणो ! इस जगहमें मेरा मन दुष्टभावसे मुक्त होगया है ॥२४॥ इसवास्ते तुम दान ग्रहण करो । तब रामका वचन सुनके ॥२५॥ यद्यपि वे ब्राह्मण मुक्ति मार्गी थे तथापि रामके प्रतापसे तथास्तु कहने लगे पीछे रामने पृथ्वीमें बाण मारके॥२६॥ भोग ऐश्वर्य और मुक्तिको देनेवाला रामसरोवर बनायके उस जलसे ब्राह्मणोंके पादप्रक्षालन करके अनेक दान दिये॥२७॥त्रेतायुगमें रामचंद्रने तापीके किनारे मुक्तिस्थानमें[हालमें जिसको मोतागांव कहतेहैं] अठरा हजार ब्राह्मणोंको स्थापन किया वे सब मोताले ब्राह्मण भये ॥ २८ ॥ जिनके चरणारविंद धोनेका जल बहने लगा वह मुक्तिदा नामकी नदी भई वहां नदीमें रामचंद्रने सकुटुंब स्नानकिया॥२९॥और मुक्तीश्वर महादेवकी पूजा कियी और रामेश्वर नामक शिवकी स्थापना करके बडे संतोष पाये ॥३०॥ पीछे रामकुंडमें पिंडप्रदान किया । उस बखत आकाशमें दशरथ

प्राप्तोऽहं तव पुत्रात्र परात्परतरं पदम् ॥ विदार्य पर्वतं चात्र चक्रे रामः सरः सुत ॥ ३२ ॥ अत्र नूनं नरः स्नात्वा न भूयस्तनयो भवेत् ॥ निश्चयान्मुक्तिमाप्नोति कार्तिके विष्णुवासरे ॥ ३३ ॥ अथ ओरपालभेदमाह ॥ रुद्र उवाच ॥ वह्नितीर्थं येन दृष्ट्वा मकरस्थे दिवाकरे ॥ तपत्या उत्तरे कूले पितॄणामनृणो भवेत् ॥ ३४ ॥ सेवनाद्वह्नितीर्थस्य रामेश्वरनिभालनात् ॥ जन्मांतरशताज्जातं तस्य नश्यति पातकम् ॥ ॥३५॥ नरः कृतार्थतां याति नागतीर्थं चतुर्थकम् ॥ तदोरुपत्तनं क्षेत्रं तदेव शिरसंयुतम् ॥ ३६ ॥ बभूव यत्र रामेण पश्चात्संस्थापिता द्विजाः ॥ सैनिकासंगमे स्नानं कृत्वा रामः षडाननः ॥ ३७ ॥ सस्मार नारदं वत्स लक्ष्मणेन समन्वितः ॥ स्मरणात्तस्य रामस्य संप्राप्तो नारदो मुनिः ॥ ३८ ॥ श्रुत्वा च रामवाक्यं स जगाम ब्रह्मसंसदि ॥ नारद उवाच ॥ ॥ ब्रह्मन् संप्रेषितश्चाहं रामेणाशु महात्मनः ॥ ३९ ॥ सावित्रीसहितस्त्वं च तव सर्वे सभासदः ॥ रामेण मंत्रिताः सर्वे प्रयांतु-

आयके ॥ ३१ ॥ कहने लगे हे पुत्र ! तुम्हारे प्रतापसे यहां परमपदकूं पाया ऐसा कहके गुप्त भये बाद रामने पर्वतकूं विदीर्ण करके सरोवर बनाया ॥ ३२ ॥ इस सरोवरमें कार्तिककी एकादशीके दिन जो स्नान करेगा तो निश्चय करके पुनर्जन्म होनेका नहीं मुक्ति पावेगा ॥ ३३ ॥ अब मोताले ब्राह्मणोंमें जो ओरपाल ब्राह्मण भी नाम कहा जाता है उसका कारण कहते हैं शिव बोले हे स्कंद ! मकरके सूर्यमें तापीके उत्तर अग्नितीर्थका जो दर्शन करेगा तो पितृगणके ऋणसे मुक्त होवेगा ॥ ३४ ॥ और जो उसमें स्नानादिक करेगा और रामेश्वरका दर्शन करेगा सो जन्मके पातकसे मुक्त होवेगा ॥ ३५ ॥ और जो मनुष्य चौथे नागतीर्थमें स्नानादिक करेगा तो कृतार्थ करेगा । जो जो नागतीर्थ है उसकूं उरुपत्तन क्षेत्र (ऊर्फ ओरपाल) कहते हैं वह ओरपाल शिरस गांवसे मिला हुवा है उसकी कथा आगे कहेंगे । जिस बखत रामचंद्र सैनिका नदी और समुद्रके संगममें स्नान करके बैठे ॥ ३६ ॥ ३७ ॥ उस बखत नारदका स्मरण करके सामने जायके नारद खडे रहे तब रामने मनकी बात कही ॥ ३८ ॥ सो सुनके ब्रह्म सभामें जायके कहने लगे हे ब्रह्मदेव ! रामने मुझको भेजा है ॥ ३९ ॥ इसवास्ते सावित्रीकूं साथ

रगपत्तने ॥ ४० ॥ तस्य श्रुत्वा मुनेर्वाक्यं समियाय द्विजे-र्वृतः ॥ ॥ राम उवाच ॥ ॥ स्वागतं वः प्रजानाथ स्थेयमत्र द्विजैः सह ॥४१॥ सहस्राष्टादश माने च स्थापयामास राघवः॥ रामक्षेत्रं ततो जातं स्वयं रामप्रतिष्ठितम् ॥४२॥ सर्वे काण्वा द्विजास्ते वै गोत्राणि सप्त संख्यया ॥ भारद्वाजश्च हारीतः गर्गः कौंडिन्यकाश्यपौ ॥ ४३ ॥ कृष्णात्रेयो माठरश्च य इदं श्रद्धया पठेत् ॥ ब्रह्मलोके वसेद्वत्स पूर्वजैः सह पुण्यकृत् ॥ ॥ ४४ ॥ अथ शिरःपतनमोतालानाभेदमाह ॥ तत्रैव ॥ रुद्र उवाच ॥ ॥ प्रत्याजगाम रामस्य गच्छतः सागरः पुरा ॥ रामकुंडात्तापत्यां च तीर्थमालां प्रकुर्वतः ॥ ४५ ॥ द्विजवेष-धरो वत्स कृतस्नातोऽर्कजाजले ॥ राघवं प्रार्थयामास तदा रामोऽब्रवीद्वचः ॥ ४६ ॥ किं प्रार्थयसि विप्रर्षे तदा प्रोवाच सागरः ॥ न गंतव्यं त्वया राम तपत्याः प्रियसंगमे ॥ ४७ ॥

लेके और यह सभासद सब लोकोंकूं लेके उरगपत्तन (उर्फ ओरपाल) में चलो ॥४०॥ऐसा नारदका वचन सुनते ब्रह्मा सबको लेके रामकेपास आये रामने ब्रह्माका आदर सन्मान करके कहा कि ब्राह्मणोंसहित यहां तुमने रहना ॥ ४१ ॥ ऐसा कहके ओरपाल गांवमें अटारह हजार ब्राह्मण स्थापन किये वे ब्राह्मण ओरपाले मोताले नामसे विख्यात भये। पीछे उस क्षेत्रका रामक्षेत्र नाम स्थापन किया ॥ ॥ ४२ ॥ अब जो मोताले ब्राह्मण ओरपाल ब्राह्मण और आगे कहेजावेंगे जो शिरसगांवमें रहनेवाले ब्राह्मण इन सबोंकी कण्व शाखाहै और सात गोत्र हैं-भरद्वाज १ हरीत २ गर्ग ३ कौंडिन्य ४ कश्यप ५ ॥ ४३ ॥ कृष्णात्रेय ६ माठर ७ ऐसे हैं जो कोई श्रद्धासे इस आख्यानका पाठ करेगा उसका ब्रह्मलोकमें वास होवेगा ॥ ४४ ॥ अब शिरसगांवमें जो मोताले ब्राह्मणका भेद है सो कहतेहैं। शिव स्कंदकूं कहते हैं।जिस बखत रामचन्द्र रामकुंडसे तापी तक तीर्थयात्रा करनेलगे तब वहाँ समुद्र ॥ ४५ ॥ ब्राह्मणका वेषलेके तापीमें स्नान करके रामकी प्रार्थना करनेलगा तब राम कहनेलगे ॥४६॥ हे ब्राह्मण! तुम क्या मांगतेहो। तब समुद्र कहनेलगा हे राम! जहां तापी और समुद्रका संगम है

तथेति चाब्रवीद्रामो वत्स वाचा नियंत्रितः ॥ माहतां न वृथा त्येव सुधावाङ् निष्फला नहि ॥४८॥ सागरोऽन्तर्दधे पश्चाद्रामस्तत्रैव संस्थितः ॥ रामक्षेत्रात्ततो रामः कृत्वा पिंडादिसत्क्रियाम् ॥४९॥ गत्वा रामेश्वरं वत्स प्रतस्थे च निजं पुरम् ॥ पंचक्रोशांतरं यावत्संप्राप्तो रघुनंदनः ॥ ५० ॥ तत्र ऋष्युपदेशेन रामः सिद्धेश्वरं तदा ॥ सानुजः पूजयामास वनपुष्पफलादिभिः ॥ ५१ ॥ नत्वा सिद्धेश्वरं वत्स रामः प्राह पुनर्मुनिम् ॥ किंचिद्दानं प्रदास्यामि इति श्रद्धास्ति मे मुने ॥५२॥ मुनिरुवाच ॥ नाहं प्रतिग्रहीष्यामि संत्यक्तविषयेंद्रियः ॥ संति गंगातटे विप्रा मध्यदेशे च राघव ॥ ५३ ॥ महालक्ष्म्याः समानीताः सन्निधाय तपो महत् ॥ तया संस्थापिता विप्राः केचिद्गंगां त्यजंति न ॥ ५४ ॥ ते समर्थाः समुद्धर्तुं ब्राह्मणा ब्रह्मवादिनः ॥ ततो विलोक्य रामोऽपि लीलया हनुमन्मुखम् ॥ ५५ ॥ उवाचानय तान् विप्रान् सोऽप्याकाशाद्ययौ द्रुतम् ॥ निमेषात्प्राप्तवान् गंगा यत्र तिष्ठन्ति ते द्विजाः ॥ ५६ ॥ ततो निरीक्ष्य हनुमानुवाच विनयान्वितः ॥

वहां तुमने जाना नहीं ॥ ४७ ॥ रामने तथास्तु कहके बडेके वचन मिथ्या नहीं है ऐसा मानके ॥ ४८ ॥ रामने वहांही निवास किया समुद्र अतर्धान होगया। पीछे राम पिंड प्रदानादि क्रिया करके रामक्षेत्रसे निकले ॥ ४९ ॥ रामेश्वरमें जायके अपनी अयोध्याको जानेका विचार किया। तो प्रायः पांचकोस भूमि आये होवेंगे कि इतनेमें ॥ ५० ॥ ऋषिके कहनेसे सिद्धेश्वर महादेवकी उत्तम पूजा करके ॥ ५१ ॥ नमस्कार करकेपुनः ऋषिकूं कहते हें हे मुने ! थोडा और दान देना, ऐसी मेरी श्रद्धाहै ॥ ५२ ॥ मुनि कहते हैं हे राम ! हमने तो सब विषय त्याग कियेहैं हम दान लेते नहीं हैं परंतु मध्यदेशमें गंगातट के ऊपर ॥५३॥ महालक्ष्मीने अपने बडे तपसे लायेहैं और वहां स्थापित कियेहैं वे ब्राह्मण कोईभी गंगाकूं छोडते नहीं हैं ॥ ५४ ॥ वे ब्रह्मवादी ब्राह्मण उद्धार करनेकूं समर्थ हैं तब रामने प्रसन्नतासे हनुमान्‌जीका मुख देखकर ॥५५॥ कहा कि उनब्राह्मणोंकूं लावो, तब हनुमान्‌जी आकाशमार्गसे जलदी वहां आकर जहां ब्राह्मण बैठेहैं उस गंगातट ऊपर प्राप्त भये ॥ ५६ ॥ पीछे ब्राह्मणोंका दर्शन करके नम्रतासे हनु-

भवदानयनार्थाय प्रेरितो राघवेण च ॥ ५७ ॥ तपंत्याः कानने तत्र स च वः पूजयिष्यति ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ नागच्छामो वयं तत्र हित्वा गंगां सरिद्वराम् ॥ ५८ ॥ हनूमानुवाच ॥ तत्रैव मम सत्येन रामदिव्यप्रभावतः ॥ प्रसादाद्भवतां विप्राः संभविष्यति जाह्नवी ॥ ५९ ॥ इत्युक्त्वा च महद्रूपं कृत्वा विप्रान्प्रगृह्य च क्षणेनाकाशमार्गेण ययौ रामस्य सन्निधिम् ॥६०॥ वृतं विप्रैश्च तं रामो दृष्ट्वा मुदमगात्परम्॥ प्रणम्य च तदा रामं हनुमानुरुविक्रमः ॥ ६१ ॥ कथयामास वृत्तांतं गंगानयनपूर्वकम् ॥ ततो रामो द्विजेंद्राणां नमस्कृत्यांघ्रिपंकजम् ॥ ६२ ॥ संस्मार जान्हवीं साक्षात् सा च तत्र समागता ॥ अष्टादशसहस्राणि गोत्राणि द्वादशैव हि ॥६३॥ स्थापयामास रामोऽपि भुक्तिमुक्तिप्रदान् द्विजान् ॥ प्रक्षाल्यांघ्रि द्विजेंद्राणां जलं शिरसि वंदितम् ॥ ६४ ॥ यथा यज्ञावसाने

मान्‌जी कहते भए कि हे ब्राह्मणों ! आपकूं बुलानेके वास्ते रामने हमको भेजे हैं ॥ ५७ ॥ और वे तापीके वनमें आप सबकी पूजा करनेवाले हैं तब ब्राह्मण कहते भये कि हे वानर ! यह सरिताओंमें श्रेष्ठ गंगाको छोडकर हम सब वहां आते नहीं हैं ॥ ५८ ॥ तब हनुमान्‌जी कहते भए कि हे ब्राह्मणो ! वहां भी मेरी सत्यतासे रामचंद्रके प्रतापसे और आप सबके अनुग्रहसे जांह्नवी गंगा होवेगी ॥ ५९ ॥ ऐसा कहकर बडा स्वरूप धारणकर उन ब्राह्मणोंकूं अपने शरीर ऊपर बिठायकर क्षणभरके बीचमें आकाश मार्गसे रामचंद्रके समीप आये ॥ ६० ॥ रामचंद्र ब्राह्मणसह वर्तमान हनुमान्‌कूं देखकर परम आनंद पाया हनुमान् रामकूं नमस्कार करके ॥ ६१ ॥ सब वृत्तान्त कहते भए हे राम ! ये सब ब्राह्मण गंगाकूं छोडकर आते नहीं थे इसवास्ते गंगाको लानेकी मैंने प्रतिज्ञा की है तब राम ब्राह्मणोंके चरणकमलकूं नमस्कार करके ॥६२॥ जाह्नवीका स्मरण करते भये और उसी क्षण वह जाह्नवी गंगा वहां प्रगट भई पीछे रामचंद्र ब्राह्मणोंकी अर्घ्य पाद्य आदिकी पूजा करके भुक्तिमुक्तिदेनेवाले अठारहहजारब्राह्मणोंका स्थान करते भये और उन ब्राह्मणोंका चरण धोकर जलमस्तकपर चढाये उनके गोत्र बारह हैं ये बारह गोत्र स्थापनके ८.लत रहे परंतु हालमें जो पीछे सात गोत्र लिखे हैं वे प्रसिद्ध हैं परंतु कलियुगमें उनमेंसे भी कम होवेंगे ॥ ६३ ॥ ६४ ॥ जैसे यज्ञ-

च देवैश्च परमामृतम् ॥ सिद्धेश्वरं नमस्कृत्य प्रतिगृह्य द्विजाशिषः ॥ ६५ ॥ यातः कृतार्थतां रामो गोकर्णस्य प्रसादतः ॥ सिद्धेश्वरं समासाद्य को न याति कृतार्थताम् ॥ ६६ ॥ मौक्तिकादिद्विजाः सर्वे कोकिलस्य मुनेर्मतम् ॥ मन्यंते ब्राह्मणाश्चान्ये तथा दिक्पालवासिनः ॥ ६७ ॥

इति श्रीब्राह्मणो० मौक्तिकोरगणपत्तनशिरःपत्तनवासिब्राह्मणोत्पत्तिवर्णनं नाम प्रकरणम् ॥ ३९ ॥ पंचद्रविडमध्ये गुर्जरसंप्रदायः आदितः श्लोकसंख्याः ॥ ४०४१ ॥

की समाप्तिमें देवतावोंको परम अमृत मिलता है वैसे सिद्धेश्वरकूं नमस्कार करके ब्राह्मणोंके आशीर्वाद लेकर ॥ ६५ ॥ गोकर्णके प्रसादसे रामचन्द्र कृतार्थ भये सिद्धेश्वरकी सेवासे कृतार्थ कौन नहीं होता ॥ ६६ ॥ मोता ओरपाल सिरस यह तीन गांवके ब्राह्मण सब मोताले कहे जातेहैं वे कोकिल मुनिके मतकूं मानतेहैं, स्त्रीका गोत्र विवाहके पूर्व पिताका लेतेहैं विवाहके अनंतर भर्त्ताका गोत्रोच्चार कहतेहैं मरण हुवे वाद पुनः पिताके गोत्रमें मिलती हैं वैसा श्रीमालिब्राह्मणोंमें दिसावाल ब्राह्मणोंमें रायकवाल ब्राह्मणोंमें कंडोल ब्राह्मणोंमें भी कोकिलमतकूं मानतेहैं॥६७॥

इति ब्राह्मणोत्पत्तिग्रंथमें मोताले ओरपाल ब्राह्मणभेदवर्णन प्रकरण ॥ ३९ ॥

अथ तापीतीरस्थकाष्ठपुरवासिब्राह्मणोत्पत्ति- प्रकरणम् ॥ ४० ॥

अथ स्कान्दे तापीमाहात्म्ये ॥ रुद्र उवाच ॥ पुरात्रेतायुगे वत्स संप्राप्तो रघुनंदनः ॥ वैदेह्या सहितो वीरो लक्ष्मणेन हनूमता ॥१॥ ततः पश्यति सर्वत्र सर्वां लिंगमयीं महीम् ॥ विमानैः शक्यते गंतुं चरणैर्न कदाचन ॥ २ ॥ पितृपिंडप्रदानाय

अब तापी नदीके तट ऊपर काष्ठपुर है,वहांके ब्राह्मणोंकी उत्पत्ति कहते हैं । शिवजी कहतेहैं हे स्कंद ! पूर्वकालमें त्रेतायुगमें वीर रामचंद्र, सीता, लक्ष्मण और हनुमान् सहित काष्ठपुरके पास आये ॥ १ ॥ तब वहां जहां देखते हैं उस ठिकाने शिवलिंग बिना पृथ्वीखाली नहीं है,पांवसे जिस ठिकाने चलना नहीं होसकता है विमानमेंबैठ कर चलना होसकताहै ॥ २ ॥ तब पितृनिमित्त श्राद्ध और ब्राह्मणोंका पादप्रक्षा-

द्विजांघ्रिक्षालनाय वै ॥ अदृष्ट्वा स्थानकं वत्स वीक्षितं हनुमन्मुखम् ॥ ३ ॥ ज्ञात्वा राघवचित्तस्थमभिप्रायं महाकपिः ॥ विंध्याचलस्य तां शीघ्रमाजहार महाशिलाम् ॥ ४ ॥ ॥ अत्रोदके तु विन्यस्य राघवेण महात्मना ॥ चक्रे पिंडप्रदानं च तथा संपूजिता द्विजाः ॥ ५ ॥ वने काष्ठपुरं चोक्त्वा स्थापिता द्विजसत्तमाः ॥ सैषा धर्मशिला वत्स महापातकनाशिनी ॥६॥ अत्र वत्स निधानानि औषधं गुटिकांजनम् ॥ रसादिकं मनोज्ञं च दृश्यते नाल्पभाग्यकैः ॥ ७ ॥ अत्र धर्मशिला वत्स यत्र गोपीपतिःस्वयम् ॥ तत्र तापीजले स्नानात्कस्य मोक्षो न जायते ॥ ८ ॥ दंडपाणिं हृषीकेशं रुद्रं च भुवनेश्वरम् ॥ स्नात्वा योऽत्र तपंत्यां च त्रिकालं पूजयन् हरम् ॥ ९ ॥ असंशयं मनुष्योऽसौ रुद्रस्य गणतां व्रजेत् ॥ भाग्यहीनो नरो यस्तु षडास्य नानु पश्यति ॥ १० ॥

इति श्रीब्राह्मणोत्पत्तौकाष्ठपुरवासिब्राह्मणोत्पत्तिवर्णनं नाम प्रकरणम् ४०

पंचद्रविडमध्ये महाराष्ट्रसंप्रदाय आदितः श्लोकसंख्याः ॥ ४०५१ ॥

पालन करनेकूं स्थान देखे उस बखत हनुमान्का मुख देखे ॥ ३ ॥ हनुमान् रामचन्द्रके मनकी बात जानकर जलदी विंध्याचलकी बडी एक शिला लाये ॥ ४ ॥ रामने वह शिला जलमें रखकर उसके ऊपर श्राद्ध पिंडदान किया और ब्राह्मणोंकी पूजा किये ॥ ५ ॥ उस वनका काष्ठपुर नाम रखकर वहा ब्राह्मणोंका स्थापन किये और उस शिलाका नाम धर्मशिला यह बडे पातकोंकूं नाश करनेवाली है ॥ ६ ॥ हे स्कंद ! इस वनमें पृथ्वीमें बडे बडे निधि हैं दिव्य औषध; गुटिका; अदृश्यांजन, रसायन आदि हैं परंतु भाग्यहीन मनुष्योंकूं दिखाते नहीं ॥ ७ ॥ हे स्कन्द ! जहां यह धर्म शिला और जहां श्रीकृष्ण और श्रीतापी वहां स्नान दर्शन करनेसे किसका मोक्ष नहीं होनेका सबका होगा ॥८॥ जो कोई इस तापीमें त्रिकाल स्नान करेगा और दंडपाणी शिव विष्णु इनकी त्रिकाल पूजा करेगा तो ॥९॥ निःसंशय वह मनुष्य शिवके गणोंमें मिलेगा हे षडानन ! जो भाग्यहीन है वह मनुष्य बहुधा वहां देखता नहीं ॥ १० ॥

इति श्री ब्रा० काष्ठपुरवासी ब्राह्मणोंकी उत्पत्ति वर्णन प्रकरण ॥ ४० ॥

अथौदुंबरकापित्थवाटमूलशृगालवाटीय-ब्राह्मणोत्पत्तिप्रकरणम् ॥ ४१ ॥

हरिवंशे विष्णुपर्वणि । वैशंपायन उवाच ॥ त्रिपुरे निहते वीरे रुद्रेणाक्लिष्टकर्मणा ॥ तत्र प्रधाना बहवो बभूवुरसुरोत्तमाः ॥१॥ शराग्निना न दग्धास्ते षष्टिः शतसहस्रिणः ॥ ते ज्ञातिवधसंतप्ताश्चक्रुर्वीराः पुराः तपः ॥ २ ॥ जंबुमार्गे सतामिष्टे महर्षिगणसेविते ॥ आदित्याभिमुखं वीराः सहस्राणां शतं समाः ॥३॥ वायुभक्षा नृपश्रेष्ठ स्तुवंतः पद्मसंभवम् ॥ तेषामुदुंबरं राजन् गण एकः समाश्रितः ॥ ४ ॥ वृक्षे तत्रावसन्वीरास्ते कुर्वंतो महत्तपः ॥ कपित्थवृक्षमाश्रित्य केचित्तत्रोषिताः पुरा ॥ ५ ॥ शृगालवाटीस्त्वपरे वटमूले तथा परे ॥ अधीयानाः परं ब्रह्म वटं गत्वाऽसुरात्मजाः ॥ ६ ॥ तेषां तुष्टो वरं दातुं प्राप्तो राजन्पितामहः ॥ वरं वरयतेत्युक्तास्ते राजन्पद्मयोनिना ॥ ७ ॥ नेषुस्तद्वरदानं तु द्विषंतह्यंबकं विभुम् ॥ इच्छन्तोपचितिं[1] गंतुं

अब औदुंबर ब्राह्मण; कापित्थ ब्राह्मण; वाटमूल ब्राह्मण; शृगालवाटीय ब्राह्मणोंकी उत्पत्ति कहते हैं वैशम्पायन बोले जिसबखत शिवने त्रिपुराधिपतिकूं मारा उस बखत उसमें जो बडे बडे असुर रहगये ॥१॥ शिवके बाणसे दग्ध नहीं भये साठलाख वे सब दैत्य ज्ञातिवधके संतापसे पूर्वकालमें बडा तप करते भये ॥२॥ जहां बडे बडे महर्षि रहते हैं और सज्जनोंको प्रिय ऐसे जंबुमार्गमें जाकर वहां सूर्यके सन्मुख खडेरहकर सौ हजार वर्षतक ॥३॥ हे नृपश्रेष्ठ ! वायु भक्षण करके ब्रह्माकी उपासना करतेहुवे जा साठ लाख दैत्य थे उनमेंसे कितनेक उदुंबर कहं गुलरके झाडका आश्रय करके तप किये इसवास्ते औदुंबरगण भये ॥४॥ कितनेक कपित्थ जो कवठेके झाडका आश्रय करके तप किये वे कापित्थगण भये ॥ ५ ॥ और कितनेक शृगालवटीमें तप किये वे शृगालवाटी भगे और जो बडके झाडका आश्रय करके तप किये वे वाट मूलगण भये ॥ ६ ॥ हे राजन् ! पीछे उन सबोंके ऊपर प्रसन्न होकर ब्रह्मा आकर कहते हैं कि तुम सब वर मांगो ॥ ७ ॥ हे कुरुनन्दन ! तब वे दैत्योंने शिवके द्वेषसे दूसरे

---

१ अत्र संधिरार्षः ।

ज्ञातीनां कुरुनंदन ॥८॥ तानुवाच ततो ब्रह्मा विश्वेशस्यशिव-
स्य च ॥ कः शक्तोपचितिं गंतुं मास्तु वोऽत्र वृथा श्रमः ॥९॥
इत्युक्ता ब्रह्मणा ते वै षट्पुरं जग्मुरादरात् ॥ ये भजन्तो
महादेवमसुरा धर्मचारिणः ॥ १० ॥ स्वयं हि दर्शनं तेषां
ददौ त्रिपुरनाशनः ॥ उवाचेदं च भगवानसुरान्स सतांगतिः ॥
॥ ११ ॥ वैरमुत्सृज्य दंभं च हिंसां चासुरसत्तमाः ॥ मामेव
चाश्रितास्तस्माद्वरं साधु ददामि वः ॥ १२ ॥ ये दीक्षिताः
स्थ मुनिभिः सत्क्रियापरमैर्द्विजैः ॥ सह तैर्गम्यतां स्वर्गः
प्रीतोऽहं वः सुकर्मणा ॥ १३ ॥ इह ये चैव वत्स्यंति तापसा
ब्रह्मवादिनः ॥ अपि कापित्थके वृक्षे तेषां लोको यथा मम ॥
॥ १४ ॥ श्वेतवाहननामान यश्च मां पूजयिष्यति ॥ व्रतं
कृत्वा त्रिरात्रे वै गतिं स मम यास्यति ॥ १५ ॥ औदुंबरा-
न्वाटमूलान्द्विजान्कापित्थकानपि ॥ तथा शृगालवाटीया-

वरकी इच्छा नहीं किये केवल शिवने जो पहले ज्ञातिका संहार किया है उसीका बदला लेने की इच्छा करतेभये॥८॥ तब ब्रह्मा उनकूं कहते भये कि हे दैत्यो! शिवकी बराबरी करनेकूं कौन समर्थ है तुम सबोंका श्रम व्यर्थ है ॥ ९ ॥ ऐसा ब्रह्माका वचन सुनकर वे दैत्य षट्पुरमें चलेगये और उनमेंसे जो कितनेक शिवके भक्त थे धर्मसे चलनेवाले ॥ १० ॥ उनकूं त्रिपुरका नाशकरनेवाले शिवने प्रत्यक्ष दर्शन दिया और सब रहेहुवे दैत्योंकूं भगवान् सज्जनोंकी रक्षा करनेवाले शिव ऐसा कहतेभए ॥ ११ ॥ हे दैत्यो ! तुम सबोंने वैर दंभ हिंसा छोडकर मेरा आश्रय किया इसवास्ते तुम लोकोंकूं उत्तम वर देताहूं ॥ १२ ॥ जो दैत्य यहां उत्तम ऋषि करके दीक्षित भयेहैं वे सब अपने कर्मसे शुद्ध उन ऋषियोंके साथ स्वर्गमें जावो हम तुमसबोंके कर्मसे प्रसन्न हैं ॥ १३ ॥ और जो कोई यहां तपस्वी ब्रह्म-वादी कपित्थ वृक्षका आश्रय करके रहेंगे उनकूं मेरे लोककी प्राप्ति होवेगी ॥१४॥ और यहां श्वेतवाहननामक मेरी जो पूजा करेगा त्रिरात्र व्रत करेगा वह मेरी गतिकूं पावेगा ॥ १५ ॥ जो यहां रहे हैं उनमेंसे जो उदुंबर वृक्षके आश्रयसे रहे हैं औदुंबर ब्राह्मण वैसे वाटमूल ब्राह्मण, कापित्थ ब्राह्मण, शृगालवाटीय ब्राह्मण

न्धर्मयुक्तान्दृढव्रतान् ॥ १६ ॥ पूजयिष्यंति सततं ते यास्यंतीप्सितां गतिम् ॥ इत्युक्त्वाथ महादेवः स्वलोकं च जगाम वै ॥ १७ ॥

इति श्रीब्रा० ध्याये औदुंबरादिचतुर्विधब्राह्मणोत्पत्ति-
वर्णनं नाम प्रकरणम् ॥ ४१ ॥

इति पंचद्राविडमध्ये गुर्जरसंप्रदायः ॥ आदितः श्लोकसंख्याः ॥ ४०६८ ॥

भये वे धर्मात्मा दृढव्रतहैं इनका ॥ १६ ॥ जो निरंतर पूजन करेंगे उनकूं इच्छित गति प्राप्त होवेगी ऐसा कहकर शिवजी कैलासको चलेगये इस तरफ वे चार प्रकारके ब्राह्मण भये ॥ १७ ॥

इति श्रीब्रा० औदुंबर आदि चार ब्राह्मणोंकी उत्पत्ति कही प्रकरण ॥ ४१ ॥ संपूर्ण.

अथद्वादशगौडब्राह्मणचतुर्विधकायस्थानामुत्पत्ति-प्रकरणम् ॥ ४२ ॥

अथ द्वादशविधगौडब्राह्मणानां चतुर्विधकायस्थानामुत्पत्तिमाह पाद्मे पातालखण्डे ॥ सूत उवाच-एकदा ब्रह्मलोके तु यमः प्रोवाच कं प्रति ॥ चतुरशीतिलक्षाणां शासनेऽहं नियोजितः ॥ १ ॥ असहायः कथं स्थातुं शक्नोमि पुरुषर्षभ ॥ ॥ ब्रह्मोवाच ॥ प्राप्स्यते पुरुषः शीघ्रमित्युक्त्वा विससर्ज तम् ॥ २ ॥ धर्मराजे गते ब्रह्मा समाधिस्थो बभूवह ॥ तच्छरीरान्महाबाहुः श्यामः कमललोचनः ॥ ३ ॥ लेखनीपट्टिकाहस्तो

अब बारह प्रकारके गौड ब्राह्मण और पंद्रह प्रकारके कायस्थज्ञातिकी उत्पत्ति कहतेहैं पद्मपुराणान्तर्गत पातालखण्डविषे सूतजी कहतेभये कि एक दिन यमराज ब्रह्माके पास जायकर बोले कि चौरासी लाख योनिकी शिक्षाके ऊपर मेरेकूं स्थापन किये हैं ॥१॥परंतु दूसरेकी सहायता बिना कैसे काम करसकूं तब ब्रह्मा कहतेभये हे यम! जलदीसे तेरेकूं दूसरा पुरुष मिलेगा ऐसा कहकर यमकूं बिदा किया॥२॥यमके गये बाद ब्रह्मा समाधि चढाकर बैठे,तब उनके शरीरमेंसे आजानुबाहु,श्यामकर्ण,कमल सरिखे हैं नेत्र जिसके ॥३॥ और हाथमें दवात कलम पट्टी लिये हैं ऐसा एक पुरुष निकल-

मषीभाजनसंयुतः ॥ स निर्गतोऽग्रतस्तस्थौ नाम देहीति चाब्रवीत् ॥ ४ ॥ ब्रह्मोवाच ॥ ॥ गच्छ पुरुष भद्रं ते तप आचरतामिति ॥ इत्याज्ञप्तः स पुरुषो ययौ धौरेयदेशकान् ॥ ५ ॥ उज्जयिन्याः समीपे तु क्षिप्रायाश्च तटे शुभे ॥ पंचक्रोशात्मके क्षेत्रे तपस्तप्तुं महत्तरम् ॥ ६ ॥ ततः कतिपये काले ब्रह्मा लोकपितामहः ॥ उज्जयिन्यां ततः श्रीमानाजगाम मुदान्वितः ॥ ७ ॥ यजनार्थाय यज्ञैश्च नाना-संभारसंयुतः ॥ चित्रगुप्तोऽपि धर्मात्मा कन्याः प्राप सुल-क्षणाः ॥ ८ ॥ वैवस्वतमनोः कन्याश्चतस्रः शुभलक्षणाः ॥ अष्टौ सुरूपा नागीया पितृभक्तिपरायणाः ॥ ९ ॥ तासां समभवन्पुत्रा द्वादशैव जगत्प्रियाः ॥ ब्रह्मा वर्षसहस्रं तु यज्ञै-रिष्ट्वा सुदक्षिणैः ॥ १० ॥ चित्रगुप्तमुवाचेदं वाक्यं धर्मार्थमेव च ॥ ॥ ब्रह्मोवाच ॥ चित्रगुप्तमहाबाहोमत्प्रियोऽस्मत्समु-द्भवः ॥ ११ ॥ चित्रगुप्त सुगुप्तांग तस्मान्नाम्ना सुविश्रुतः ॥ मम कायात्समुद्भूतःसर्वांगंप्राप्य सत्वरम् ॥१२॥ तस्मात् कायस्थ-विख्यातो लोके त्वं तु भविष्यसि॥ एते वै तव पुत्राश्च काक-

कर आगे खडा हुवा और कहताभया कि मेरेकूं नाम देवो ॥ ४ ॥ तब ब्रह्मा कहतेभए हे पुरुष ! तू जा तप कर तेरा अच्छा होगा तब उस पुरुषने अस्तु कहकर बडे देशोंमें जाता भया ॥ ५ ॥ उज्जयन नगरींके समीप क्षिप्रा नदीके तट ऊपर पांच कोशका जो क्षेत्र है वहां बडा तप किया ॥ ६ ॥ उसकूं बहुत दिन गये बाद लोकोंके पितामह ब्रह्मा हर्षित होकर उज्जयन नगरीमें आये ॥ ७ ॥ और बडे पदार्थोंसे हजार वर्षका यज्ञारंभ करतेभये अब वह चित्रगुप्तकूं सुलक्षणोंसे युक्त कन्या मिलीं ॥ ८ ॥ शुभलक्षणवाली चार तो वैवस्वत मनुकी सुन्दररूपवती पिताकी सेवामें तत्पर और आठ कन्या नागोंकी ॥ ९ ॥ ऐसी वह बारह स्त्रियोंसे जगत्प्रिय ऐसे बारह पुत्र भये और ब्रह्माने हजारवर्षका सुन्दर दक्षिणावाले यज्ञको पूरा करके ॥ १० ॥ चित्रगुप्तकूं कहतेभए हे चित्रगुप्त ! तू मेरेकूं प्रिय है क्योंकि मेरी कायासे उत्पन्न भया है ॥ ११ ॥ तेरा अंगगुप्त है इसवास्ते चित्रगुप्त तेरा नाम होवेगा और मेरी कायासे पैदा भया इसवास्ते ॥ १२ ॥ लोकमें कायस्थ नामसे विख्यात होवेगा और ये काकपक्ष धारण करनेवाले जो तुम्हारे बारहपुत्र

पक्षधराः शुभाः ॥ १३ ॥ सर्वे षोडशवर्षीयाःशुभाचाराःशुभाननाः ॥ परिप्राप्तसदाचारः कायस्थः पंचमो मतः ॥ १४ ॥ धर्मराजगृहं गच्छ कार्यं मे कुरु सुव्रत ॥ सदसत्सर्वजंतूनां लेखकः सर्वदैव हि ॥ १५ ॥ एतान्दास्यामि सर्वान्वै ऋषिभक्तिपरांस्तव ॥ एवमुक्त्वा तु विप्रेभ्यो ददौ लोकपितामहः ॥ १६ ॥ मांडव्याय ददौ पुत्रं सुरूपमृषिवल्लभम् ॥ मंडपाचलसान्निध्ये मंडपेश्वरसन्निधौ ॥ १७ ॥ मंडपेश्वरीयादेवी वर्तते जगदंबिका ॥ गृहीत्वा गतवान् सोऽपि ऋषिर्मांडव्यसंज्ञकः ॥१८॥ नाम्नाश्रीनैगमः सोऽपि कायस्थो देवनिर्मितः ॥ मांडव्यास्तत्रश्रीगौडागुरवःशंसितव्रताः ॥ १९ ॥ नैगमास्तेऽपि बहवःऋषिभक्तिपरायणाः ॥ जाता वै नैगमास्तत्रशतशोऽथसहस्रशः ॥२०॥ गौडास्तेऽपि च मांडव्य शिष्यास्ते गुरवः स्मृताः शिष्याणां चैव लक्षैकं प्रसंगात्समुदीरितम् ॥ २१ ॥ तस्मादर्धं गतास्ते वै लंभितं वासयन्पुरम् ॥ द्वितीयं तु सुतं तस्य गौतमाय ददौ ततः ॥२२॥ गौडेश्वरी तु या देवी वर्तते

हैं ॥ १३ ॥ वे सब सोलह बरसके, उत्तम आचार पालन करनेवाले हैं इसवास्ते कायस्थ वर्ण पांचवां मान्य है ॥ १४ ॥ और तुम धर्मराजके नजीक जावो मेरा काम करो सब जीवमात्रका पुण्यपाप कर्म सर्व काल तुमने लिखना ॥ १५ ॥ और ये बारह पुत्र तुमकूं देता हूं ऐसा कहकर ब्रह्मा एक एक पुत्र देतेभए ॥१६॥ उसमें प्रथम मांडव्यनामक ऋषिकूं दिये उनका स्थान मंडप पर्वतके पास जहां मंडपेश्वर शिव ॥ १७ ॥ और मंडपेश्वरी देवी हैं वहां चित्रगुप्तके पुत्रकूं लेकर मांडव्य ऋषि जाते भये ॥ १८ ॥ तब चित्रगुप्तके पुत्रका जो वंश भया सो नैगम कायस्थ ज्ञाति भयी और मांडव्यके वंशमें जो भये वे मांडव्य श्रीगौड ब्राह्मण भये कोई मालव्यश्रीगौड कहते हैं वे उनके उपाध्याय भये ॥ १९ ॥ और उनके सेवक सौ हजार नैगम कायस्थभए वे ऋषिकी भक्तिमें तत्पर रहते भये ॥ २० ॥ वे श्रीगौड मांडव्यके शिष्य एक लाख थे यह प्रसङ्गसे वर्णन किया ॥ २१ ॥ उसमेंसे आधे लंभित नगर बसाकर रहे पीछे ब्रह्माने दूसरा पुत्र गौतमकूं दिया ॥ २२ ॥ उनका स्थल जहां गौडेश्वरी देवी

जगदंबिका ॥ श्रीगौडः सोऽपि कायस्थो बहुधा विश्रुतः शुचिः ॥ २३ ॥ गौतमो दत्तवांस्तेषां गुर्वर्थं तानृषीन् विभुः ॥ श्रीगौडास्तत्र शिष्यावै गुरुवस्ते तपस्विनः ॥ २४ ॥ तृतीयं तु सुतं तस्य श्रीहर्षं दत्तवांस्ततः ॥ श्रीहर्षेश्वरसान्निध्ये गतवानृषिसत्तमः ॥ २५ ॥ सरोरुहे शुभे देशे शुभे च सरयूतटे ॥ सरोरुहेश्वरी यत्र वर्तते जगदंबिका ॥ २६ ॥ श्रीगौडास्तस्य वै शिष्या गुर्वर्थं संप्रकल्पिताः ॥ श्रीवास्तव्याश्च कायस्था नानारूपा ह्यनेकशः ॥२७॥ श्रीगौडानां च लक्षैकं शिष्याणां संप्रकीर्तितम् ॥ तस्मादर्धं गतास्तेऽपि ह्यवसन् जाह्नवीतटे ॥ ॥ २८ ॥ चतुर्थं तु सुतं तस्य हारीताय ददौ ततः गृहीत्वा गतवान् सोऽपि देशे हर्याणके शुभे ॥ २९ ॥ हारीतेश्वरसान्निध्ये हारितस्याश्रमे शुभे ॥ हर्याणेशी यत्र देवी वर्तते जगदंबिका ॥ ३० ॥ कायस्थाः श्रेणिपतयः विवृताश्च सहस्रशः ॥ हर्याणाश्चैव श्रीगौडा गुरुत्वे संप्रणोदिताः ॥ ३१ ॥ पचमं तु सुतं तस्य वाल्मीकाय ददौ ततः ॥ गृहीत्वा गतवान् सोऽर्बुदारण्यके शुभे ॥ ३२ ॥ देशेऽर्बुदे महारण्ये वल्मीकाश्रम-

वहां है और श्रीगौडकायस्थ यजमान श्रीगौड ब्राह्मण उपाध्याय भये वे बडे तपस्वी हैं ॥ २३ ॥ २४ ॥ ब्रह्माने तीसरा पुत्र श्रीहर्षनामकूं दिया सो श्रीहर्ष चित्रगुप्तके पुत्रकूं लेकर सरोरुह देहमें सरयू नदीके तट ऊपर जहां श्रीहर्षेश्वर महादेव सरोरुहेश्वरी देवी हैं वहां गया ॥ २५ ॥ २६ ॥ पीछे श्रीहर्षके शिष्य श्रीहर्ष गौडगुरु भये और श्रीवास्तव्य कायस्थ भये ॥ २७ ॥ श्रीगौड जो लक्ष ब्राह्मण थे उनमेंसे अर्ध जाह्नवीगंगाके तट ऊपर जाकर निवास किया वे गंगापुत्र भये ॥ २८ ॥ ब्रह्माने चौथा पुत्र हारीत ऋषिकूं दिया तब हारीत ऋषीश्वर चित्रगुप्तके पुत्रकूं ग्रहण करके हर्याणा देशमें ॥२९॥ जहां हरीतेश्वर महादेव, हर्याणेशी देवी है और जहां हारीत ऋषिका आश्रम है वहां गया ॥ ३० ॥ तिस पीछे उन दोनोंके वंशमें जो उत्पन्न भये वे श्रेणिपति कायस्थ यजमान और हर्याणा गौड ब्राह्मण उपाध्याय भये ॥ ३१ ॥ ब्रह्माने पाचवां पुत्र वाल्मीक नामकूं दिया सो वाल्मीक चित्रगुप्तके पुत्रकूं लेकर ॥ ३२ ॥ आबूगढके पास वाल्मीक

संज्ञके ॥ वाल्मीकेश्वरसान्निध्ये कायस्थो देवनिर्मितः ॥ ३३ ॥ वाल्मीकेश्वरिका यत्र वर्तते जगदंबिका ॥ वाल्मीकाश्चैव कायस्था वर्द्धितास्तदनंतरम् ॥ ३४ ॥ वाल्मीकाश्चैव गुरवो मुनिना संप्रकल्पिताः ॥ रक्तशृङ्गाश्च इत्येते पार्श्वे पश्चिमतः शुभे ॥ ३५ ॥ योजनद्वयमाने तु दूरे तिष्ठति चाश्रमे ॥ कियत्काले च संप्राप्ते यज्ञकर्म समाचरन् ॥ ३६ ॥ षष्ठं तस्य सुतं ब्रह्मा वसिष्ठाय ददौ पुनः ॥ गृहीत्वा गतवान् सोऽपि वसिष्ठो मुनिसत्तमः ॥३७॥ अयोध्यामंडले देशे वसिष्ठेश्वरसन्निधौ ॥ सरयूतटमासाद्य वर्तते जगदंबिका ॥ ३८ ॥ वासिष्ठाश्चैव कायस्था गुरवोऽपि शुचिस्मिताः ॥ वासिष्ठा ऋषिशिष्याश्च वसिष्ठस्य महात्मनः ॥ ३९ ॥ सप्तमं तु सुतं तस्य ददौ सौभरये ततः ॥ गृहीत्वा गतवान् सोऽपि ब्रह्मर्षिः स्वाश्रमं शुभम् ॥ ४० ॥ सौरभेय शुभे देशे सौरभेश्वरसान्निधौ ॥ सौरभी देवता तत्र वर्तते जगदंबिका ॥४१॥ सौरभाश्चैव कायस्थाः सौरभा गुरवः स्मृताः ॥अष्टमं तु सुतं तस्य दाल्भ्याय ददौ ततः॥४२॥

ऋषिका आश्रम है जहां वाल्मीकेश्वर महादेव, और ॥ ३३ ॥वाल्मीकेश्वरी देवी हैं वहां रहा पीछे वहां वाल्मीक कायस्थ यजमान और वाल्मीकि ब्राह्मण गौडगुरु वृद्धिंगत भये ॥ ३४ ॥ कितनेक ऋषिसे रक्तशृंगनामक भये ॥ ३५ ॥ आठ कोसके ऊपर जिनका आश्रम है कितनेक काल बीतनेपर जहां यज्ञ किया है ॥ ॥ ३६ ॥ ब्रह्माने छटा पुत्र वसिष्ठनामकूं दिया तब वसिष्ठमुनि चित्रगुप्तके पुत्रकूं लेकर ॥ ३७ ॥ अयोध्याके नजीक सरयू नदीके तट ऊपर जहां वसिष्ठेश्वर महादेव और वासिष्ठादेवी हैं वहां गये ॥३८॥ पीछे उन दोनोंके वंशमें वासिष्ठ गौड ब्राह्मण उपाध्याय भये और वासिष्ठकायस्थ यजमान ॥ ३९ ॥ ब्रह्माने सातवां पुत्र सौभरि ऋषिकूं दिया पीछे सौभरि चितगुप्तके पुत्रकूं लेकर अपने आश्रममें आये ॥ ४० ॥ सौरभ देशमें जहां सौरभेश्वर महादेव हैं और सौरभी देवी है वहां आये ॥ ४१ ॥ पीछे दोनों गुरु और शिष्यके वंशमें सौरभ कायस्थ यजमान भये सौरभ गौड ब्राह्मण उपाध्याय भये पीछे ब्रह्माने आठवां पुत्र दालभ्य नामकूं दिया ॥ ४२ ॥

गृहीत्वा गतवान् सोऽपि स्वाश्रमं मुनिसंयुतम् ॥ देशो दुर्ललको यत्र दालभ्या च सरिद्वरा ॥ ४३ ॥ दालभ्ये श्वरसान्निध्ये दालभ्यश्चित्रगुप्तजः ॥ दालभ्या इति या देवी वर्तते जगदंबिका ॥ ४४ ॥ तच्छिष्याश्चैव दालभ्या गुरुत्वे ते प्रकीर्तिताः ॥ तदुत्पन्ना द्विजाः सूत शतशोऽथ सहस्रशः ॥ ४५ ॥ एकदाहिस्थलीं प्राप्ताः केचित्कुंडलिनीं गताः ॥ याजयंति स्म दालभ्यान् कायस्थांश्चित्रगुप्तजान् ॥ ४६ ॥ नवम तु सुतं तस्य हंसं तमृषिसत्तमम् ॥ गृहीत्वा प्रययौ हंसं हंसदुर्गस्य सन्निधौ ॥ ४७ ॥ सुखसेनो महादेशो विद्यते गुणवत्तरः ॥ हंसेश्वरस्यसान्निध्य ऋषीणां प्रवरः सुधीः ॥ ४८ ॥ हंसेश्वरी यत्र देवी वर्तते जगदंबिका ॥ तदुत्पन्नाश्च कायस्थाः सुखसेना ह्यनेकशः ॥ ४९ ॥ ततस्तेभ्यो ददौ हंसान् शिष्यांश्च याजनानि वा ॥ विप्रास्तु सुखदाश्चैव सुखसेना महौजसः ॥ ५० ॥ याजयंति सदा- चाराः सुदेशेषु व्यवस्थिताः ॥ दशमं तस्य पुत्रं तु भट्टाख्य- मुनये ददौ ॥ ५१ ॥ गृहीत्वा गतवान् सोऽपि भट्टकेश्वर-

दालभ्य ऋषि चित्रगुप्तके पुत्रकूं लेकर दुर्ललक देशमें दालभ्या नदीके तट ऊपर ॥ ॥४३॥ जहां दालभ्येश्वर महादेव और दालभ्या देवी हैं दालभ्य मुनिका आश्रमहै वहां आये ॥४४॥ दालभ्य ऋषिके शिष्य थे वे दालभ्य गौडब्राह्मणगुरु भये और दालभ्यनामक कायस्थ उनके यजमान भये दालभ्यगौडके वंशमें जो सहस्रावधि उत्पन्न भये ॥४५॥ उसमें कितनेक अहिस्थलीमें गये कितनेक कुंडलिनीमें गये और चित्रगुप्त दालभ्यकायस्थोंकूं यज्ञ करवाये ॥४६॥ ब्रह्माने नववां पुत्र हंसनामक ऋषिकूं दिया वह हंस ऋषि चित्रगुप्तके हंसनामककूं लेकरहंस पर्वतके नजदीक॥४७॥ सुखसेन देशमें जहां हंसेश्वर महादेव और हंसेश्वरी देवी है वहां गये॥ ४८ ॥ पीछे हंस चित्रगुप्तके वंशमें उत्पन्न भये वे सुखसेनकायस्थ यजमान भये और ॥ ४९ ॥ हंस ऋषिके जो शिष्य थे वे सुखसेन गौड ब्राह्मण उपाध्याय भये ॥५०॥ उत्तम देशमें यज्ञकराते भये ब्रह्माने दशवां पुत्र भट्टनामक ऋषिकूं दिया ॥ ५१ ॥ वह भट ऋषि

सन्निधौ ॥ भट्टेश्वरी यत्र देवी वर्तते जगदंबिका ॥ ५२ ॥ भट्टेश्वरो महादेवो यत्र शूली महेश्वरः ॥ भट्टकेशाश्च कायस्थास्तदुत्पन्ना ह्यनेशकः ॥ ५३ ॥ तान् गुरुत्वेन संपाद्य भट्टनागरसंज्ञकाः ॥ एकादशं तु पुत्रं तु सौरभाय ददौ ततः ॥ ॥ ५४ ॥ सूर्यमंडलदेशे तु सौरभेश्वरसन्निधौ ॥ यत्र सौरेश्वरी देवी वर्तते जगदंबिका ॥ ५५ ॥ सूर्यध्वजाश्च बहवो जातास्तेऽपि सहस्रशः ॥ कायस्थास्तत्र विख्याता स्वधर्मनिरताः सदा ॥ ५६ ॥ सूर्यध्वजाश्च तच्छिष्या गुरुत्वे ते प्रकल्पिताः ॥ द्वादश तु सुतं तस्य माथुराय ददौ ततः ॥ ५७ ॥ माथुरेश्वरसान्निध्ये माथुरा विस्तृताः पुनः ॥ माथुरेशी महादेवी वर्तते जगदंबिका ॥ ५८ ॥ माथुरीयाश्च गुरवो वर्तंते बहवः स्मृताः ॥ एवं दत्त्वा तु तान् पुत्रान् ब्रह्मा लोक पितामहः ॥ ॥ ५९ ॥ उवाच वचनं श्लक्ष्णं ब्रह्मा मधुरया गिरा ॥ पुत्रत्वे पालनीयाश्च लेखकाः सर्वदैव हि ॥ ६० ॥ शिखासूत्रधरा ह्येते पटवः साधु संमता ॥ ॥ सूत उवाच ॥ ॥ एवमुक्त्वा

चित्रगुप्तके पुत्र भट्टनामककूं लेकर जहां भट्टकेश्वर महादेव और भटेश्वरी देवी वहां गये ॥ ५२ ॥ चित्रगुप्तके वंशमें जो पैदा भये वे भट्टनगर कायस्थ यजमान भये और भट्टऋषिके जो शिष्य थे वे भट्ट गौडब्राह्मण उपाध्याय भये ॥ ५३ ॥ ब्रह्माने ग्यारहवां पुत्र सौरभनामक ऋषिकूं दिया ॥ ५४ ॥ सौरभ ऋषिने चित्रगुप्तके पुत्रकूं लेकर सूर्यमंडल देशमें जहां सौरभेश्वर शिव सौरभेश्वरी देवी हैं वहां गये ॥ ५५ ॥ वे सूर्यमंडल देशमें गये इसवास्ते सूर्यध्वज कायस्थ और सूर्यध्वज गौडब्राह्मणनामसे विख्यात भये ॥ ५६ ॥ ब्रह्माने बारहवां पुत्र माथुरनामक ऋषिकूं दिया ॥ ५७ ॥ माथुर ऋषि चित्रगुप्तके पुत्रकूं लेकर माथुरदेशमें जहां माथुरेश्वर महादेव मथुरा नगरी माथुरेश्वरी देवी है वहां गये ॥ ५८ ॥ पीछे माथुर ऋषिके जो शिष्य थे माथुर चौबे गौड ब्राह्मण उपाध्याय भये और माथुरकायस्थ यजमान भये ब्रह्माने ऐसे बारह पुत्र देकर ॥ ५९ ॥ कहा कि यह चित्रगुप्तके वंशकूं पुत्रसरीखा पालन करना ॥ ६० ॥ ये सब कायस्थ शिर ऊपर शिखा और यज्ञोपवीत धारण करना, सूत कहते भये कि ब्रह्माजी!

विधायादौ यज्ञं ब्रह्मा ययौ स्वकम् ॥ ६१ ॥ सावित्र्या सहितः श्रीमानथ ये चित्रगुप्तकाः ॥ तेषां मध्ये तु ये चंकाः शृण्वंतु तस्य कारणम् ॥ ६२ ॥ गौडदेशे महारण्ये गंगायाश्चोत्तरे तटे ॥ महालक्ष्म्या कृतो यज्ञस्तत्र ये वै वृताः शुभाः ॥ ६३ ॥ चत्वारः परमार्थज्ञा मुख्याः कर्मणि साधवः ॥ तेषां शुश्रूषकास्तत्र लेखकाः कायजाः पुनः ॥ ६४ ॥ ते तु लक्ष्म्याः प्रसादेन चंकाः श्रीवत्सलाः परे ॥ कर्माणीह तु यान्येषां या गतिस्त्रिषु वर्णतः ॥ ६५ ॥ द्विजातीनां यथादानं यजनाध्ययने तथा ॥ कर्तव्यानीति कायस्थैः सदा तु निगमान् लिखेत् ॥ ६६ ॥ पुराणपाठकाः सर्वे सर्वे तत्स्मृतिशंसकाः ॥ आतिथ्यं श्राद्धकर्तृत्वं सर्वेषां धर्मसाधनम् ॥ ६७ ॥ इच्छया पुनरुद्वाहमितरः परिवर्जयेत् ॥ शूलारोहनिमित्तेन कायस्थानृषिसत्तमान् ॥६८॥ मांडव्यस्तान् शशापेदं कोपसंरक्तलोचनः ॥ अल्पोऽपराधो मे जातस्त्वया बहुतरीकृतः ॥६९॥

ऐसा कहकर यज्ञ समाप्त करके सावित्रीके सहित अपने लोकमें गये अब जो चित्रगुप्तके वंशमें चंकनामक भये हैं उनका कारण सुनो ॥ ६१ ॥ ६२ ॥ बडे रमणीक गौड देशमें गंगाके उत्तर तट ऊपर महालक्ष्मीने यज्ञ किया वहां जो विस्तारकूं प्राप्त भये ॥ ६३ ॥ उसमें चार मुख्य भये और उनकी सेवाकेवास्ते कायस्थ तत्पर होतेभये ॥ ६४ ॥ पीछे वे कायस्थ लक्ष्मीके अनुग्रहसे श्रीवत्सल चंक कायस्थ नामसे विख्यात भये इनका कर्म ब्राह्मणादि तीनवर्णोंमें जो हैं वह करना ॥ ६५ ॥ कायस्थोंने दान देना यज्ञ करना अध्ययन करना और वेदका पुस्तक लिखना ॥ ६६ ॥ पुराण और स्मृतिका पाठ करना आतिथ्यसेवा और श्राद्धादि धर्मसाधन कर्म करना ॥ ६७ ॥ इतर जो यह पंचम चित्रगुप्त कायस्थ हैं इन्होंने पुनर्विवाह वर्जित करना अब गौडोंकूं और कायस्थोंकूं कालेमें जो शाप भया है सो कहते हैं एकदिन चोरोंके सह वर्तमान मांडव्य ऋषिकूं कोई राजाने शूलीके ऊपर चढायकर उनका प्रताप देखकर ऋषिकूं तो नीचे उतार दिया ॥ ६८ ॥ तब मांडव्य ऋषि चित्रगुप्तके पास जायकर कहा कि बाल्य अवस्थामें जो थोडा मैने अपराध किया उसका दंड तूने बहुत दिया इसवास्ते ॥ ६९ ॥

वध्यस्त्वं धर्मतः शीघ्रं पापीयान् भव लेखक ॥ श्रुत्वा शापं चित्रगुप्त ऋषिसेवां चकार ह ॥ ७० ॥ ऋषिरुवाच ॥ ॥ मम शापस्तु विफलो न कदाचिद्भविष्यति ॥ तथाप्यनुग्रहो मे वै स्वज्जातीनां भविष्यति ॥ ७१ ॥ एवमुक्तोऽपि सेवां वै चित्रगुप्तश्चकारह ॥ कलौ शापो मया दत्तः सर्वेषां स भविष्यति ॥ ७२ ॥ तेषु सूर्यध्वजा ये वै तेषां धर्मः प्रणश्यपि ॥ वैश्यादुच्चतरा वृत्तिर्ब्राह्मणक्षत्रियादधः ॥ ७३ ॥ ब्रह्मशापाभिभूतानां पातित्यं च कलौ ध्रुवम् ॥ वाल्मीकानां कियान् धर्मः स्थास्यत्येवं सुनिश्चयम् ॥ ७४ ॥ इति चित्रगुप्तकायस्थभेदः प्रथमः । अथ कल्पभेदेन द्वितीयचित्रगुप्तकायस्थः तदुत्पत्तिमाह पाद्मे सृष्टिखंडे ॥ सृष्ट्यादौ सदसत्कर्मज्ञप्तये प्राणिनां विधिः ॥ क्षणं ध्यायन् स्थितस्तस्य शरीरान्निर्गतो बहिः ॥ ७५ ॥ दिव्यरूपः पुमान् हस्ते मषीपात्रं च लेखनीम् ॥ दधानश्चित्ररूपेण रक्षिता दैवतेन हि ॥ ७६ ॥

हे लेखक ! तू पापी होजा और तू धर्मसे वध योग्य है चित्रगुप्त ऋषिका शाप सुनते त्रास पाकर ऋषिकी सेवा करनेलगे ॥ ७० ॥ तब मांडव्य कहते भए हे चित्रगुप्त ! तू सेवा करता है परंतु मेरा शाप विफल कदापि नहीं होनेका तथापि मेरे अनुग्रहसे तेरे ज्ञाति लोकोंकूं शाप फलेगा तेरेकूं नहीं ॥ ७१ ॥ ऐसा कहा तथापि चित्रगुप्त ऋषिकी सेवा करनेलगा तब ऋषिने कहा कि तीन युगमें पुण्यात्मा रहेंगे और कलियुगमें सब पापी होवेंगे ॥ ७२ ॥ तथापि चित्रगुप्तने सेवा करी तब ऋषि कहते भए कि तेरे बारह वंश हैं उसमेंसे जो सूर्यध्वजवंश है उनका धर्मनाश पावेगा बाकी सबोंकी वृत्ति वैश्यवर्णसे ऊंची ब्राह्मण क्षत्रियसे नीची पालन करना ॥ ७३ ॥ ब्राह्मणके शापसे कलिमें पतितपना प्राप्त भया है बाल्मीक ब्राह्मण और कायस्थ उनका कुछ धर्म रहेगा निश्चय करके ॥ ७४ ॥ इति चित्रगुप्त कायस्थका भेद पहला समाप्त भया ॥ अब दूसरा चित्रगुप्तकायस्थकी उत्पत्तिभेदसे कहते हैं सृष्टिके आरंभमें ब्रह्मा प्राणियोंका पुण्य पाप कर्मका ज्ञान होनेके वास्ते क्षणभर ध्यानकरकेबैठे इतनेमें ब्रह्माके शरीरमेंसे बाहर एक पुरुष निकला ॥ ७५ ॥ दिव्यस्वरूप दवात कलम हाथमें धरे है विचित्र

चित्रगुप्त इति ख्यातो धर्मराजसमीपतः ॥ ब्रह्मणा सह देवैश्च क्षणं ध्यात्वा नियोजितः ॥ ७७ ॥ प्राणिनां सदसत्कर्मलेखनाय सुबुद्धिमान् ॥ भोजनादौ बलिस्तस्य भागोऽपि परिकीर्तितः ॥ ७८ ॥ ब्रह्मकायोद्भवो यस्मात्कायस्थ इति गीयते ॥ दक्षप्रजापतेः कन्यां दाक्षायण्यभिधां ततः ॥ ७९ ॥ उपयेमे ततः पुत्रो जातस्तस्य महात्मनः ॥ विचित्रगुप्तनामासौ बुद्धिचातुर्यवीर्यवान् ॥ ८० ॥ ततस्तेन मनोः कन्या यथाविधि विवाहिता ॥ स्वक्षाभिधानतस्तस्यां धर्मगुप्तो बभूव ह ॥ ८१ ॥ धर्मगुप्ताच्च गांधार्यां रुद्रगुप्तोऽभवत्सुतः ॥ तस्मादप्सरसो जातं पुत्राणां तु चतुष्टयम् ॥ ८२ ॥ माथुरो गौडसंज्ञश्च नागरो नैगमस्तथा ॥ तेषां नामानि चत्वारि चतुर्णां च यथाक्रमम् ॥ ८३ ॥ कायस्थश्चैकशाकश्च कौलिकश्च महेश्वरः ॥ एतेषां काश्यपं गोत्रं तेषां धर्ममथ शृणु ॥ ८४ ॥ स्नानं द्विकालमेतेषां त्रिकालं संधिवंदनम् ॥ अष्टम्यां च चतुर्दश्यां चंडीव्रतपरायणाः ॥ ८५ ॥ भौमवारव्रताश्चैव

स्वरूप है उसकूं देखकर देवतावोंने चित्रगुप्त नाम रक्खा ॥ ७६ ॥ उस चित्रगुप्तकूं ब्रह्माने क्षणभर ध्यान करके देवसहवर्तमान धर्मराजके पास स्थापन किया ॥ ७७ ॥ प्राणिके शुभाशुभकर्म लिखनेके वास्ते बुद्धिमान् चित्रगुप्तकूं स्थापन किया और भोजनकी बखत उनका बलि देनेका स्थापन किया ॥ ७८ ॥ ब्रह्माकी कायासे पैदा भया इस वास्ते कायस्थ जिसकूं कहतेहैं पीछे चित्रगुप्तने दक्षप्रजापतिकी दाक्षायणी नाम कन्याके साथ ॥ ७९ ॥ विवाह किया उसमें विचित्रगुप्तनामक पुत्र भया वह बडा पराक्रमी भया ॥ ८० ॥ उसने मनुष्यकी कन्याके साथ विवाह किया उससें धर्मगुप्तनामक पुत्र भया॥८१॥धर्मगुप्तका पुत्र रुद्रगुप्त भया उसकी अप्सरास्त्रीसे चार पुत्रभये ॥ ८२ ॥ माथुर १ गौड २ सागर ३ नैगम ४ ऐसे चार नामसे चार पुत्र भये॥८३॥उनके अपर नाम क्रमसेकायस्थ १ शाक २ कौलिक ३ महेश्वर ४ ऐसे जानो इन सबोंका काश्यप गोत्र है अब धर्म सुनो ॥ ८४ ॥ नित्य दो बखत स्नान करना त्रिकाल संध्यावंदन करना और अष्टमी चौदसकूं दुर्गाव्रतकरना

नवरात्रव्रतास्तथा ॥ तर्पणं पंचयज्ञानां विधानं च यथाक्रमम् ॥८६॥ इ० चि० का० भे० द्वितीयः ॥ अथ चांद्रसेनीयकायस्थोत्पत्तिमाह स्कांदे रेणुकामाहात्म्ये—एवं हत्वार्जुनं रामः संधाय निशिताञ्छरान् ॥ अन्वधावत्स तान्हंतुं सर्वानेवासुरान्नृपान् ॥ ८७ ॥ तदा रामभयात्सर्वे नानावेषधरान्नृपाः ॥ स्वस्वस्थानं परित्यज्य यत्र कुत्र गताः किल ॥ ८८ ॥ सगर्भा चंद्रसेनस्य भार्या दाल्भ्याश्रमं गता ॥ ततो रामः समायातो दाल्भ्याश्रममनुत्तमम् ॥ ८९ ॥ पूजितो मुनिना रामो भोजनार्थं समुद्यतः ॥ भोजनावसरे तत्र गृहीत्वापोशन करे ॥ ९० ॥ रामस्तु याचयामास हृदिस्थं स्वमनोरथम् ॥ तस्मै प्रादादृषिः कामं भार्गवाय महात्मने ॥ ९१ ॥ याचयामास रामाद्वै कामं दाल्भ्यो महामुनिः ॥ ततो द्वौ परमप्रीतौ भोजनं चक्रतुर्मुदा ॥ ९२ ॥ भोजनांते महाभागावासने चोपविश्य च ॥ तांबूलानंतरं दाल्भ्यः पप्रच्छ भार्गवं प्रति ॥ ॥ ९३ ॥ यत्त्वया प्रार्थितं देवं तत्त्वं शंसितुमर्हसि ॥ राम

॥ ८५ ॥ मंगलवारका व्रत नवरात्रका व्रत करना तर्पण पंचयज्ञ करना ॥ ८६ ॥ इति चित्रगुप्त कायस्थोंका दूसरा भेद पूरा भया । अब चंद्रसेन राजाके वंशस्थ कायस्थोंका भेदकहतेहैं—परशुराम सहस्रार्जुनकूं मारकर पीछे पृथ्वीमेंके सब क्षत्रियोंकूं मारनेके वास्ते तीक्ष्ण बाणलेके दौडने लगे ॥ ८७ ॥ तब परशुरामके भयसे सब क्षत्रिय राजा अनेक तरहके वेष धारण करके अपना अपना स्थान छोडकर जहां तहां चलेगये ॥ ८८ ॥ और चंद्रसेन राजाकी स्त्री सगर्भा थी सो दालभ्य ऋषिके आश्रममें गई दालभ्य ऋषिने उसका संरक्षण किया पीछे परशुराम दालभ्य ऋषिके आश्रममें आये ॥ ८९ ॥ तब मुनिने पूजा किये और भोजनकूं बैठाये तब आपोशन हाथमें लेकर ॥ ९० ॥ परशुराम अपने दिलकी बात मांगने लगे तब दालभ्य मुनिने रामकूं कहा कि आप जो मांगोगे सो दूंगा ॥ ९१ ॥ ऐसा कहकर रामके पास भी अपने एक इच्छित मांग लिया सो रामने तथास्तु कहा पीछे दोनों जने परमप्रीतिसे भोजन करके ॥ ९२ ॥ पीछे उत्तम आसन ऊपर बैठकर तांबूल भक्षण करके प्रथम दालभ्य परशुरामकूं पूछते भये ॥ ९३ ॥ हे राम ! तुम क्या मांगते हो सो कहो तब राम कहते भए तुम्हा

उवाच ॥ ॥ तवाश्रमे महाभाग सगर्भा स्त्री समागता ॥९४॥ चंद्रसेनस्य राजर्षेस्तां देहि त्वं महामुने ॥ ततो दाल्भ्यः प्रत्युवाच ददामि तव वांछितम् ॥ ९५ ॥ यन्मया प्रार्थितं देव तन्मे दातुं त्वमर्हसि ॥ ततः स्त्रियं समाहूय चंद्रसेनस्य वै मुनिः ॥ ९६ ॥ भीता सा चपलापांगी कंपमाना समागता ॥ रामाय प्रददौ तत्र ततः प्रीतमना अभूत् ॥ ९७ ॥ ॥ राम उवाच ॥ यत्त्वया प्रार्थितं विप्र भोजनावसरे पुरा ॥ तन्मे शंस महाभाग ददामि तव वांछितम् ॥ ९८ ॥ ॥ दाल्भ्य उवाच ॥ ॥ प्रार्थितं यन्मया पूर्वं राम देव जगद्गुरो ॥ स्त्रीगर्भस्थममुं बालं तन्मे दातुं त्वमर्हसि ॥ ९९ ॥ ततो रामोऽब्रवीद्दाल्भ्यं यदर्थमिह चागतः ॥ क्षत्रियांतकरश्चाहं तत्त्वं याचितवानसि ॥ १०० ॥ प्रार्थितं च त्वया विप्र कायस्थं गर्भमुत्तमम् ॥ तस्मात्कायस्थ इत्याख्या भविष्यति शिशोः शुभा ॥ ॥१०१॥ जायमानस्तदा बालः क्षात्रधर्मा भविष्यति ॥ दुष्टाद्वै क्षात्रधर्मात्तु त्वं वारयितुमर्हसि ॥ १०२ ॥ ततो दाल्भ्यः प्रत्युवाच भार्गवं प्रति हर्षितः ॥ मा कुरुष्वात्र संदेहं

आश्रममें चन्द्रसेनकी स्त्री सगर्भा आई है उसकूं देव ॥ ९४ ॥ तब दालभ्य कहतेभए हे राम ! तुम्हारा वांछित मैं देताहूं ॥ ९५ ॥ पीछे मेरा इच्छित आप देनेकूं योग्य हो ऐसा कहकर चन्द्रसेनकी स्त्रीकूं बुलाकर ॥ ९६ ॥ कम्पायमान होरही ऐसी स्त्री रामकूं दिये तब राम प्रसन्न होकर कहते हैं ॥ ९७ ॥ हे दालभ्य भोजनकी वखत तुमने जो मांगा सो कहो मैं इच्छित देताहूँ ॥ ९८ ॥ दालभ्य कहते भए हे राम ! आपके पास पहले जो मांगाहै सो यह है कि चंद्रसेनकी स्त्रीके गर्भमें जो बालक है सो देनेकूं योग्यहो ॥ ९९ ॥ तब राम कहतेभए कि जिस कारण मैं यहां आया सो हे ऋषि ! तुमने जो तत्व था सोई मांगा ॥ १०० ॥ हे ऋषि ! तुमने कायाके अंदरकागर्भ मांगा इसवास्ते इस बालकका नाम कायस्थ होगा ॥ १०१ ॥ यह बालक उत्पन्नहोके क्षात्रधर्मी होवेगा इसवास्ते हे ऋषि ! तुमने उसकूं दुष्ट क्षत्रधर्मसे निवारण करना ॥ १०२ ॥ तब दालभ्यऋषि हर्षितहोकर कहते भए इस बातमें आपने संशय नहीं करना दुष्ट बुद्धि नहीं होगा ॥१०३॥

दुर्बुद्धिर्न भविष्यति ॥ १०३ ॥ एवं रामो महाबाहुर्हित्वा तं गर्भमुत्तमम् ॥ निर्जगामाश्रमात्तस्मात्क्षत्रियांतकरः प्रभुः ॥ ॥ १०४ ॥ स्कंद उवाच ॥ ॥ कायस्थ एष उत्पन्नः क्षत्रिण्यां क्षत्रियात्ततः ॥ रामाज्ञया स दाल्भ्येन क्षत्रधर्माद्वहिष्कृतः ॥ १०५ ॥ दत्तः कायस्थधर्मोऽस्म चित्रगुप्तस्य यः स्मृतः ॥ तद्वंशजाश्च कायस्था दाल्भ्यगोत्रास्ततोऽभवन् ॥ ॥ १०६ ॥ दाल्भ्योपदेशतस्ते वै धर्मिष्ठाः सत्यवादिनः सदाचाररता नित्यं रता हरिहरार्चने ॥ १०७ ॥ देवविप्रपितॄणां वै ह्यतिथीनां च पूजकाः ॥ यज्ञदानतपः शीला व्रततीर्थरताः सदा ॥१०८॥ इति चांद्रसेनीयकायस्थभेदस्तृतीयः ॥ अथ संकरकायस्थानां जातिनिरूपणम् ॥ महिष्यवनिता सुतं वैदेहा यं प्रसूयते ॥ स कायस्थ इति प्रोक्तस्तस्य कर्म विधीयते ॥ १०९ ॥ लिपीनां देशजातानां लेखनं ससमाचरेत् ॥ गणकत्वं विचित्रत्वं बीजपाटीप्रभेदतः ॥ ११० ॥ अधमः शूद्रजातिभ्यः पंचसंस्कारवानसौ ॥ चातुर्वण्यस्य

ऐसा सुनकर गर्भकूं छोडकर रामआश्रमके बाहर चलेगये ॥ १०४ ॥ स्कंद कहते भये इस गर्भस्थ बालक क्षत्रियवीर्यसे क्षत्रियवाणी स्त्रीके विषे उत्पन्न भया सो मुख्य क्षत्रियधर्मी भया परंतु परशुरामकी आज्ञासे दालभ्यमुनिने उस बालकूं क्षत्रियधर्मसे बाहर निकाला ॥ १०५ ॥ और चित्रगुप्त कायस्थका धर्म दिया पीछे उसके वंशमें जो भये वे सब कायस्थ भये सबोंका दालभ्यगोत्र भया ॥ १०६ ॥ दालभ्यके वचनसे सब कायस्थ धर्मिष्ठ सत्यवादी आचारसंपन्न विष्णु शिवके पूजनमें तत्पर ॥ १०७ ॥ देव, ब्राह्मण अतिथिके पूजनमें तत्पर श्राद्ध तर्पण यज्ञ ज्ञान तप व्रत तीर्थयात्रा करनेमें तत्पर रहतेभए ॥ १०८ ॥ इति चद्रसेनीयकायस्थका भेद तीसरा पूरा भया अबवर्णसंकर कायस्थ जातिका भेद कहते हैं द्वादशमिश्रजातीमेंका चौथा जो माहिष्यउसकी स्त्री वैदेह मिश्रजातीमें ग्यारहवीं इन दोनोंसे जो पैदा भया पुत्र उसकूं कायस्थ कहते हैं ॥ १०९॥ उनका कर्म अनेकदेशकी लिपि लिखना बीजपाटी गणित जानना ॥ ११० ॥ शूद्रवर्णसे

सेवा हि लिपिलेखनसाधनम् ॥ १११ ॥ व्यवसायः शिल्पकर्म तज्जीवनमुदाहृतम् ॥ शिखां यज्ञोपवीतं च वस्त्रमारमंभसा ॥ ११२ ॥ स्पर्शनं देवतानां च कायस्थः परिवर्जयेत् ॥ इति संकरजातीयकायस्थभेदश्चतुर्थः ॥ एवं कायस्थात् कायस्थविधवायां कायस्थतमाः पंचमाः ॥ अथैषां किंचिद्धर्मनिर्णयः ॥ संकरकायस्थस्य पंचसंस्कारा अमंत्रकाः ॥ ११३ ॥ जातकर्मान्नाशनं च वपनं कर्णभेदनम् विवाहः ॥ पंचमस्तस्य नान्यः संस्कार इष्यते ॥ ११४ ॥ चित्रगुप्तचांद्रसेनीयकायस्थानां केचन षोडशसंस्कारान् समंत्रकान् वदंति केचन दश संस्कारान् शूद्रवदमंत्रकान् कुर्यादिति वदंति तत्र पूर्वमेवास्मिन्ग्रंथे स्वस्वोत्पत्तिप्रसंगे द्विजातिवद् यजनाध्ययनदानानि वैश्यादुत्तमं ब्राह्मणक्षत्रियादधमं धर्ममाचरेदित्येवमप्युक्तं तत्रैव कलौ पातित्यमपि तेषां प्रतिपादितमाद्यचित्रगुप्तकायस्थस्य कलौ पातित्यं द्वितीयचित्रगुप्तकायस्थस्य स्पष्टक्षत्रियधर्मः [illegible]पादितः ॥ चांद्रसेनीयकायस्था ब्रह्मकायोद्भवादयः ॥ [illegible]गुप्ताश्चांद्रसेनास्तेषां धर्मः समोभवत् ॥११५॥ हरिकृष्ण:-[illegible]-समूहे तु निश्चयो नव जायते ॥ कलौ सर्वपि [illegible] ह्युत्तमत्वं बहिः स्थिताः ॥ ११६ ॥ न चांतःकरणे

[illegible]म इनकूं पांच संस्कारका अधिकार है चा[illegible] वर्णकी सेवा करना ॥१११॥ व्यापार [illegible] [illegible]गरी चातुर्यकाम करना यही जीविकाहै और शिखा, जनेऊ लाल वस्त्र [illegible] ॥११२॥ देवताका स्पर्श इन कायस्थोंकूं [illegible] है और संकरवर्ण कायस्थोंका विना मन्त्र पांच संस्कारका अधिकार है ॥ ११३ ॥ जातकर्म १ अन्नप्राशन २ मुंडन ३ कर्णवेध ४ विवाह ५ पांच संस्कार है दूसरे नहीं ॥ ११४ ॥ पूर्व जो कायस्थ कहे उनका [illegible] समान है कोई कहतेहैं ॥११५॥ ऐसे वाक्यभेदमें निश्चय नहीं हो सकता और कलियुगमें उत्तम वर्णकी सब इच्छा ऊपरसे रखते हैं ॥११६॥ अंतःकरणमें उनी

शुद्धिस्तेषां पातित्यदर्शनात् ॥ अमंत्रक कर्म कुर्यादिति मे मतिकल्पना ॥ ११७ ॥

इति श्रीब्राह्मणोत्पत्तिमार्तंडाध्याये द्वादशगौडानामष्टा दशविधकायस्था-
नामुत्पत्तिवर्णनं नामप्रकरणम् ॥४२॥ सर्वपद्यसंख्याः ॥४१८५॥

धर्मकी शुद्धि नहीं है और कलिमें शापसे पतित शापहै इस वास्ते कायस्थोंको सविधि पराणोक्त कर्म करना योग्य दीखताहै ॥ ११७ ॥

इति गौडकायस्थोत्पत्तिप्रकरण ॥ ४२ ॥

अथ वाल्मीकगोमित्रीयख्यालयब्राह्मणोत्पत्ति-प्रकरणम् ॥ ४३ ॥

अथ वाल्मीकादिब्राह्मणोत्पत्तिसारमाह ॥ पूर्वं द्वादशगौडानां ब्राह्मणानां समुद्भवः ॥ कायस्थसंयुतः प्रोक्तस्तन्मध्ये पंचमाश्च ये ॥ १ ॥ ते तु वाल्मीकका विप्राः कायस्थाः सेवकास्तथा ॥ गोमित्रीयाश्च तत्रैव तेषां वक्ष्ये समुद्भवम् ॥२॥ पाद्मे पातालखंडे कायस्थोत्पत्तिप्रसंगे ॥ सूत उवाच॥कायस्थश्चित्रगुप्तस्तु ब्रह्मदेहसमुद्भवः ॥ तस्मै पितामहः पुत्रान् दत्तवान् द्वादशैव हि ॥ ३ ॥ तत्र वै पंचमं पुत्रं वाल्मीकाय ददावजः ॥ गृहीत्वा गतवान् सोपि ह्यर्बुदारण्यके शुभे ॥ ४ ॥ देशेऽर्बुदे

अब वाल्मीक [उर्फ वालम] ब्राह्मणोंकी उत्पत्तिसार कहतेहैं-इसकेपूर्व प्रकारके जो गौड कायस्थोंके सहवर्तमान उनकी उत्पत्ति कही उसमें जो पांचवें गौड कहे ॥१॥ वे वाल्मीक ब्राह्मण और कायस्थ उनके सेवक भये और गोमित्रीय ब्राह्मण भी वहां उत्पन्न भयेहैं उन सबोंकी उत्पत्तिकथा कहतेहैं ॥२॥ सूतजी कहतेभये हे शौनक चित्रगुप्त कायस्थ ब्रह्माके देहसे उत्पन्न भया पीछे ब्रह्माने उसकूं बारह पुत्र दिये और चित्रगुप्तकूं भी बारह पुत्र भये थे॥३॥ उनमें पांचवां पुत्र जो वाल्मीक नामक ऋषिकूं दिया सो वाल्मीक ऋषिने चित्रगुप्तके पुत्रकूं लेकर आबूगढके नजीक ॥ ४ ॥ वा-

महारम्ये वाल्मीकाश्रमसंज्ञके ॥ वाल्मीकेश्वरिका यत्र वर्तते जगदंबिका ॥ ५ ॥ वाल्मीकाश्चैव कायस्था वर्द्धितास्तदनंतरम् ॥ वाल्मीकाश्चैव गुरवो ऋषीणां संप्रकल्पिताः ॥ ६ ॥ रक्तशृंगाश्च इत्येते पार्श्वे पश्चिमतः शुभे ॥ योजनद्वयमाने तु दूरे तिष्ठंति चाश्रमे ॥ ७ ॥ तत्रैकदा च वाल्मीकी रामाल्लब्धधनो महान् ॥ श्रीमद्रामसहायेन सर्वसंभारसंवृतः ॥ ८ ॥ सरस्वत्यग्निकोणे तु कृत्वास्थानमनुत्तमम् ॥ उत्तमं मंडपं कृत्वा गौतमादीन् महामुनीन् ॥ ९ ॥ वाल्मीकिर्वरयामास क्रतुर्जातस्तथोत्तमः ॥ तदंते शुशुभेतीव वाल्मीकिस्थानमुत्तमम् ॥ ॥ १० ॥ नवयोजनविस्तीर्णं प्रायतं च त्रयोदश ॥ यज्ञांते मुनिमुख्यानां दानार्थं विहितं हि तत् ॥ ११ ॥ वाल्मीकिर्मधुरैर्वाक्यैः प्रबद्धांजलिरब्रवीत् ॥ अगस्त्यात्रे भरद्वाज कण्व च्यवन गौतम ॥ १२ ॥ वसिष्ठ गर्ग ऋषभ हे गालव विशारद ॥ ऋष्यशृङ्ग तथा धौम्य हे काश्यप महामते ॥ १३ ॥ जमदग्नेऽत्रिकुलज विश्वामित्र महातप॥यूयं चान्ये च बहवो मम यज्ञेऽत्र संगताः ॥ १४ ॥ स्थानप्रतिष्ठाकरणं यथा मे

ल्मीक ऋषिके आश्रममें जहां वाल्मीकेश्वरी देवी है वहां गये ॥५॥ पीछे वाल्मीक नामक कायस्थ औ वाल्मीकनामक ब्राह्मण वृद्धिपाये ॥६॥ और वे रक्तश्रृंगनामक वहांसे ८ कोसके ऊपर एक आश्रम है उस ठिकाने रहते भये ॥ ७ ॥ और वहां एक दिनवाल्मीक मुनि रामचंद्रजीके पाससेबहुत धन लाकर और उनकीसहायतासे यज्ञका पदार्थ संपादन करके ॥८॥ सरस्वतीके अग्निकोणके ऊपर उत्तम भूमि देख कर वहां कुंड,मंडप बनाकर गौतमादिक जो बड़े २ ऋषि हैं उनका ॥ ९ ॥ वरण करके उत्तम यज्ञ किया । यज्ञ करनेसे वह आश्रम अति शोभित हुवा ॥१०॥ उस आश्रमका प्रमाण कहतेहैं छत्तीस कोस चौडा बावन कोस लंबाहै वह स्थानयज्ञसमाप्तिमें ऋषियोंकूं दान देनेकेवास्ते निश्चित कियाहै ॥११॥ यज्ञ हुवे बाद वाल्मीक ऋषि हाथ जोडकर मधुर वचनसे हे अगस्ति हे आत्रि हे भरद्वाज हे कण्व हेच्यवन हे गौतम ॥ १२ ॥ हे वसिष्ठादि ऋषीश्वरो ॥ १३ ॥ तुम सब और दूसरे भी जो मेरे यज्ञमें आयेहैं ॥ १४ ॥ जैसे मेरे स्थानकी प्रतिष्ठा हो वैसा मेरा मनोरथ सिद्ध करो

सफलं भवेत् ॥ एवं श्रुत्वा मुनिवरास्तथेत्यूचुस्तपोनिधिम् ॥ ॥ १५ ॥ सर्वे ते शिष्यलक्षैकमुत्तमा वेदवित्तमाः ॥ तेषां विहितसख्यानां गोत्राणि विमलानि च ॥ १६ ॥ त्रयोदशशतान्युच्चैः सञ्जातानि महात्मनाम् ॥ पंचाशच्च सहस्राणि गोरक्षणनियोजिताः ॥ १७ ॥ गोमित्रीयास्ते विज्ञेयाः सर्वदा विबुधोत्तमैः ॥ अष्टौ च चत्वारिंशच्च ब्राह्मणानां सहस्रशः ॥ ॥ १८ ॥ रव्यग्रे प्रेषिता ह्येते ते वै रव्यालयाः स्मृताः ॥ तत्रावशेषिता ह्येते ब्रह्मणः पुरतः स्थिताः ॥ १९ ॥ अध्वर्युर्होतत्विक्चैव उद्गाता द्वारपालकः ॥ वाल्मीकास्ते तु विज्ञेया विख्याता भुवनत्रये ॥ २० ॥ तेषां प्रवरगोत्राणि शृण्वंतु ऋषिसत्तमाः ॥ भारद्वाजं च वासिष्ठं काश्यपं गार्ग्यमेव च ॥ २१ ॥ आत्रेयं गौतमं वत्सं कौडिन्यं भार्गवं तथा ॥ मुद्गलं जमदग्निं चांगिरसं कुत्सकौतुके ॥ २२ ॥ विश्वामित्रं पुलस्त्यं चागस्त्यं शांडिल्यमेव च ॥ एतानि ऋषिगोत्राणि सर्वाण्यष्टादशैव हि ॥२३॥ वाल्मीकाय प्रदत्तानि धात्रा प्रेमप्लुतात्मने॥ वासिष्ठं च वसिष्ठानां प्रवरस्त्वेक एव हि ॥ २४ ॥ काश्यपध्रुववत्साराः काश्यपप्रवरा इमे ॥ गार्ग्यस्यैते च विज्ञेया आत्रेयाणां वदाम्यहम् ॥ २५ ॥ आत्रेयस्त्वार्चनानशशावाश्व-

ऐसा वचन सुनते सब मुनि तथास्तु कहनेलगे ॥१५॥ उस वखत सब ऋषियोंके एक लाख शिष्य थे वेदमें प्रवीण थे उनकी निर्मल गोत्रसंख्या ॥१६॥ तेरह सौ १३०० थी लक्ष शिष्योंमें पचास हजार शिष्य गौवोंके रक्षण करनेके वास्ते रखे ॥१७॥ वे गोमित्रय ब्राह्मण भये और अडतालीस हजार ब्राह्मण ॥१८॥ सूर्यके सामने भेजा वे रव्यालय ब्राह्मण भये । अब लक्ष शिष्यमें बाकी रहे दो हजार ब्राह्मण वे सामने बैठे हैं ॥ १९ ॥ सो यज्ञमें कोई अध्वर्यु भये कोई होता भये कोई ऋत्विज भये कोई उद्गाता भये कोई द्वारपाल भये वे सब ब्राह्मण वाल्मीकब्राह्मण नामसे तीन लोकमें विख्यात भये ॥२०॥ इन वाल्मीक ब्राह्मणोंका गोत्र प्रवर निर्णय जो है सो

श्चेति वै त्रयः ॥ भार्गवच्यवनौर्वश्च जमदग्निश्च वत्सकः ॥ ॥२६॥ कात्यायनानां पंचैते प्रवराश्च भवंति हि ॥ वसिष्ठमैत्रावरुणकौंडिन्याश्चेति ते पृथक् ॥ २७ ॥ कौंडिन्यप्रवरा ह्येते जमदग्नेर्वदाम्यहम् ॥ जमदग्निर्भार्गवश्च और्वश्चेति त्रयः स्मृताः ॥ २८ ॥ भार्गवश्च्यवनश्चैव आप्नवांश्च तथैव च ॥ आर्ष्टिषेणेनुपेक्षेति भार्गवप्रवरा इमे ॥ २९ ॥ आंगिरसश्च ब्राह्मयश्च मुद्गलश्च तथैव च ॥ मुद्गलांगिरसानां च प्रवराश्चेति विश्रुताः ॥ ३० ॥ मांधातांगिरसश्चैव कौत्सश्चेति त्रयः स्मृताः ॥ विश्वामित्रो देवतश्च देवश्रवस एव च ॥ ३१ ॥ विश्वामित्रः सगोत्राणां प्रवराश्च इमे स्मृताः ॥ विश्वामित्रः स्मररथो वार्धुलेति पृथक्पृथक् ॥ ३२ ॥ अगस्त्यस्य सगोत्राणां प्रवराश्च इमे स्मृताः ॥ विचार्य गोत्रप्रवरं विवाहं चैव कारयेत् ॥ ३३ ॥ कृते सगोत्रप्रवरे गोत्रनाशा भवंति हि ॥ एवं विधा द्विजा दिव्या वाल्मीका विश्रुता भुवि ॥ ३४ ॥ यजुर्वेदे च माध्याह्न्यामेते कोकिलसंज्ञकाः ॥ योजयामास पुरुषान् द्विजशुश्रूषणाय वै ॥ ३५ ॥ वाल्मीकिना पुरा ह्येते सर्वे ते कायजाः शुभाः ॥ एकादशशतं साग्रा एकविंशास्तदुत्तराः ॥ ३६ ॥ लेखने कुण्डकरणे यज्ञसंभारसाधने ॥ राजकार्ये च सेवायां वाल्मीकाः कायजाः स्मृताः ॥ ३७ ॥ पंचमो वर्णधर्मस्तु येषां धात्रा विनिर्मितः ॥ प्रदत्तं द्विजवर्यै-

चक्रमें स्पष्ट है ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ॥ ३० ॥ ३१ ॥ ३२ ॥ ऐसा गोत्र प्रवरका विचार करके विवाह करना ॥ ३३ ॥ जो सगोत्रमें विवाह किया तो वंशनाश होता है ऐसे यह वाल्मीक ब्राह्मण पृथ्वीमें विख्यात हैं ॥ ३४ ॥ इन ब्राह्मणोंका शुक्ल यजुर्वेद माध्यंदिनीय शाखा कोकिल मुनिका मत है पीछे इन ब्राह्मणोंकी सेवाके अर्थ ॥३५॥ वाल्मीक कायस्थ ग्यारह सौ एक ऐसी संख्या दिये ॥३६॥ वे कायस्थ लिखनेमें कुंड करनेमें राजकार्य करनेमें सेवामें बडे कुशल हैं ॥३७॥ इनका पंचमवर्ण धर्म ब्रह्माने निर्माण किया है । पीछे

भ्यो वाल्मीकिनामकं पुरम् ॥ ३८ ॥ भूमिशोधनकाले तु यदुक्तमृषिणा पुरा ॥ शुद्धा वा यदि वा नैव हलेनैव विशोधयेत् ॥ ३९ ॥ तस्माद्धलहलेतीदमभिधानं विदुर्जनाः ॥ ते विप्राः कर्मकर्त्तारो धर्मकर्मार्थभूषिताः ॥ ४० ॥ वाल्मीका इति विख्याताः सर्वेसत्त्वदयापराः ॥ य इदं शृणुयान्नित्यं वाल्मीकाख्यानमुत्तमम् ॥ ४१ ॥ तस्य सर्वार्थसिद्धिः स्याद्विप्रस्य विजितात्मनः ॥ ४२ ॥

इति श्री ब्राह्मणोत्पत्तिमार्तण्डाध्याये वाल्मीकिगोमित्रीयख्यालयब्राह्मणोत्पत्तिवर्णनं नाम प्रकरणम् ॥ ४३ ॥

आदितः श्लोकसंख्याः ॥ ४२२७ ॥

वाल्मीकि मुनिने सब वाल्मीक ब्राह्मणोंको वाल्मीकपुर (उर्फ वालम) दिया॥३८॥ पहिले भूमिशोधनके बखत ऋषिने कहा कि पृथ्वी शुद्ध या अशुद्ध होवे परन्तु हलसे शोधन करनेसे शुद्ध होती है ॥३९॥ इसवास्ते कितनेही लोक हलहल नामभी कहते हैं । वे वाल्मीक ब्राह्मण कर्मनिष्ठ धर्मार्थ करनेवाले ॥४०॥ सात्त्विकगुणी दयावंत होते भये । जो कोई यह वाल्मीकाख्यान सुनता है ॥ ४१ ॥ उसके सब कार्य सिद्धि होवेंगे ॥ ४२ ॥

इति वाल्मीकि ब्राह्मणोत्पत्तिप्रकरण ॥ ४३ ॥ संपूर्ण ।

अथ वाल्मीकिब्राह्मणानां गोत्रप्रवरज्ञानचक्रम्

सं.	गोत्र	प्रवर
१	भारद्वाज	
२	वसिष्ठ	वसिष्ठ १
३	काश्यप	काश्यपवत्सध्रुवाः
४	गार्ग्य	काश्यपवत्सध्रुवाः
५	आत्रेय	आत्रेयअर्चनानशशावाश्वाः
६	गौतम	
७	वत्स	
८	कौंडिन्य	वसिष्ठमित्रावरुणकौंडिन्याः
९	भार्गव	भार्गवच्यवनआत्मावान्‌आर्ष्टिषण अनुपेक्षा
१०	मुद्गल	आंगिरसब्राह्र्यमुद्गल
११	जमदग्नि	जमदग्निभार्गवऔर्व
१२	आंगिरस	आंगिरसब्राह्र्यमुद्गल
१३	कुत्स	मांधाताआंगिरसकौत्स
१४	कौशिक	
१५	विश्वामित्र	विश्वामित्रदेवतदेदश्रवस
१६	पुलस्प	
१७	अगस्ति	विश्वामित्रसमरथवाधूंल
१८	शांडिल्य	
१९	कात्यायन	भार्गवच्यवनऔर्वजमदग्निवत्स

अथ देशस्थांतर्गतशुक्लयजुर्वेदीयब्राह्मणोत्पत्तिप्रकरणम् ॥ ४४ ॥

अथ शुक्लयजुर्वेदीयब्राह्मणभेदमाह ॥ हरिकृष्णः ॥ यजुर्वेदीय विप्राणां भेदं वक्ष्यामि साम्प्रतम् ॥ शालिवाहनके शाके खाश्विनेत्रेंदुसं १२२० मिते ॥ १ ॥ प्रतिष्ठानपुरस्थो हि बिंबाख्यो नृपसत्तमः ॥ उत्तरं कोंकणं गत्वा तत्र राज्यं चकार ह ॥ २ ॥ ततश्च स्वगुरुं तत्र पुरुषोत्तमसंज्ञकम् ॥ रघुनाथस्य पुत्रं वै कावळेत्युपनामकम् ॥ ३ ॥ आनाय्य वृत्तिं प्रददौ कोंकणस्थां मुदान्वितः ॥ अष्टाधिकारसहितां ततः स पुरुषोत्तमः ॥४॥ स्वदेशतः स्वशाखीयान्सुहृत्सबंधिबांधवान् ॥ ५ ॥ ततः कतिपये काले बिंबे च नृपतौ मृते ॥ म्लेच्छराज्ये प्रवृत्ते च वृत्तिरासीच्च पूर्ववत् ॥ ६ ॥ उपद्रवो ब्राह्मणानां नाभूत्तत्र मनागपि ॥ ततः कतिपये काले याम्यकोंकणवासिनः ॥ ७ ॥ चित्पावनाख्यज्ञातिस्थपेशवेसंज्ञकस्य च ॥ राज्यमासीत्तदा तत्र चैकपंक्तौ हि भोजने ॥ ८ ॥ आग्रहो नृपतेरासीत्तथा तैनैव

अब शुक्ल यजुर्वेदीय ब्राह्मणोंकी उत्पत्तिभेद कहतेहैं । शालिवाहन शके १२२० के सालमें एक गोदावरीके तट ऊपर ॥ १ ॥ प्रतिष्ठानपुर था (उर्फमुंगापिट्टन) वहांका बिंबनामक राजा उत्तर कोंकणमें जायके राज्य करताभया ॥ २ ॥ पीछे राजाने अपने गुरुरघुनाथ के पुत्र पुरुषोत्तम कावळेको ॥ ३ ॥ बुलायके उत्तरकोंकणकी जितनी वृत्ति थी वह सब देदियी और अष्ट अधिकार राजसन्मानके दिये पीछे पुरुषोत्तमजीने ॥ ४ ॥ अपने प्रतिष्ठान प्रांतमेंसे स्वशाखाके इष्ट मित्र भाईबंधु संबंधियोंकूं बुलायके अपने पास रखे ॥ ५ ॥ बाद बहुत काल गये पीछे बिंबराजा मृत्यु पाया । तब उत्तर कोंकणमें म्लेच्छका राज्य भया । तथापि इस पुरुषोत्तम ब्राह्मणकी यजमानवृत्ति और प्रतिष्ठाकूं कुछ हानि नहीं भई । पहिली सरीखीचली ॥ ६ ॥ उपद्रव थोडा भी नहीं भया । उस म्लेच्छ राज्यको भी बहुत दिन गये । बाद दाक्षिण कोंकणके रहनेवाले ॥ ७ ॥ चित्तपावन ज्ञातिके पेशवे सरकारका राज्य भया । तब वेन राजा कोंकणस्थ चित्तपावनब्राह्मण थे उन्होंने अपनी पंक्तिमें भोजन करनेके वास्ते महाराष्ट्र ब्राह्मणोंको आग्रह किया ॥ ॥ ८ ॥ परंतु यह उत्तरकोंकणकी वृत्ति करनेवाले भट्ट संबंधि शुक्लयजु

कारितम् ॥ ततः प्रभृति शौक्लियः कराष्ट्राणां द्विजन्मनाम् ॥९॥ तथा चित्पावनानां च विरोधः सुमहानभूत् ॥ एवं बहुतिथे काले वत्सापुरसमीपतः ॥ १० ॥ पळसीवनकुट्टाख्यं तत्र ब्राह्मणसत्तमः ॥ तुकंभट इतिख्यातो ह्यग्निहोत्रपरायणः ॥ ११ ॥ शालिवाहनके शाके वसुषड्रसभू १६६८ मिथे ॥ चित्पावनैश्च काराष्ट्रैर्विप्रैस्तद्देशवासिभिः ॥ १२ ॥ तुकंभटस्य विप्रर्षेर्ह्यग्निहोत्रस्य खंडनम् ॥ कृतं तदा स विप्रेंद्रो स्वविप्रगणसंयुतः ॥ १३ ॥ सतारापत्तनं गत्वा राज्ञे दुःखं न्यवेदयत् ॥ राजापि निर्णयं कृत्वा पुनर्होत्रं ह्यवर्त्तयत् ॥ १४ ॥ एवं कलहयोगेन विप्रास्तद्देशवासिनः ॥ तुकंभट्टगणान् सर्वान्पलशीकरनामतः ॥ १५ ॥ ऊचुःस्तत्कालमारभ्य पलशीकर नामकम् ॥ जातं तेषां द्विजेंद्राणां केचिदीर्षालवो द्विजाः ॥ ॥ १६ ॥ करशब्दं विनाप्यत्र नाम गृह्णंति चाधुना कुर्वंति वृत्तिहरणे कलहं क्लेशभागिनः ॥ १७ ॥ वृथा स कलहो ज्ञेयः

देवियोंके साथ कराडे और चित्तपावनोंका ॥ ९ ॥ बडा विरोध भया । उसके बाद उत्तरकोंकणमें वत्सापुर (उर्फ वसईके) नजदीक ॥ १० ॥ पळशी वन कुट्टकरके गाँवमें एक तुकंभट अग्निहोत्री ब्राह्मण रहतेथे ॥ ११ ॥ शालिवाहन शके१६६८ के सालमें चितपावन कराडे आदि देशमें रहतेथे उन्होंने ॥ १२ ॥ प्राचीन द्वेषके लिये तुकंभटके अग्निहोत्रमें भंग किया । तब तुकंभटने अपने शुक्लयजुर्वेदी सब समूह लेकर के ॥ १३ ॥ सतारा नगरमें छत्रपति राजाको सब अपना दुःख कहा तब राजाने उनका निर्णय करके तुकंभटका अग्निहोत्र फिर चलवाया॥ १४॥ ऐसेकलहयोगसे उन कोंकणस्थ ब्राह्मण तुकंभट्टके अनुयायी शुक्लयजुर्वेदी ब्राह्मणोंको पळशीकर ब्राह्मण नामसे ॥ १५ ॥ बुलानेलगे उस समयमें इन ब्राह्मणोंका पळशी नाम भया उनमें भी कितनेतक ईर्षक ब्राह्मण हैं वे ॥ १६ ॥ करशब्दको छोडके पलशे ऐसा कहते हैं और उनकी वृत्ति हरणकरनेके वास्ते कलह करतेहैं । वे केवल संसारमें क्लेशके भागीदार जानने ॥ १७ ॥ परंतु उत्तम मनुष्योंने यह कलह व्यर्थ जानना इसमें

सर्वैः शिष्टैर्न संशयः ॥ सौम्यकोंकनिवासेऽपि ते देशस्था न संशयः ॥ १८ ॥ एषां माध्यंदिनीयानां गोत्रोपनामनिर्णयः ॥ देशस्थवत् स विज्ञेयः कुलाचारश्च तादृशः ॥ १९ ॥ कन्याभोजनसंबंधौ स्वगणे महाराष्ट्रके ॥ भवतः कर्मनिपुणाः सर्वे शौक्ला यजुर्गणा ॥ २० ॥

इति श्रीब्राह्मणोत्पत्तिमार्तण्डाध्याये शुक्लयजुर्वेदीयब्राह्मणभेदकथनं नाम प्रकरणम् ॥ ४४ ॥ संपूर्णम् ॥

इति पंचद्राविडमध्ये महाराष्ट्रसंप्रदायः॥ आदितःश्लोकसंख्याः॥ ४२४७ ॥

संशय नहीं है यह शुक्लयजुर्वेदीय ब्राह्मण उत्तर कोंकणमें रहते हैं तथापि महाराष्ट्र ब्राह्मण जानना इसमें संशय नहीं ॥ १८ ॥ यह माध्यंदिनीय शुक्लयजुर्वेदीब्राह्मणोंका उपनाम गोत्रका निर्णय और कुलाचार देशस्थ सरीखा जानना ॥ १९ ॥ इनका कन्या, भोजन संबंध अपने महाराष्ट्रमें होताहै ये ब्राह्मण शुक्ल यजुर्वेदी कर्ममें बडे कुशल होते हैं ॥ २० ॥

इतिश्रीब्राह्मणोत्पत्तिमार्तंडाध्यायमें शुक्लयजुर्वेदीयपळशीकरब्राह्मण वर्णन प्रकरण ॥ ४४ ॥

अथ शाकद्वीपिब्राह्मणोत्पत्तिप्रकरणम् ॥ ४५ ॥

अथ शाकद्वीपिमगभोजकब्राह्मणोत्पत्तिसारमाह ॥ भविष्यपुराणे १३३ तमेऽध्याये॥ कृष्णपुत्रोऽति तेजस्वी सांबो जांबवतीसुतः ॥ सूर्यस्य च महाभक्तः प्रसादं स चकार ह ॥ १ ॥ तस्मिन्सूर्यप्रतिष्ठां च कृत्वा सांबपुरे शुभाम् ॥ ततश्चिन्तापरो जातो नित्यपूजनहेतवे ॥ २ ॥ अस्यार्चनं नित्यमेव ब्राह्मणः कः करिष्यति ॥ सांबो गौरमुखं गत्वा प्रार्थयामास पूजने ॥ ३ ॥ न प्रासादं प्रगृह्णामीत्युवाच ऋषिसत्तमः ॥ सांबो

अब शाकलद्वीपि मगभोजक ब्राह्मणोंकी उत्पत्ति कहतेहैं कृष्णका पुत्र जांबवतीसे उत्पन्न हुवा बडा तेजस्वी सांबनामक सूर्यका बडा भक्त था उसने सांबपुरमें एक देव मंदिर बनवाया ॥१॥ पीछे उसमें सूर्यकी उत्तम मूर्तिकी प्रतिष्ठा करके आनंद पाया परंतु नित्य पूजाके वास्ते चिंतातुर भया ॥ २ ॥ इस मूर्तिका नित्य पूजन कौन ब्राह्मण करेगा इस हेतुसे गौरमुख ऋषिके पास जायके सूर्यकी पूजा करनेके वास्ते प्रार्थना करने लगा ॥३॥ तब ऋषिने कहा कि मैं मंदिरकी पूजाका प्रतिग्रह नहीं

ब्राह्मणलब्ध्यर्थं सूर्यमाराधयत्तदा ॥ ४ ॥ ततः प्रसन्नो भगवान् सांबमाह दिवाकरः ॥ ॥ सूर्य उवाच ॥ ॥ ममार्चनेऽस्मिद्वीपे तु ह्यधिकारी न को हि ते ॥ ५ ॥ शाकद्वीपे ते वसंतिवर्णाश्चत्वार एव च ॥ मगश्च मनसश्चैव मानसो मंदगस्तथा ॥ ६ ॥ तत्राद्यवर्णोऽह्यव्यंगो वेदवेदांगपारगः ॥ अष्टादशकुलैर्युक्तो मगो नाम द्विजोत्तमः ॥ ७ ॥ ममार्चनरतो नित्यं तमानाय्य निवेशय ॥ सांबः सूर्यवचः श्रुत्वा चारुह्य गरुडंद्रुतम् ॥८॥ शाकद्वीपात्समानाय्यचाष्टादशकुलोद्भवान् ॥ कुमारांस्थापयामास चंद्रभागानदीतटे ॥ ९ ॥ रम्ये मित्रवने सांबपुरे पूजनकर्मणि ॥ ते तु नित्यं पूजयंति सूर्यं भक्तिपुरःसराः ॥ १० ॥ तन्मध्ये मंदगाश्चाष्टौ मगाश्च दशसंख्यकाः ॥ ततः सांबो भोजकन्याः समानाय्य प्रयत्नतः ॥११॥ मगाख्यदशविप्रेभ्यो दत्तवान्विधिपूर्वकम् ॥ ततो जाताश्च ये

करता जो लोभसे नौकरी देनेसे देवपूजा करै या पूजा दान लेवे तो वह देवलके ब्राह्मण होता है ब्रह्मधर्मसे भ्रष्ट होता है। तब सांबने दूसरे ब्राह्मणकी प्राप्ति होनेके वास्ते सूर्यका आराधन किया ॥ ४ ॥ तब सूर्य प्रसन्न होयके कहने लगे हे सांब ! इस जंबुद्वीपमें मेरा पूजनका आधिकारी नहीं है ॥ ५ ॥ जो पूजा करते हैं वे शाकद्वीपमें चार वर्ण रहते हैं जैसे इस द्वीपमें ब्राह्मण क्षत्रिय वैश्य शूद्र ऐसे चार वर्ण हैं वैसे मग १ मगस २ मानस ३ मंदग ४ ऐसे चार वर्ण हैं ॥ ६ ॥ उनमें पहिला वर्ण मग अव्यंग वेदशास्त्रमें पारंगत अठारह कुलयुक्त हैं ॥ ७ ॥ और मेरी पूजामें तत्पर परम भक्त हैं उनकूं लायके स्थापन कर ऐसा सूर्यका वचन सुनते सांब गरुडके ऊपर बैठके जल्दीसे ॥ ८ ॥ शाकद्वीपमेंसे अठारह कुलोंमें उत्पन्न हुए वे छोकराकूं लायके चंद्रभागानदीके तट ऊपर॥९॥मित्रवनमें रमणीक सांबपुरमें सूर्य पूजनकेवास्ते मंदिरमें स्थापन किये पीछे वे सब नित्य परमभक्तिसे सूर्यकी पूजा करते भये॥१०॥ वे अठारह कुलके बालक आये उसमें आठ कुल मंदगवर्णके कहते शूद्रवर्णके थे। और दश कुलके बालक मगवर्णके कहते ब्राह्मणवर्णके थे। तब सांबने सूर्यके पूजनके वास्ते अठारह कुलकू स्थापन करके पीछे भोजकुलकी कन्या लायके ॥११॥ मगके दश कुल बालकोंकूं विधिसे विवाह करवाया। कन्या दान दिया। उनसे जो पुत्र भये

पुत्रास्ते तु भोजकसंज्ञकाः ॥ १२ ॥ ब्राह्मणेन समानाश्च का पांसव्यंगधारकाः ॥ वेद पाठविपर्यासान्मगास्ते परिकीर्तिताः ॥ १३ ॥ भोजने मौनिनः सर्वे ऋषिवत्कूर्चधारकाः ॥ वर्चा- चाश्चाष्टवर्षे च ह्यमाहकविधारकाः ॥ १४ ॥ सव्याहृतेर्हि सू- र्यस्य गायत्र्या जपतत्पराः ॥ अग्निहोत्ररताः सर्वे मद्यं संस्का- रपूर्वकम् ॥ १५ ॥ सौत्रामणौ ब्राह्मणवत्पानं कुर्वंति ते मगाः ॥ अष्टभ्यः शककन्याश्च दत्तास्ते शूद्रकाः स्मृताः ॥ १६ ॥ तेऽपि सूर्यस्य भक्ताश्च मंदगा नात्र संशयः ॥ इति संक्षेपतः प्रोक्तं शाकद्वीपीयवृत्तकम् ॥ १७ ॥

इतिश्रीब्राह्मणोत्पत्तिमार्तंडाध्याये शाकद्वीपिभोजकब्राह्मणोत्पत्ति- वर्णनं नाम प्रकरणम् ॥ ४५ ॥ समाप्तम् ॥

इति पंचगौडमध्ये उत्कलमैथिलादिसंप्रदायः ॥ आदितः श्लोकसंख्याः ॥ ४२६२ ॥

भोजक ब्राह्मणनामसे विख्यातभये ॥ १२ ॥ ब्राह्मणका जो धर्म उसके समान है कपासका बनायाहुवा अंदरसे पोला सर्पकंचुकीसरीखा यज्ञोपवीत तुल्य अंगुल १३२ का उत्तम अं. १२० का मध्यम अं. १०८ का कनिष्ठ, इससे कम नहीं ऐसा जिसका नाम अव्यंग उसका धारण आठवें बरस कराते हैं। और वेदका विपर्यास उलट पुलट पाठ करनेसे मग नाम प्रसिद्ध भया है ॥१३॥ भोजनके वखत मौन रहत हैं। ऋषि सरीखे सब दाढी रखते हैं वर्च जो सूर्य उसके अर्च कहते अर्चन करनेसे वर्चार्च कहेजाते हैं आठवें बरसमें अमाहक धारण करते हैं। अमाहक पठितांग सार यह नाम अव्यंगके हैं। यह अव्यंग सर्ववेदमय देवमय लोकमय है। यह अव्यग सर्वकाल धारण करतेहै फक्त मैथुनके समय और सूत- कमें अव्यंग धारणका निषेध है ॥ १४ ॥ ये ब्राह्मण तीन व्याहृति पूर्वक सूर्य- गायत्रीके जपमें तत्पर रहते हैं । यह याग अग्निहोत्र करते हैं। मंत्रसे अभि- मंत्रण करके मदिरापान करते हैं ॥ १५ ॥ जैसे सौत्रामणिमें ब्राह्मण ग्रहणकरते हैं वैसे वे मग शाकद्वीप ब्राह्मण मद्यपान करते हैं। अब आठ कुलके जो थे उनको शाकोंकी कन्या दियी उनके वंशमें सब शूद्रवर्ण भये ॥ १६ ॥ वेभी सब सूर्यभक्त भये परंतु मंदगहैं ऐसा संक्षेपमें शाकद्वीपि ब्राह्मणोंका वृत्तांत कहा ॥ १७ ॥

इति शाकद्वीपि भोजक ब्राह्मणोंकी उत्पत्तिप्रकरण संपूर्ण ॥ ४५ ॥

अथ अनावलाभाटेलाब्राह्मणोत्पत्तिप्रकरणम् ॥ ४६ ॥

अथानादिपुरवासब्राह्मणानामुत्पत्तिसारमाह ॥ स्कांदे उत्तरखंण्डे अनादिपुरमाहात्म्ये॥स्कंद उवाच ॥ तीर्थराजसमं क्षेत्रंयदनादि पुरं श्रुतम् ॥ अतस्तस्य प्रभावं मे वद विस्तरतः प्रभो ॥ १ ॥ श्रीरुद्र उवाच ॥ एकदा त्रिपुरं जेतुं शिवः सर्वार्थसाधनः ॥ अष्टादशसहस्राणि ब्राह्मणान् ब्रह्मवादिनः ॥ २ ॥ वरयामास शांत्यर्थमनादिपुरपत्तने ॥ शिवेन पूजिताः सर्वे प्रोचुस्ते त्रिपुरांतकम् ॥ ३ ॥ अस्माकं नियमस्थानां तीर्थानि स्थापयस्व भोः ॥ ततस्तेषां हि तुष्ट्यर्थं बभूव लिंगरूपकः ॥ ॥ ४ ॥ सकलेश इति ख्यातो भुक्तिमुक्तिप्रदायकः ॥ यस्याराधनमात्रेण भिल्लो मुक्तिमवाप ह ॥ ५ ॥ अष्टषष्टिश्च तीर्थानि स्थापयामास शंकरः ॥ अंबिकारूपिणी तत्र गंगा संस्थापिता मया॥६॥ ततस्तुष्टैर्द्विजैस्तत्र कृतपुण्याहवाचनः ॥ एकेषुणाहमदहं तं दुष्टं त्रिपुरासुरम् ॥ ७ ॥ स्कंद उवाच ॥ ॥ केनानीतोष्णसलिला गंगानादिपुरोत्तमे ॥ ॥ श्रीरुद्र उवाच ॥ ॥ पुरा त्रेतायुगे वत्स रामचन्द्रो महाहवे ॥ ८ ॥

अब अनावला भाटेला देशाई ब्राह्मणोंकी उत्पत्ति कहते हैं । स्कंद पूछनेलगे हे रुद्र ! जो प्रयागतुल्य अनादि पुरमय सुनाहै उसका माहात्म्य कहो ॥ १ ॥ रुद्र कहने लगे एक बखत त्रिपुरासुरकूं जीतनेके वास्ते शिव अठाराहजार ब्रह्मवादि ब्राह्मणोंको ॥ २ ॥ अनादि पुरमें शांतिकरनेके अर्थ वरण करतेभये शिवजीने पूजा कियी तब वे सब ब्राह्मण कहने लगे ॥ ३ ॥ हे शिव ! हम यम नियम धर्मसे चलनेवाले हैं इसवास्ते तीर्थस्थापन करो तब शिवजी ब्राह्मणोंके संतोषार्थ लिंगरूप धारण करके ॥ ४ ॥ सकलेश्वरनामसे प्रतिष्ठित भये जिनके आराधनसे भिल्लकूं मुक्ति प्राप्तभई ॥ ५ ॥ और अडसठतीर्थ स्थापन किये । अंबिका गंगा स्थापनकियी ॥ ६ ॥ पीछे उन ब्राह्मणोंसे पुण्याहवाचन करवायके आशीर्वाद लेके गया तो एक बाणसेत्रिपुरासुरकूंदग्धकिया ॥ ७ ॥ स्कंद पूछनेलगे अनादिपुरमें उष्णोदक गंगा कौन लाया सो कहो । रुद्र बोले पहले त्रेतायुगमें

रावणं सकुलं हत्वा चागस्त्याश्रममाययौ ॥ अगस्त्यः पूजयामास रामचंद्रं मुदान्वितः ॥ ९ ॥ राम उवाच ॥ ऋषे ह्येकं विस्मृतं हि युद्धांते पूर्वकल्पितम् ॥ इदानीं संस्मृतं तत्तु करिष्ये व्रतमुत्तमम् ॥ १० ॥ कुत्र गत्वा कदा कुर्यां तन्मामुपदिश स्वयम् ॥ ॥ अगस्त्य उवाच ॥ देशोऽयं दैत्यगुरुणा दंडं दंडयता नृपम् ॥ ११ ॥ कृतो धूलिदृषद्वर्षैरसस्यजलजंतुमान् ॥ तदेतद्दण्डकारण्यं तस्य प्रांतेऽयमाश्रमः ॥ १२ ॥ इतोऽनादिपुरं राम दूरे त्रिंशञ्च योजनम् ॥ अयोध्याऽनादिपुरतो वर्तते षष्टियोजनम् ॥ १३ ॥ तदनादिपुरं गच्छ निर्मितं ब्रह्मणा पुरा ॥ सेवितं शंकरेणैव स्थापिताश्च द्विजोत्तमाः ॥ १४ ॥ इदानीं ते गता गंगां तानानाय्य समर्चय ॥ राम कालस्य वैषम्यात्त्यक्त्वा स्थानं गताः किल ॥ ॥ १५ ॥ स्वस्थाने स्थापयित्वा तान् स्नात्वा तीर्थेष्वनादिषु गत्वाऽयोध्यां पवित्रस्त्वमात्मानमभिषेचय ॥ १६ ॥ एवं मुनिवचः श्रुत्वा रामोऽनादिपुरं ययौ ॥ अनादि तत्पुरं दृष्ट्वा

रामचंद्र बडे संग्राममें ॥ ८ ॥ सकुल रावणकूं मारके पीछे पुष्पक विमानमें सीता लक्ष्मण हनुमानादिसहित बैठके अगस्तिके आश्रममें आये अगस्तिऋषिने बडे हर्षसे रामकी पूजाकरी ॥ ९ ॥ राम कहने लगे हे ऋषि ! युद्धके अंतमें एक व्रत करनेका संकल्प लिया था सो वह भूलगया था यहां स्मरण भया इसवास्ते वह मेरेकूं करनाहै व्रत ॥ १० ॥ सो कहां करना वह स्थान बतावो। अगस्ति कहने लगे हे राम ! यह दंडकारण्य देश है ॥ ११ ॥ इसके अंतमें मेरा यह आश्रम है ॥ १२ ॥ यहांसे अनादिपुर एक सौ बीस कोस दूर है। और अनादिपुरसे आपकी अयोध्या नगरी पूर्व दिशामें दो सौ चालीस कोस है ॥ ॥ १३ ॥ उस अनादिपुरमें तुम जावो पाहिले ब्रह्माने निर्माण किया है शिवने ब्राह्मण स्थापन किये हैं ॥ १४ ॥ परंतु इस वखत वे ब्राह्मण अनादि पुरकूं छोडके गंगा तट ऊपर चले गये हैं। उनकूं बुलायके पूजा करो। कालकी विषमतासे स्थान त्याग किया है ॥१५॥ ब्राह्मणोंका स्थापन करके तीर्थोंमें स्नान करके पवित्र होयके अयोध्यामें पट्टाभिषेक करवावो ॥१६॥ ऐसा अगस्तिका

सकलेशं तथा शिवम् ॥ १७ ॥ नानाविधानि तीर्थानि रामः प्रमुदितोऽब्रवीत् ॥ गच्छाद्य हनुमद्वीर द्विजानानय सत्वरम् ॥ ॥ १८ ॥ इत्युक्तो रामचंद्रेण स गत्वा जाह्नवीतटम् ॥ ब्रह्मनिष्ठान्मुनीन्नत्वा प्रोवाच कपिकुंजरः ॥ १९ ॥ राघवश्चागतोऽनादिपुरे तर्थानि सेवितुम् ॥ तेनाहं प्रेषितो विप्रा भवतां सन्निधिं गतः ॥ २० ॥ आगच्छंतु महाभागाः क्षणात्तत्र नयाम्यहम् ॥ ॥ विप्रा ऊचुः ॥ ॥ वयं भागीरथीं त्यक्त्वा नागच्छामः कदाचन ॥ २१ ॥ तपसा दग्धदेहाः स्मो तद्रूकंडूतिदूषिताः ॥ ॥ हनुमानुवाच ॥ ॥ भागीरथीं नयिष्यामि रामस्य वचनादहम् ॥ २२ ॥ उष्णोदकां करिष्यामि श्रीमतां सुखहेतवे ॥ भवंतो नागमिष्यन्ति त्यक्ष्याम्यत्रैव जीवितम् ॥ ॥ २३ ॥ कपेस्तन्निश्चयं दृष्ट्वा तथास्त्विति वचोऽब्रुवन् ॥ तथापि न वयं तत्र शक्ता गंतुं कपीश्वर ॥ २४ ॥ हनूमांस्तद्वचः वा रूपं चक्रे महत्तरम् ॥ आदाय सकलान् विप्रान्

वचन सुनके रामचंद्र अनादिपुरमें आयके सकलेश्वर महादेवकूं ॥ १७ ॥ और सब तीर्थोंकूं देखके आनंदित होयके हनुमान्कूं कहने लगे हे हनुमान् ! ब्राह्मणोंकूं जलदी लावो ॥ १८ ॥ यह रामका वचन सुनके हनूमान् जाह्नवी गंगाके तट ऊपर जायके ब्रह्मनिष्ठ मुनिनको नमस्कार करके कहने लगे ॥ १९ ॥ हे ऋषीश्वरो ! रामचंद्र तीर्थयात्रा करनेके वास्ते अनादिपुरमें आये हैं उन्होंने मुझको तुम्हारे सन्मुख भेजा है सो मैं आपके नजदीक आयाहूँ ॥ २० ॥ इस वास्ते आप वहां चलो क्षकभरमें मैं ले चलता हूं ब्राह्मण कहनेलगे हम भागीरथी गंगाको छोडके तुम्हारे साथ कभी आनेके नहीं ॥ २१ ॥ और तप करनेसे देह दग्ध हो गये हैं दद्रू कंडूसे दूषित भये हैं हनुमान् कहने लगे हे महाराज ! रामजीकी आज्ञासे मैं भागिरथी लाऊंगा ॥ २२ ॥ आपके शरीरसुख होनेके वास्ते उसका सदैव उष्ण जल करूंगा इतने ऊपरभी आप नही आये तो मैं प्राणत्याग करूंगा ॥ २३ ॥ ऐसा हनुमान्का निश्चय देखके वे तथास्तु ऐसा वचन कहे हे हनुमान् ! तेरा वचन माने परंतु इतने दूर जानेकी हमारी शक्ति नहीं है ॥ २४ ॥ हनुमान्ने ऋषियोंका वचन सुनके बडा प्रचंड विस्तीर्णरूप धारण

क्षणाद्ग्राममथाययौ ॥ २५ ॥ ततो नत्वा स्थितं रामं विप्रानु-
त्तार्य भूतले ॥ कथयामास रामाय गंगानयनमच्युत ॥ २६ ॥
ततो रामो द्विजेन्द्राणां कृत्वा पादाभिवंदनम् ॥ पाद्यार्घ्यासन-
सन्मानैः स्वागतैरभ्यपूजयत ॥ २७ ॥ बाणं मुमोच भूमौ
वै तस्माद्गंगा विनिर्मिता ॥ उष्णोदकी दिव्यदेहा रामगंगेति
विश्रुता ॥ २८ ॥ चैत्रशुक्लचतुर्दश्यामाविर्भूता द्युसन्नदी ॥
पूजिता पूर्णिमायां सा तत्र स्नानं विमुक्तिदम् ॥ २९ ॥
आहूता रामचंद्रेण दद्रूकंडूतिदूषिताः ॥ उष्णोदक्यां कृत-
स्नाना विप्रार्थं ननृतुर्जगुः ॥ ३० ॥ रामचंद्रोऽपि तान्वव्रे
सकलेश्वरसन्निधौ ॥ अष्टादशसहस्राणांशुद्धद्वादशगोत्रिणाम्
॥ ३१ ॥ पपौ पादोदकं रामः सीतालक्ष्मणसंयुतः ॥ उष्णो-
दकीकुंडसमंकुंडं कृत्वा विधानतः ॥ ३२ ॥ अजुहोद्वैदिकै-
र्विप्रैर्मंत्रज्ञैः शिष्टसंमतैः ॥ एकादशदिनान्येवं दीक्षितो रघुनं-
दनः ॥ ३३ ॥ यज्ञांते दर्शनं लेभे तीर्थानां स्वस्वरूपिणाम् ॥

करके शरीरके ऊपर ब्राह्मणोंकूं बिठायके क्षणभरमें रामके पास पहुँचाया ॥ २५ ॥ रामकूं नमस्कार करके ब्राह्मणोंकूं पृथ्वीऊपर बिठायके गंगालानेका वृत्तांत कह ॥ २६ ॥ पीछे रामने ब्राह्मणोंकी मधुपर्कपूजा करके॥२७॥ बाण पृथ्वीमें मारे वहांसे उष्णोदकी गंगा प्रगटभई । इसका नाम रामगंगा भया ॥२८ ॥ चैत्रशुक्लचतुर्दशीके दिन प्रकटभई और पूर्णिमाके दिन पूजा किया इस वास्ते दोनों दिन वहां स्नान करनेसे तत्काल मुक्ति प्राप्त होतीहै ॥२९॥ अब रामने जो ब्राह्मण बुलायै वे सब दद्रू कंडूसे दूषित थे परंतु उष्णोदकीगंगामें स्नान करनेसे स्वच्छ शरीरभये नृत्य गायन करनेलगे ॥ ३० ॥ पीछे रामचंद्र सकलेश्वर महादेवके नजदीक बैठके उन बारह गोत्रोंके अठारह हजार ब्राह्मणोंका वरण करतेभये ॥ ३१ ॥ और उनका पादप्रक्षालन जल सीतालक्ष्मणसहित पान करते भये उष्णोदकका जैसा कुंड, वैसा दूसरा कुंड विधिसे बनायके ॥ ३२ ॥ रामचंद्र ग्यारह दिनकी दीक्षा-लेके वैदिकमंत्रोंसे ब्राह्मणोंके हस्तसे होम करते भये ॥३३॥ जब यज्ञ समाप्त भया तब सवतीर्थोंने दर्शन दिया । अवभृथ स्नान किया । अन्य ब्राह्मणोंकूं दक्षिणा देके

कृताभिषेको यज्ञांते द्विजेभ्यो दत्तदक्षिणः ॥ ३४ ॥ भागीरथ्याः समानीतांस्तान्द्विजानाह राघवः ॥ सर्वे भवंतो निर्लोभाः संतुष्टाः कामवर्जिताः ॥ ३५ ॥ पात्रे दानं प्रकर्तव्यं नापात्रेषु कदाचन ॥ पात्रीभूतेषु युष्मासु तस्माद्दानानिदद्म्यहम् ॥ ३६ ॥ अनुगृह्णंतु मां विप्रा प्रतिगृह्णंतु मेऽर्पितम् ॥ ॥ विप्रा ऊचुः ॥ ॥ प्रतिग्रहं न ते राम करिष्यामः कथंचन ॥ ३७ ॥ सीताहेतोर्हतानेकं लंकापुरनिवासिनः ॥ ॥ राम उवाच ॥ ॥ जानंतोऽपि न जानंति महदेतत्कुतूहलम् ॥ ३८ ॥ विप्रा ऊचुः ॥ ॥ वासांसि विश्वेश्वर वल्कानि पुष्पस्रजः संति विभूषणानि ॥ वस्तूनि नो राम तपांसि नित्यं दानाद्वयं ते विरताः स्म सर्वे ॥ ३९ ॥ श्रीरामउवाच ॥ श्रुतिस्मृतिगतंधर्ममोहादुल्लंघयंतिये ॥ भवंतःशुष्कवादारतेवेदहीना भविष्यथ ॥ ४० ॥ अद्यप्रभृति कर्माणित्रीण्येवभवतामिह ॥ अधीतिर्यजनंदानंभविष्यति न संशयः ॥ ४१ ॥ विद्यावेदव्रतैर्हीनाः केवलंवैश्यवृत्तयः ॥ निर्वैराबहुदातारोभवंतुद्विजनायकाः ॥ ४२ ॥

॥ ३४ ॥ वरण कियेहुये अठारह हजार ब्राह्मणोंकूं कहतेहैं । हे ऋषीश्वरो ! तुम सब निर्लोभी हो और संतोषीहो किसी बातकी तृष्णा नहींहैं ॥ ३५ ॥ इस वास्ते शास्त्रमें लिखाहै कि सत्पात्रकूं दान देना अपात्रकूं कभी दान देना नहीं इस वास्ते तुम पात्ररूप हो तुमकूं दान देताहूं मेरे ऊपर अनुग्रह करो । और मेरा दान लेव ब्राह्मण कहनेलगे हे राम ! हम प्रतिग्रह कुछभी नहीं करते सीताके निमित्त तुमने अनेक राक्षस मारे राम कहने लगे क्या वडा आश्चर्य है ये ब्राह्मण जानकर भी भूलतेहैं ॥ ३६--३८ ॥ ब्राह्मण कहनेलगे हे राम ! वस्त्र हमारे वल्कल हैं । अलंकार पुष्पकी माला हैं पदार्थ तप है इस वास्ते दानप्रतिग्रहसे हम निवृत्त भयेहैं ॥ ३९ ॥ श्रीराम कहनेलगे जो तुमश्रुतिस्मृतिमें कहे हुये धर्मकूं छोडतेहो और शुष्कवाद करते हो इससे वेदाध्ययन हीन होवोगे ॥ ४० ॥ और आजसे तुम्हारे तीनकर्म रहेंगे अध्ययन करना यज्ञ. दानकरना । इसमें संशय नहीं ॥ ४१ ॥ विद्या वेद व्रत ब्रह्मचर्याश्रमसे हीन केवल वैश्य वृत्तिसे चलोगे तो निर्वैर रहोगे । दान बहुत देवोगे और तुम ब्रह्मणोंमें नायक होवोगे ॥ ४२ ॥

प्रतिग्रहश्च कर्तव्यो भवद्भिर्दारसंग्रहे॥पूजयिष्यंतियेयुष्मान्मया नीतान्मयार्चितान् ॥४३॥ नित्यं संमानदानेन तेऽर्चयिष्यंति मामिति ॥ इत्युक्त्वा विश्वकर्माणमाहूयानादिपत्तनम् ॥ ४४ ॥ श्रीरामः कारयामास सर्वं संपत्तिसंयुतम् ॥ लक्षहर्म्ययुतं कृत्वा वासयित्वाथ वाडवान् ॥ ४५ ॥ मनसा दत्तवान् वित्तं यद-क्षय्यं प्रचक्षते ॥ अष्टादशसहस्रेषु भागद्वयमनंगनम् ॥ ४६ ॥ सांगनं भागमेकं च दृष्ट्वा रामस्तदाऽकरोत् ॥ नागकन्या याच-यित्वा रामचन्द्रः प्रतापवान् ॥ ४७ ॥ द्वादशैव सहस्राणि ब्राह्मणेभ्यः प्रदत्तवान् ॥ ता नागकन्या जानक्या मानुषत्वे निरूपिताः ॥ ४८ ॥ अद्यापि तासां तच्चिह्नं वेणीभालतल-स्थितम्॥बाणःप्रकाश्यते वत्स गत्या कुटिलयापि च ॥ ४९ ॥ ददौ नवसहस्राणि ग्रामाणां राघवस्तदा ॥द्वादशैव तु गोत्राणि ह्यवटंकोऽर्जितानि च ॥५०॥ वसिष्ठःकश्यपो रैभ्यो गौतमश्च पराशरः ॥ उशना गालवोऽगस्त्यो गार्ग्यः सांख्यायनस्तथा ॥ ५१ ॥ कण्वोऽथवच्छसः संख्या गोत्राणां द्वादशैव हि ॥ वशिनो नायकाः सर्वे विख्याताः स्वस्वकर्मभिः ॥ ५२ ॥

तुम विवाहमें स्त्रीका प्रतिग्रह करना जो तुम्हारा सन्मान करेंगे ॥४३॥ उन्होंने मेरी पूजा कियी सरीखा मानूंगा ऐसा कहके विश्वकर्माकूं बुलायके अनादिपुरकूं ॥४४॥ सर्वसंपत्तियुक्त करके लाखघर बनायके ब्राह्मणोंकूं वहां निवास करवायके॥४५॥अंतः-करणसे अक्षय्य धन उनकूं दिया।उन अठारह हजार ब्राह्मणोंमें एक भाग स्त्रीसहित एक स्त्री हीन था॥४६॥पीछे रामने नागकन्या लायके॥४७॥बारह हजार ब्राह्मणोंकूं दियी। पीछे सीताने उन नागकन्यावोंको मनुष्यरूप दिया ॥ ४८ ॥ आजतक नाग कन्याका चिह्न है। कपालमें जो वेणी है वहां बाणाकारका चिह्न दीख पडताहै॥४९॥ पीछे रामने उन ब्राह्मणोंकी नव सौ गांव दिये और बारहगोत्र अवटंकसहित दिये॥ ॥५०॥बारह गोत्रोंके नाम वसिष्ठ १ कश्यप २ रैभ्य ३ गौतम ४पराशर ५उशना ६ गालव ७ अगस्त्य ८ गार्ग्य ९ सांख्यायन १० कण्व ११ वच्छस १२ ॥ ५१ ॥ ऐसे यह बारह गोत्र हैं और वशि नायक यह दोनों अवटंक हैं ॥ अपने

ब्रह्मरक्षोवधाद्यत्र मुक्तोऽभूद्राघवः स्वयम् ॥ द्विजान्नै शिवंनमः-
स्कृत्य वत्साऽयोध्यां जगाम ह ॥ ५३ ॥ स्कंद उवाच ॥
रामसंस्थापिता विप्रा प्रतिग्रहपराङ्मुखाः ॥ पुनः संपूजिताः
केन पृथिव्यां प्रथिताः कथम् ॥ ५४ ॥ श्रीरुद्र उवाच ॥
वारिताप्ये महाक्षेत्रे यदा संवरणो नृपः ॥ कन्यां समुद्वहत्तापीं
तपनस्य महात्मनः ॥ ५५ ॥ तदैतान्साक्षिणश्चके आनीया
नादिपत्तनात् ॥ ततो वरणकाले च राज्ञा संवरणेन च ॥५६॥
तत्र द्वादशगोत्राणि द्विजानां गणनां कृता ॥ अष्टादशसहस्रा-
स्ते स्थापिता द्विजसत्तमाः ॥ ५७ ॥ राजवेषधराः सर्वे प्रति
ग्रहविवर्जिताः ॥ ग्रामाणां च शतं तेभ्यः प्रदत्तं षोडशाधि-
कम् ॥ ५८ ॥ तत्र संस्थापितं लिंगं नाम्ना संवरणेश्वरम् ॥
विश्वेशात्पूर्वतो यत्र विवाहे वेदिका कृता ॥ ५९ ॥ विषयान्बु-
भुजे दिव्यांस्तपत्या सह भूमिपः ॥ दृष्ट्वा पुत्रमुखं पश्चात्स ज-
गाम निजं पदम् ॥ ६० ॥ गोत्रद्वयं स्थितं तत्र वारिताप्ये

अपने कर्मसे भये हैं ॥५२॥ अब रामचंद्र ब्रह्मराक्षसके वधसे जहां मुक्त भये वहांके ब्राह्मणोंकूं शिवकूं नमस्कार करके अयोध्याकूं जातेभये ॥ ५३ ॥ स्कंद पूछने लगे हे शिव ! रामने जो ब्राह्मण स्थापन किये वे प्रतिग्रहसे परांमुख भये । पीछे पृथ्वीमें पुनः पूजन किन्होंने किया और विख्यात कैसे भये सो कहो ॥५४॥ रुद्र कहनेलगे हे स्कंद ! सूरतशहरके नजदीक तीन कोसके ऊपर वरियाव करके गांव है जिसकूं संस्कृतमें वारिताप्यक्षेत्र कहतेहैं वहां संवरणराजने तापीके साथ विवाह किया ॥५५॥ उस वखत विवाहकी साक्षीमें अनादिपुरके अठारह हजार ब्राह्मणोंकूं बुलायके वरण किया ॥ ५६ ॥ उस वखत बारह गोत्रोंकी संख्या भई । वे अठराह हजार ब्राह्मण॥५७॥ उस वखत राजवंश धारण करनेवाले पतिग्रहरहित थे । उनकूं राजाने एक सौ सोलह ११६ गांव दिये ॥५८॥ और संवरणेश्वर महादेवका स्थापन किया।उनके पूर्वभागमें विवाहवेदी स्थापन कियी ॥५९॥ तापी सहित संवरणराजा सब देशका दिव्य सुख भोगके और पुत्र सुख देखके अपने निजस्वरूपमें मिलगया ॥६०॥संवरणराजाने जो बारह गोत्रोंके ब्राह्मण बुलाये उनमेंसे दो गोत्रोंके ब्राह्मण

पुरोत्तमे ॥ पश्चात्तु दशगोत्रा ये गतास्तेऽनादिपत्तने ॥ ६१ ॥ नायकाः सर्वकार्येषु वशिनो विषयेषु च ॥ निवारयंति ये तेषां दरिद्राणां दरिद्रताम् ॥६२॥ वारिणस्तेन ते प्रोक्ता वारिताप्ये स्थिता अपि ॥ एवं नानाभिधानास्ते काले भिन्नेन कर्मणा ॥ ६३ ॥ वसंत्यद्यापि विख्यातेऽनावलेऽनादिपत्तने ॥ धर्मिष्ठाश्च वदान्याश्च दातारो ह्यपरिग्रहाः ॥ ६४ ॥ एतत्सर्वं मयाख्यातं यत्पृष्टो भावता सुत॥ अनादिपुरमाहात्म्यं द्विजानां स्थापनं तथा ॥

इति श्रीब्राह्मणोत्पत्तिमार्तंडाध्यायेअनादिपुरवासि-ब्राह्मणोत्पत्तिप्रकरणम् ॥ ४६ ॥

पंचद्रविडमध्ये गुर्जरसंप्रदायः आदितःश्लोकसंख्याः ॥ ४३२९ ॥

वरियाव गांवमें रहे और दशगोत्र जो थे वे अनादिपुरमें गये ॥ ६१ ॥ सर्व कार्यमें जो कुशल उनकूं नायक कहते हैं जो विषयमें परिपूर्ण कुशल वे वशी भये उनमें जो दरिद्र भये उनकी दरिद्रता दूर किये ॥ ६२ ॥ वे वारिण भये वरियावमें रहते हैं ऐसे भिन्न २ कर्मोंसे नाना प्रकारके नाम भये ॥ ६३ ॥ वे सब अनादिपुरमें (उर्फ अनावला गांवमें) अद्यापि रहते हैं सब ब्राह्मण धर्मिष्ठ वचन चातुर्थ युक्त दानशूर प्रतिग्रह पराङ्मुख भये । अब भाटेला देशाईका भेद कहते हैं अठारह हजार ब्राह्मणोंमें जो बारह हजार ब्राह्मणोंने नागकन्यावोंका प्रतिग्रह किया तब रामने उनको नवसौ गांव दिये वहांके जमींदार किये । वे अद्यापि अनावले जमींदार देशाई कहे जाते हैं वे नीच कर्मसे रहित हैं और जो छः हजार ब्राह्मणोंने नागकन्या भी नहीं लीं और दान प्रतिग्रह नहीं किया उसमें रामने कर्म भ्रष्टता तथा वेदहीनताका शाप दिया वे भाटेले अनावला ब्राह्मण कहे जाते हैं लोकिकमें कर्मभ्रष्ट शब्दके ठिकाने भाटेला अपभ्रंश शब्द भया है वे लोग अद्यापि कृषिकर्म कन्याका विक्रय करते हैं। वाकडा देते नहीं भाटेला देशाई अनावलाका भोजन व्यवहार एक पंक्तिमें होता है कन्या व्यवहारमें भाटेलेकी कन्या लेते हैं देते नहीं हैं ॥ ६४ ॥ हे स्कंद ! तुमने जो पूछा सो अनादिपुरका माहात्म्य कहा ॥ ६५ ॥

इति ब्राह्मणोत्पत्तिमें अनावला भाटेला देशाई ब्राह्मणोत्पत्ति प्रकरण संपूर्ण ॥ ४६ ॥

अथ सनाढ्यब्राह्मणोत्पत्तिप्रकरणम् ॥ ४७ ॥

मातुलः स्मृतः ॥ ततोऽग्रो यमुनातीरे लक्ष्मीमाराधयद्यदा ॥ ॥ ७ ॥ लक्ष्मी प्रसन्ना प्रोवाच चाग्रसेननृपं प्रति ॥ तव वंशश्च त्वन्नाम्ना लोके ख्यातिं गमिष्यति ॥ ८ ॥ युष्मदीयवंशमध्ये कुलदेवी भवाम्यहम् ॥ न दरिद्रो न दीनश्च युष्मद्वंशे भविष्यति ॥ ९ ॥ इत्युक्त्वांतर्हिता देवी सोपि राज्यमथाकरोत् ॥ स्वनाम्ना नगरं चक्रे पुरो ह्यग्रपुराह्वयम् ॥ १० ॥ ततो सप्तदश यज्ञांश्चकार नृपसत्तमः ॥ अष्टादशेऽर्धयज्ञे च हिंसां दृष्ट्वा स मामितः ॥ ११ ॥ तावंत्येव च गोत्राणि जातानि तस्य वंशके ॥ एषां पुरोहिता गौडब्राह्मणा एव केवलम् ॥ १२ ॥ वैश्यकर्मरता ह्येते वेदाध्ययनतत्पराः ॥ ततः कलौ जैनधर्मबलेन वैश्यसत्तमाः ॥ १३ ॥ वैश्यधर्मं परित्यज्य जैनमार्गरतास्तथा ॥ म्लेच्छराज्यवशेनैव धर्मभ्र-

तट ऊपर लक्ष्मीका आराधन किया ॥ ७ ॥ उस समय लक्ष्मीने प्रसन्नहोके कहा कि हे अग्र ! तेरा वंश आगे तेरे नामसे विख्यात होवेगा ॥८॥ और मैं तेरे वंशकी कुलदेवी होती हूं दरिद्री, दीन तेरे वंशमें कोई नहीं होगा ॥ ९ ॥ ऐसा कहके देवी अंतर्धान हुई और राजा अग्रभी राज्य करनेलगा । और यमुनानदीके तटऊपर अपने नामसे नगर बसाया जिसको हालमें आगरा कहते हैं ॥१०॥ पीछे अग्रराजाने सत्रह यज्ञ किये अठारहवां यज्ञ जब आधा भया । तो इतनेमें राजाके मनमें आया कि यह हिंसात्मक यज्ञ अब नहीं करना और हमारे वंशमें भी आजसे मद्य मांस देवीको अर्पण करना नहीं और आपखाना,पीना भी नहीं सात्त्विकी पूजा उत्सव करना।ऐसा कहके वहांसे यज्ञ समाप्तकिया सो ॥ ११ ॥ साढेसत्रह यज्ञ भये । इसलिये उनके साढे सत्रह गोत्र भये । सो गोत्रोंके नाम कहते हैं गर्ग,१ गोइल,२ ग्वाल,३वात्सल,४ कासिल ५ सिंहल,६ मंगल, ७भद्दल,८ तिंगल, ९ ऐरण, १० टैरण, ११ टिंगण, १२तित्तल, १३मित्तल १४तुंदिल, १५ तायल, १६ गोभिल, १७ और गवन आधा वे गोत्र जानने और इनके पुरोहित गौड ब्राह्मण जानना ॥१२॥ इनका कर्म वैश्यवर्णका है । वेदाध्ययन,दान, यजन करना । परंतु कलियुगमें जैन धर्मकी प्रबलतासे कितनेक वैश्य ॥ १३ ॥ अपना वैश्यवर्णाश्रम धर्म छोडके जैनधर्ममें मिलगये हैं । उसके

ष्टास्तथापरे ॥ १४ ॥ देशंदेशं गतास्सर्वे नानाचारपरायणाः ॥
जातास्ते चाग्रवंशीयास्तेषामुक्तं चरित्रकम् ॥ १५ ॥

इतिश्रीब्रा० अग्रवंशिवैश्योत्पत्तिवर्णनं नाम प्रकरणं सम्पूर्णम् ॥ ५६ ॥
आदितः पद्यसंख्याः ॥ ४५७५ ॥

बाद म्लेछोंका राज्य भया उससे तो यज्ञोपवीतादिक तोडके धर्मभ्रष्ट बहुत होगये ॥ ॥ १४ ॥ देशदेशांतरमें चलेगये नाना प्रकारके अपने इच्छित आचार पालन करने लगे। यह ज्ञातिपूर्वमें पुरविया नामसे मारवाडमें गुजरातमें और अनेक देशोंमें प्रसिद्ध है। ऐसे जो अगरवाले भये उनका चरित्र मैंने कहा ॥ १५ ॥

इति अगरवालोंकी उत्पत्तिप्रकरण ॥ ५६ ॥ संपूर्ण

अथ ब्राह्मणोत्पत्तिग्रंथमध्ये जैनाचार्यशंकराचार्ययोः प्रादुर्भावकथने प्रयोजनमाह–हरिकृष्णः पूर्वं ॥ मयास्मिन् ग्रंथे तु ब्राह्मणोत्पत्तिरीरिता ॥ तेषां च सेवक श्रेष्ठास्तत्रतत्र निरूपिताः ॥ १ ॥ तेषु केचन वैश्याश्च क्षत्रियाश्चापि केचन ॥ केचित्सच्छूद्रकाश्चैव केवलं शूद्रकाः परे ॥ २ ॥ संति स्वस्वप्रसंगेन तत्सर्वं पूर्वमीरितम् ॥ परं त्वत्राधुना सर्वं विपरीतं हि दृश्यते ॥ ३ ॥ शूद्रा वैश्यत्वमापन्ना वैश्याद्याः शूद्रतां गताः ॥ तस्य किं कारणं मेद्य शृणु वक्ष्यामि निश्चयात् ॥ ॥ ४ ॥ वर्णधर्मविनाशे तु जैनाचार्योत्र कारणम् ॥ पश्चाच्च

अब कोई ऐसा कहेगा कि ब्राह्मणोत्पत्ति ग्रंथमें जैनाचार्य शंकराचार्यका प्रादुर्भाव कहनेका क्या कारण है। तब उसका प्रयोजन कहते हैं। पहिले इस ग्रंथमें मैंने ब्राह्मणोंकी उत्पत्ति कही है और उस उस ठिकाने उनहींके जो जो सेवक वानिये हैं उनके विवाह निरूपण किये हैं ॥ १ ॥ उसमें कितनेक वानिये वैश्य हैं, कितनेक सच्छूद्र हैं, कितनेक शूद्र हैं ॥ २ ॥ अपने २ प्रसंग जो है वे सब मैंने पहले कहे हैं परन्तु इससमयमें सब विपरीत दिखलाई पडताहै ॥ ३ ॥ शूद्र जो हैं वे वैश्य होके फिरते हैं और वैश्यादिक जो हैं वे शूद्रदशाको पाये हैं। उसका क्या कारण है सो मैं कहताहूं। निश्चय करके श्रवण करो ॥ ४ ॥ पहले जो वर्णाश्रमधर्म बनियोंका डूबगया उसका कारण जैनाचार्य हैं।

ब्राह्मणाः सर्वे ये वै चारण्यपंडिताः ॥ ५ ॥ ततो धर्मस्य रक्षार्थं शंकर प्रकटोऽभवत् ॥ तस्मात्तयोश्च वक्ष्यामि प्रादुर्भावं समासतः ॥ ६ ॥ अथ कलियुगवशाद्वर्णस्थितिनिर्णयमाह—धर्मशास्त्रे ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैषु त्रयो द्विजाः ॥ युगेयुगे स्थिताः सर्वे कलावाद्यंतयोः स्थितिः ॥७॥

इति श्रीब्राह्मणोत्पत्तिमार्तंडाध्याये आचार्योत्पत्तिप्रयोजनप्रकरणम् ॥

॥ ५७ ॥ संपूर्णम् ॥

आदितः पद्यसंख्याः ॥ ४५८२ ॥

विष्णुके वरदानसे कलियुगके आरम्भसे लेके उनका प्रताप बहुत भया सो उन्होंने एक ब्राह्मणवर्ण विना तीनोंवर्णके लोकोंको वर्णधर्मसे छुडाके एकजैनधर्ममें मिलाय दिये सो अद्यापि केवल नाममात्रसे विख्यातहैं । श्रीमाली पोरवालमें श्रीडीडुखंडेलवे अगरवाल ये पूर्वी क्षत्रियादिक थे वे हालमें कितनेक जैनमें कितनेक वैष्णवधर्ममेंहैं । परन्तु दोनों ठिकाणे वर्णधर्मसे भ्रष्ट हैं । और वर्ण लोप करनेके वास्ते हालके समयमें अन्य उपग्रन्थोंमें जिनको ज्ञान नहीं केवलन्याय, व्याकरणादि पढके उसके सामर्थ्यसे "कलावाद्यंतयोः स्थितिः" ऐसा शास्त्रवचनसे कलियुगमें आदिवर्ण ब्राह्मण अंतवर्ण शूद्र इन्हींकी स्थिति है । अन्य दोवर्ण क्षत्रिय वैश्यका नाशहै ऐसा अरण्यरोदनसरीखा प्रतिपादन करतेहैं । और उन्हींके घर कुकर्म करनेवाले हैं जो गुरु उपाध्याय वे भी मुखसे वैश्यादिक कहतेहैं परंतु कर्म करातीसमय शूद्रकाभी कर्म यथार्थ कराते नहींहैं तब वैश्य क्षत्रियकर्म तो कहांसे जानेंगे ॥ ५ ॥ जब जैनलोग वर्णधर्म बहुत खण्डन करनेलगे तब श्रीशंकराचार्य प्रकट होके सब वादीगणोंको जीतिके ब्रह्ममत स्थापन किया इसलिये दोनों आचार्यके प्रादुर्भावकी कथा कहता हूं ॥६॥ अब कलौ आद्यंत संस्थितिका जो अर्थ सो कहते हैं ब्राह्मण, क्षत्रिय, वैश्य, शूद्र ये चारवर्ण हैं इनमें शूद्रको छोडके तीनवर्णकी द्विजसंज्ञा है । "द्वाभ्यांजन्मसंस्काराभ्यां जायतेऽसौ द्विजः" तीनोंका समंत्रक संस्कार है । ये लोग सभीयुगोंमें वर्तमान रहते हैं किन्तु कलियुगके समयमें चारोंवर्णकेवल आदि आदि और अन्तमें स्थिति रहते हैं । मध्यमें नहीं, कलिका आदिभागसंधि, अंतभाग संध्यांश है ॥ ७ ॥

इति श्रीआचार्यकीउत्पत्तिप्रयोजनप्रकरण सम्पूर्ण ॥ ५७ ॥

अथ जैनाचार्योत्पत्तिप्रकरणम् ॥ ५८ ॥

अथ जैनदिगंबराचार्योत्पत्तिसारमाह उक्तं च शिवपुराणे ॥ पुरा तपोबलेनैव मयो नामासुरो महान् ॥ त्रिपुरेषु स्थितो विप्रैः श्रौतस्मार्तक्रियापरः ॥ १ ॥ तेन संतापिता देवा ब्रह्माणं शरणं ययुः ॥ दुःखं च वेदयांचक्रुस्तदोवाच पितामहः ॥ २ ॥ मत्तो हि वर्द्धितो दैत्यो वधं मत्तो न चार्हति ॥ तद्दुःखास्ते ययुस्तत्र यत्रासौ वृषभध्वजः ॥ ३ ॥ तत्र गत्वा च तद्दुःखन्निवेद्य संस्थिताः पुरः ॥ शिवोपि तद्वचः श्रुत्वा वचनं चेदमब्रवीत् ॥ ४ ॥ अयं वै त्रिपुराध्यक्षः पुण्यवान् वर्द्धतेधुना ॥ यत्र पुण्यं प्रवर्तेत न हंतव्यं बुधैरपि ॥ ५ ॥ तथापि विष्णवे देवा निवेद्यं कारण त्विदम् ॥ शिवस्य वचनं श्रुत्वा देवा विष्णुं न्यवेदयन् ॥ ६ ॥ ज्ञात्वा वृत्तं च तेषां वै विष्णुर्वचनमब्रवीत् ॥ इदं सत्यं वचश्चैव यत्र धर्मः सनातनः ॥ ७ ॥ तत्र दुःखं न जायेत सूर्ये दृष्टे यथा तमः ॥ तथापि देवकार्यार्थं धर्मविघ्नं करोम्यहम् ॥ ८ ॥ धर्मनष्टोऽसुरः पश्चात्क्षयं यास्यति सान्वयः ॥ विचार्येत्थं ततस्तेषां भगवान्पुरुषोत्तमः ॥ ९ ॥ असृजच्च महातेजाः पुरुषं स्वात्मसंभवम् ॥ मायी मायामयं तेषां धर्मविघ्नार्थमच्युतः ॥ १० ॥ मुंडो मलिनवस्त्रश्च गुंफीपात्रसमन्वितः ॥ दधानः कूर्चकं हस्ते चालयंश्च पदेपदे ॥ ११ ॥ वस्त्रयुक्तं तथा हस्तं क्षिपमाणो मुखे सदा ॥ धर्मेति व्याहरन्देवं नमस्कृत्य स्थितो हरिम् ॥ १२ ॥ उवाच वचनं तत्र बद्धाञ्जलिरमुं पुनः ॥ अरिहन्नुच्यतां पूज्य किं करोमि तदादिश ॥ १३ ॥ इत्येवं भगवाञ्छ्रुत्वा वचनं चेदमब्रवीत् ॥ यदर्थं निर्मितोसि त्वं निबोध कथयामि ते ॥ १४ मर्मांगात्त्वं समुत्पन्नो मत्कार्यं कर्तुमर्हसि ॥

मदीयस्त्वं सदा पूज्यो भविष्यसि न संशयः ॥१५॥ मायि-
न्मायामयं शास्त्रं ग्रंथं नृपसहस्रकम् ॥ श्रौतस्मार्तविरुद्धं च
वर्णाश्रमविवर्जितम् ॥१६॥ इहैव स्वर्गनरकौ प्रत्ययान्नान्यथा
पुनः ॥ अपध्वंसमयं शास्त्रात्कर्मवादपराङ्मुखात् ॥ १७ ॥
एतच्छास्त्रं त्वया ग्राह्यं तद्विस्तारो भविष्यति ॥ ददामि तुभ्यं
सामर्थ्यं निमेषेण भविष्यति ॥१८॥ माया च विविधा त्वत्तो
ममावश्यकरी शुभा ॥ रोधनारोधनं चैव भवतः संभविष्यतः
॥ १९ ॥ इष्टानिष्टप्रदृश्यं च तथान्यत्कुहकं बहु ॥ विचित्रं
चैव यत्कृत्यं तत्सर्वं च भविष्यति ॥ २० ॥ तच्छ्रुत्वा वचनं
तस्य हरेश्च परमात्मनः ॥ नमस्कृत्य स्थितं तत्र कर्तव्यमा-
दिशत्पुनः ॥ २१ ॥ इत्युक्त्वा पाठयामास शास्त्रं मायामयं
तदा ॥ तच्छास्त्रमुपदिश्यैव पुरुषायोचतुः स्वयम् ॥ २२ ॥
तमुवाच पुनस्तत्र मोहनीया इमे त्वया ॥ एते दैत्यास्त्वया सर्वे
पाठनीया मदाज्ञया ॥ २३ ॥ प्रदृश्यते तत्र धर्मः श्रौतस्मार्त्तो
न संशयः ॥ अनया विद्यया सर्वं स्फोटनीयं न संशयः ॥२४॥
पुरत्रयविनाशार्थं प्राह तं पुरुषं हरिः ॥ गन्तुमर्हसि नाशाय
तूर्णं त्रिपुरवासिनाम् ॥ २५ ॥ ततो धर्मं प्रकाश्यैव नाश-
यित्वा पुरत्रयम् ॥ ततश्चैव पुनर्गत्वा मरुस्थल्यां त्वया पुनः
॥ २६ ॥ स्थातव्यं च स्वधर्मेण कलिर्यावत्समाचरेत् ॥ प्रवृत्ते
च युगे तस्मिंस्तव धर्मः प्रकाशते ॥ २७॥ शिष्यैश्च प्रतिशि-
ष्यैश्च वर्द्धनीयस्त्वया पुनः ॥ मदाज्ञया भवद्धर्मो विस्तारं
यास्यति ध्रुवम् ॥ २८ ॥ मदनुज्ञापरा नित्यं गतिं प्राप्स्यथ
मामकाः॥एवमाज्ञा तदा दत्ता विष्णुना प्रभविष्णुना ॥२९॥
ततःसमुंडी परिपालयन् हरेराज्ञां तदा निर्मितवांश्च शिष्यान्॥
यथास्वरूपं चतुरश्च तांस्तदा मायामयं शास्त्रमपाठयत्तदा

॥ ३० ॥ यथा स्वयं तथा ते च चत्वारो मुंडिनः शुभाः ॥
नमस्कृत्य स्थितास्तत्र हरये परमात्मने ॥ ३१ ॥ हरिश्चापि
पुनस्तत्र चतुरस्तांस्तदा स्वयम् ॥ उवाच परमप्रीतः धन्याः
स्थ इति संस्तुवन् ॥ ३२ ॥ यथा गुरुस्तथा पूज्या भविष्यथ
मदाज्ञया ॥ चत्वारो मुंडिनस्ते च धर्मं पाखंडमाश्रिताः
॥ ३३ ॥ हस्ते पात्रं दधानाश्च तुंडवस्त्रविधारकाः ॥ मलि-
नान्येव वासांसि धारयंतोल्पभाषणाः ॥ ३४ ॥ धर्मलाभ
परं तत्त्वं वदंतस्ते तथा स्वयम् ॥ मार्जनिं धार्यमाणास्ते
वस्त्रखंडविनिर्मिताम् ॥ ३५ ॥ ते सर्वे च तदा देवं भगवंत
मुदान्विताः ॥ नमस्कृत्य पुनस्तत्र हर्षनिर्भरमानसाः ॥ ३६ ॥
हरिणा च तदा हस्ते धृत्वा च गुरवेऽर्पिताः ॥ यथा त्वं च
तथैवैते मदीया नैव संशयः ॥ ३७ ॥ आदिरूपं च त्वन्नाम
पूज्यत्वात्पूज्य उच्यते ॥ ऋषिर्यतिस्तथाचार्य उपाध्यायइति
स्वयम् ॥ ३८ ॥ इमान्यपि तु नामानि प्रसिद्धानि भवंत्विति
ममापि च भवद्भिश्च नाम ग्राह्यं शुभं पुनः ॥ ३९ ॥ अरिह-
न्निति तन्नाम मध्ये पापप्रणाशनम् ॥ भवद्भिश्चैव कर्तव्यं कार्यं
लोकसुखावहम् ॥ ४० ॥ ततः प्रणम्य तं मायी शिष्ययुक्तः
स्वयं तदा ॥ मायां प्रवर्तयामास मायिनामपि मोहिनीम् ॥
॥ ४१ ॥ येये गतास्तदा तत्र तथा दीक्षामुपागताः ॥ ये पश्यं-
तश्च तांस्तत्र माया मोहपरायणाः ॥ ४२ ॥ अभयवंस्तत्क्ष-
णादेव दर्शनान्मायिनामपि ॥ नारदोऽपि तदा मायानियोगा-
न्मायिनां प्रभोः ॥ ४३ ॥ प्रविश्य तत्पुरं तेन मायिना सह
दीक्षितः ॥ ततश्च नारदो गत्वा राज्ञे सर्वं न्यवेदयत् ॥ ४४ ॥
कश्चित्समागतश्चात्र यतिर्धर्मपरायणः ॥ दृष्टाश्च बहवो धर्मा

न तेन सदृशाः पुनः ॥ ४५ ॥ वयं च दीक्षितास्तत्र दृष्ट्वा धर्मं सनातनम् ॥ तवेच्छा यदि वर्तेत ग्राह्या दीक्षा त्वया पुनः ॥ ४६ ॥ तदीयं तद्वचः श्रुत्वा राजा तत्र जगाम ह ॥ नारदो दीक्षितो यस्माद्वयं के नाम किंकराः ॥ ४७ ॥ इत्येवंच विदित्वा वै जगाम स्वयमेव हि ॥ तदा सोऽयं तथा दृष्ट्वा मोहितो मायया तया ॥ ४८ ॥ उवाच वचनं तस्मै नमस्कृत्य महात्मने ॥ दीक्षा देया त्वया मह्यं ऋषयो निर्मला शयाः ॥ ४९ ॥ इत्येवं तु वचश्चोक्त्वा राजा मायामयोऽभवत् ॥ यथा च दास्यसि त्वं च तत्तथैव न चान्यथा ॥५०॥ दूरीकृत्य मुखाद्वस्त्रमुवाच ऋषिसत्तमः ॥ दीक्षितस्य वचः श्रुत्वा दीक्षितस्तत्क्षणादपि ॥ ५१ ॥ सर्वे च दीक्षितास्तत्र ये वै त्रिपुरवासिनः ॥ मुनिशिष्यैः प्रशिष्यैश्च व्याप्तं वै त्रिपुरं महत् ॥ ५२ ॥ स्त्रीधर्मं शास्त्रधर्मंच शिवविष्णोः प्रपूजनम् ॥ यज्ञयागाननेकांश्च खंडयामास तत्र वै ॥ ५३ ॥ स्नानदानादिकं तीर्थं पर्वकालं सुशोभनम् ॥ वेदधर्माश्च ये केचित्ते सर्वे दूरतः कृताः ॥ ५४ ॥ माया च देवदेवस्य विष्णोस्तस्याज्ञया प्रभोः ॥ अलक्ष्मीश्च स्वयं तस्य नियोगात्त्रिपुरं गता ॥ ५५ ॥ यल्लक्ष्मीस्तपसा तैस्तु लब्धा देवेश्वरादजाव ॥ बहिर्गता परित्यज्य नियोगाद्ब्राह्मणः प्रभोः ॥ ५६ ॥ बुद्धिमोहस्तथा भूतो विष्णोर्मायादुरत्यया ॥ तथा कृत्वा क्षणादेव तेषां मोहं यतिस्तदा ॥ ५७ ॥ नारदोऽपि मुनिश्रेष्ठो यथा ॥ मायी तथैव सः ॥ एवं नष्टे तथा धर्मे श्रौतस्मार्त्ते सुशोभने ॥ ५८ ॥ पाखंडः स्थापितस्तेन विष्णुना प्रभविष्णुना ॥ ॥ अथ तस्मात्प्राचीनजैनाचार्योत्पत्तिमाह ॥ अत्रापि नारदेन


दृष्ट्वा धर्मं सनातनमिति जैनधर्मस्य प्राचीनत्वं श्रीभागवते पञ्चमस्कन्धे तृतीयाध्यायादिषु यदुक्तं तत्सारमाह श्रीविष्णुः॥ दिगंबराणां तपस्विनांज्ञानिनां नैष्ठिकब्रह्मचारिणां धर्मान्दर्शयितुं नाभिराज्ञो गृहे ऋषभनाम्नाऽवतारं गृहीत्वा भरतज्येष्ठाञ् शतपुत्राननन्यांश्च सन्मार्गमुपदिश्य ब्रह्मावर्त्तात् प्रवव्राज ॥ ५९ ॥ जडांधमूकबधिरपिशाचोन्मादकवदवधूतवेशोऽभिभाष्यमाणोऽपि जनानां गृहीतमौनव्रतो दुर्जनैः परिभूयमानोनाना योगचर्याचरणो भगवान् कोंकवेंककुटक कर्नाटकान् देशान् यदृच्छयोपगतः आस्यकृताश्मकवलः उन्मत्त इवमुक्तमूर्द्धजः कुटकाचलोपवने विचचार ॥६०॥ अथ दावानलस्तद्वनमालेलिहानः सह तेन ददाह ॥६१॥ यस्य किलानुचरितमुपाकर्ण्य कोंकवेंककुटकानां राजार्हन्नामोपशिक्ष्य कलावधर्मं उत्कृष्यमाणे भवितव्येन विमोहितः स्वधर्ममकुतोभयमपहाय कुपथपाखंडमसमञ्जसं निजमनीषया मंदः प्रवर्तयिष्यते ॥ ६२ ॥ येनेह वाव कलौ मनुजापसदा देवमायामोहिताः स्वविधिनियोगशौचचारित्रविहीनादेवहेलनान्यपव्रतानि निजेच्छया गृह्णाना अस्नानानाचमनाशौचकेशोलुञ्चनादीनिकलिनाऽधर्म बहुलेनोपहतधियोब्रह्मब्राह्मणयज्ञपुरुषलोकविदूषका प्रायेण भविष्यंति ॥ ६३ ॥ अथावांतरभेदमाह हरिकृष्णः ॥ पूर्वमुक्ताश्च ये शिष्याश्चत्वारो धर्मसूचकाः ॥ कलावपि तथा संघाश्चत्वारः परिकीर्तिताः ॥६४॥ नंदिसंघश्च प्रथमो वेदशाखासमन्वितः ॥ नंदीकीर्तिभूषणाख्याश्चंद्रा चैव चतुर्थिका ॥ ६५ ॥ सिंहसिंघो द्वितीयस्तु सिंहगुप्ताऽऽश्रवा तथा ॥ जयंसूरी द्विधा शाखा

तुरीया परिकीर्तिता ॥ ६६ ॥ तृतीयः सेनसंघश्च चतुः शाखा-समन्वितः ॥ सेनशाखा भद्रशाखा नागातुंगा चतुर्थिका ॥ ६७ ॥ चतुर्थो देवसंघश्च शाखासंख्या च पूर्ववत् ॥ देवदत्तराजमल्लशाखाभिश्च समन्वितः ॥ ६८ ॥ एवं षोडशशाखाभ्यो ह्यनेकाःपुरुषाऽभवन् ॥ चतुरशीतिभेदाश्चप्रभाचंद्रविनिर्मिताः ॥ ६९ ॥ जैनाभासाः पंच कथ्यंते ॥ द्राविडो यापनीयश्च निःपिच्छः श्वेतचैलकः ॥ काष्ठसंघश्च पंचैते जैनाभासाः प्रकीर्तिताः ॥ ७० ॥ गाथा ॥ एक्कसये छत्तीसे १३६ विक्कमराअस्स मरणपत्तस्स ॥ सोरट्टे बलहीये उप्पन्नो सेवडोसंघो ॥ ७१ ॥ ढुंढियानामकमते लूंकागच्छाद्विनिर्गतः ॥ द्विधा सोऽपि समाख्यातोद्वात्रिंशत्पुरुषात्मकः ॥७२॥ त्रयोदशसमूहैश्च द्वितीयः परिकीर्तितः ॥ अतः परं प्रवक्ष्यामि सेवकानां समुद्भवम् ॥ ७३ ॥

इति श्रीब्राह्मणोत्पत्तिमार्तण्डाध्याये जैनाचार्योत्पत्तिवर्णनं नाम प्रकरणम् ॥ ५८ ॥ आदितः पद्यसंख्याः ॥ ५५ ॥

टि०–१ चौरासीगच्छ २ द्राविडजैनः ३ यापनीयजैनः ४ निःपिच्छजैनः ५ श्वेतांबरीजैनः ६ काष्ठसंघजैनः ७ विक्रमराज्ञः ८ मरणंप्राप्तस्य ९ सौराष्ट्रदेशे १० वलभीनगर्याम् ११ उत्पन्नः १२ श्वेतांबरीसंघः

अथ जैनाचार्योंना संघपुरुषज्ञानचक्रम्।



अथ श्रावकोत्पत्तिप्रकरणम् ॥ ५९ ॥

दोहा।

तीर्थंकर वारे प्रथम, जैनधर्म अधिकार ॥
वरण च्यार मैं सकल जन, पालत करत विचार ॥ १ ॥
आगांसु तारीति इह, आई चली अमान ॥
वर्द्धमान मुगती गये, भये और गति ग्यान ॥ २ ॥

छंदपद्धति।

वरधमाने पधारे मुकतिथान, ता पीछे षटशत वरष प्रमान ॥
तासी सतियासी वरख जान, अपराजितनामा मुनिवर वाण ॥३॥

जिनसेन नामा एक मुनींद्र, सोभे एक संवत सुछंद ॥
शुद्ध माघ पंचमी करि विहार, वनिगये खंडेले कृत विचार ॥४॥
वनकीधतपस्या दिन कितेक, मुनिसंघ पंचशत युत विवेक ॥
मुनि सब मिलि यह कीनो विचार;इह ठामे उपजिह अबविकार५
मुनि भये ध्यानमें सावधाव, दृढ गह्यो हिरदे जिना जैन ॥
पानखंडेले राजा गिरखडेल, चोरासी खेडामा प्रति दलेल ॥६॥
सुखवसत सर्व निज निज स्थान, सब ठाकुर धरमइसावध्यान ॥
होय गांवा ठाकुरनहिकोय, वयासि ठाकुर मिले सोय ॥ ७ ॥
वापरि मृत्यु उन दहो गाय, विपरीति उठि इह ता समाय ॥
नृप तब बुलाये विप्र देव, विइतन कह्यो सब खेल भेव ॥ ८ ॥
याको अब करि एको विचार, द्विज कहो सांच सब समचार ॥
द्विज बलि इह वाणि विशाल, नरमेध यज्ञ कीजे नृपाल ॥ ९ ॥
तासे इह मिटहै सब दोष, प्रजा सुख पावे सर्वपोष ॥
तब करे आप नृप सरंजाम, एक सहस मनुज शत मुनि ताम १०॥
अन्य मेवा सामगरि अपार, ततकाल कियो जज्ञको विचार ॥
द्विजकरत होम निशि दिन अखंड,मुनि मेवासहित मनुज पिंड ११
तब भयो उपद्रव अति अपार, जिनसेन ध्यान दैकरि विचार॥
चक्रेश्वरी भगवतकी करत जाप,जासै इह मिटिहै सरबपाप ॥१२॥
जिनकूं व स्थापनकरे जास, मिटगयो मृत्युभय सर्वत्रास ॥
नृप मुनि वंदन आप कीन, सब कहि बात दुख बुधिप्रवीन १३॥
इह भयो उपद्रव कौन पाप, मुनि कहो सत्य विरतंत आप ॥
मुनि कहि एक शत मुनि प्रमान, करि दिये होम विप्रन अज्ञान१४॥
तासै इह मोये भया पाप, इह सुनो कान दे नृपति आज ॥
तब पाणिजोडि नृप प्रणति कीन, मुनि प्यायपढ्यो अतिहोय दीन॥

अब मुनि वरजा विधि मिटे पाप, करि कृपा आज्ञाकरो आप ॥
मुनि कही नृपति ल्यो धरम जैन, ज्यु पावे सब हि प्रजाचैन १६॥
चौरासि ठाकुर सर्व आय, मुनि पीछि दीनी सिर फिराय ॥
जुग आसी भये रजपूत जैन, दोय सो नीतिन में मिले अैन ॥
मिलि असी चार भइ प्रकट जास. ता दिनतै श्रावक भये तास १७

दोहा ।

इह चौरासी जातिके, सब श्रावककी जानि ॥
इह विधि संवत एकमे, मुनिवर कहि वर वानि ॥ १८ ॥
गोत्रोत्पत्ति देवी सुफल, चार बात परमान ॥
सब श्रावकजनकी सुनौ, बुधजन सरब सुजान ॥ १९ ॥
साह जाति सब जग कहत, सो भये वंश चौहान ॥
कुलदेवी चक्रेश्वरी, उत्पत्ति खंडेलथान ॥ २० ॥
तवर गोत्र भये पाटणी, पाटनि जन्मप्रमान ॥
कुलदेवी आमणी कहत, जानत सकल जहान ॥ २१ ॥
कहत वंश चौहानको, जाती पापडिवाल ॥
पापडिकी उत्पत्ति कहत, चक्रेसुर कुल चाल ॥ २२ ॥
दोसि वंश राठौड है, उत्पत्ति दोसणिगाँव ॥
कुलदेवी चक्रेश्वरी, नोखेड जाको नाँव ॥ २३ ॥
सेठी सोरठ वंशके, उत्पत्ति सेठोलाव ॥
लोसिल पद्मावती कुलशक्ति, चितदिन पूजाचाव ॥ २४ ॥
वंशचोहाण सभावसा, उतपति भाव से जानि ॥
कुलदेवी चक्रेश्वरी, बुधजन कहत बखानि ॥ २५ ॥
चांदुवाड चंदेल है, मातणि देवीनाम ॥
चंदवाजि उत्पत्ति है, जपत जिनेश्वरीनाम ॥ २६ ॥

मोठ्याढी मर वंशके, उत्पत्ति मोठ्यो गांव ॥
जाके कुलमरजादकी, देवी ओर बनाव ॥ २७ ॥
गोधा ठोल्या गोडकुल, नांदणि देवी नाम ॥
उत्पत्ति जाकी कहत बुध, निज गोधाणे गाम ॥ २८ ॥
अजमेरा वश गौड़को, नांदणि कुलकी जात ॥
अजमेचो उत्पत्ति कहत, सब जग कहत विख्यात ॥ २९ ॥
दरडोम्या चहुवाण कुल, दरडो डीय निकास ॥
जिह देवी चक्रेश्वरी, जिनसेवा कृतजास ॥ ३० ॥
गदिह्या चूडीवाल जुग, वंश कहत चौहान ॥
कुलदेवी चक्रेश्वरी, गदह्यो गांव सुथान ॥ ३१ ॥
पाहाप्पा वंश चोहाणहै, उत्पत्ति पाहडि गाम ॥
कुलदेवी चक्रेश्वरी, भजे जु भगवत नाम ॥ ३२ ॥
भुंछ वंशके सोरठी, गांव भुच्छडो थान ॥
आमणा कुलदेवी कहत, बुधजन करत बखान ॥ ३३ ॥
कुलसुनार वज आमणा, उत्पत्ति खंडेले थान ॥
आमणी कुलदेवी कहै, जानत सकल जहान ॥ ३४ ॥
है सुनार वज मोहण्या, उत्पत्ति, खंडेले गाम ॥
जा कुलकी पूजा लहत, आमणदेवी नाम ॥ ३५ ॥
सोढा रारा रावका, रीरे नगर सुथान ॥
कुलदेवी ओरल कहत, जानत ताहि जहान ॥ ३६ ॥
पाठोधी तोवर कहत, पाटोधे उत्पत्ति ॥
जाके कुलकी जग कहत, देवी पद्मावत्ति ॥ ३७ ॥
कुच्छाहा गँगवाल है, काटीवाल कुछाह ॥
उतपति गंगवाणे नगर, कुलदेवी जमवाह ॥ ३८ ॥

झिथरीया चोहाणकुल, उत्पत्ति झथरे गाँव ॥
कुलदेवी चक्रेश्वरी, जगत बतावत नाँव ॥ ३९ ॥
सोनी सोरठवंशके, उत्पत्ति सोहने गाम ॥
जाके कुलकी देवता, आमणदेवी नाम ॥ ४० ॥
ठीमरवंश विलाल कुल, बडी विलाली थान ॥
पोरल शाकी देवता, वंदत बुध सुज्ञान ॥ ४१ ॥
कुरुवंशीविल्लाल कुल, लघुविल्लाली गाँव ॥
जा कुल सोनी देवता, जगत बतावत नाँव ॥ ४२ ॥
कुल गहलोत विनायक्या,विनायक्यो सुथान ॥
चौथिमात कुलदेवता. जिन मत वचन प्रमान ॥ ४३ ॥
मोहिलवाकुली वालकुल, गांव वाकुले थान ॥
जिह कुलदेवी जीणहै, मानत सकल जहान ॥ ४४ ॥
मोहिल कुलतैं प्रगट सो, साह कासलीवाल ॥
थान कासली नगर शुभ, जेहल करत निहाल ॥ ४५ ॥
सोरठ कुलके पांपल्या, गांव पापल्यो थान ॥
आमण कुलदेवी कहत, पूजा करत प्रमान ॥ ४६ ॥
सोगाणी रविवंशके, सोगाण्ये शुभ थान ॥
कोटेची देवी कहत, जाने धरम सुजान ॥ ४७ ॥

चौपाई।

कुच्छाहा झाझरी कहावे। झाझरि गाँव निकास बतावे ॥
कुलदेवी जमवाय पुजावे। महाजनव्हैग्याजगत बतावे ॥४८॥
कुच्छाहासु भया कटाऱ्या। कुलदेवी जमवाष पुजाऱ्या ॥
गांवनिकासकटाऱ्योकहिए । भेदभाव यामें सब लहिये ॥ ४९॥
सोरठ पद्मा वैद कहावे। कुलदेवी आमणा पुजवावे ॥
उत्पत्ति गाँव पावडा जाने। जुग श्रावक्की जाति पिछाने ॥५०॥

टौंग्या गोत पवार ऊपना । कुलदेवी चावंड पूजना ॥
उत्पति टौंग गाय बतावे । धर्मजैनकूं निश्चै ध्यावै ॥ ५१ ॥
बोहरा सोढा वंश कहावे । कुलदेवी सैतली मनावे ॥
उतपत्ति बोहरे गाय बताई । तासे बोहरा जात कहाई ॥ ५२ ॥
कुरुवंशी सो बाजे काला । कालवाडिसूं उतपति चाला ॥
कुलदेवी लेहणिकी पूजा । काला श्रावग और न दूजा ॥५३॥
कुल चोहाण छावटा कहावे । चक्रेश्वरी देवीकुं ध्यावे ॥
गाँव छावडे उत्पत्ति जाकी । जाति छावडा कहिये ताकी ॥५४॥
सोरठ वंश लौग्या प्रतावे । लौग्यगायनि कास कहावे ॥
कुलदेवी आमण पुजवावे । जाये परणा जात बुलावे ॥ ५५ ॥
मोरठ वंश लुहाड राजानूं । उतपत्ति गांपल होडे मानूं ॥
कुलदेवी लोसिल पुजवावै । जासे लाभ लाभ बहुपावै ॥ ५६ ॥
भंडसाली सो नरवर वानू । ताकी देवी आमण जानू ॥
भंडसाल्याकीउत्पत्तिजाकी । जाति भई भंडसाली ताकी ॥५७॥
सोलंखी सो दगडा जानो । पुरंदरे दोदनिकासपिछानो ॥
कुलदेवी आमण सो कहिये।रिद्धि सिद्धि तासे फललहिये॥५८॥
तौंवरसुं चौधरी कहावे । चौधरचे गाँव निकास बतावे ॥
कुलदेवी आमण पुजवावे । सो देवी कुलवृद्धि वधावे ॥ ५९ ॥

दोहा ।

पोटलिया गहलोत कुल, गाँव पोटले निकास ॥
कुलदेवी पद्मावती, पूज्या पूरण आस ॥ ६० ॥
सोठा वंशगिदोडिया, गाँव गिंदोडे यान ॥
कुलकी देवी चौथिकी, पूजा करत प्रमाण ॥ ६१ ॥
सांखुण्या चंदेल कुल, सांखुण्ये पुर वास ॥
श्री देवी कुलदेवता, ताकी पुरे आस ॥ ६२ ॥

सोडा वंश अनोपजा, अनोपने सुथान ॥
संकरा है कुलदेवता, पूज्या सिद्धि प्रमान ॥ ६३ ॥
गोऊनी गोल्या कहत, सब गोतिये निकास ॥
मातणी कुलदेवी कहत, पूज्यापुण्यप्रकास ॥ ६४ ॥
पंगुलिया चोहाण कुल, पंगुलिये असथान ॥
कुलकि तांदणी देवता, पूज्या राखे मान ॥ ६५ ॥
भूलण कुल चोहाणको, भूलणिये नीकास ॥
कुलदेवी चक्रेश्वरी, पूरे मनकी आस ॥ ६६ ॥
वनमाली चोहाण है, वनमालीपुर स्थान ॥
चक्रेश्वरी देवी कहत, जाहि बधारतमान ॥ ६७ ॥
चोहाणासुपीतल्या, उतपति पीतल्योहै गाँव ॥
चक्रेश्वरी प्रतापसूं, रिद्धि सिद्धि घरमाहि ॥ ६८ ॥
अरडकिया चोहाणकुल, अरलीकियेअस्थान ॥
कुलदेवी चक्रेश्वरी, पूजा पावे मान ॥ ६९ ॥
ठीमर कहिए रावत्या, उतपत्ति रावते गांव ॥
मातदेवी चक्रेश्वरी, सोमवंशके माहि ॥ ७० ॥
मोदी ठीमर वंशके, उत्पत्ति मोदेगाँव ॥
कुलदेवी ओरल कही, धरमी जैन कहाव ॥ ७१ ॥
कोकराज कुरुवंशके, कोकराज पुरवास ॥
नातनी देवी ओरल कही, पूज्या पूरे आस ॥ ७२ ॥

चौपाई।

जगराज्या कुरुवंशी जानो। सोनिलदेवी ताकि बखानो ॥
जगराजेपुरउत्पत्ति जाकी । जाति भई जगराज्या ताकी॥७३॥
मूल राजा कुरुवंशी कहिए। कुलकी देवी सोनिल लहिये ॥
मुलराजपुरउत्पत्ति जानो। छाहडनीनातनिश्चैधर्मजैनकरिमानो॥

छाहग सो कुरुवंशि कहावे । सोनिलदेवी मात पुजावे ॥
गाव छाहडे उत्पत्ति जाकी । छाहडजाती भईयुवाकी ॥ ७५ ॥

दोहा ।

दुकडा दुज्जिलवंशके, ताकी सोनिल मात ॥
गांव दुकडयो जासुकी, उत्पत्ति कही विख्यात ॥ ७६ ॥

चौपाई ।

गौतमवंशी दुजिल जानु । गोत हिये उत्पत्ति बखानु ॥
कुलदेव्या हेमांकु मानु । निश्चै जैनधर्म महि छानु ॥ ७७ ॥
कुलभाख्यासोदुजिलकहिए । कुळदेवी जिह हेमा चहिए ॥
उत्पत्तिग्राम कह्योकुलभान्यो । जैनधर्मनिश्चैकरि मान्यो॥७८॥

दोहा ।

वोरखंडिका ऊजला, वोरखंड पुर वास ॥
हेमा देवी हेत करि, पूज्या पूरे आस ॥ ७९ ॥
सुरपत्या मोहित कह्या, सुरपति गाय निकास ॥
जीणमात परमेश्वरी, रिधि विरधि कुळ तास ॥ ८० ॥
चिरकन्याचोहाणकुल, चिरकन्येगायनिकास ॥
मात जासु चक्रेश्वरी, धर्मजैन परकास ॥ ८१ ॥
सोरठ वंश निगदिया, निरदे गाम निकास ॥
कुळदेवी नांदणिकहि, वा सबपूरे आस ॥ ८२ ॥

चौपाई ।

गौड वंश नरपोल्या जानो । निरपोले पुर उत्पत्ति मानो ॥
माता नांदणिदेवी जानो । जैनीजीके साँच करि मानो ॥८३॥
सरवाडचा वंशगौड कहावे । सो सरवाडि निकास बतावे ॥
नांदणी देवी मात पुजावे । निश्चै धर्म जैनकूं ध्यावे ॥ ८४ ॥
करवागच्छ सो गौडबताया । नांदणी देवी मात पुजाया ॥
कडवा गडयो थानहे जाको । निश्चै धर्म जैन मत वाको ॥८५॥

सांभरिया चोहाण कुल, सांभरि जासु निकास ॥
कुळदेवी चक्रेश्वरी, अरहंत पूज प्रकाश ॥ ८६ ॥
हळटचा मोहिल वंशके, उत्पत्ति हळटचे गांव ॥
देतमात चक्रेश्वरी, रिद्धिसिद्धि घरमाहिं ॥ ८७ ॥
बंब वंश सोढी कहत, बंबलिये निकास ॥
कुळदेवी सकरायकूं, पूजे प्रेम प्रकाश ॥ ८८ ॥
चौवाण्या चौहाण है, पुर चौवाऱ्ये वास ॥
मात जास चक्रेश्वरी, वरदाता भइ तास ॥ ८९ ॥
राजहंस्या साढो कह्या, उत्पत्ति राजहंस गांव ॥
आमणि देवी मात कुळ, बुधजन कहते नांव ॥ ९० ॥
ठग सोटा बुधजन कहे, ठगाणिये निकास ॥
आमणि कुलकी देवता, बहुविधि पूरे आस ॥ ९१ ॥
अहंकाऱ्या चौहाण है, अहंकारिये सुथान ॥
कुलदेवी सकराय है, पूजन किया प्रमाण ॥ ९२ ॥
भसावड कुरुवंसी कहै, गांव भसावड वास ॥
कहिये कुलकी देवता, सोनिळ कहिये जास ॥ ९३ ॥
मोलसऱ्या सोटा कहत, मोळसऱ्ये उत्पत्ति ॥
कुलदेवी सकरायकूं, पूज्यो ध्यावे नित्ति ॥ ९४ ॥
ठीमरवंशी भांगडी, गांव भांगडचे वास ॥
कुळकी कहिये देवता, ओरल देवी जास ॥ ९५ ॥
लोहट सोरठ वंशके, गाँव लोहटे निकास ॥
ताके कुलकी देवता, लोसिल पूरे आस ॥ ९६ ॥

चौपाई।

दुजिळवंशी खेतर पाल्या। खेतरपाल्यो गाव ॥
रजाल्याहेमादेवी मातवखाणु। निश्चे अरहंतदेव पिछानु ॥९७॥

दोहा।

राज भद्रिया सांखला, भद्रेराज निकास ॥
सुरपति कुलकी देवता, मनकी पूरे आस ॥ ९८ ॥

चौपाई ।

कुरुवंशी भुवाल्या कहिये । गांव भुवालये उत्पति लहिए ॥
कुळदेवी जमवाय पुजावे । धर्म जैन निश्चैकरि ध्यावे ॥९९॥
जलवाण्या कुरुवंशी जाणु । जलवाण्ये निकास बखाणु ॥
कुळदेवी जमवाय कहावे । मंत्रसिद्धिनो कारज पावे ॥१००॥
वैनाडी कहे ठीमरवंसी । वैनाडी उत्पत्ति अवतंसी ॥
कुलदेवी ओरकूं ध्यावे । पूजाकिये रिद्धि कुळपावे ॥१॥
लटीवाळ सोढा सो जाणु । जाकुळकी श्रीदेवि बखाणु ॥
उत्पत्ति जाकी लटवे कही । जैनधर्म माने करि सही ॥२॥

दोहा ।

सोरठवंशी नरपत्या, उत्पत्ति नरपतो गाम ॥
ताकी देवी आमणा, रिद्धि सिद्धि घरमांहि ॥ ३ ॥
गौड गोतकालोसल्या, उत्पत्ति लोसिल गांव ॥
जमवाई कुलदेवता, जामें संशय नाहि ॥ ४ ॥
कहतबांद्-यासोखला, गांव बांदरे निकास ॥
कुळकी देवी मातणी, रिद्धि सिद्धि दे तास ॥ ५ ॥
सोढा विरल्या वंशका, विरले गांव सथान ॥
ताकी सोनिळ देवता, जिनमत वचन प्रमाण ॥ ६ ॥
यह चौरासी जातिके, श्रावककी उत्पत्ति ॥
खंडखंडेले ऊपनी, दया जु पाले नित्य ॥ ७ ॥
अठारहसौं पचासमें, १८५०, संवतकी मरजाद ॥
श्रावण सुदि एकादशी, सूर्यवार घननाद ॥ ८ ॥
पंडित ईश्वरदासके, भईजमनमें चूप ॥
जातिगोत्रको भेद सब, देख्यो शास्त्र अनूप ॥ ९ ॥
चौपाई करिके प्रगट, भाषा रची सुगंम ॥
पढता सुनता सकल जन, पावे बुद्धि अगंम ॥११०॥

इति श्रावकोत्पत्तिप्रकरणम् ॥ ५९ ॥ पद्यसंख्या ॥ ४७६५ ॥

अथ श्रावकाणां गोत्रवंशग्रामदेवीज्ञानचक्रम् ॥

सं.	गोत्र	वंश	उत्पत्तिग्राम	देवी
१	शाह	चोहाणा	खण्डेले	चक्रेश्वरी
२	पाटणी	तुंवर	पाटणी	आवणा
३	पापडीवा	चोहाण	पापरी	चक्रेश्वरी
४	दोसी	राठोर	ससणि	जमवाई
५	सेठी	मोरवंसी	सेठोल	पद्मावती
६	भौसा	चोहाण	भावसो	चक्रेश्वरी
७	चांदिवार	चन्देल	चौदवारी	मातणी
८	मौठा	ठीमर	मोठोल	औराली
९	नरपत्य	सीरई	नरपत्या	आमणी
१०	गाधा	गौड	गोधाणी	नांदणी
११	अजमेरा	गौड	अजमेर	नांदणी
१२	दरडोण्या	चोहाण	गधिहो	चक्रेश्वरी
१३	गदिया	चोहाण	गधिहो	चक्रेश्वरी
१४	पाहाऱ्या	चोहाण	पहारी	चक्रेश्वरी
१५	मूंछ	सोरईसूर्यवंश	मूछड	आमणी
१६	वज्र	सुनाळ	खंडेले	मोहणी
१७	राराराऊ	राठोड	खंडेळे	मोहणी
१८	वज्जमहराया	सुनार	खंडेळे	मोहणी
१९	पाटोदी	तुंवर	पाटोद	पद्मावती
२०	गंगवाल	कछावा	गंगवाणी	जमवाई
२१	पांडया	चोहाण	पाडरोगूथे	चक्रेश्वरी
२२	बीकाला	टीमर	वक्कीविला	ओसली
२३	बिनाइक्या	गहलोत	बिनारल	चौथी
२४	वीरलाल	कुरुवंशी	लाडिविला	सानली
२५	वाकळीवाल	मोहछ.	वोकोली	जोणी
२६	सोनी	सोरई	सोनाही	आमणी
२७	कासलीवा	सोहिल	कासली	जीणी
२८	पांपल्या	सारार्ई	पांपली	आमणी
२९	सौगाणी	को.टसू.वं.	सौगाणी	कनहड
३०	काकरी	कछाहा	कंकरी	जमुनाती
३१	दटाऱ्या	कछाहा	कटारी	कमवाई
३२	वेद	सोरई	पावड	आमणी
३३	दुवा	पवार	टोगे	पावाडी
३४	वोहोरा	सोठा	वोचन्द	सीतल
३५	फाला	कुरुवंशी	कुरुवंशीहः	लोहली
३६	छावरां	चोहाण	छावड	आरोली
३७	लोहाग्या	सोरई	हेहज	आमणी
३८	लुहाडया	मोरखावंशी	लाहड	लोसली
३९	भडशाली	सोलंखी	भडशाली	आमणी
४०	दगडया	सोलंखी	दगरोदी	आमणी
४१	चौधरी	तुंवर	चौधरी	पद्मावती
४२	पोंडल्या	गहैलोत	पोटळ	चोथी
४३	दगडया	सोढा	गदीड	श्रीदेवी
४४	सांभुण्या	सोढा	सांबूण	सलराई
४५	नोपडा	चंदेल	अनोपगढ	मातनी
४६	मूलराज्य	कुरुवंशी	मूलराज	सोनली
४७	निगोत्या	गौडे	नगौती	नादणी
४८	पिङ्गल्या	चोहाण	पिंगल	चक्रेश्वरी
४९	भुलंण्या	चोहाण	भूलनका	चक्रेश्वरी
५०	बनमाल्या	चोहाण	वनमाला	चक्रेश्वरी
५१	अरडका	चोहाण	अरडका	चक्रेश्वरी
५२	रावत्या	ठीमरसोम	रावत्यो	आरोली
५३	मोंदी	ठीमरसो.व.	मोद्यो	ओराली
५४	कोकरोज्य	कुरुवंशी	कोकराज	सौनली
५५	राजराज्य	कुरुवंशी	जगराज	सोगली
५६	छाहडया	कुरुवंशी	छाहणी	सोहनी
५७	ठुकडया	धुजळवंशी	थुकडी	हेमादेवी
५८	गोतवंशी	दुजळी	गोतडी	हेमादेवी
५९	वीरखंडया	दूजिल	वोरखंड	हेमादेवी
६०	सरपत्या	गोहिल	सरपती	यजिणिदेवी
६१	चरकण्या	चोहाण	चरकोनी	चक्रेश्वरी
६२	सावड	गौड	सरवाढ	नांदणी
६३	नगोंद्या	गौड	नगद	नांदणी
६४	निरपोत्या	गौड	निरपल	नांदणी
६५	पितळया	चोहाण	पितळगांव	चक्रेश्वरी
६६	कळभान	दूजिळ	कुलभान	हेमादेवी
६७	कडवाग	गौड	कडवागरी	नांदणी
६८	सोभसा	चोहाण	सोभासका	चक्रेश्वरी

सं.	गोत्र	वंश	उत्पत्तिग्राम	देवी
६९	हलट्या	मोहिल	हळरोनी	गीयादेवी
७०	सोमगया	गहेलोत	सावद	चोथीदेवी
७१	वंश	सोढा	बावळा	तकरारी
७२	चौवोस्या	चोहाण	चौरारो	चक्रेश्वरी
७३	राजहंस्या	सोढा	राजहंस	सकाई
७४	अहंकाऱ्या	सोढा	अहंकार	सकाई
७५	भुसावरी	कुरुवंशी	भुसावर	सोनली
७६	मोलससा	साठा	माश्वेच	सकाई
७७	आंगव्या	टीनर	मंगल	आरोली
७८	लहाडया	मोरवंशी	लोहड	लोसणी
७९	खेत्रपाल्या	बीजोळ	खेत्रपाल	हेमादेपी
८०	राजभडया	कछाहा	भूराई	जमवाई
८१	जळबीजा	कछाहा	जळवानी	जमवाई
८२	जलबीजा	कछाह	जळवानी	जमवाई
८३	वैनाडया	दीपर	वनपड	आरोली
८४	कठीवाल	सोठा	लटवो	आरोली

अथ षड्दर्शनानां षण्णवतिभेदाः

अथ जैनभेदाः

१ चौदसिया
२ पुनमिया
३ आगमिया
४ आंचलिया
५ ढुंढिया
६ ऊकट

अथ दिगंबराः

१ काष्टश्रङ्गी
२ मथरश्रङ्गी
३ हिंगकूडा
४ नठावाजागरिया
५ जागरिया
६ परणिया
७ वेसगारि
८ वैय
९ यत
१० पुजारा

इति जैनभेदाः ।

अथ बौद्धभेदाः

१ चांदा
२ सानघडिया
३ दगडा
४ डांगरा
५ भूदतवाल
६ कमाळिया
७ मूलथाणिया
८ पेटफोडा
९ भाड
१० विट
११ पाइमा
१२ दुगा
१३ गरोडा
१४ गुणधुली
१५ जगहघिया
१६ वोगवेडिया

इति बौद्धभेदाः ।

अथ चार्वाकभेदाः

१ जोगी
२ हरमेखलिया
३ इंद्रजालिया
४ नागदामनि
५ तोतलमति
६ भाटमतिया
७ उरुकुलमती
८ गोगमनिया
९ नगोघनेतरि
१० रसाणिया
११ धत्तुर्वादिया
१२ भिक्षु
१३ तुंबर
१४ मन्त्रवादि
१५ शास्त्रकमि
१६ याञ्चायक
१७ नोरखिया

इति चार्वाकाः

अथ जैमिनिभेदाः

१ ब्राह्मण
२ वाह्तिय
३ अग्निहोत्री
४ दीक्षित
५ याज्ञिक
६ उपाध्याय
७ आचार्य
८ व्यास
९ ज्योतिषी
१० पंडित
११ चतुर्मुखपा
१२ कथक:
१३ केहुलिया
१४ वैष्णव
१५ कउतगिय'
१६ बहुमा
१७ भाट

इति जैमिनि०

अथ सांख्यभेदाः

१ भगवन्
२ त्रिदंडीय
३ स्नातकाः
४ चांद्रायणः
५ मौनीया
६ शुरियाः
७ कवियाः
८ कुराडाः
९ छागाः
१० गुगळिया
११ डंभिकं
१२ गलवहाडिया
१३ शंखिया
१४ कळेसरिया
१५ अवतरिया
१६ स्वामिया
१७ नागरिया

इति सांख्यभेदाः ।

अथ नैयायि०

१ भरडाः
२ शैवाः
३ पाशुपताः
४ कापालियाः
५ घंटाला
६ पाहूया
७ आकडाः
८ केदारपुत्राः
९ नमाः
१० अयाचकाः
११ एकभिक्षु
१२ घाडिवाहा
१३ भ्रामरी
१४ पथियाणा
१५ मठपति
१६ चारपी
१७ फामभुखा

इति षड्दर्शनानां षण्णवतिभेदाः समाप्ताः ।

अथ शंकराचार्यप्रादुर्भावप्रकरणम् ॥ ६० ॥

श्रीगणेशाय नमः॥ अथ शंकराचार्यप्रादुर्भावकथामाह कूर्मपुराणे त्रिंशत्तमेऽध्याये युगवंशानुकीर्त्तने ॥ कलौ रुद्रो महादेवो लोकानामीश्वरः परः ॥ करिष्यन्नवतारं स्वं शंकरो नीललोहितः ॥१॥ अत्र विशेषमाह शिवरहस्ये नवमांशे षोडशाध्याये ॥ ईश्वर उवाच ॥ शृणु देवि भविष्याणां भक्तानां चरितं कलौ ॥ वदामि संग्रहेणैव गोपनीयं प्रयत्नतः ॥ २ ॥ पापकर्मैकनिरतान्विरतान्सर्वकर्मसु ॥ वर्णाश्रमपरिभ्रष्टान्धर्मप्रस्रवणाञ्जनान् ॥ ३ ॥ कल्यब्धौ मज्जमानांस्तान् दृष्ट्वा चुक्रोशतोम्बिके ॥ मदंशजातं देवेशि कलावपि तपोधनम् ॥ ४ ॥ केरलेषु तदा विप्रं जनयामि महेश्वरि ॥ तस्यैव चरितं तेऽद्य वक्ष्यामि शृणु शैलजे ॥५॥ कल्यादिमे महादेवि सहस्रद्वितयात्परम् ॥ सारस्वतास्तथा गौडा मिश्राः कर्णाजिना द्विजाः ॥ ६ ॥ आममीनाशना देवि आर्यावर्तानुवासिनः ॥ औत्तरा विंध्यनिलया भविष्यंति महीतले ॥७॥ शब्दार्थज्ञानकुशलास्तर्ककर्कशबुद्धयः ॥ जैना बौद्धा बुद्धियुक्ता मीमांसानिरताः कलौ ॥ ८ ॥ वेदबोधदवाक्यानामन्यथैव प्रोचकाः ॥ प्रत्यक्षवादकुशलाः शल्यभूताः कलौ शिवे ॥ ९ ॥ मिश्राः शास्त्रमहाशस्त्रैरद्वैतोच्छेदिनोऽम्बिके॥ कर्मैव परमं श्रेयो नैवेशः फलदायकः ॥ १० ॥ इतियुक्तिपरामिष्टवाक्यैरुद्बोधयंति च ॥ तेन घोराः कुलाचाराःकर्मसारा भवंस्तथा ॥११॥ तेषामुद्घाटनार्थाय सृजामीशं मदंशजम् ॥ केरलेशशलग्रामे विप्रपत्न्यां मदंशजः ॥ १२ ॥ भविष्यति महादेवि शंकराख्यो द्विजोत्तमः ॥ उपनीतस्तदा मात्रा वेदान्सांगान् ग्रहीष्यति ॥१३॥अब्दावधि ततः सर्वं विहृत्य स सुतर्कजम् ॥ मतं मीमांस-

मानोऽसौ कृत्वा शास्त्रेषु निश्चयम् ॥१४॥ वादिमत्तद्विपवरान् शंकरोत्तमकेसरी ॥ भिनत्त्येव महाबुद्धान् सिद्धविद्यानपि द्रुतम् ॥ १५ ॥ जैनान्विजित्य तरसा तथान्यान्कुमतानुगान् ॥ तदा मातरमामंत्र्य परिव्राड् स भविष्यति ॥ १६ ॥ परिव्राजकवेषेण मिश्रानाश्रमदूषकान् ॥ दंडहस्तस्तथाकुंडी काषायवसनोऽमलः ॥ १७ ॥ भस्मदिव्यत्रिपुंड्रांको रुद्राक्षाभरणोज्ज्वलः ॥ताररुद्रार्थपारीणः शिवलिंगार्चनप्रियः ॥१८॥ स्वशिष्यैस्तादृशैर्घुष्यन् भाष्यवाक्यानि सोंबिके ॥ मद्दत्तविद्यया भिक्षुर्विराजति शशांकवत् ॥ १९ ॥ सोऽद्वैतोच्छेदकान् पापानुच्छिद्याक्षिप्य तर्कतः ॥ स्वमतानुगतान् देवी करोत्येव निर्गलम् ॥ २० ॥ तथापि प्रत्ययस्तेषां नैवासीच्छ्रुतिदर्शनैः ॥ सूत उवाच ॥ मिश्राः शास्त्रार्थकुशलास्तर्ककर्कशबुद्धयः ॥२१॥ तेषामुद्बोधनार्थाय तिष्ये भाष्यं करिष्यति ॥ भाष्यं घुष्यमहावाक्यैस्तिष्यजातान् हनिष्यति ॥ २२ ॥ व्यासोपदिष्टसूत्राणां द्वैतवाक्यात्मनां शिवे ॥ अद्वैतमेव सूत्रार्थं प्रामाण्येन करिष्यति ॥ २३ ॥ अविमुक्तो समासीनं व्यासं वाक्यैर्विजित्य च ॥ शंकरोस्तीति हृष्टात्मा शंकराख्योऽथ मस्करी ॥ २४ ॥ शंकर उवाच ॥ सत्यं सत्यं नेह नानास्ति किंचिदीशावास्यं ब्रह्म सत्य जगद्धि ॥ ब्रह्मैवेदं ब्रह्म पश्चात् पुरस्तादेको रुद्रो न द्वितीयोऽवतस्थे ॥ २५ ॥ ईश्वर उवाच ॥ इति शंकरवाक्येन विश्वेशाख्यादहं तदा ॥ प्रादुर्बभूव लिंगात्स्वादलिंगोऽपि महेश्वरि ॥ २६ ॥ त्रिपुंड्रविलसद्भालश्चंद्रार्द्धकृतशेखरः ॥ नागाजिनोत्तरासंगो नीलकंठस्त्रिलोचनः ॥२७॥ वरकाकोदरानद्धराजद्धारस्त्वयांबया ॥ तमब्रुवं महादेवि प्रणतं यतिनांवरम् ॥ २८ ॥ शिष्यैश्चतुर्भिश्च युतं भस्मरुद्राक्षभूष-

णम् ॥ ईश्वर उवाच ॥ मदंशजस्त्वं जातोऽसि भुवि चाद्वैतसि
द्धये ॥ २९ ॥ पापमिश्राश्रिते मार्गे जैनदुर्बुद्धिबोधकैः ॥
भिन्ने वेदैकसंसिद्धे ह्यद्वैते द्वैतवाक्यतः ॥ ३० ॥ तद्भेदगिरि-
वज्रस्त्वं संजातोऽसि मदंशतः ॥ द्वात्रिंशत्परमायुस्ते शीघ्रं
कैलासमावस ॥ ३१ ॥ एतत्प्रतिगृहाण त्वं पंचलिंगं सुपू-
जय ॥ भस्मरुद्राक्षसंपन्नः पंचाक्षरपरायणः ॥ ३२ ॥ शतरु-
द्रावर्त्तनैश्च तारेण भसितेन च ॥ बिल्वपत्रैश्च कुसुमैर्नैवेद्यैर्वि-
विधैरपि ॥ ३३ ॥ त्रिवारं सावधानेन गच्छ सर्वंजयाय च
॥ ३४ ॥ त्वदर्थे कैलासाचलवरसुपाली गतमहासमग्रचन्द्राभं
स्फटिकधवलं लिंगकुलकम् ॥ सामासीनं सोमोद्यतविमलमौ-
ल्यर्चय परं कलौ लिंगार्चायां भवति हि विमुक्तिः परतरा
॥ ३५ ॥ सशंकरोमां प्रणनाम मस्करी मयस्करं तस्करवर्य
मार्ये ॥ सगृह्य लिंगान्निजगाम वेगाद्भूमौ सुबुद्धार्हतमिश्रजै-
नान् ॥ ३६ ॥ तद्योगभोगवरमुक्तिसुमोक्षयोगलिंगार्चनात्प्रा-
प्तजयं स्वकाश्रमम् ॥ तान्वै विजित्य तरसाक्षतशास्त्रवादैर्मि-
श्रान्स कांच्य[illegible]थ सिद्धिमाप ॥३७॥ अथ माधवकृते शंक-
रविजये ॥ एकदा देवता रूप्याचलस्थमुपतस्थिरे ॥ देवदेवं
तुषारांशुमिव पूर्वाचलस्थितम् ॥३८॥ प्रासादानुमितस्वार्थसि
द्धयः प्रणिपत्य तम् ॥ मुकुलीकृतहस्ताब्जा विनियेन व्यजिज्ञ-
पन् ॥३९॥ विज्ञातमेवभगवन् विद्यते यद्धिताय नः ॥ वंचयन्
सुगतान् बुद्धवपुर्धारी जनार्द्दनः ॥ ४० ॥ तत्प्रीणितागमालं-
बबौद्धैर्दर्शनदूषकैः ॥ व्याप्तेदानीं प्रभो धात्री रात्रिः संतमसै-
रिव ॥ ४१ ॥ वर्णाश्रमसमाचारान् द्विषंति ब्रह्मविद्विषः ॥
ब्रुवंत्याम्नायवचसां जीविकामात्रतां प्रभो ॥४२॥ न संध्या-
दीनि कर्माणि न्यासं वा न कदाचन ॥ करोति मनुजः कश्चि-

त्सर्वे पाखंडतां गताः ॥ ४३ ॥ तद्भवांल्लोकरक्षार्थमुत्साद्य-
निखिलान्खलान् ॥ वर्त्म स्थापयतु श्रौतं जगद्येन सुखं
व्रजेत् ॥ ४४ ॥ इत्युक्तोपरतान् देवानुवाच गिरिजाप्रियः ॥
मनोरथं पूरयिष्ये मानुष्यमवलंब्य वः ॥ ४५ ॥ दुष्टाचारवि-
नाशाय धर्मसंस्थापनाय च ॥ भाष्यं कुर्वन् ब्रह्मसूत्रतात्पर्या-
र्थविनिर्णयम् ॥ ४६ ॥ मोहनप्रकृतिद्वैतध्वांतमध्याह्नभा-
नुभिः ॥ चतुर्भिः सहितः शिष्यैश्चतुरैर्हरिवद्भुजैः ॥ ४७ ॥
यतींद्रः शंकरो नाम्ना भविष्यामि महीतले ॥ मद्वत्तथा भवं-
तोऽपि मानुषीं तनुमाश्रिताः ॥४८॥ तं मामनुसरिष्यंति सर्वे
त्रिदिववासिनः ॥ तदा मनोरथः पूर्णो भवतां स्यान्न संशयः ॥
॥ ४९ ॥ अवदन्नंदनं स्कंदममंदं चन्द्रशेखरः ॥ शृणु सौम्य
वचः श्रेयो जगदुद्धारगोचरम् ॥ ५० ॥ कांडत्रयात्मके वेदे
प्रोद्धृते स्याद्द्विजोद्धृतिः ॥ इदानीमिदमुद्धार्यमिति वृत्तिमतः
पुरा ॥ ५१ ॥ मम मूढाशयविदौ विष्णुशेषौ समीपगौ ॥
मध्यमं कांडमुद्धर्त्तुमनुज्ञातौ मयैव तौ ॥ ५२ ॥ अवतीर्णौ-
शतो भूमौ संकर्षणपतंजली ॥ मुनी भूत्वा मुदोपास्तियोग-
कांडकृतौ स्थितौ ॥ ५३ ॥ अग्रिमं ज्ञानकांडं तूद्धरिष्यामिति
देवताः ॥ संप्रति प्रतिजाने स्म जानात्येव भवानपि ॥५४॥
जैमिनीयनयांभोधेः शरत्पर्वशशी भव ॥ विशिष्टं कर्मकांडं-
त्वमुद्धर ब्राह्मणः कृतेः ॥ ५५ ॥ सुब्रह्मण्य इतिख्यातिं गमि-
ष्यसि ततोऽधुना ॥ ब्रह्मापि ते सहायार्थं मंडनो नाम भूसुरः
॥ ५६ ॥ भविष्यति महेंद्रोपि सुधन्वा नाम भूमिपः ॥
तथेति प्रतिजग्राह विधेरपि विधायनीम् ॥ ५७ ॥ बुधानीक-
पतिर्वाणीं सुधाधारामिव प्रभो ॥ अथेंद्रो नृपतिर्भूत्वा प्रजा-
धर्मेण पालयन् ॥ ५८ ॥ सर्वज्ञोऽप्यसतां शास्त्रे कृत्रिम-

श्रद्धयान्वितः ॥ प्रतीक्षमाणः क्रौंचारीं मेलयामास सौगतान् ॥ ५९ ॥ ततः स तारकारातिरजनिष्ट महीतले ॥ भट्टपादाभिधो यस्य नाशयामास शौगतान् ॥ ६० ॥ ततो महेशः किल केरलेषु श्रीमद्वृषाद्रौ करुणासमुद्रः ॥ पूर्णानदीपुण्यतटे स्वयंभूर्लिगात्मनानंगधगाविरासीत् ॥ ६१ ॥ तन्नोदितः कश्चन राजशेखरः स्वप्ने मुहुर्दृष्टतदीयवैभवः ॥ प्रसादमेकं परिकल्प्य सुप्रभं प्रावर्तयत्तस्य समर्हण विभो ॥ ६२ ॥ तस्येश्वरस्य प्रणतार्तिहर्तुः प्रसादतः प्राप्तनिरीतिभावः ॥ कश्चित्तदभ्यासगतोऽग्रहारः कालट्यभिख्योऽस्ति महान्मनोज्ञः ॥ ६३ ॥ कश्चिद्विपश्चिदिह निश्चलधीर्विरेजे विद्याधिराज इति विश्रुतनामधेयः ॥ रुद्रो वृषद्रिनिलयोऽवतरीतुकामः पुत्रत्वमाप पितरं यमरोचयत्सः ॥ ६४ ॥ पुत्रोभवत्तस्यपुरात्तपुण्यैः सुब्रह्मतेजाः शिवगुर्वभिख्यः ॥ ज्ञाने शिवो यो वचने गुरुस्तस्यान्वर्थनामा कृतिलब्धवर्णः ॥६५॥ तस्योपधाम किल संनिहितापगैका स्नात्वा सदाशिवमुपास्त जले स तस्याः ॥ कंदाशनः कतिचिदेव दिनानि पूर्वं पश्चात्तदास शिवपादयुगाब्जभृंगः ॥ ६६ ॥ जायापि तस्य विमला नियमोपतापैश्चिक्लेश कायमनिशं शिवमर्चयंती ॥ क्षेत्रे वृषस्य निवसंतमजंसभर्त्तुः कालोत्यगादिति तयोस्तपतोरनेकः ॥६७॥ देवः कृपापरवशो द्विजवेषधारी प्रत्यक्षतां शिवगुरुं गत आत्तनिद्रम् ॥ प्रोवाच भोः किमभिवांछसि किं तपस्ते पुत्रार्थितेति वचनं स जगाद विप्रः ॥ ६८ ॥ पुत्रोस्तु मे बहुगुणः प्रथितानुभावः सर्वज्ञतापदमितीरित आबभाषे ॥ दद्यामुदीरितपदं तनयं तपो मा पूर्णो भविष्यसि गृहं द्विज गच्छ दारैः ॥६९॥ तौ दंपती शिवपरौ नियतौ स्मरंतौ स्वप्नेक्षितं गृहगतौ बहुदक्षि

पान्नैः ॥ संतर्प्य विप्रनिकरं तदुदीरिताभिराशीर्भिरापतुरनल्पमुदं विशुद्धौ ॥ ७० ॥ लग्ने शुभे शुभयुते सुषुवे कुमारं श्री पार्वतीव सुखिनी शुभवीक्षिते च ॥ जाया सती शिवगुरोर्निजतुंगसंस्थे सूर्ये कुजे रविसुते च गुरौ च केंद्रे ॥ ७१ ॥ अन्यत्र प्रासूत तिष्यशरदामतियातवत्यामेकाशाधिकशतोन १११ चतुःसहस्र्याम् ॥३८८९ संवत्सरे विभवनाम्नि शुभे मुहूर्ते राधे सिते शिवगुरोर्गृहिणी दशम्याम् ॥ ७२ ॥ यत्पश्यतां शिशुरसौ कुरुते शमग्र्यं तेनाकृतास्य जनकः किल शंकराख्याम् ॥ यद्वा चिराय किल शंकरसंप्रसादाज्जातस्ततो व्यधितशंकरनामधेयम् ॥ ७३ ॥ इति बालमृगांकशेखरे सति बालत्वमुपागते ततः ॥ दिविषत्प्रवराः प्रजज्ञिरे भुवि षट्शास्त्रविदां सतां कुले ॥ ७४ ॥ कमलानिलयः कलानिधेर्विमलाख्यादजनिष्ट भूसुरात् ॥ भुवि पद्मपदं वदंति यं स विपद्ये न विवादिनां यशः ॥ ७५ ॥ पवनोप्यजनि प्रभाकरात्सवनोन्मीलितकीर्त्तिमंडलात् ॥ गलहस्तितभेदवाद्यसौ किल हस्तामलकाभिधामधात् ॥ ७६ ॥ पवमानदशांशतो जनिष्णुममानांचति यद्यशांबुधौ ॥ धरणी मथिता विवादिवाक्करणी येन स तोटकाह्वयः ॥ ७७ ॥ उद्भावि शिलादसूनुना मदवद्वादिकदंबनिग्रहैः ॥ समुदंचितकीर्त्तिशालिनं यमुदंकं ब्रुवते महीतले ॥ ७८ ॥ विधिरास सुरेश्वरो गिरां निधिरानंदगिरिर्व्यजायत ॥ अरुणः समभूत्सनंदनो वरुणोऽजायत चित्सुखाह्वयः ॥७९॥ अपरेऽप्यभवन् दिवौकसः स्वपरेर्ष्याः परविद्विषः प्रभो ॥ चरणं परिसेवितुं जगच्छरणं भूसुरपुंगवात्मजाः ॥ ८० ॥ चार्वाकदर्शनविधानसरोषधातृशापेन गीष्पतिरभूद्भुवि मंडनाख्यः ॥ नंदीश्वरः करुणयेश्वरचोदितः सन्नानंदगिर्यभिधया व्यजनीति

केचित् ॥ ८१ ॥ ततःश्रीशंकराचार्यो वादैर्वादिगणान् बहून् ॥ विजित्य शारदापीठमधिरुह्य व्यरोचत ॥ ८२ ॥ कचभरवद्दनं पुलोमजायाः कतिचिदहान्यपगर्भकं यथा स्यात्त ॥ गुरुशिरसि तथा सुधाशनाःस्वस्तरुकुसुमान्यथ हर्षतोऽभ्यवर्षन् ॥ ८३ ॥ अथसंन्यासदशनामानि मठाम्नाये—१ तीर्थाश्रम२वना ३ रण्य ४ गिरि ५ पर्वत ६ सागराः७। सरस्वती ८ भारती ९ च पुरि १० नामानि वै दश ॥८४॥ चतुर्दिक्षु प्रसिद्धासु प्रसिद्ध्यर्थं सुनामतः ॥ चतुरोऽथ मठान्कृत्वा शिष्यान्संस्थापयद्विभुः ॥ ८५ ॥ चकार संज्ञामाचार्यश्चतुर्णां नामभेदतः ॥ क्षेत्रं च देवतां चैव शक्तिं तीर्थं पृथक्पृथक् ॥८६॥ संप्रदायमथाम्नायभेदं च ब्रह्मचारिणाम् ॥ क्रमात् संस्थापयच्छिष्यांश्चतुर्ष्वपि मठेषु च ॥ ८७ ॥ एवं प्रकल्पयामास लोकोपकरणाय वै ॥ चतुर्णां देवताशक्तिक्षेत्रनामान्यनुक्रमात् ॥ ८८ ॥ महावाक्यानि वेदांशाः सर्वमुक्तं व्यवस्थया ॥ उक्ताः श्रीशंकराचार्यशिष्यास्तेनैव तेजसा ॥ ८९ ॥ विख्यातास्त्रिषु लोकेषु आचार्या ऋषिपूजिताः ॥ गुरुभक्तिसमायुक्ता गुरुवदनतत्पराः ॥ ९० ॥ पद्मपादः सुरेशश्च हस्तामलकत्रोटकौ ॥ शंकराचार्यवर्यस्य शिष्या भाष्यकृतः स्मृताः ॥ ९१ ॥ पश्चिमे द्वारकाख्ये तु मठे वै पद्मपादकः ॥ पूर्वे गोवर्द्धनमठे हस्तामलकसंज्ञकः ॥ ९२ ॥ उत्तरस्यां श्रीमठे तु नाम्ना त्रोटक एव च ॥ दक्षिणस्यां च शृंगेर्यां सुरेश्वर इति स्मृतः ॥ ९३ ॥ आधुनिककल्पिताम्नायचंद्रिकायां विशेषः प्रथमः ॥पश्चिमाम्नायो द्वार-

१ टि० एतद्द्वारकापीठाधिकारिणः पद्मपादाचार्यानुवर्तिनःआचार्याः पुरा यवनाद्युपद्रुताद्वारका पीठं विहाय दक्षिणदेशे शृंगेर्याः समीपे मुलबागलग्रामेमठं परिकल्पयामासुः। तच्छिष्यपरंपरागतो यतिवर्यः श्रीमत्परमहंसपरिव्राजकाचार्यःसदानंदतीर्थाख्यआचार्यः अधुनाविराजतेइतिसुप्रसिद्धतरम्।

कामठ उच्यते ॥ कीटवारः संप्रदायस्तत्र तीर्थाश्रमौ शुभौ ॥९४॥ द्वारकाख्यं हि क्षेत्रं स्याद्देवः सिद्धेश्वरः स्मृतः ॥ शक्तिस्तत्र भद्रकाली ह्याचार्यः पद्मपादकः ॥९५॥ विख्यातं गोमतीतीर्थं सामवेदश्च तद्गतम् ॥ जीवात्मपरमात्मैक्यबोधो यत्र भविष्यति ॥ ९६ ॥ विख्यातं तन्महावाक्यं वाक्यं तत्त्वमसीति च ॥ सामवेदप्रपाठी च तत्र धर्मं समाचरेत् ॥ ९७ ॥ पूर्वाम्नायो द्वितीयस्तु गोवर्धनमठःस्मृतः ॥ भोगवारः संप्रदानो वनारण्ये पदे स्मृते ॥९८॥ तस्मिन्देवो जगन्नाथः पुरुषोत्तमसंज्ञकम् ॥ क्षेत्रं च विमलादेवी हस्तामलकदेशिकः ॥९९॥ ख्यातं महोदधिस्तीर्थं ब्रह्मचारीप्रकाशकः ॥ महावाक्यंचतत्रोक्तं प्रज्ञानं ब्रह्म चोच्यते ॥१००॥ ऋगाह्वयस्तस्यवेदस्तत्र धर्मं समाचरेत्॥ तृतीयस्तूत्तराम्नायो ज्योतिर्नामा मठोभवत् ॥ १ ॥ श्रीमठश्चेति वा तस्य नामांतरमुदीरितम् ॥ आनंदवारो विज्ञेयः संप्रदायोस्य सिद्धिदः॥२॥पदानि तस्यगीतानिगिरिपर्वतसागराः ॥ बदर्याश्रमकं क्षेत्रं देवो नारायणः स्मृतः ॥ ३ ॥ पूर्णागिरी च देवी स्यादाचार्यस्त्रोटकः स्मृतः ॥ तीर्थं चालकनंदाख्य ह्यानंदो ब्रह्मचार्यभूत्॥४॥ अयमात्माब्रह्म चेति महावाक्यमुदाहृतम् ॥ अथर्ववेदवक्ता च तत्र धर्मं समाचरेत् ॥५॥ चतुर्थो दक्षिणाम्नायःशृंङ्गेर्यां वर्तते मठः॥ मलहानिकरं लिंगं विभांडक सुपूजितम्॥६॥यत्रास्ते ऋष्य शृङ्गस्य महर्षेराश्रमो महान् ॥ वराहो देवता तत्र रामक्षेत्रमुदाहृतम् ॥७॥ तीर्थं च तुंगभद्राख्य शक्तिः कामाक्षिकास्मृता ॥ चैतन्यब्रह्मचारीति आचार्यो लोकविश्रुतः ॥८॥ वार्तिकादिब्रह्मविद्याकर्त्ता यो मुनिपूजितः ॥ सुरेश्वराचार्य इति साक्षाद्ब्रह्मावतारकः ॥ ९ ॥ सरस्वती पुरी

टि०. १ शृंगेरीमठस्य शाखामठाः षट्तेषांनामानि--कुडली,करवीर, पुष्पगिरी, हंपी, नचनी, शिवगंगेति ।

चेति भारत्यारण्यतीर्थकौ ॥ गिर्याश्रममुखानि स्युः सर्वनामानि सर्वदा ॥ १० ॥ संप्रदायो भूरिवारो यजुर्वेद उदाहृतः ॥ अहं ब्रह्मास्मि तत्रैव महावाक्यं समीरितम् ॥ ॥ ११ ॥ पृथ्वीधराख्य आचार्य इति वा परिपठ्यते ॥ यजुर्वेदप्रपाठश्च तत्र धर्मं समाश्रयेत् ॥ १२ ॥ आम्नायाःकथिता ह्येते यतीनां च पृथक्पृथक् ॥ ते सर्वे चतुराचार्यनियोगेन यथाक्रमम् ॥ १३ ॥ प्रयोक्तव्याःस्वधर्मेषु शासनीयास्ततोऽन्यथा ॥ कुर्वंत एव सततमटनं धरणीतले ॥ १४ ॥ विरुद्धाचारसंप्राप्तावाचार्याणां ममाज्ञया ॥ लोकान् संशीलयंत्येव स्वधर्माप्रतिरोधतः ॥ १५ ॥ सिंधुसौवीरसौराष्ट्रमहाराष्ट्रास्तथांतराः ॥ देशाः पश्चिमदिक्स्था ये द्वारकामठभागिनः ॥ ॥ १६ ॥ अंगवंगकलिंगाश्च मागधोत्कलबर्बराः ॥ गोवर्धनमठाधीना देशाः प्राचीव्यवस्थिताः ॥ १७ ॥ कुरुकाश्मीरकांबोजपांचालादिविभागतः ॥ ज्योतिर्मठवशादेशाह्युदीचीदिगवस्थिताः ॥ १८ ॥ आंध्रद्रविडकर्णाटकेरलादिप्रभेदतः ॥ शृंगेर्यधीना देशास्ते ह्यवाचीदिगवस्थिताः ॥ १९ ॥ मर्यादैषा सुविज्ञेया चतुर्मठविधायिनी ॥ तामेतां समुपाश्रित्य आचार्याः स्थापिताः क्रमात् ॥ २० ॥ स्वस्वराष्ट्रप्रतिष्ठित्यै संचारः सुविधीयताम् ॥ मठे तु नियतं वास आचार्यस्य न युज्यते ॥ २१ ॥ वर्णाश्रमसदाचारा अस्माभिर्यैं प्रसाधिताः॥ रक्षणीयास्त एवैते स्वस्वे भागे यथाविधि ॥ २२ ॥ यतो विनष्टिर्महती धर्मस्यात्र प्रजायते ॥ मांद्यं संत्याज्यमेवात्र दाक्ष्यमेव समाश्रयेत् ॥ २३ ॥ परस्परविभागे तु प्रवेशो न कदाचन ॥ परस्परेण कर्त्तव्य आचार्येण व्यवस्थितिः ॥ ॥ २४ ॥ परिव्राडार्यमर्यादां मामकीनां यथाविधि ॥ चतुः-

पीठाधिगां सत्तां प्रयुंज्याच्च पृथक्पृथक् ॥ २५ ॥ शुचिर्जितें-
द्रियोवेदवेदांगादिविशारदः ॥ योगज्ञः सर्वतंत्राणामस्मदास्था
नमाप्नुयात् ॥ २६ ॥ उक्तलक्षणसंपन्नः स्याच्चेन्मत्पीठभाग्भ-
वेत् ॥ अन्यथारूढपीठोऽपि निग्रहार्होमनीषिणाम् ॥१२७॥ न
जातुमठमुच्छिंद्यादधिकारिण्युपस्थिते॥ विघ्नानामतिबाहुल्या-
देष धर्मः सनातनः ॥१२८॥ एकएवाभिषेच्यः स्यादंतेलक्षण-
सम्मतः ॥ तत्तत्पीठे क्रमेणैव न बहुर्युज्यते क्वचित् ॥ १२९ ॥
अस्मत्पीठे समारूढः परिव्राडुक्तलक्षणः ॥ अहमेवेति विज्ञे-
यो यस्य देव इति श्रुतेः ॥ १३० ॥ सुधन्वनः समौत्सुक्य-
निर्वृत्यै धर्महेतवे ॥ देवराजोपचारांश्च यथावदनुपालयेत् ॥
॥ १३१ ॥ केवलं धर्ममुद्दिश्य विभवो बाह्यचेतसाम् ॥ विहि-
तश्चोपकाराय पद्मपत्रनयं व्रजेत् ॥ १३२ ॥ सुधन्वा हि महा-
राजस्तदन्ये च नरेश्वराः ॥ धर्मपारंपरीमेतां पालयंतु निरं-
तरम् ॥ १३३ ॥ ब्रह्मक्षत्रकुले भूत्वा भारतीपीठवंचकः ॥
परार्थाच्च्यवते चांते पैशाचीं योनिमाप्नुयात्॥१३४॥ शारदा-
मठ आचार्य आश्रमाख्यो बहूत्तमः ॥ गोवर्धनस्य विज्ञेयो
महिमात्र विचक्षणः ॥ १३५ ॥ ज्योतिर्मठस्य नियतं पर्व-
णीषु निगद्यते ॥ शृंगबेरमठे नित्यं भारतीबहुभावनः ॥
॥ १३६ ॥ निर्णयोऽसौ सुविज्ञेयश्चतुःपीठाधिकारिणाम् ॥
तेन व्यत्यय आदेयः कदाचिदपि शीलिना ॥१३७॥ मठा-
श्चत्वार आचार्याश्चत्वारश्च नियामकाः ॥ संप्रदायाश्चचत्वार
एषा धर्मव्यवस्थितिः ॥ १३८ ॥ चातुर्वर्ण्यं यथायोग्यं वाङ्-
मनःकायकर्मभिः ॥ गुरोः पीठं समर्चेत विभागानुक्रमेण
वै ॥ १३९ ॥ धरामालंब्य राजानः प्रजाभ्यः करभागिनः ॥

---

१ टि. योगपट्ट.

कृताधिकारा आचार्या धर्मतस्तद्धदेव हि ॥१४०॥ धर्मो मूलं मनुष्याणां स चाचार्यावलंबनः ॥ तस्मादाचार्यसुमणेः शासनं सर्वतोऽधिकम् ॥४१॥ आचार्याक्षिप्तदंडास्तु कृत्वा पापानि मानवाः॥निर्मलाःस्वर्गमायांति संतः सुकृतिनो यथा ॥१४२॥ तानाचार्योपदेशो दंडश्च पालयते तस्माद्राजाचार्यावनिंद्याव-निंद्यौ इत्येवं मनुरप्याह ॥ गौतमोपि विशेषतः—विशिष्ट-शिष्टाचारोपि मूलादेव प्रसिध्यति ॥१४३॥तस्मात्सर्वप्रयत्नेन शासनं सर्वसमतम् ॥ आचार्यस्य विशेषेण ह्यौदार्यभरभागिनः ॥ १४४ ॥ धर्मपद्धतिरेषा हि जगतः स्थितिहेतवे ॥ सर्व-वर्णाश्रमाणां हि यथाशास्त्रं विधीयते ॥ १४५ ॥ कृते विश्व-गुरुर्ब्रह्मा त्रेतायामृषिसत्तमः ॥ द्वापरे व्यास एव स्यात्कला-वत्र भवाम्यहम् ॥१४६॥ माधवीये शंकरविजये—इति । मुनि-रतितुष्टो घुष्य सर्वज्ञपीठं निजमतगुरुतायै नो पुनर्मानहेतोः॥ कतिचन विनिवेश्याथर्ष्यशृंगाश्रमादौ मुनिरथ बदरीं स प्राप कैश्चित्स्वशिष्यैः ॥ १४७ ॥ इंद्रोपेंद्रप्रधानैस्त्रिदशपरिवृढैः स्तूयमानः प्रसूनैर्दिव्यैरभ्यर्च्यमानः सरसिरुहभुवा दत्तहस्ता-वलंबः ॥ आरुह्योक्षाणमग्र्यं प्रकटितसुजटाजूटचंद्रावतंसः शृण्वन्नालोकशब्दं समुदितमृषिभिर्धाम नैजं प्रतस्थे ॥१४८॥ पांडवेष्वहितारेशप्रमिते शुभवत्सरे ॥ श्रावणे सितपंचम्यां सिंहे सिद्धो गुरावयम् ॥ १४९ ॥ आनंदगिरिकृते शंकर-विजये—कर्म्मभ्रष्टान् परानंददूरान् मूढान्नराधमान् ॥ तान्दृष्ट्वा नारदः शीघ्रमाप ब्रह्मपदांतिकम् ॥ १५० ॥ भो तात नूतन-मभूज्जगदेतदर्वाक्चित्रप्रयुक्तिपरिकल्पितकर्म्मशीलम्॥ काला-दिजातनिगमार्थपरंपरा स्याद्व्यर्था तदा यदि भवन्मतम-प्रमाणम् ॥ १५१ ॥ एवं नारदवचनं निशम्य ब्रह्मापि चिरं ध्यात्वा स्वलोकात्पुत्रमित्रभक्तादियुक्तः शिवलोकं प्राविशत

अस्तौच्च तदा संतुष्टः शिव उवाच ॥ १५२ ॥ ब्रह्मन् यथा सुखं गच्छ संतुष्टोऽस्मि तवोक्तितः ॥ शंकराचार्यनाम्नाहं संभवामि महीतले ॥ १५३ ॥ यद्धितं तव विष्णोश्च तदेव स्थापयाम्यहम् ॥ मम भक्त वुभौ यस्मात्सत्यं नान्यद्विचिंतय ॥ १५४ ॥ इति संबोधितो ब्रह्मा प्रणिपत्य महेश्वरम् ॥ सगणः प्राप सत्याख्यं निजलोकमनन्यधीः ॥ १५५ ॥ ततः सर्वात्मको देवश्चिदंबरपुराश्रितः ॥ आकाशलिंगनाम्ना तु विख्यातोऽभून्महीतले ॥ १५६ ॥ तत्र विद्वन्महेन्द्रस्य कुले द्विजगणाश्रिते ॥ जातः सर्वज्ञनाम्ना तु कश्चिद् द्विजकुलेश्वरः ॥ १५७ ॥ कामाक्षीति सती चाभूत्तस्य लक्षणलक्षिता ॥ चिदंबरेश्वरं ध्यात्वा तावुभौ प्रापतुः सुतम् ॥ ॥ १५८ ॥ सा कुमारी सदा ध्यानसक्ताऽभूज्ज्ञानतत्परा ॥ विशिष्टेति च नाम्ना तु प्रसिद्धाभून्महीतले ॥ १५९ ॥ तामष्टमेब्दे विप्राय शांतायाद्भुतकर्मणे ॥ प्रददौ विश्वजिन्नाम्ने सर्व्वज्ञोऽस्याः पिता स्वयम् ॥१६०॥ सा सदा पतिमद्वैतं ध्यात्वाकाशात्मकं शिवम् ॥ तस्याराधनमत्युग्रमाचकार विवेकिनी ॥ ॥ १६१ ॥ तादृशीमपि संत्यज्य ययौ विश्वजिदद्भुतम् ॥ अरण्यं तपसे कृत्वा मनो निश्चयतां गतम् ॥ १६२ ॥ तदाप्रभृति सा नारी चिदंबरमहेश्वरम् ॥ तोषयामास पूजाभिर्ध्या नैरात्मगतैः सदा ॥ १६३ ॥ स देवः सर्वपूर्णोपि तस्या वदनपंकजम् ॥ प्रविश्य विस्मितान् कुर्वञ्जनानन्यान्समागतान् ॥ १६४ ॥ महोग्रतेजसा जुष्टा विशिष्टाभूद्यथांबिका ॥ सर्वैः संपूजिता नित्यं पितादिभिरुपाश्रिता ॥ १६५ ॥ अतीते मासगर्भस्य वृद्धिरासीद्दिनेदिने ॥ चिदंबरेश्वरं कृत्वा यजमानं द्विजोत्तमाः ॥ १६६ ॥ तृतीयादिषु मासेषु चक्रुः कर्माणि वेदतः ॥ प्राप्ते तु दशमे मासि विशिष्टो गर्भगोलतः ॥

॥ १६७ ॥ प्रादुरासीन्महादेवः शंकराचार्यनामतः ॥ आसी-
त्तदा पुष्पवृष्टिर्देवसंघैः प्रचोदिता ॥ १६८ ॥ ततः श्रीशंकरा-
चार्यः शैवमतादिभूतवेतालमतांताष्टचत्वारिंशन्मतनिराकरणं
कृत्वा षण्मतस्थापनं कृतवान् ॥१६९॥ अचक्रांकमलिंगा-
कमजटास्थिमनामिषम् ॥ अनासवमनारक्तं षडस्माभिरनुष्ठि-
तम् ॥ १७० ॥ ततः परं सर्वज्ञः श्रीशंकराचार्यः स्वशिष्यांस्तत्र
तत्रविषयेषु प्रेषयित्वा स्वयं स्वेच्छया स्वलोकं गंतुमिच्छुः
कांचीनगरे मुक्तिस्थले स्थूलशरीरं सूक्ष्मेंतर्धाय सद्रूपो भूत्वा
सूक्ष्मं कारणे विलीनं कृत्वा सर्वव्यापकचैतन्यरूपेणाद्यापि
तिष्ठति ॥ १७१ ॥ तत्रत्या ब्राह्मणाः सर्वे शिष्यप्रशिष्याश्च
उपनिषद्गीताब्रह्मसूत्राणि पठतः अत्यंतशुचिस्थले गर्तं
कृत्वा तत्र गंधाक्षतबिल्वतुलसीप्रसूनादिभिः संपूज्य
तच्छरीरसमाधिं चक्रुः ॥ १७२ ॥ ततः प्रत्यहं क्षीरतर्पण-
क्षीरान्ननिवेदनादिभिः सर्वोपचारैर्विधिवदभ्यर्च्य ततो महा-
पूजादिने श्रीमच्छंकरगुरुमुद्दिश्य बहुयतीनां ब्राह्मणानां पर-
ब्रह्मणो धिया स्वाद्वन्नवस्त्राभरणैः पूजां चक्रुः ॥ १७३ ॥ एवं
हि शंकराचार्यगुरुर्मुक्तिप्रदः सताम् ॥ सर्वव्यापकचैतन्यरूपे-
णाद्यापितिष्ठति ॥१७४॥ अथ श्रीशंकराचार्यपरंपरावर्णनम् ॥
नारायणं १ पद्मभवं २ वसिष्ठं ३ शक्तिं ४ च तत्पुत्रपराशरं
च ५ व्यासं ६ शुकं गौडपदं ७ महांतं गोविंदयोगींद्रमथास्य
शिष्यम् ॥ १७५ ॥ श्रीशंकराचार्यमथास्य पद्मपादं च हस्ता-
मलकं च शिष्यम् ॥ तं त्रोटकं वार्तिककारमन्यानस्मद्गुरून्सं
ततमानतोस्मि ॥ १७६ ॥

इति श्रीब्राह्मणोत्पत्तिमार्तण्डाध्याये श्रीशंकराचार्यप्रादुर्भावकथनं नाम
प्रकरणं संपूर्णम् ॥ ६० ॥ आदितः पद्यसंख्याः ॥ ४९४१ ॥

अथ ग्रंथालंकारः ॥ श्रीमद्वाजसनेयगौतमकुलोत्पन्नोतिविद्यावतां मान्यो गुर्जरपंडितोपपदकौदीच्यः सहस्राह्वकः॥ ज्योतिःशास्त्रविशारदोऽतिमतिमाञ्छ्रीवेंकटाख्यो द्विजस्तज्जोहं हरिकृष्णसंज्ञक इमं चक्रे विदां प्रीतये ॥ ४९४२ ॥ दक्षिणे सुमहाराष्ट्रदेशेऽस्ति नगरं बृहत् ॥ औरंगाबादनाम्ना वै ख्यातं तत्र जनिर्मम ॥४९४३॥ ज्योतिषार्णवमध्यस्थें षष्ठे वै मिश्रसंज्ञके ॥ अध्यायशतसंयुक्ते स्कंधे च परमाद्भुते ॥ ४९४४ ॥ तत्र वै षोडशेऽध्याये ब्राह्मणोत्पत्तिनिर्णयः ॥ संपूर्णतामगाच्छाके शालिवाहनसंज्ञके ॥ ४९४५ ॥ त्रिनंदमुनिचंद्रे १९७३ च कार्त्तिकस्यादिवासरे ॥ अत्रावशिष्टो यो भागः सतु शेषे भविष्यति ॥ ४९४६ ॥ गणिता पद्यसंख्यात्र मुनिवेदांकवेदकाः । मूलमात्रा बुधैर्ज्ञेया ह्यध्याये षोडशे किल ॥ ४९४७ ॥

इति श्रीज्योतिर्वित्कुलावतंसवेंकटरामात्मजहरिकृष्णविनिर्मिते बृहज्ज्योतिषार्णवे षष्ठे मिश्रस्कंधे ब्राह्मणोत्पत्तिवर्णनं नाम षोडशोऽध्यायः ॥ १६ ॥

पुस्तकें मिलने के स्थान :–

१. खेमराज श्रीकृष्णदास, श्रीवेंकटेश्वर स्टीम् प्रेस, खेमराज श्रीकृष्णदास मार्ग, सातवीं खेतवाड़ी खम्बाटा लेन बम्बई–४०० ००४	२. गंगाविष्णु श्रीकृष्णदास, लक्ष्मीवेंकटेश्वर स्टीम् प्रेस, व बुक डिपो, अहिल्या बाई चौक, कल्याण, (जि० ठाणे–महाराष्ट्र)

३. खेमराज श्रीकृष्णदास, चौक–वाराणसी (उ. प्र.)

खेमराज श्रीकृष्णदास, बम्बई-४